CC-0. In Public Domain. Digitization by eGangotri
सा. १६६४

श्रीमहेन्द्रसंस्कृतविश्वविद्यालयस्य दशमं प्रकाशनम्

R
5
८६
R.

नेपालस्य प्रथममहाकविना मणिमहोपाध्यायेन श्रीवंशमणिशर्म्मणा प्रणीतम्

हरिकेलिमहाकाव्यम्

सम्पादक :
डा. वेणीमाधवढकाल:

प्रकाशक:
महेन्द्रसंस्कृतविश्वविद्यालय:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१६८४

R

श्रीमहेन्द्रसंस्कृतविश्वविद्यालयस्य दशमं प्रकाशनम्

नेपालस्य प्रथममहाकविना मणिमहोपाध्यायेन श्रीवंशमणिशर्म्मणा प्रणीतम्

-हरिकेलिमहाकाव्यम्-

(विस्तृतभूमिकासहितम्)

सम्पादकः
डा. वेणीमाधवढकालः
सहप्राध्यापकः
वाल्मीकिविद्यापीठम्,
काष्ठमण्डपः, नेपालः ।

प्रकाशकः
श्रीमहेन्द्रसंस्कृतविश्वविद्यालयः
वेलझुण्डी, दाङ्गः, नेपालः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशक : -
श्रीमहेन्द्रसंस्कृतविश्वविद्यालयः
बेलझुण्डी, दाङ्गः, नेपालः ।

प्रथमं संस्करणम् - १००० प्रतिरूपाणि

प्रकाशनसमयः -

२०५१ तमे वैक्रमाब्दे, फाल्गुनमासे, १५ तमे दिवसे । १९१६ तमे शकाब्दे, महाशिवरात्रौ, सोमवासरे । १९९५ तमे खैस्ताब्दे, फरवरीमासे, २७ तमायां तारिकायाम् ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

R.
Acc. 22923 / 22153

मूल्यम् - रु. २००/-

मुद्रक
देउराली अफसेट प्रेस प्रा. लि.
पुतलीसडक, काठमाण्डौं
फोन नं २१६२४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीः

जयतु जयतु कृष्णः सच्चिदानन्दमूर्तिः
जयतु जयतु कृष्णः सत्स्वरूपश्चिदात्मा ।
जयतु जयतु कृष्णः केवलानन्दमूर्तिः
जयतु जयतु कृष्णः स्वामिनीस्नेहसिक्तः ॥

-पुराणसंहितायाम् (२४।९५) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकीयम्

अथ तत्र भवता मणिमहोपाध्यायेन वंशमणिशर्म्मणा प्रणीतं "हरिकेलिमहाकाव्यम्" चिराय नेपालस्थ-राष्ट्रियाभिलेखालये हस्तलिखिततया सुरक्षितं महेन्द्रसंस्कृतविश्वविद्यालयस्य सहप्राध्यापकोऽलङ्कारशास्त्रप्रवीणोऽध्ययनाध्यापन - गद्यपद्यलेखन - व्याख्यान - प्रवचननिपुणः डा.वेणीमाधवढकालमहोदयो महेन्द्रसंस्कृतविश्वविद्यालयस्य अनुसन्धानपरिषदोऽनुमतिमङ्गीकृत्य प्रतिभापूर्णकौशलपुरस्सरेण महनीयेन महता परिश्रमेण सविस्तृतभूमिकाप्रबन्धप्रस्तुतिं समपीपदत् । सेयं काव्यकृतिर्महेन्द्रसंस्कृतविश्वविद्यालयस्य दशमप्रकाशनतयाऽनेन रूपेण प्रकाशिता रसिकानां हृदयान्याह्लादयितुं काव्यपिपासाञ्च शमयितुमुपस्थिता वर्ततेऽधुना । अत्र सर्वोऽपि भूमिकाप्रबन्धो विशेषज्ञैः सूक्ष्मेक्षिकया परीक्षितः काव्यग्रन्थादौ समावेशितोऽस्ति, यतः काव्यकृतेरैतिहासिकपृष्ठभूमि-परिवेश-स्वरूप -संरचना -परम्परागतप्रभाव - कलापक्ष - भावपक्षादिसंवलितः सर्वाङ्गपूर्णपरिच्चयः समधिगतो भविष्यति पाठकानां कृते ।

महाकाव्यस्यैतस्य प्रणेता मणिमहोपाध्यायो वंशमणिशर्मा नेपालाभिजनः प्रथमो महाकविः, नैपालककविविरचितेषु महाकाव्येषु प्रथमं महाकाव्यमिदमेव । कविरसौ भक्तपुराधिपतेर्जगज्ज्योतिर्मल्लस्य समकालभवो भक्तपुरवास्तव्यो मैथिलो ब्राह्मणः । एतस्य कृतयश्चतस्र आसन् । इत्थं महाकवेर्देशकालग्रन्थकर्तृत्वादिपरिचयसन्दर्भे डा.ढकालमहोदयेन यादृशी प्रमाणपूर्विका युक्तिः समुपस्थापिता, सैव तावत्कालं तथ्यतया स्वीकार्या, यावत्कालं गवेषणाधिषणाः प्रामाणिका अपरे विद्वांसः प्रामाणिकसामग्रीभिर्मतमिदं नान्यथयेयुः । न हि केनापि गवेषणामार्गोऽवरुध्यते । अथ च हरिकेलिमहाकाव्यानुशीलनेनावगम्यते कविरसौ वेदशास्त्रस्य, ज्यौतिषस्य, व्याकरणस्य, न्याय-वेदान्त-मीमांसा-सांख्य-योग-चार्वाकादिदर्शनानां धर्मशास्त्रेतिहासपुराणायुर्वेद-संगीतशास्त्र-कामशास्त्र-शस्त्रविद्यादीनां ज्ञाता सनातनधर्मावलम्बी राजपूज्यः प्रख्यातो विद्वानासीदिति सविस्तरं भूमिकायां निरूपितमिति तत एवावगन्तव्यम् ।

सप्तदशसु सर्गेषु विभक्तं काव्यमिदं पौराणिकीं कथामाश्रित्य प्रणीतम, यत्र भगवतः श्रीकृष्णस्य जन्मत आरभ्य कंसवधपर्यन्ता लीलाकथा वर्तन्ते । तद्यथा-प्रथमे लीलावतारस्य हरेर्जन्म, द्वितीये पूतनातृणावर्तशकटासुरवधपूर्वकं यमलार्जुनभञ्जनं वृन्दावनप्रस्थानञ्च, तृतीये वृन्दावनविहारः, अन्धब्राह्मणाय नेत्रशक्तिप्रदानञ्च, चतुर्थे श्रीकृष्णकृतो वृषबकाघासुराणां वधः, बलरामकृतो धेनुकासुरवधश्च, पञ्चमे कालियदमनम्, षष्ठे गिरिधारणम्, सप्तमे इन्द्रकृता श्रीकृष्णस्तुतिः, राधाप्रमुखानां गोपकुमारीणां श्रीकृष्णं प्रति समर्पितत्वम्, शरदः प्रादुर्भावः, अरिष्टासुरवधश्च, अष्टमे नानाविधकामकेलिभिः श्रीकृष्णस्य राधया सह विहारः, नवमे शिशिरसमये गोपकुमारीणां व्रतपराणां वसनापहरणं तत्प्रत्यर्पणञ्च, दशमे रासलीला, एकादशे वसन्तशोभावर्णनम्, द्वादशे यमुनातटे गोपकुमारीभिः सह हरेर्विहारः, त्रयोदशे यामुनपुरनिर्माणम्, चतुर्दशे यामुनपुरविहारः, पञ्चदशे मथुराप्रस्थानम्, षोडशे धनुर्भङ्गः, सप्तदशे कंसवधः । संपादकमहोदयेन प्रकृतकाव्यस्यैतिहासिकपृष्ठभूमिवर्णनप्रसङ्गे वेदोपनिषद्वर्णिता, मत्स्य-मार्कण्डेय-देवीभागवत - भविष्य - ब्रह्म - ब्रह्माण्ड - ब्रह्मवैवर्त - वायु - वाराह - वामन - विष्णु - नारद - अग्नि - पद्म - लिङ्ग - गरुड - कूर्म - स्कन्द - भागवत - शिवपुराण - हरिवंश - महाभारत - गर्गसंहितादिग्रन्थचर्चिता कृष्णकथा प्रस्तुता । वस्तुतः प्रकृतकाव्यस्य मूलाधारभूता कथा श्रीमद्भागवतीयकथैव वर्तते, काव्यकलाकौशलेन परिवर्तनं नैसर्गिकमेव । संस्कृतसाहित्यगतकृष्णकाव्यपरम्परया सह नेपालीय-कविप्रणीत-कृष्णचरित – संबन्धि-काव्यचर्चा प्रस्तुता भूमिकायां सविस्तरम् । प्रकृतकाव्यं साहित्यशास्त्रीयमहाकाव्यलक्षणं याथार्थ्येनावलम्ब्य संनिबद्धं वर्तते । जगदात्मतत्त्वं परमेश्वरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिर्नायकः, वृषभानुसुता राधा नायिका, श्रृङ्गारोऽङ्गी रसः, वीरशान्ताद्भुतभयानकरौद्रा अङ्गभूता रसाः, सन्ध्या-चन्द्रोदय-सूर्योदय-ध्वान्त-वन-पर्वत-नद्यादीनां यथास्थानं वर्णनम् । संभोगश्रृङ्गाररस्योत्कर्षतया हरिकेलिमहाकाव्यम् इति नाम्नः सार्थकता दरीदृश्यते । काव्यशास्त्रिभिर्निर्दिष्टानां धर्मार्थकाममोक्षाख्यानां चतुर्णां पुरुषार्थानां निरूपणञ्चात्र वर्तते । इदञ्चावधेयम्-भगवतो लीलावतारस्य चरितवर्णनप्रसङ्गे गृहीताः सर्वेऽपि पूतनावधादिलीलाः कथावस्तुनो विकासक्रमे समावेशिता घटनाः काव्यसंरचनाश्रेणय एव, वस्तुतः काव्यरसस्यात्मतत्वं श्रृङ्गाररस एव, परब्रह्मणो मायाभूताभीराधिकाप्रभृतिगोपकुमारिभिः सह विहारः, प्रकृतिपुरुषसंसर्गः । अत एव नेदं काव्यं बृहत्त्रयीमनुसरति । सुकृतिदत्तपन्तस्य कार्तवीर्योदय-महाकाव्यशैलीं सर्वथा विसंवदत् काव्यमिदं कोमलकान्तपदावलीपूर्णप्रसादगुणेन, सरसमधुरया भाषाशैल्या, श्रृङ्गाररसपरिपाकतया च कालिदासीय-शैलीमनुगच्छतीति दृढं वक्तुं शक्यते । अथ चैतत्काव्यगतानां छन्दोऽलङ्कार-रस-गुण-दोष-ध्वनि-रीत्यादीनां सविस्तरं विवेचनं सम्पादकमहोदयेन प्रस्तुतमिति जिज्ञासुभिर्भूमिकाऽवलोक्या ।

संपादकमहोदयो ग्रन्थसम्पादनसन्दर्भे चतस्रः प्रतिलिपीः समचकलत्, ताश्च क-ख-ग-घनामभिर्निर्दिश्य यथासंभवं शुद्ध-समुचितपाठं मूलभागे स्थापयितुं प्रायतत, टिप्पण्यां पाठभेदांश्च प्रास्तौषीत् ।

डा.वेणीमाधवढकालमहोदयेन स्वकीये भूमिकाप्रबन्धे समीक्षणात्मक-भाषाशैल्याः समाश्रयणीयत्वेऽपि आलङ्कारिकी भाषाशैली समवलम्बिता । अनेन विद्यावारिधिशोधप्रबन्धेऽपि आलङ्कारिकी भाषाशैली समाश्रितेति विद्वांसो वदन्ति । यस्य कस्यापि विदुषोऽभिव्यक्तिप्रकारः स्वीयवैशिष्ट्यवान् भवतीति तद्विषये न किमपि वक्तव्यम् । सम्पादकमहोदयेन एकस्य काव्यप्रबन्धस्य भूमिका-निर्माणे यावन्तो ग्रन्थाः समधीताः, यावद्भिः प्राचीनैरार्षग्रन्थैरर्वाचीनकाव्यग्रन्थैश्च स्वकीयं मस्तिष्कं परिपोष्य, प्राज्ञिकचेतनां समुन्मील्य, बुद्धिवैशारद्यं समुद्बोध्य, प्रबन्धरचना विहिता, यादृशः स्तुत्यतमः प्रयासः कृतः, तत्सर्वमाश्चर्यपूर्णं वर्तते, सर्वथाऽयं भूमिकाप्रबन्धो विद्यावारिधिशोधप्रबन्धायितो वर्तते ।

नैपालकप्रथममहाकविना प्रणीतस्यैतस्य महाकाव्यस्य केचनानुरूपाः सर्गाः संस्कृतविश्वविद्यालयीयपाठ्यक्रमे विषयसमित्या समावेशनीया इति मन्ये ।

अन्ते च तत्रभवन्तं महाकविं मणिमहोपाध्यायं वंशमणिं, राष्ट्रियाभिलेखालये एतत्पुस्तकप्रतिलिपेर्निक्षेपकमज्ञातपरिचयं (नरनाथशर्माणम्) सादरं संस्मृत्य, विपश्चिते संपादकाय प्रकृतहरिकेलिमहाकाव्यमुद्रणनिमित्तटङ्किताक्षरशुद्धीकरणसहयोगिने च डा.वेणीमाधवढकालमहोदयाय, "ढेरालीप्रेस"-नामकमुद्रणालयप्रबन्धकारिणेऽन्येभ्यश्च प्रकाशनसहयोगिभ्यः शतशः साधुवादानुपहृत्य विरमामीति शम् ।

२०५१ महाशिवरात्रिः,

डा. टीकारामपन्थी
शिक्षाध्यक्षः
महेन्द्र-संस्कृत-विश्वविद्यालयस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किमपि निवेदनम्

श्रीवाग्वादिन्या भगवत्याः परमया करुणया समारब्धस्य महेन्द्रसंस्कृतविश्वविद्यालयीयानुसन्धानकार्यक्रमान्तर्गतस्य हरिकेलिमहाकाव्यसम्पादनरूपस्य महनीयस्यानुष्ठानस्य पूर्णताहेतुभूताऽपि सैव भालचन्द्रचमत्कृतचारुवदना त्रिनयनवामनयना काचन सच्चिदानन्दघना नूनम् ।

२०४५तमे वैक्रमाब्दे काष्ठमण्डपस्थराष्ट्रियाभिलेखालयस्य हस्तलिखितग्रन्थागारेऽनुसन्धानकर्मणि व्यापृतेन मया भक्तपुराधिपतेर्जगज्ज्योतिर्मल्लस्याश्रितेन, पं. रामचन्द्रशर्म्मणः सूनुना, जनकपुरजनपदाभिजनेन, मणिमहोपाध्यायेन, महाकविना श्रीवंशमणिना प्रणीतस्य हरिकेलिमहाकाव्यस्यैकतमा पाण्डुलिपिर्नयनगोचरीकृता । तदधीत्युत्तरकालमेव तदीयपदमाधुर्यार्थगाम्भीर्यालङ्कारचमत्काररसभावपरिपोषैः परां निर्वृतिमनुभवता मया महेन्द्रसंस्कृतविश्वविद्यालयस्य तदानीन्तनाः शिक्षाध्यक्षाः प्रा. श्रीविद्यानाथमहाभागास्तद्विषये विज्ञापिताः । राष्ट्रगौरवविद्योतकं संस्कृतवाङ्मयालङ्काररूपञ्चैतन्महाकाव्यं नूनं प्रकाशनीयमिति परामृशतां तेषां प्रेरणयैव मया विधिवत् कार्यमिदं प्रारब्धम् ।

महता श्रमेण निष्पादितमेतत् कार्यं कीदृशं निर्वृतमिति शास्त्रकाव्यविचक्षणा एव प्रमाणम् । निष्पक्षया धिया निभालिते, केवलमेकसंवत्सरावधिकं संज्ञामात्रं सौविध्यं नानेन कार्येण तुलनीयतां गच्छति नूनम् । तथापि मया राष्ट्रगौरवभावनया सरस्वतीचरणपङ्कजमकरन्दपानसमीहया च साभिनिवेशं ससंरम्भञ्चेदं कार्यं कृतमिति विदुषां पुरतो निवेदयितुमीहे । यद्यपि भावप्रभावदूषिते मन्दप्रज्ञे कलिप्रधाने च कलिकालेऽस्मिन् कठिनेन तपसा महताऽध्यवसायेन च निष्पादितानामेतादृशानां कार्यविशेषाणां गुणग्राहिणो यथार्थमूल्याङ्कनकृतश्च सन्ति कियन्तः सन्त इति मनसि भावतरङ्गः समुदेति, तथापि निजैर्बालवचनैः पदे पदे परब्रह्मरूपस्य कृष्णचन्द्रस्य कीर्तनेन, तत्प्राणाधिकप्रेयस्याः श्रीराधिकायाः पावननामसमुदीरणेन, भगवत्या वाचामधीश्वर्याश्च परमया सपर्यया चार्जितं परनिर्वृतिरूपं महान्तं लाभं प्रयत्नशतवानपि को नु नाम व्याहन्तुमीशः ।

सारस्वतेऽनुष्ठानेऽस्मिन् मया भूमिकाखण्डो मूलपाठखण्डश्चेति खण्डद्वयं कल्पितम् । तत्र प्रथमखण्डे निहितेषु नवप्रकरणेषु प्रतिप्रकरणं, द्वितीयखण्डे निहितेषु सप्तदशसर्गेषु च प्रतिसर्गं भिन्न-भिन्न एव पादटिप्पणीक्रमः प्रवर्तितः ।

पाण्डुलिपिस्वरूपगतसामान्यविशेषभावं मनसिकृत्य मया राष्ट्रियाभिलेखालयस्य ए. ३९८।२५ चित्रपाण्डुलिपि (रील)-सङ्ख्याङ्किता-पाण्डुलिपिः "क" संज्ञया, ए. ३९७।२३ चि.पा.-सङ्ख्याङ्किता पाण्डुलिपिः "ख" संज्ञया, बी. ३११।२० चि.पा.-सङ्ख्याङ्किता पाण्डुलिपिः "ग" संज्ञया, ए. १०५८।१० चि.पा.-सङ्ख्याङ्किता पाण्डुलिपिश्च "घ" संज्ञया व्यवहृता । पाण्डुलिपिस्वरूपसम्बद्धं विवरणं भूमिकाखण्डस्य द्वितीयप्रकरणे निहितमिति नेहाधिकमुच्यते तद्विषये । हरिकेलिमहाकाव्यस्य सप्तदशसर्गात्मकस्य मूलपाठस्य टिप्पणीप्रदानविधौ विशेषस्थलेषु यत्र केवलं "टि" इति संक्षिप्योक्तं तत्र निहिता विचाराः सम्पादकीया एवावगन्तव्याः । "पु.टि." इति सङ्केतेन निर्दिष्टं वस्तु "क" पाण्डुलिपेरेवेति विज्ञेयम् । अन्यपाण्डुलिपीनामुद्धरणानि "ख.पु.टि.", "ग.पु.टि." प्रभृतिभिः सङ्केतैः सूचितानि सन्ति । "क" पाण्डुलिपेः सर्वाङ्गपूर्णत्वात्तस्या एव सर्वाधिक उपयोगो मया व्यधायि ।

भूमिकाभागस्य तृतीयप्रकरणे कृष्णकथास्रोतसां चर्चावसरे मया -

"अष्टादश पुराणानि कृत्वा सत्यवतीसुतः ।
भारताख्यानमतुलं चक्रे तदुपबृंहितम् ॥" (मत्स्यपुराणे, ५३।७०)

इति प्रमाणवचनमङ्गीकृत्य पुराणनिकरनिरूपतकथातत्वनिरूपणान्त एव महाभातीयं कृष्णाश्रितं वस्तु निरूपितम् । अष्टादशमहापुराणेषु श्रीमद्देवीभागवतमहापुराणं निर्दिश्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमद्भागवतस्याष्टादशमहापुराणविशिष्टां महामहापुराणतां समर्थयतां श्रीनीलकण्ठदीक्षितमहाभागानां मतं समादृतम् ।

अस्य महाकाव्यस्य प्रकाशनकर्मणि दायित्वबोधपुरःसरं सौजन्येन प्रवृत्ता महेन्द्रसंस्कृतविश्वविद्यालयस्य वर्तमानाः उपकुलपतयः प्रा. श्रीचूडानाथभट्टरायमहोदयाः, शिक्षाध्यक्षाः डा.श्रीटीकारामपन्थिमहोदयाः, कुलसचिवाः सहप्रा. श्रीदत्तात्रेयदाहालमहोदयाश्च कृतज्ञतावचनैरभिनन्द्यन्ते सप्रश्रयम् । अस्य महाकाव्यस्य प्रकाशनार्थं पूर्वाधारनिर्मितौ कृतयोगदानानां पूर्वोपकुलपतीनां प्रा. श्रीश्रीकृष्णाचार्यमहोदयानां पूर्वकुलसचिवानां सहप्रा. श्रीमाधवराजगौतममहोदयानां च सविधे ज्ञापयामि निजां कृतज्ञतां गुणग्राहितया । महेन्द्रसंस्कृतविश्वविद्यालयस्य पूर्वशिक्षाध्यक्षैः प्रा. श्रीविद्यानाथोपाध्यायमहाभागैरस्मिन् कर्मणि सविश्वासमहं नियोजित इति तान् प्रति विस्फुरति मदीयः कृतज्ञताभावः ससमादरम् । प्रा. श्रीखेमराजकेशवशरणमहानुभावानां स्वल्पाऽपि सम्मतिरस्यानुष्ठानस्य मार्गनिर्देशिका संवृत्तेति हेतोस्तेभ्य कृतज्ञतां निजां निवेदयामि सश्रद्धम् । ग्रन्थसम्पादनकर्मणि निजाममूल्यां सम्मतिं प्रदायोपकुर्वतां सम्मान्यानां राजसभासदस्यपदमलंकुर्वतां मम सतीर्थ्यानां विद्वद्धौरेयाणां डा. स्वामिप्रपन्नाचार्यमहाभागानां सविधे निजां कृतज्ञतामावेदयामि सश्रद्धम् । नेवारीलिपिनिबद्धस्य स्थले स्थलेऽस्पष्टस्य बहुशो लेखकदौर्बल्याद् भ्रष्टस्य च मूलपाठस्य शब्दानुशासनमवलम्ब्य परिष्कृतिविधौ सहयोगितामुपेतेभ्यो वैयाकरणेभ्यः पं. श्रीशुकदेवपौडेलमहाभागेभ्यः कृतज्ञतासुमानि समर्पयामि ससम्मानम् । ससौजन्यं ससौमनस्यञ्च वंशमणिसबद्धां सामग्रीमुपकल्पयन्तो जनकपुरधाम्नि वर्तमानस्य पाण्डुलिपिरसिकमन्दिरस्याधिष्ठातारः श्रीरोहिणीप्रसादमहोदयाः संस्मर्यन्ते कृतज्ञतावचनव्याहारविधौ । नारदीयमहापुराणं प्रदाय ममाध्ययने सौविध्यमुपकल्पयतः सहप्रा. श्रीविष्णुप्रसादज्ञवालीमहाभागान् नाहं विस्मर्तुं समर्थः कृतज्ञतावेदनविधौ । वंशमर्गिसम्बद्धां सामग्रीं स्वयमादाय ममाध्ययने सहयोगितामापन्नेभ्य उपप्रा. श्रीरमेशझामहोदयेभ्यः कृतज्ञतावचनकुसुममुपाहरामि सधन्यवादम् । सौजन्यसुन्दरः सानुसन्धानप्रमुखो राष्ट्रियाभिलेखालयपरिवारः कृज्ञतावचनकुसुमैरभिनन्द्यते नितराम् । सपुस्तकालयाध्यक्षो वाल्मीकिविद्यापीठपुस्तकालयपरिवारोऽविस्मरणीयो नितान्तं कृतज्ञताज्ञापनकर्मणि । म.सं.वि. वसन्तपुरकार्यालयस्याधिकृतान् सहायकांश्च प्रति कृतज्ञतामावेदयामि ससाधुवादम् । संस्कृतानुरागेण विश्वविद्यालयीयकार्यगौरवेण च सोत्साहं सत्वरञ्च चारु टङ्कणं कृतवते श्रीप्रेमचित्रकारमहोदयायानल्पं कृतज्ञताभावमावेदयामि सधन्यवादम् । येषां सुकृतिनां शोधग्रन्थाः सामान्यग्रन्था निबन्धाश्च मयाऽधीताः प्रमाणत्वेन पुरस्कृताश्च तेभ्यः सर्वेभ्यो निजां कृतज्ञतामावेदयामि सप्रश्रयम् । कर्तव्यनिष्ठाकेन्द्रितैरतन्द्रितैः सत्प्रयासैर्मुद्रणसंबद्धैर्नेपालीयस्य प्रथममहाकाव्यस्यास्य सर्वप्रथमं लोकलोचनलेह्यतापादने निदानभूतानां धौरालीगफ्सेटमुद्रणालयस्य सञ्चालकानां श्रीप्रेमबहादुरघर्तीमगरमहोदयानां, सुश्रीराधाचन्द-श्रीसुरजभट्टराइ-श्री सुदीपखड्काप्रभृतीनां मुद्रणसहयोगिनां च सविधे धन्यवादं ज्ञापयमि सतोषमोदम् ।

अन्त्ये च प्रत्यक्षाप्रत्यक्षतया कार्येऽस्मिन् सहयोगितामुपेतेभ्यो मान्यजनेभ्यो मित्रजनेभ्यो बन्धुजनेभ्यश्च कृतज्ञतावचनकुसुमान्युपाहरन्नेष जनोऽज्ञानभ्रमप्रमादजन्यानामपराधानां क्षमापनाय सन्ततं कारुण्यामृतलाभाय च वाग्वादिनीपादपङ्कजयोर्हृदयपुष्पमेव समर्पयति तदीयदिव्यरूपविभावनपुरःसरम् ।

काष्ठमण्डपे,
महाशिवरात्रौ,
सोमवासरे ।
दिनाङ्कः २०५१।११।१५

विदुषां वशंवदः -

डा. वेणीमाधवढकालः
सहप्राध्यापकः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयानुक्रमणिका -

१. भूमिकाखण्डे-

(क) सङ्केतसूची ङ

१. हरिकेलिमहाकाव्यस्य रचयिता वंशमणिशर्मा १

१.१ समय: १
१.२ जीवनम् ३
१.३ सन्ततिपरम्परा ४
१.४ धर्म: ४
१.५ स्वभाव: ५
१.६ वैदुष्यम् ६
१.७ महाकवित्वम् ६
१.८ कृतय: ७

१.८.१ हरिकेलिमहाकाव्यम् ७
१.८.२ चतुरङ्गतरङ्गिणी ७
१.८.३ सङ्गीतभास्कर: ७
१.८.४ गीतदिगम्बरनाटकम् ८
१.८.५ निष्कर्ष: ९

२. हरिकेलिमहाकाव्यस्य पाण्डुलिपीनां स्वरूपपरिचय: १०

२.१ "क" पाण्डुलिपि: १०
२.२ "ख" पाण्डुलिपि: १३
२.३ "ग" पाण्डुलिपि: १६
२.४ "घ" पाण्डुलिपि: २०
२.५ निष्कर्ष: २२

३. हरिकेलिमहाकाव्यस्य विषयवस्तुपरिशीलनम् २३

३.१ सर्गसार: २३
३.२ कृष्णकथाया महनीयं धरातलम् ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३.२.१ वेदेषु कृष्ण: ३३
३.२.२ उपनिषत्सु कृष्ण: ३३
३.२.३ पुराणेषु कृष्ण: ३५
३.२.४ महाभारते कृष्ण ४९
३.२.५ गर्गसंहितायां कृष्ण: ४९
३.२.६ अन्येष्वार्षग्रन्थेषु कृष्ण: ५२

३.३ हरिकेलिमहाकाव्यस्याधिकारिकं वृत्तं मुख्या आधारग्रन्थाश्च ५२
३.४ प्रासङ्गिकवृत्तनिर्वाहे कथावस्तुप्रस्तावे च हरिकेलिमहाकाव्यस्य कश्चन विशेष: ५३
३.४.१ प्रासङ्गिकवृत्तनिर्वाह: ५३
३.४.२ कथावस्तुप्रस्ताव: ५४

४. संस्कृतसाहित्ये कृष्णकाव्यपरम्परा ५५

४.१ भारतीयमवदानम् ५५
४.१.१. निष्कर्ष: ५९
४.२ नैपालमवदानम् ५९
४.२.१ निष्कर्ष: ६१
४.३ कृष्णचरितप्रधानेषु काव्येषु हरिकेलिमहाकाव्यस्य स्थानम् ६१

५. महाकाव्यपरमपरायां हरिकेलिमहाकाव्यम् ६२

५.१ महाकाव्यपरम्परा ६२
५.२ महाकाव्यत्वसमीक्षा ६२
५.३ नामौचित्यसमीक्षा ६३
५.४ हरिकेलिमहाकाव्यरचनाया: प्रेरकतत्वानि ६४
५.५ अङ्गिरसविमर्शनम् ६५
५.६ मुख्य: पुरुषार्थ: ६६
५.७ हरिकेलिमहाकाव्यस्य नेपालस्य सर्वप्रथममहाकाव्यत्वम् ६६
५.८. नेपालस्य संस्कृतमहाकाव्यानि तेषु हरिकेलिमहाकाव्यस्य स्थानञ्च ६७
५.८.१ नेपालस्य संस्कृतमहाकाव्यानि ६७
५.८.२ नैपालसंस्कृतमहाकाव्येषु हरिकेलिमहाकाव्यस्य स्थानम् ६९

६. प्रभावसमीक्षा ७०

६.१ आर्षकाव्यानां प्रभाव: ७०
६.२ विदग्धमहाकाव्यानां प्रभाव: ७३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६.३ निष्कर्ष: ७९

७. हरिकेलिमहाकाव्यस्य काव्यात्मकमनुशीलनम् ८०

७.१ छन्दोयोजना ८०
७.२ अलङ्कारसौन्दर्यम् ८१
७.३ गुणव्यक्ति: ८५
७.४ रीतिस्थापना ८६
७.५ रसभावाभिव्यञ्जनम् ८६
७.६ ध्वनिविमर्श: ९०
७.७ दोषदृष्टि: ९१
७.८ चित्रकाव्यविमर्श: ९२
७.९ स्तुतिकाव्यदिग्दर्शनम् ९३
७.१० सूक्तिकाव्यसमीक्षणम् ९४
७.११ प्रकृतिसौन्दर्यम् ९७
७.१२ समष्टिगतं काव्यसौन्दर्यम् ९९

८. हरिकेलिमहाकाव्ये शास्त्रव्युत्पत्ति: १००

८.१ वेदव्युत्पत्ति: १००
८.२ वेदाङ्गव्युपत्ति: १०१
८.३ दर्शनव्युत्पत्ति: १०३
८.४ धर्मशास्त्रव्युत्पत्ति: १०९
८.५ पुराणेतिहासव्युत्पत्ति: ११०
८.६ आयुर्विज्ञानव्युत्पत्ति १११
८.७ सङ्गीतशास्त्रव्युत्पत्ति: ११२
८.८ शस्त्रविद्याव्युत्पत्ति: ११३
८.९ कविसमयव्युत्पत्ति: ११४
८.१० कामशास्त्रव्युत्पत्ति: ११४
८.११ राजशास्त्रव्युत्पत्ति: ११६
८.१२ विज्ञानव्युत्पत्ति: ११७
८.१३ निष्कर्ष: १२०

९. लोकचित्रणम् १२१

९.१ राजा १२१
९.२ वर्णाश्रमव्यवस्था १२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९.३ आवास: १२२
९.४ भोजनम् १२३
९.५ वस्त्राभूषणप्रसाधनानि १२३
९.६ धर्मानुसरणम् १२४
९.७ सामाजिकं जीवनम् १२५

२- मूलपाठखण्डे-

प्रथमसर्ग: १२९
द्वितीयसर्ग: १३९
तृतीयसर्ग: १४८
चतुर्थसर्ग: १५६
पञ्चमसर्ग: १६४
षष्ठसर्ग: १७४
सप्तमसर्ग: १८२
अष्टमसर्ग: १८९
नवमसर्ग: १९५
दशमसर्ग: २०१
एकादशमसर्ग: २०८
द्वादशसर्ग: २१६
त्रयोदशसर्ग: २२२
चतुर्दशसर्ग: २३०
पञ्चदशसर्ग: २४१
षोडशसर्ग: २४९
सप्तदशसर्ग: २५७

३- सन्दर्भग्रन्थानुक्रमण्याम् -

(क) संस्कृतभाषाग्रन्था: २६९
(ख) नेपालीभाषाग्रन्था: २७३
(ग) हिन्दीभाषाग्रन्था: २७४

शुद्धिपत्रम् २७५

★★★★★

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सङ्केतसूची

१-	अ.हृ.	- अष्टाङ्गहृदयम् ।
२-	ई.	- इशवीयसंवत् ।
३-	उ.स्था.	- उत्तरस्थानम् ।
४-	उ.प्र.	- उत्तरप्रदेश: ।
५-	क.पा.लि.	- कनाम्नी पाण्डुलिपि: ।
६-	क.पु.	- कनामकं पुस्तकम्
७-	क.पु.टि.	- कनामकस्य पुस्तकस्य टिप्पणी ।
८-	का.प्र.	- काव्यप्रकाश: ।
९-	का.सू.	- कामसूत्रम् ।
१०-	कि.म.	- किरातार्जुनीयमहाकाव्यम् ।
११-	कु.खं.	- कुमारखण्ड: ।
१२-	कु.सं.	- कुमारसंभवमहाकाव्यम् ।
१३-	कौ.अ.	- कौटिलीयमर्थशास्त्रम् ।
१४-	ख.पा.लि.	- खनाम्नी पाण्डुलिपि: ।
१५-	ख.पु.	- खनामकं पुस्तकम् ।
१६-	ख.पु.टि.	- खनामकस्य पुस्तकस्य टिप्पणी ।
१७-	ग.पा.लि.	- गनाम्नी पाण्डुलिपि: ।
१८-	ग.पु.	- गनामकं पुस्तकम् ।
१९-	ग.पु.टि.	- गनामकस्य पुस्तकस्य टिप्पणी ।
२०-	घ.पा.लि.	- घनाम्नी पाण्डुलिपि: ।
२१-	घ.पु.	- घनामकं पुस्तकम् ।
२२-	चि.स्था.	- चिकित्सास्थानम् ।
२३-	चौ.सं.सि.अ.	- चौखम्भा संस्कृत सिरीज अफिस ।
२४-	छा.	- छान्दोग्योपनिषद् ।
२५-	टि.	- सम्पादकीया टिप्पणी ।
२६-	तृ.सं.	- तृतीयं संस्करणम् ।
२७-	त्रि.वि.वि.	- त्रिभुवनविश्वविद्यालय: ।
२८-	द्वि.सं.	- द्वितीयं संस्करणम् ।
२९-	ने.उ.म.इ.	- नेपाल उपत्यकाको मध्यकालीन इतिहास ।
३०-	नै.च.	- नैषधचरितमहाकाव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३१-	न्या.द.	-	न्यायदर्शनम् ।
३२-	पा.वि.के.	-	पाठ्यक्रम-विकास-केन्द्रः ।
३३-	पु.टि.	-	पुस्तकीया टिप्पणी ।
३४-	प्र.सं.	-	प्रथमं संस्करणम् ।
३५-	प.सं.	-	पत्रसङ्ख्या ।
३६-	मनुस्मृ.	-	मनुस्मृतिः ।
३७-	या.स्मृ.	-	याज्ञवल्क्यस्मृतिः ।
३८-	यो.सू.	-	योगसूत्रम् ।
३९-	र.वं.म.का.	-	रघुवंशमहाकाव्यम् ।
४०-	रा.अ.	-	राष्ट्रियाभिलेखालयः ।
४१-	रु.सं.	-	रुद्रसंहिता ।
४२-	ल.सं.	-	लगतसङ्ख्या ।
४३-	वि.सं.	-	विक्रमसम्वत् विषयसङ्ख्या च ।
४४-	शि.पु.	-	शिवपुराणम् ।
४५-	शि.म.	-	शिशुपालवधमहाकाव्यम् ।
४६-	शु.य.सं.	-	शुक्लयजुर्वेदसंहिता
४७-	श्रीमद्भा	-	श्रीमद्भागवतमहापुराणम् ।
४८-	सा.द.	-	साहित्यदर्पणः ।
४९-	सं.अ.सं.	-	संस्कृताध्ययनसंस्थानम् ।
५०-	ह.के.	-	हरिकेलिमहाकाव्यम् ।

☆☆☆☆☆☆☆

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिकेलिमहाकाव्यम्

भूमिका - खण्डः

(समीक्षाप्रधानः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१. हरिकेलिमहाकाव्यस्य रचयिता वंशमणिशर्म्मा

१.१ समयः

नेपालस्येतिहासे साहित्यसङ्गीतकलाभिः समृद्धस्य मल्लशासनकालस्य गौरवपूर्णं स्थानमस्ति । मल्लकालस्य गौरवप्रवर्धने येषां प्रतिभाजुषां विदुषां कवीनाञ्च योगदानं तेषु धौरेयो वर्तते हरिकेलिमहाकाव्यस्य रचयिता वंशमणिः ।

काव्यकलाजुषो विदुषो[1] भक्तपुराधिपतेर्जगज्ज्योतिमल्लस्य सभापण्डितो वंशमणिः समयदृष्ट्या तत्समकालिको नूनम् । [2]भक्तपुरताम्रलेखानुसारेण जगज्ज्योतिर्मल्लो विक्रमस्य १६६८ तमे वत्सरे सिंहासनमारुरोह । विक्रमस्य १६७४ तमे वत्सरे जगज्ज्योतिर्मल्लेन प्रणीतायां "नरपतिजयचर्यायाः स्वरोदयटीकायां[3] लेखकत्वेन वंशमणेर्य उल्लेखः स एव वंशमणिसंबद्धः प्रथमोऽभिलेखः । १६८८ तमे विक्रमसंवत्सरे वंशमणिना प्रणीतायां सङ्गीतशास्त्रस्य भास्करटीकायां[4] जगज्ज्योतिर्मल्लस्य य उल्लेखः स एव तस्यान्तिमोऽभिलेखः । वंशमणेरन्तिम उल्लेखस्तु १७१४ तमे विक्रमसंवत्सरे तेनैव प्रणीते[5] गीतदिगम्बररूपके जातः । वंशमणेः पिता श्रीरामचन्द्रशर्म्मा जगज्ज्योतिर्मल्लस्य पितुस्त्रैलोक्यमल्लस्याश्रितः पण्डित आसीदिति तथ्यं [6]निबन्धविशेषादैतिहासिकजनवचनाच्चावगम्यते । सर्वमेतत्तथ्यजातं वंशमणिजगज्ज्योतिर्मल्लयोः सर्वात्मना समकालिकत्वं साधयति । श्री वंशमणिजगज्ज्योर्तिमल्लयोर्वैदुष्यविभूषितयोराश्रयाश्रयिणोर्मिथः

---

1. सूर्यविक्रमज्ञवाली, नेपाल उपत्यकाको मध्यकालीन इतिहास, रोयल नेपाल एकेडेमी, प्र.सं. वि.सं. पृ ९६-९७।
2. तत्रैव ।
3. ...... "वंशमणिशर्मा व्यलिखदिदं पुस्तकम् ।" रा.अ. बृहत्सूचीपत्रस्य प्रथमभागे पृ. १११ ।
4. (क) "श्रीमज्जगज्ज्योतिरधीश्वरस्य निदेशमासाद्य गुणोत्तरस्य ।
सङ्गीतशास्त्रस्य चकार टीकां श्री मैथिलो वंशमणिर्मनीषी ॥
(ख) "नेपालाब्दे शशिशरमुनिव्यञ्जिते शुक्लपक्षे ।" रा.अ. स्थितस्य १६१ विषयसंख्यायुतस्य सङ्गीतभास्करस्य पाण्डुलिपौ, पृ.१९२।
5. "अस्ति किल भारद्वाजकुलजन्मना जनकजनपदीयेन श्रीरामचन्द्रशर्म्मणः पुत्रेण वंशमणिशर्मणोपनिबद्धं गीतदिगम्बरं नाम रूपकम् ।" रा.अ. स्थितस्य गीतदिगम्बरस्य पाण्डुलिपौ, पृ.१ ।
6. (क) ..... "वंशमणिका वेलओचयमूलक भारद्वाज गोत्रीय मैथिली ब्राम्हण छलाह । जनिक पिता रामचन्द्रशर्मा जगज्ज्योतिमल्लक पिता त्रैलोक्यमल्लक राज्याश्रयमे रहि काव्यरचना कएलनि ..." ।
पशुपति झा, मैथिली जगत (पत्रिका) "वंशमणि झाक साहित्यिक परिचय", भाद्र-कार्तिक २०४७, प्रकाशक-अखिल नेपाल मैथिली साहित्य परिषद, काठमाडौं, पृ.२६ ।
(ख) "एकतमस्य मल्लकालिकस्य कृष्णसम्बद्धस्य नाटकस्य रचयिता विश्वमल्लस्योत्तराधिकारी त्रैलोक्यमल्लो बभूव । अस्य नाटकस्य गीतिपद्येषु रामचन्द्रवीरनारायणयोरुल्लेखो लभ्यते ।" (नैपाल्याः संस्कृते रूपान्तरणम्)
ज्ञवाली, पूर्ववत् पृ. २२८ ।
राष्ट्रियाभिलेखालयस्य ग्रन्थागारे नाटकविभागे ४४ विषयसंख्यया संकेतितमेतन्नाटकं ज्ञवालीवर्णनानुसारि चरमार्धे च खण्डितमस्ति । यथा जगज्योतिर्मल्लप्रणीतेषु ग्रन्थेषु वंशमणेरुल्लेखा लभ्यन्ते तथैव त्रैलोक्यमल्लप्रणीतेऽस्मिन् नाटके रामचन्द्रवीरनारायणयोरुल्लेखः । एतेन त्रैलोक्यमल्लरामचन्द्रशर्म्मणोराश्रयाश्रयिभावः सिद्ध्यति नूनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्बन्धः सौहार्दमयो बभूवेति तथ्यं प्रणीताभिः कृतिभिः प्रकाश्यते । जगज्ज्योतिर्मल्लस्य दृष्टौ वंशमणिर्महान्[7] सुधीः प्रतिभाति, वंशमणिशर्म्मणो दृष्टौ च जगज्ज्योतिर्मल्लो [8]ज्योतिःसाहित्यशास्त्रस्मृतिकलाकलापमर्मज्ञो गुणोत्तरो[9] विचक्षणः प्रतिभाति । अस्मद्दृष्टौ द्वावेव बालसखायौ सप्रतिस्पर्धं सरस्वतीग्रन्थभाण्डागारसम्वर्धनरतौ सारस्वतौ प्रतिभातः । सत्यामपि प्रतिस्पर्धायां तयोर्मिथो गुञ्जामात्रमपि विद्वेषो नासीत् । एकस्य ग्रन्थप्रणयनविधावपरस्य सहयोगस्तयो स्वाभाविकी प्रक्रियैव बभूव । जगज्ज्योतिर्मल्लेन प्रणीतानां हरगौरीविवाह- मुदितकुवलयाश्व-प्रभावतीहरण - कुञ्जविहारनाटकानां नरपतिजयचर्यास्वरोदयटीकायाश्च परिष्कृतौ प्रस्तावनानिर्मितौ च वंशमणेर्योगदानं जातमिति तत्र तत्र निहितेन तन्नाम्ना प्रमाणीक्रियते । वंशमणेः सौजन्येन सौहार्देन वैदुष्येण च वशीभूत इव जगज्ज्योतिर्मल्लः स्वारब्धमपि सङ्गीतभास्करटीकाप्रणयनं वंशमणिगौरववर्धनायेव ग्रन्थसम्पूर्तिहितुना तस्मै ददौ । अनेन कार्येण कृतकृत्यो वंशमणिः सङ्गीतभास्करान्ते पुष्पिकापद्ये निजगाद-

> [10]"श्रीमज्जगज्ज्योतिरधीश्वरस्य निदेशमासाद्य गुणोत्तरस्य ।
> सङ्गीतशास्त्रस्य चकार टीकां श्रीमैथिलो वंशमणिर्मनीषी ॥

जगज्ज्योतिर्मल्लसदृशस्य साहित्यसङ्गीतमर्मज्ञस्याश्रयलाभोऽपि वंशमणेः प्रतिभाप्रकर्षाय जातः । गुणज्ञानां गुणग्राहिणाञ्चाभावे कवीनां कलाकाराणां विदुषाञ्च प्रतिभाऽऽश्रयहीनेव कुण्ठिता सम्पद्यते । सौभाग्यवशाद् गुणज्ञेन विदुषा सुकविना च भूपतिना जगज्ज्योतिर्मल्लेन प्रेरितोऽभिनन्दितश्च वाङ्मयप्रवर्धनकर्मणि व्यापृतो वंशमणिर्नेपालस्यैतिहासिकं गौरवं समेधयामास । एतावता, १६६८ तमाद् विक्रमसंवत्सरात् १६८७ तमं विक्रमसंवत्सरं यावत् प्रमाणिते जगज्ज्योतिर्मल्लशासनकाले वंशमणेरुपस्थितिः प्रमाणिता भवति । राजपरिवारविद्वत्परिवारयोः परम्परागतं सम्बन्धमात्मसात्कृत्य विचारिते सत्युभयोराजीवनं साहचर्यं सख्यञ्च प्रमाणितं भवति । सामान्यतः पितुः प्राणत्यागसमये पुत्रः पूर्णं यौवनं प्राप्नोतीति धिया चिन्तने १६६८ तमे विक्रमसंवत्सरे जगज्ज्योतिर्मल्लस्य पञ्चविंशतिवर्षदेशीयत्वं सिद्धं भवति । तत्समकालिकस्य वंशमणेरपि स एवायुषो भागः प्रमाणितो भवति । पञ्चषाणां वर्षाणां न्यूनाधिकभावस्तु प्रायिक एव । एतावता विक्रमस्य १६४०तमात् संवत्सरादर्वाक् १६५०तमात् संवत्सराच्च प्राक्कदाचन वंशमणिर्जनिं लेभे इत्यनुमातुं शक्यते । जीवनस्य पूर्वार्धे मध्यभागे च जगज्ज्योतिर्मल्लस्य तदुत्तराधिकारिणाञ्चाश्रये स्थितो वंशमणिर्वार्धक्ये, कान्तिपुरशासकस्य प्रकाण्डविदुषः कवीन्द्रस्य च प्रतापमल्लस्य गुणज्ञया दृष्ट्याऽप्यभिनन्दितो बभूवेति तथ्यं १७१४तमे विक्रमसंवत्सरे पशुपतिपरिसरे प्रतापमल्लकृतस्य तुलादानस्य पुण्यावसरे समुपस्थितानां जनानां हृदयरञ्जनायाभिनीतं वंशमणिप्रणीतं गीतदिगम्बररूपकं प्रमाणयति । एतच्च वृत्तं वंशमणिप्रतापमल्लयोर्मिथो गहनस्यानुरागस्य परिचायकमप्यस्ति निस्सन्देहम् । १७१४तमाद् विक्रमसंवत्सरादनन्तरं तदुपस्थितिप्रत्यायकस्य प्रमाणस्याप्राप्त्या १७१४तमेऽथवा १७१५तमे वर्षे स कदाचित् कीर्तिकलेवरमङ्गीचकारेति निष्कृष्यते ।

---

7. "…. सुधियं समेत्य वंशमणिम् ।" रा.अ. स्थितस्य सङ्गीतभास्करस्य पाण्डुलिपौ पृ. १ ।
8. "तत्पुत्रो दानकर्णो जयति जयजगज्ज्योतिर्मल्लो नरेन्द्रो
ज्योतिःसाहित्यशास्त्रस्मृतिविविधकलाम्भोधिपारंगमज्ञ :। रा.अ. सूचीपत्रम् १, पृ. १०९ ।
9. "… निदेशमासाद्य गुणोत्तरस्य ।" सङ्गीतभास्करस्य पाण्डुलिपौ पृ. १९२ ।
10. तत्रैव ।
विशेषः- जगज्ज्योतिर्मल्लप्रणीतेषु मृदङ्गोत्पत्ति - प्रभातकृत्यविधानपद्धति - अश्ववैद्यक-स्तोत्रसङ्ग्रहाभिधानेषु ग्रन्थेष्वपि वंशमणेः सहयोगस्य संभावना भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१.२ जीवनम्

वंशमणिना निजासु रचनासु स्वजीवनवृत्तं न क्वापि निर्दिष्टम् । कुलगोत्राभिजनोपाधिमातृपितृपरिचायकानि वाक्यानि तदीयासु रचनासु यत्र तत्र विकीर्णतया लभ्यन्ते । तदनुसारेणायं[11] भारद्वाजगोत्रजन्मा [12]जनकपुरजनपदीयो [13]विल्वपञ्चवंशावतंसाऽथवा विनुपञ्चवंशावतंसो[14] मणिमहापाध्यायोपाधिना समलङ्कृतोऽन्वीक्षापारावारपारीणस्य श्रीरामचन्द्रशर्म्मणो[15] वन्द्यचरितायाश्च जयमत्याः सूनुर्मैथिलो ब्राह्मण आसीत् । प्राप्तसाक्ष्यानुसारेण महाकविः सैष झोपनामा आसीत् । झाब्राह्मणनामेकतमो वर्गः संप्रत्यपि वेलौंचीवंशसंवद्धमात्मानं मन्यते । हरिकेलौ पुष्पिकावाक्ये वित्वकुञ्जपदं विलोक्यते । विल्वकुञ्जस्यापभ्रंशत्वेन "वेलौंची" इति लोकैरुच्चारितं सम्भाव्य वंशमणेर्झोपाह्वत्वं सिद्ध्यति । अपरञ्च मणिमहोपाध्यायोपाधिरपि तस्यौझात्वं झात्वं च सम्यक् प्रमाणयति । मैथिलेषु झाब्राह्मणानां प्रसिद्धिः, वंशमणिश्च मैथिलः, झाब्राह्मणेषु वर्गविशेषस्य वैलौंचीवंशप्रभवत्वं वंशमणिश्च तत्सदृशविल्वपञ्चवंशावतंसः, उपाध्यायपदस्यैवापभ्रंशरूपं झापदमथवौझापदं वंशमणिश्च मणिमहोपाध्यायः, एतत् सर्वं हृदि निधाय निश्चीयते यद् त्वंशमणिशर्म्मा "वंशमणिझा"[16] आसीदिति । अत एव पशुपतिझामहोदयेन लेखनाथमिश्रमहोदयेन च "वंशमणिझा" इति नाम यद् व्यलेखि तत् सार्थकमेव । भक्तपुराधिपतेस्त्रैलोक्यमल्लस्याश्रये निवसतः पण्डितस्य रामचन्द्रशर्मणः पुत्रत्वादयमपि निजं बाल्यं काष्ठमण्डपोपत्यकायामेव यापयामासेति वक्तुं शक्यते । जगज्ज्योतिर्मल्लेन सहास्य प्रगाढः सम्बन्धो न केवलं पण्डितत्वेनापितु बालसखित्वेनापि । अत एव जगज्ज्योतिर्मल्लस्य शिक्षायै दीक्षायै च राजभवने नियुक्तैराचार्यैरेवायमपि शिक्षितो दीक्षितश्चेति बलवती सम्भावना समुदेति । भक्तपुरमधिवसतोऽस्य मिथिलासम्पर्कोऽविच्छिन्न एव बभूवेति तथ्यं प्रमाणयति तस्य रचनायां प्रतिबिम्बिता मैथिली संस्कृतिः ।[17] सोऽयं मैथिलो महाकविः[18] कस्मिन् स्थाने कस्यां तिथौ जनिं लेभे कदा च भुवं विरहयाम्बभूवेति सत्यापकं साक्ष्यं न लब्धमद्यावधि । १६८९ तमाद् विक्रमसंवत्सरादनन्तरं वंशमणिर्जगज्ज्योतिर्मल्लस्य सान्निध्याभावेऽपि कान्तिपुराधिपतेः प्रतापमल्लस्य सम्पर्केण लाभान्वितो बभूवेति तथ्यं प्रतापमल्लस्य तुलादानावसरे वंशमणिप्रणीतस्य

---

11. पञ्चम्यां टिप्पण्यां निर्दिष्टं तथ्यम् ।
12. पूर्ववत् ।
13. "इति विल्वपञ्चवंशावतंसमणिमहोपाध्यायश्रीवंशमणिशर्म्मकृतं हरिकेलिनाम महाकाव्यं समाप्तम् ।" रा.अ. स्थितस्य हरिकेलिमहाकाव्यस्य "क" पाण्डुलिपौ, पृ. १११ ।
14. "इति विनुपञ्चवंशावतंसमणिमहोपाध्यायश्रीवंशमणिशर्म्मकृतं हरिकेलिनाम महाकाव्यं समाप्तम् ।" रा.अ. स्थितस्य हरिकेलिमहाकाव्यस्य "ख" पाण्डुलिपौ, पृ. १०६ ।
15. "पिता यस्यान्वीक्षाम्बुधिवहलने चन्द्रमा रामचन्द्रो,
जगत्ख्याता माता जय मतिरिति श्रीभवानीव वन्द्या ॥" हरिकेलिमहाकाव्यस्य सर्गान्तपुष्पिकायाम् ।
16. (क) षष्ठ्यां (६) टिप्पण्यां निर्दिष्टं तथ्यम् ।
(ख) "लेखनाथमिश्रः, वंशमणिझा, मिथिला भारती प्रकाशन, पटना प्र.सं. ई. १९८८ । (वंशमणिसंबद्धविवरणं मया श्री रोहिणीप्रसादखतिवडामुखात् श्रुतम्, स ग्रन्थः स्वचक्षुषा नावलोकितः)
17. "आध मौलिमण्डनफुलमाले, आध तरङ्गित सुरसरिधारे ।
आध अधिक तिलक नव इन्दु, आध सोहायो सिन्दुरविन्दु ॥
सुकवि वंशमणि एकरस गावै, सेवी की देव हरकी न ही पावै " ।
(गीतदिगम्बरे) सूर्यविक्रमज्ञवाली, ने.उ.म. इ.,पृ. २३९ ।
18. "श्रीमैथिलो वंशमणिर्मनीषी ।", रा.अ., संगीतभास्करपाण्डलिपौ, पृ. १९२ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गीतादिगम्बरनाटकस्याभिनयप्रसङ्गः प्रमाणयति । एतावता निष्कृष्टतया वक्तुं शक्यते यदस्यायुषोऽधिकतमो भागोऽत्रैव काष्ठमण्डपोपत्यकायां व्यतीत इति ।

१.३ सन्ततिपरम्परा

आयुषोऽन्तिमभागेऽपि वाङ्मयसम्वर्धनपुरःसरं काष्ठमण्डपोपत्यकायां निवसतो वंशमणेर्जीवनस्यावसानमपीहैव जातमिति सम्भाव्यते । प्रतापमल्लस्य[19] तुलादानावसरेऽभिनयाय गीतदिगम्बररूपकस्य रचनाऽनेन प्रायः सप्ततिवर्षात्मके वयसि कृता । आजीवनं भक्तपुरेऽथवा काष्ठमण्डपोपत्यकायां निवासेन शीतजलवायुप्रभावितोऽयं वार्धक्ये चोष्णजलवायुप्रधाने मिथिलाप्रदेशे स्थातुं समर्थो नासीन्निश्चप्रचम् । एतावताऽस्य वार्धक्यमिहैव व्यतीतं जीवनञ्चेहैव समाप्तम् । जगज्ज्योतिर्मल्लस्य तदुत्तराधिकारिणां, कान्तिपुराधिपतेः प्रतापमल्लस्य च सौजन्येनानेन प्रचुरा संपदर्जिता नूनम् । अतस्तद्वंश्यानामत्रत्याश्चलाचलसंपदो विहाय मिथिलापरावर्तनमसंभवमेव । मल्लकालादेव भक्तपुरे कान्तिपुरे ललितपुरे चाश्रयमाणा विस्मृतमिथिलागन्धा अङ्गीकृतनेवारजातिसंबन्धाश्च झावंश्या अन्ये मैथिलाश्च सम्प्रत्यपि प्रचुरसंख्यायामत्र निवसन्ति । तस्यां प्रचुरसंख्यायां वंशमणिसन्ततीनां झावंश्यानामपि सहभागिता संभविनीति कथनं न भवेद् विवादाय नूनम् ।

१.४ धर्म :

हरिकेलिमहाकाव्ये वंशमणिना वेदानां[20] वैदिककर्मकाण्डस्य च सादरं निरूपणं विधाय निजा वैदिकसनातनधर्मानुयायिताऽभिव्यक्ता । कविरसौ तत्रैव शैव-[21] शाक्त-[22] वैष्णव-[23] गाणपत-[24] सम्प्रदायानामपि संसूचनं चकार । परमिष्टदेवतारूपेण गौरीगिरीश्वरावनेन संस्तुतौ । अवतारपुरुषेषु सर्वोत्तमस्य षोडशकलावतारस्य श्रीकृष्णचन्द्रस्य परमेणानुभावेन भावितोऽसौ महाकविः कृष्णलीलायाः कीर्तनेनात्मानं पावयामास । भगवतः प्राणेश्वरी राधा[25] कविना सादरं वन्दिता । वस्तुतो मल्लकालिके सामाजिकजीवने कृष्णाराधनापरम्परायाः पल्लवने वैष्णवसम्प्रदायसम्वर्धने संस्कृतवाङ्मयविशिष्टीकरणे च मल्लकालस्य प्रारम्भादेव काष्ठमण्डपोपत्यकया संबद्धानां सामान्यमैथिलानां नेपालान्तर्गतमिथिलावासिनां मैथिलानां विदुषां कवीनाञ्च महद् योगदानमस्ति । तेषु शुभराज-माणिक-जयत-रामचन्द्र-वंशमणि-काशीनाथप्रभृतयः सन्ति धौरेयाः । [26]शुभराजेन पाण्डवविजयनाटकं, माणिकेन राघवानन्दनाटकं भैरवानन्दनाटकं च,

---

19. सूर्यविक्रमज्ञवाली, ने. उ. म. इ., पृ. २३९ ।
20. (क) "श्रुतिनान्दीनिगदेन यत् स्वयम् ।" ह.के. १५।१२ ।
    (ख) "द्रुपदा वारि तवाधिजं रजः ।" ह.के.१५।१२ ।
21. ह.के., १।१ ।
22. ह.के., ९।१७ ।
23. "यस्य पादजलं गङ्गाऽनङ्गारेमौर्लिमण्डनम् ।
    कीर्तितः स कथं न स्यादंहःसंघहरोहरिः ॥ ह.के., १।४।
24. (क)"ॐ नमो गणपतये, ह.के., ग्रन्थारम्भे ।
    (ख) "गर्वितमिव गणनायकम्, ह.के., १७।१४ ।
25. "यौवतेषु परिहासपेशलो राधिकामनुबन्ध सोऽधिकम् ।" ह.के., ७।१२ ।
26. रा.अ. बृहत्सूचीपत्रस्य साहित्यकाव्यविषयके द्वितीयभागे नाटकविषयके तृतीयभागे च विभिन्नेषु पृष्ठेषु विलोकनीयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयतेन महीरावणवधनाटकं, वंशमणिना ग्रन्थान्तरैः सह हरिकेलिमहाकाव्यं, काशीनाथेन यदुवंशमहाकाव्यं च निर्माय संस्कृतवाङ्मयस्य श्रीवृद्धिः कृता । रामचन्द्रस्य मौलिकग्रन्थाभावेऽपि वंशमणिकृतस्य हरिकेलिमहाकाव्यस्य सर्गान्तपुष्पिकापद्यैस्तस्य[27] न्यायशास्त्रेऽगाधं पाण्डित्यं प्रमाणीक्रियते, अतो विद्याविस्तारक्षेत्रे तस्य विशिष्टं योगदानमाकलनीयं नूनम् । काष्ठमण्डपोपत्यकायां राज्याश्रयेण सम्मानितया मैथिलविद्वत्परम्परया कृष्णभक्तिमूलकसाहित्यरचनायां वैष्णवसम्प्रदायकर्मकाण्डे चाभिप्रेरितैः मल्लकुलालङ्कारैर्महीपतिभिरपि[28] कृष्णचरिताश्रितानि नैकविधानि रूपकाणि व्यरचि नैकविधानि मन्दिराणि च निरमायि । [29]पाटनस्य कृष्णमन्दिरं सिद्धिनरसिंहमल्लनिर्मितं सर्वोत्कृष्टमादर्शभूतञ्चोदाहरणमस्ति । प्रतापमल्लनिर्मितस्य नारायणहिटीस्थितस्य[30] नारायणमन्दिरस्य वर्तत एव कश्चन नैजो विशेषः । विशेषतो महाकाव्यशैल्या कृष्णचरितस्योद्गाता महाकविपरम्परामालाया एकतमो मालिको वंशमणिर्वैदिकसंस्कारसमेधितमेधोऽपि ज्ञानयोगापेक्षया भक्तियोगस्य साधको विश्वकुटुम्बवादी सनातनधर्मानुयायी प्रतिभाति ।

१.५ स्वभावः

दयामहिमप्रकाशनाय कविनोद्भावितानि पद्यानि[31] कवेर्दयार्द्रां प्रकृतिमुपस्थापयन्ति । [32]अहङ्कारशून्यः सरलचेताः सज्जनो वंशमणिरासीदिति तथ्यं हरिकेलिमहाकाव्यगतैः पद्यैः प्रमाणीक्रियते । [33]सङ्गीताभिरुचिः [34]प्रकृतिप्रियश्च [35]वंशमणिर्मर्यादामहिमगायकः सक्रियो विद्वानासीदिति तथ्यं हरिकलिगतैर्वाक्यविशेषैर्ज्ञाप्यते । [36]शिष्टाचारस्य पक्षपाती सैष कविः खलचरितं भृशं निनिन्द । हरिकेलौ गोपीभिः साकं हरिकेलिनिरूपणविधौ नैकविधेषु पद्येष्वाविर्भूता विलक्षणा[37] चमत्कृतिरस्य कवे रसिकहृदयतामावेदयति नूनम् । एभिः सौजन्यसंस्कृतेर्गुणैः सह [38]महाकविर्वंशमणिर्विनोदाढ्येन भृशं जनरञ्जनेन गुणेन समलङ्कृतः सर्वेषां चिरपरिचित इव

---

27. पिता यस्यान्वीक्षाम्बुधिबहलनें चन्द्रमा रामचन्द्रः" । हरिकेलिमहाकाव्ये १।६६ ।
28. एतत्तथ्यमस्यैव ग्रन्थस्य "कृष्णकाव्यपरम्परा" शीर्षके प्रमाणितं भविष्यति ।
29. बालचन्द्र शर्मा. नेपालको ऐतिहासिकरूपरेखा, प्रकाशिका- कृष्णकुमारी देवी, २३।११९ दुग्धविनायक, वाराणसी, तृतीय संस्करण, वि.सं. २०३३, पृ. १५३ ।
30. पूर्ववत् । पृ. १६८ ।
31. (क) "दयालुता खेदयते महान्तम् ।" ह.के., २।४९।
(ख) " सदयोदयो भवति को न महान् ।" ह.के., ९।४३।
32. "अनिष्पन्नाभिधेयापि तथापि मम भारती ।
कस्य नानन्दयेदन्तः शिशूनामर्द्धवागिव ॥," ह.के., १।३ ।
33. "मृगा विमुक्तान्यरसप्रसङ्गा मौनैरवर्तन्त वने विहङ्गाः ।
मुकुन्दगाने जगदेव जाने जातं चिदानन्दसमुद्रमग्नम् ॥" ह.के., १०।१० ।
34. "भृङ्गस्वनाविष्कृतसाधुनादा गोविन्दगानान्यभिनन्दमानाः ।
व्यालोलयन् मौलिमिव स्वकीयं समीरलोला वनशाखिनोऽपि ।" ह.के., १०।१५ ।
35. "स्ववर्णधर्माश्रयणं श्रियः पदम् ।" ह.के., ४।२ ।
36. "वसनं विनैव सलिलाप्लवनं लवनं व्रतस्य यदतोऽजनि वः ।", ह.के., ८।४२ ।
37. "समं सखीभिः कुसुमावचाये काये क्षते काननकण्टकेन ।
समन्यरं भर्तृसुखावहानि चकार नारी भयसीत्कृतानि ॥" ह.के., १०।५४।
38. "द्रष्टुं देहि सरोजसुन्दरमुखि त्वं श्वस्तनौ वीक्षितौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयस्पर्शी सखाऽऽसीत् । चिराय काष्ठमण्डपोपत्यकासम्पर्कादय[39] तन्त्रसाधनायां तन्त्रशास्त्रे च श्रद्धावानासीदिति तथ्यं हरिकेलिनिहितपद्यविशेषाज्ज्ञायते ।

१.६ वैदुष्यम्

रुद्रपीठस्य[40] समुल्लेखोऽभिमन्त्रितजलमहिमनिर्देशश्च कवेरस्य वैदिककर्मकाण्डनैपुण्यं पुरस्कुरुतः । श्रुतिरूपां नान्दीं गायन् परमात्मा संसृतिनाट्यं प्रवर्तयतीति कविकृतं निरूपणं तस्य वैदिकज्ञानकाण्डे वैदुषीं प्रमाणयति । सुबन्ततिङन्ततद्धितान्तानां कृदन्तनिष्पन्नानां पदानां यदृच्छया नर्तने, विवक्षानुसारितया कारकप्रयोगे, निर्दुष्टपदवाक्यसंघटने च कवेः सामर्थ्यं तस्य व्याकरणशास्त्रविशेषज्ञत्वं प्रत्याययति । उच्चचन्द्र-स्वस्थसूर्य- ग्रहदृष्टीनां निरूपणं कवेरस्य ज्योतिर्विद्याज्यायस्त्वं विज्ञापयति । अर्थवाद-हेत्वाभास- पन्चावयव- प्रकृति- पुरुष- गुण- यम- नियम- योगनिद्रा- ब्रह्मणां सन्दर्भानुसारीणि कविकृतानि निरूपणानि कवेर्दर्शनालोडनसमर्थां तीव्रां शेमुषीमावेदयन्ति । मूर्च्छाया विशल्यकरणीलताया अजगरविषनाशकस्य दर्भस्य च चर्चा कवेरायुर्विज्ञानवैदुष्यं विशदीकरोति । सङ्गीतगीतिगानमूर्च्छनादिपदानि कवेः सङ्गीतशास्त्रनैपुणीं निरूपयन्ति । सुललितं रससिद्धं चेदं हरिकेलिमहाकाव्यं कवेस्तस्यासाधारणीं साहित्यविद्यावैशारदीं विशदीकरोति । अतः साहित्यसङ्गीतकलाकलापमण्डितो निगमागमपण्डितो वंशमणिर्मल्लकालिकानां कवीनां शिरोमणिरेवेति निष्कृष्यते ।

१.७ महाकवित्वम्-

कोऽपि कविविशेषोऽनेकासां रचनानां रचनया विपुलाकारकाव्यविशेषनिबन्धनेन वा महाकविपदं न लभते । तत्तु तत्प्रणीतकाव्यविशेषस्य प्रतिभाविशेषविच्छित्त्यैव लब्धुं शक्यते नूनम् ।

उक्तञ्चाभियुक्तैः-

"सरस्वती स्वादु तदर्थवस्तु निष्यन्दमाना महतां कवीनाम् ।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् ॥" (ध्वन्यालोके १।६)

वस्तुतो यः कविर्नवनवोन्मेषशालिन्या प्रतिभया चमत्कृतो भवति, निबध्नाति च प्रतिभापेशलं रसनिर्भरं महाकाव्यविशेषं स एव महाकविपदवीं विन्दतीति सर्वविवेचकसम्मतः सिद्धान्तः । वंशमणिशर्मा चैतादृश एव प्रतिभाप्रकर्षचमत्कृतो विलक्षणो विचक्षणः सुकविश्चेति स महाकविपदभाग् नूनम् । सर्वमेतद् हरिकेलिमहाकाव्यस्य काव्यात्मकानुशीलनप्रकरणे शास्त्रीयानुशीलनप्रकरणे च प्रमाणितं भविष्यति । वंशमणिपूर्वकालिकः कश्चन नेपालजन्मा महाकविर्नाद्यावधि केनापि रूपेण प्रतीतिपथमागत इति हेतोर्वंशमणेरेव नेपालस्य प्रथममहाकवित्वे न स्याद् विदुषां काचन विप्रतिपत्तिः ।

यौ तौ हाटकसम्पुटौ पुटितवल्लग्नं मनस्तत्र मे ।
किं मूल्यं न यतः परं प्रियतरं लोके त एवासवः
यत्रैवं लपतोर्बभूव विपणौ यूनोरनूनो रसः ॥, ह.के., १५।१३ ।

39. अथ गोपगणैरलोकि बालो विकरालोदरदानवोपरिष्ठः ।
शवसाधनकर्म किन्नु कुर्वन्नमरद्वेषिकुलानि सञ्जिहीर्षुः ॥ ह.के. २।२० ।

40. वैदुष्यप्रकरणे निरूपितानां तथ्यानां सत्यापनाय शास्त्रव्युत्पत्तिप्रकरणं द्रष्टव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१.८ कृतयः

१.८.१ हरिकेलिमहाकाव्यम्

सप्तदशभिः सर्गैः द्विचत्वारिंशदुत्तरनवशतसंख्यकैः (९४२) पद्यैरन्वितं श्यामसुन्दरशैशवकेलिमनोहरं विलक्षणया किशोरकेल्या रमणीयं रसाधिराजेन श्रृङ्गारेण चमत्कृतं वंशमणेर्महाकविकुलप्रतिस्पार्धेन्याः प्रतिभायाः साकारं रूपमिव हरिकेलिमहाकाव्यं भूमिकाखण्डेऽस्मिन् बहुविधैः कोणैर्विवेचयिष्यते । अस्य महाकाव्यस्यानेकेषु सर्गेषु श्रृङ्गारसपरिपाकविशेषानुभूत्येदं महाकाव्यं तरुणेनानवलोकितपञ्चविंशतितमवसन्तेन कविना १६७४ तमाद् विक्रमसंवत्सरात् प्राक् कदाचन प्रणीतमित्यनुभूयते । रा.अ. साहित्यविषयके [41]सूचीपत्रे केषाञ्चन ग्रन्थकाराणां रचनासु च वंशमणेरचनात्वेन कृष्णकाव्यस्याप्युल्लेखा लभ्यन्ते । हरिकेलिमहाकाव्यस्य कृष्णकाव्यनाम्ना व्यपदिष्टस्य च काव्यस्य विषयवस्तुपरिशीलनेन तयोः सर्वात्मनैक्यमनुभूतवता मया कृष्णकाव्यस्य स्थापना हरिकेलिमहाकाव्यस्य "ग" पाण्डुलिपिरूपेण कृता । तद्विषयको विचारः पाण्डुलिपिप्रकरणे विधास्यते । वंशमणिप्रणीतस्य हरिकेलिमहाव्येतरस्य कस्यचन कृष्णचरित्रकाव्यस्य सत्ता खपुष्पायितैव मन्तव्या । मूलपाण्डुलिपीनामध्ययनं विनैव सूचीपत्रं पञ्जिकाञ्चाधिकृत्य निष्कर्षस्थापनया यत्र तत्र ग्रन्थकृतां ग्रन्थेषु सैव दोष आपतितः ।

१.८.२ चतुरङ्गतरङ्गिणी

रा.अ. पञ्जिकायामियं "ल.सं.प्र. १६१, वि.सं.का. २५१, प.सं. १४, री.सं.बी. ३१३।२६" इत्यादिसङ्केतैः पुरस्कृता मैथिलीलिपिनिबद्धा चतुरङ्गतरङ्गिणी परिचायिता । अस्यां बलबुद्धिक्रीडापरिचायका विषया निहिताः सन्ति ।

आदिवाक्यम्-

[42]".......... केलिपतेः पराजितरती ....।

.... वाचा विनयशालिनीम् ।

बुधो वंशमणि........ चतुरङ्गतरङ्गिणीम् ॥" इत्यादि ।

१.८.३ सङ्गीतभास्करः

रा.अ. पञ्जिकायामस्य ग्रन्थस्य पाण्डुलिपिः "ल.सं. २-२२२, वि.सं. १६१, प.सं. १९२, री.सं.बी. २८८।२७ "प्रभृतिभिः सङ्केतैरुपस्थापिता नेवारीलिपिनिबद्धा च वर्तते । वंशमणिः सङ्गीतशास्त्रस्य टीकारूपेणेमं ग्रन्थं रचयाम्बभूव । वंशमणेर्व्युत्पतिविशिष्टेयं टीकाऽन्यत्र दुर्लभा । अयं ग्रन्थो हि सङ्गीतशास्त्रप्रवर्धने नेपालराष्ट्रस्यैतिहासिकं योगदानं ख्यापयति ।

---

41. (क) हंसपुरे सुवेदी, संस्कृत वाङ्मय संक्षिप्त अध्ययन पा.वि.के. त्रि.वि.वि. प्र.सं. वि.सं. २०३७ पृ. ३२९ ।
(ख) पथिकृत् कौडिन्यायनः शिवराज आचार्यः, कार्यकर्तारश्च, कतिपयनैपालसंस्कृतग्रन्थकारपरिचयः प्रकाशिका, देवी आचार्यानी, स्वाध्यायशाला, काठमाडौं, प्र.सं., वि.सं. २०४८, पृ. १२-१३ ।
42. चतुरङ्गतरङ्गिण्याः, पाण्डुलिपौ, पृ. १ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदिवाक्यम्-

43"विश्वं स्थावरजङ्गमात्मकमिदं यस्याङ्गिकं वाङ्मयम्
सर्वं वाचिकमिन्दुसूर्यभगणमाहार्य्यमार्या जगुः ।
वीक्षामात्रकृताखिलत्रिभुवनो यः केवलं सात्विको
रुद्रः स्त्रीकृतसव्यभागसुभगो भूयात् स वः श्रेयसे ॥
श्री गणेशाय नमः
अज्ञानतिमिरदिनकरमानन्दसुधापूर्णेन्दुम् ।
तापत्रयापहरणं वन्दे परदेवताचरणम् ॥" इत्यादि ।

अन्तिमवाक्यम् -

44"नेपालाब्दे शशिशरमुनिव्यञ्जिते शुक्लपक्षे
पुष्ये गण्डे सुरगुरुदिने ..... दशम्याम् ।
लब्ध्वादेशं गुणगणनिधेः श्रीजगज्ज्योतिरीशात्
सङ्गीताद्यं समलिखदसौ भास्करं विज्ञ इन्दुः ॥" इत्यन्तम् ।

१.८.४ गीतदिगम्बरं नाम रूपकम्

नेपालराष्ट्रियाभिलेखालयस्य ग्रन्थपञ्जिकायामस्य ग्रन्थस्य पाण्डुलिपिः, "ल.सं. १- ३८२, वि.सं.ना. ०-११, प.सं. ४४, आकारः सी.एम., ३१, ३, ५, रीलसं. बी. १५1९" इत्यादिसङ्केतजातैः प्रत्यायिता तरङ्गचतुष्टयान्विता मैथिली लिपिनिबद्धा च वर्तते । १७१४ तमे विक्रमसंवत्सरे निर्मिता वंशमणेरद्य यावत् प्राप्तासु कृतिष्वन्तिमा कृतिरियमस्ति । प्रतापमल्लकृतस्य तुलादानस्यावसरेऽभिनयाय प्रणीतायामस्यां रूपकशास्त्रीयनियमानां नास्ति पूर्णो निर्वाहः । गौरीशङ्करलीलाविलसितं स्मरारेर्वैशिष्ट्यप्रतिपादकञ्चेदं रूपकं मैथिलीगीतिपद्यैश्च समलङ्कृतमस्ति ।

आदिवाक्यम्-

45"चिन्ता कामकलाकलापविषये भोगाय योगासनम्
जातेयं जपमालिकापि करयोः शृङ्गारहारो मम ।
पार्वत्याः प्रथमे समागमविधावित्यस्तु वः संस्तुवन्
पञ्चेषो रिपुपौरुषाणि जंगतामादिमुदि पूरुषः ॥" इत्यादि

---

43. रा.अ. वर्तमानायां सङ्गीतभास्करस्य, पाण्डुलिपौ, पृ. १।
44. तत्रैव, पृ. १९२ ।
45. रा.अ. स्थितस्य वि.सं.ना. ११ युतस्य गीतदिगम्बररूपकस्य पाण्डुलिपौ पृ. १ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१.८.५ निष्कर्षः

[46]कैश्चन "जगज्ज्योतिर्मल्लस्य वह्वीषु कृतिषु वंशमणेरुल्लेखात्, तासां प्रणेता वंशमणिरेव बभूव, राज्ञो नामनिर्देशस्तु बाध्यताजन्यः । राज्ञ आश्रये वर्तमानेन कविना राजमहत्त्वाकाङ्क्षापरिपूर्तये स्वयं विरच्यापि राज्ञः कर्तृता निर्दिष्टा" इति निरूपितम् । परन्तु सुष्ठु निभालिते नेदं क्वचन याथार्थ्येन स्वीकर्तुं शक्यते । यतो हि जगज्ज्योतिर्मल्लस्य वैदुष्यस्य प्रमाणपुष्टत्वात्, जगज्ज्योतिर्मल्लेन रचितानां कृतीनां वंशमणेः कर्तृत्वसिद्धये बलवत्तरप्रमाणाभावाच्च तत्कर्तृत्वसाधनमसङ्गतमेवेति मदीया धारणा । अत उपरि निर्दिष्टाश्चतस्रो रचना एव वंशमणेः प्रमाणसिद्धा रचना इति निष्कृष्यते ।

☆

46. रोहिणीप्रसादखतिवडामहोदयः, (पाण्डुलिपिरसिकपुस्तकमन्दिर याज्ञवल्क्याश्रम जनकपुरधाम, धनुषा), कतिपयानां वंशमणिग्रन्थानुशीलनपराणां विदुषामिदं मतं प्रत्यपादयत्, वंशमणिचर्चावसरे २०४७ तमे विक्रमसंवत्सरे मार्गशीर्षमासे जनकपुरधाम्नि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२- हरिकेलिमहाकाव्यस्य पाण्डुलिपीनां स्वरूपपरिचयः

विक्रमस्य सप्तदशशतकस्योत्तरार्द्धे वंशमणिना प्रणीतस्याद्य यावदप्रकाशितस्य हरिकेलिमहाकाव्यस्य पुरातत्वविभागान्तर्गते काष्ठमण्डपस्थे राष्ट्रियाभिलेखालये चतस्रः पाण्डुलिपयो रक्षिताः सन्ति । ता एवाश्रित्य प्रकृतग्रन्थसम्पादनकार्यं प्रवर्तितमिति तासां क-ख-ग-घनामभिः क्रमेण स्वरूपपर्यालोचनं विधीयते ।

२.१ "क" पाण्डुलिपिः

रा.अ. पञ्जिकायामियं पाण्डुलिपिर्निम्ननिर्दिष्टैः सङ्केतैः परिचायिता । यथा "पुस्तकनाम- हरिकेलिमहाकाव्यम्, ल.सं.पं. ७२४४, वि.सं. का. ८४१, प.सं. ११२, आकारः - सी.एम्. २७.८ X ७.४, रील सं. - ए. ३९८।२५, पंक्तिः १० इति । इयं पाण्डुलिपिः सर्वात्मना परिपूर्णा सप्तदशसर्गैर्युता स्पष्टा नेवारीलिपिनिबद्धा च वर्तते । ११२ पृष्ठैर्युताया अस्या विषयवस्तु १११ तमे पृष्ठ एव परिसमाप्यते । ११२तमं पृष्ठन्तु १११तमस्य पृष्ठस्यावरणरूपं रिक्तञ्च विद्यते । कदा ग्रन्थस्य प्रणयनारम्भो जातः कदा च ग्रन्थः समाप्तिं नीत इति तथ्यजातमस्यां न क्वचन सङ्केतितम् । ग्रन्थस्य प्रथमावरणपृष्ठे हरिकेलिमहाकाव्येनासंबद्धं पद्यद्वयं निर्दिष्टमस्ति । यथा-

[1]"कुलीन स्वाधीन भ्रमणपरिहीन प्रियतम
दयासिन्धो साधो शरणकरुणाभाजन विभो ।
अपीदानीमस्याः कुरु करुणमिन्दीवरदृशो
दशेयं प्राणेश क्षणमपि विलम्बं न सहते ॥
पीत्वा गर्जन्त्यपस्ते दिशि दिशि जलदास्त्वं शरण्यो गिरीणाम्
सुत्रामत्रासभाजामिह विटपिनां जन्मभूमिस्त्वमेव ।
गाम्भीर्यं तच्च तादृक् त्वयि सलिलनिधे किन्तु विज्ञाप्यमेतत्
सर्वोपायेन मैत्रावरुणमुनिकृपादृष्टयः कांक्षणीयाः ॥"

उभयोः पद्ययोर्मध्ये "हरिकेलिमहाकाव्यम्" इति ग्रन्थनाम लिखितमस्ति । द्वितीयपद्यस्याधश्च "नरनाथशर्म्मा"[2] इति कस्यचन नाम निरूपितमस्ति । कोऽसौ "नरनाथशर्म्मा" न ज्ञायते किमपि । सम्भवतोऽयं ग्रन्थसङ्ग्राहको भवेत् ।

ग्रन्थारम्भः -

[3]"नमो गणपतये
वन्दे सन्देहमन्देहदूरीकरणभास्वरौ ।
नित्यप्रकाशौ जगतो गुरू गौरीगिरीश्वरौ ॥१॥
अयं मम समारम्भो गोविन्दगुणकीर्तने ।
मेरुहेमसमाहारं शिशोरनुकरोति हि ॥२॥
अनिष्पन्नाभिधेयापि तथापि मम भारती ।
कस्य नानन्दयेदन्तः शिशूनामर्द्धवागिव ॥३॥

---

1. ह.के., क.पा.लि., आवरणपृष्ठे ।
2. तत्रैव ।
3. ह.के., क.पा.लि., पृ. १ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu



– "क" पाण्डुलिपरारम्भभाग. –

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

" क " नाण्डुक्यपा—भाग

थी॥ऊ॥ॐ कि ड्डू व कं स द सा य स त्य विधृ त वं सं चि कू त्र व म ञ्ञ न । ॐ या म य । ॐ मि न ल य ना सं ह
निग्निनी आदि व कू ॐ न्दं ॥ ग० ॥ ॐ मि रु न व मि वं सं कं ग क्क क मि रु या । ओं ल । धि म थ न सा न स्ह न
दा४ लुक्क गे ल न कू म उ य ज य ना दें ना दि न ये न दा ना । सू न म नू नू स ना हि ध्व । ल्यि ना वृ ह्वि अ ना ॥ ग
१ ॥ ना मा न मं ग ष्यि न वो य्र दम्य । दी नो स मा त न्द य नों सू वा ञ्ञो ३ । ध्या वा यृ थि ॥ नि वि ना य न क्ष । दि
म ञ्ञु या ते दि वं गी न वा चि ४ ॥ ग २ ॥ स मा दृ ये वं ग्री ज ॐ हृ य न मा वा ज म वि य । स मी क म ल्ला म य

कृ मि व वि नं व ञ्च ति ल्लि नं । स मा ना ना मि न्दु स्त्रि द ग म हि न ४ सू ह्वि न मं यं । स ना ना चि त्रं ग ध्व थि न य न
मा न न्द हि मि नं ॥ ग ३ ॥ कवि का यु ना म व क्र मि दं ॥ ॥ यि ना य स्या न्वि ञ्ञा नू थि व ह्ल न न च न्दु
मा या म य ला । ज ग त्स्या ना मा ना ज य म नि वि मि ग्री र वा नी व वं ग्या । कृ न न न ग्री वं ग म ति क वि ना
कृ ष्ण वा श ति रुध्य । स मा य स ग्नं यं नि नि न क न यू कं गृ ञ्ञ न सं ख्या ४ ॥ ॐ नि त्रि ल्व य श्र कू ला व नं
स म ति म हा या ध्या य ग्री वं ग मे ति ग म्न कृ नं हृ नि क लि ना म म हा का थं स मा प्तं ॥ ग ८ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

यस्य पादजलं गङ्गाऽनङ्गारेर्मौलिमण्डनम् ।
कीर्तितः स कथं न स्यादंघसंघहरो हरिः ॥४॥
अथ स्वनति जीमूते मङ्गलानकजालके ।
चन्चलानर्तकीनृत्ते प्रवृत्ते गगनाङ्गणे ॥५॥
प्रसन्नपांसुप्रकरपवनोपवनोदके ।
कालेऽसूतं जगत्सूतिं देवं देवकनन्दिनी ॥६॥" इत्यादि ।

ग्रन्थान्तपुष्पिका -

[4]"पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽति भव्ये ,
समापत् सर्गोऽयं शिशिरकरयुक्तस्य श्रृङ्गारसंख्यः ॥

इति विल्वपन्चकुलावतंसमणिमहोपाध्यायश्रीवंशमणिशर्म्मकृतं हरिकेलिनाम महाकाव्यं समाप्तम् ।" अखण्डितत्वात् सर्वपाण्डुलिपिश्रेष्ठत्वाच्चेयं मयाऽध्ययनसौविध्याय "क" पाण्डुलिपिसंज्ञया व्यवहृता ।

२.२ "ख" पाण्डुलिपिः

रा.अ. पञ्जिकायामियं पाण्डुलिपिर्निम्नप्रकारेण सङ्केतिता । यथा- "पुस्तक नाम- हरिकेलि काव्यम्, ल.सं.च. ७७६५, वि.सं.का. ८४२, प.सं. १०६, पङ्क्तिसं. १०, आकारः- सी.एम् ३७.७ X ७.८, रील सं. ए. ३९७२३।" नेवारीलिपिनिबद्धेयं पाण्डुलिपिः प्रारम्भिकेषु सर्गेषु मध्ये मध्ये आंशिकरूपेण भ्रष्टा वर्तते । प्रथमात् पृष्ठादारब्धो ग्रन्थः १०६तमे पृष्ठ एव परिसमाप्तः । अस्यां २६ पृष्ठतः ५१ पृष्ठपर्यन्तो भागो न लभ्यते । यद्यपि पञ्जिकायां १०६ पत्राणि निर्दिष्टानि, परन्तु पाण्डुलिपिदर्शने जाते मध्यवर्तीनि २६ पत्राणि खण्डितानि लभ्यन्ते । तदनुसारेण हरिकेलिमहाकाव्यस्य पञ्चमसर्गस्य षष्ठपद्यादारभ्य नवमसर्गस्याष्टमपद्यपर्यन्तो भागो न लभ्यते । इत्थमत्र षष्ठसप्तमाष्टमसर्गाः पूर्णतया खण्डिताः । पञ्चमसर्गस्य षष्ठपद्यादारभ्य सर्वो भागः खण्डितश्चेन्नवमसर्गस्य प्रारम्भिका अष्टौ श्लोकाः खण्डिताः । अस्यां पाण्डुलिपौ लेखकदौर्बल्यात् क्रमभङ्गोऽपि विलोक्यते । ग्रन्थस्य प्रथमावरणपृष्ठे "हरिकेलिकाव्यमिति व्यपदेशः । "क" पाण्डुलिपौ महाकाव्यपदप्रयोगः, "ख" पाण्डुलिपौ च काव्यपदप्रयोग इति तयोः शीर्षकसंबद्धमिदमन्तरं विलोक्यते । "क" पाण्डुलिपौ ग्रन्थारम्भमङ्गलाचरणे "नमो गणपतये" इति प्रयोगः, परं "ख" पाण्डुलिपौ "ॐ नमः शिवाय" इति व्यपदेशः ।

ग्रन्थारम्भः-

"ॐ नमः शिवाय
[5]वन्दे सन्देहमन्देहदूरीकरणभास्वरौ ।
नित्यप्रकाशौ जगतो गुरू गौरीगिरीश्वरौ ॥
अयं मम सभारम्भो गोविन्दगुणकीर्तने
मेरुहेमसमाहारं शिशोरनुकरोति हि ॥

4. तत्रैव, पृ. १११ ।
5. ह.के., ख.पा.लि., पृ. १ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ख. पाण्डुलिपेरारम्भभाग: -





- ... पाण्डुलिपेरात्मभागः -

रतिरुच्या समनायत्नात्प्रमोदयं शिशिरकानसंयुक्ता ।ट्ङ्गान संख्य ४॥ स्तुतिवि स्वच्छस्वच्छालावनं सम्भिमरुवायाधाय
श्रीवंभमणिभर्मकमदश्रिकालिनामसम्भाकार्यसनायकौ॥ ———— ॥स्तु ॥लोकगुणिनोगुणद्यकाशस्तुलिनामग्र
गनयनयो।कालकण्ठकूर्दनवे नसालाश्च विन्हुसक्रियनयन नगाक्षा ४॥६ इङ्गीतिस्त्रियमणलावनाताकुटिलस
स्मितनीक्षितजनस्फुरूपनीवादिनालिवीनयत्नागमयन्ति सनाकिङ्कना यवान ४॥ — ॥स्तुनात्सिरुनुलिखि
तमिदं ॥सम्वत् ३ परेत्रिति त्रावादस्सुदी ॥५ रो १ थकरु... सम्वत्सरके... रौनर ... यात्रा... नदिया...श्री॥

श्रीः

CC-0. In Public Domain. Digitization by eGangotri

अनिष्पन्नाभिधेयापि तथापि मम भारती ।
कस्य नानन्दयेदन्तः शिशूनामर्द्धवागिव ॥
यस्य पादजलं गङ्गाऽनङ्गारेमौलिर्मण्डनम् ।
कीर्तितः स कथं न स्यादंघसंघहरो हरिः ॥
अथ स्वनति जीमूते मङ्गलानकजालके ।
चन्चलानर्तकी नृत्ते प्रवृत्ते गगनाङ्गणे ॥
प्रसन्नपांसुप्रकरपवनोपवनोदके ।
कालेऽसूत जगत्सूतिं देवं देवकनन्दिनी ॥" इत्यादि ।

ग्रन्थान्तपुष्पिका -

6"पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽति भव्ये
समापत् सर्गोऽयं शिशिरकरसंयुक्तश्रृङ्गारसंख्यः ॥
इति विनुपञ्चवंशावतंसमणिमहोपाध्यायश्रीवंशमणिशर्म्मकृतं हरिकेलिनाम महाकाव्यं समाप्तम् ।"
पुष्पिकान्ते ग्रन्थेनासंबद्धं पद्यद्वयं नेवारीलिपावेव लिखितमस्ति । पद्यद्वयान्ते च ग्रन्थलेखकस्य नामसमयादिकं नेवारीभाषायां निर्दिष्टमस्ति । यथा-

7"सगुणा गुणिनां गुणप्रकाशा
गुणिनामश्र ……… तरेपरेषाम् ।
कलकण्ठकुहुरवै रसालाः
परिफुत्लन्ति परं परे न शालाः ॥
प्रकृतिस्त्वियमेणलोचनानाम्
कुटिलं सस्मितमीक्षितं जनेषु ।
इयतीव दिनानि दीनदेहा
गमयन्ति स्मरकिङ्करा युवानः ॥ सुरत्तिंहेन लिखितमिदम् । सम्वत् ९४९ ४ रो. १
थ्व कुहु श्री दोलेश्वरयाके रुद्रीयाज्ञ श्रीईश्वरीचरणयाता भाजु धनं दिया । शुभं श्री ।"
सगुणेत्यादिपद्यद्वयी सुरत्तिंहेन कुतश्चिदुद्धतेति सम्भाव्यते । पाण्डुलिपिश्चेयं "क" पाण्डुलिपेरक्षया दुर्बलत्वात्, ग-घ पाण्डुलिपिभ्याञ्चोत्तमत्वाद् व्यवहारसौकर्याय "ख" संज्ञया व्यवहृता ।

२.३ "ग" पाण्डुलिपिः

रा.अ. पञ्जिकायामियं "ग" पाण्डुलिपिरित्थं सङ्केतिता-"पुस्तकनाम कृष्णचरित्रकाव्यम् ल.सं.प्र. ४२७, वि.सं. १३९, प.सं. ४२, पंक्तिसं., १२, आकारः सी.एम् ३७.३ X ७, रीलसं. बी. ३११।२० इति" । नेवारीलिपिनिबद्धेयं पाण्डुलिपिरेकादशसर्गस्य ३७ तमपद्यात् समाप्तिपर्यन्तं खण्डिता वर्तते । पञ्जिकायां ४२ पत्रसंख्यायां निर्दिष्टायामपि ग्रन्थे ४३ पत्राणि सन्ति । यतो हि द्वितीयपत्रस्थाने प्रथमपदव्यवहारो जातः । प्रथमपत्रं संख्याशून्यमस्ति । रा.अ. पञ्जिकायां सूचीपत्रे च कृष्णकाव्यपदव्यवहार एव भ्रान्तिबीजं जातम् । इत्थं वंशमणे रचनासु

---

6. तत्रैव, पृ. १०६ ।
7. तत्रैव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

- ग - पाण्डुलिपिरारम्भभाग -

व५

१ॐ नमो महागणपतये॥ वन्दे सिन्दूरमन्दारह. दूर्वीकरणरावयीनित्यप्रकाशेजगतां ज्योतिर्मणीगिरीश्वरी॥ जयजयं समस्तानन्दाभिवन्द्य
गुणकीर्तनं संकृत्य नमस्कारं. निर्गुण्यं कलानिधि॥ अनिश्चनाशिधयायिनमथार्थविमस्वरावमां॥ कस्यनानन्दयः दन्त४गिगूनां सर्द
वागिव॥ यस्य पादकमलेगमा नमोऽवनौ लिमन्दना। कीर्तितं स्वकथं नस्या दयस्य स्वयहृश्वाङविश॥ अथ स्वनतिजीनूतमस्मलानकआलः
कांवच्छलाने लकीन्हरु. प्रवहरु गगनामृतनो। प्रसन्नयांशुप्रकते यन्नायनादकांकालरंसूतजगत्सूर्ति. दर्वदेवकनन्दिना॥ कूलकं॥ सत्व
वृद्धि४समासंसखलीकालश्वलास्तनो। वीजंवृजिनरुमस्यजागजकजगत्यनि॥ अयजलामसाल्लास. सवतवाधर्वस्तच्छवा॥ ओंनपिर्यं
गतानाक्र. वन्द्याधिगगाणवंचा॥ रुजिवरंसूत्रसंघातं विहायस्व सूवसंहृती॥ जायमानकगतायथ. विलोवायलसंद्भना॥ अभसन्नांसादित

निर्गसनिरवतीव. नगुतिताद नैर

श्रीकान्तहानाद मनादवा॥व नवनसूमनसा॥ गुवनस्तवनजना॥ दवानां नूर्द्धनिस्कृन. सांपूस्नानजप्रग॥ अस्वल कंसकान्तानां. कांगुलि
नककर्दुलको॥ अजापिजायतदव खिनमंगीतिकोवकांतकान्मलनूयदद्दणसमस्तेवंशिक्रियहेः॥ पूनायनरुयांदेवे. दर्वनिजगृहेजले
अध्रूवासंकिमेतासःयूनस्वासवप्रज॥ आगिनामंचसेगन्यारुद्रवेवकृवा॥ अर्थ्यलूकतयांक्विदिन्दूनूवस्करलक्षितः॥ वसूदवदस्त
वारस्हृद्ववकीसर्वदेवता॥ भो यांकिनूसअमो. पूनस्तनयंजलनो॥ हविक्तोसादंकस्तूवक्रवाविजक्षविहिः॥ आगतानमनिप्र. रूविहृषतहृवि
मेः॥ हजैनंसूवसंयमन. सिन्धनिर्मनक नन्दवेः॥ हसक्रिविवमदयां. नस्यायांसायसविमानू॥ संध्यानवसनसिद्धपीतमावीतयन्धिगः॥ यूजं
दजनमक्रागनाविबांवयपायूबन्॥ यिजाःयवमिद्धीधीतिं. कंसदंसपतस्कया॥ पूसःप्रादूवरूस्नया॥ गजगमगणयाविवे॥ कलापकं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

- ग. पाण्डुलिपेरन्तभागः -



CC-0. In Public Domain. Digitization by eGangotri

जनैर्हरिकेलिमहाकाव्यातिरिक्तस्य कृष्णकाव्यस्यापि परिगणना प्रारब्धा । ग्रन्थानां पाण्डुलिपीरनधीत्यैवानुसन्धित्सुभिरपि सूचीपत्रं पञ्जिकां च प्रमाणीकृत्य कृष्णकाव्यस्य पृथक् परिगणना विहिता । हरिकेलिमहाकाव्यस्य तथाकथितस्य च कृष्णकाव्यस्य विषयवस्तुपर्यालोचने कृते तत् काव्यं हरिकेलिमहाकाव्यस्यैवोत्तरार्धे खण्डितैकतमा पाण्डुलिपिरस्तीति सम्यगवम्यते । राष्ट्रियाभिलेखालये संबद्धविषयविशेषज्ञेषु सत्स्वपि कथमेषा महती त्रुटिर्जातेति विस्मयस्य विषयो वर्तते । विषयावगाहनाभावात् तुलनाऽभावाद् वैज्ञानिकसूचीपत्रनिर्माणकार्यस्यानारम्भाच्च सेयं स्थितिरापतितेति संभाव्यते ।

ग्रन्थारम्भ :-

"ॐ नमो महागणपतये
[8]वन्दे सन्देहमन्देहदूरीकरणभारवी ।
नित्यप्रकाशौ जगतो गुरू गौरीगिरीश्वरौ ॥
अयं मम समारम्भो गोविन्दगुणकीर्तने ।
मेरुहेमसमाहारं शिशोरनुकरोति हि ॥
अनिष्पन्नाभिधेयापि तथापि मम भारती ।
कस्य नानन्दयेदन्तः शिशूनामर्द्धवागिव ॥
यस्य पादजलं गङ्गाऽनङ्गारेमौर्लिमन्दनम् ।
कीर्तितः स कथं नस्यादंघसंघहरो हरिः ॥
अथ स्वनति जीमूते मङ्गलानकजालके ।
चन्चलानर्तकीनृत्ते प्रवृत्ते गगनाङ्गणे ॥
प्रसन्नपांसुप्रकरपवनोपवनोदके ।
कालेऽसूत जगत्सूतिं देवं देवकनन्दिनी ॥" इत्यादि ।

एकादशसर्गस्यान्तिमभागस्य खण्डितत्वाद् दिग्दर्शनार्थं "ग" पाण्डुलिपेर्दशमसर्गस्य सर्गान्तपुष्पिका निरूप्यते । यथा -

[9]"पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽतिभव्ये
गतो दिक्संख्याको रसिकहृदयोल्लासकः सर्ग एषः ॥"

तुलनायै "क" पाण्डुलिपेरयमेवांशो निरूप्यते । यथा-

"पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽतिभव्ये
गतो दिक्संख्याको रसिकहृदयोल्लासकः सर्ग एषः ॥"

"ग" पाण्डुलिपेरन्तिमवाक्यम् - (एकादशसर्गस्य ३७ तमं पद्यम्)

[10]"व्रजस्त्रीणां चेतो मधुरमुरलीनादमधुभिः

---

8. ह.के., ग.पा.लि., पृ. १ ।
9. ह.के., ग.पा.लि., पृ. ३९ ।
10. तत्रैव, पृ. ४३ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समासिञ्चन् .... ॥" (अतः परं खण्डितम्)

तुलनार्थे "क" पाण्डुलिपेरेकादशसर्गस्य ३७ तमं पद्यम्-

"व्रजस्त्रीणां चेतो मधुरमुरलीनादमधुभिः
समासिञ्चन्नुच्चैः कनकरुचिकौशेयवसनः ।
कदा नः कालिन्दीतटभुवि भवेदक्षिविषयो
विषक्तः शृङ्गारे सकलसुखसारे हरिघन : ॥"

विद्वांसः स्वयमेव विदाङ्कुर्वन्तु तथाकथितकृष्णकाव्यस्य प्रकृतहरिकेलिमहाकाव्यस्य च सर्वात्मना विषयैक्यमुपरिनिरूपितैः प्रमाणजातैः । अतस्तत् कृष्णचरितकाव्यं हरिकेलिमहाकाव्यमेवेति सिद्धम् । "ख" पाण्डुलिपेरपेक्षयाऽधिकं खण्डितत्वादियं पाण्डुलिपिर्व्यवहारसौकर्याय "ग" पाण्डुलिपिरिति व्यवहृता ।

२.४ "घ" पाण्डुलिपिः

रा.अ. पञ्जिकायां "घ" पाण्डुलिपिरित्थं सङ्केतिता- "पुस्तकनाम- हरिकिला महाकाव्य, ल.सं.पं. ७२८२, वि.सं. ८७२, प.सं. २७. पङ्क्तिसं. ६, आकारः सी.एम् २१. ४,७, ७ री.सं. ए १०५८।१०, माइक्रोफिल्मपरिचयपत्रे चांग्ललियौ HARIKILA इति निरूपितम् । सर्वात्मना भ्रष्टेयं देवनागरीलिपिनिबद्धा पाण्डुलिपिः । अस्यां नास्ति कश्चन सर्गः परिपूर्णः । प्रथमसर्गस्य षष्ठसर्गस्य, सप्तमसर्गस्य, नवमसर्गस्य, पञ्चदशषोडशसप्तदशसर्गाणां च नैकमपि पद्यमत्र लभ्यते । पत्रेष्वपि ६, ९, १५-१६, १६, १७, १८, १९, २९, ३२, ३४, ३५, ८०, ८१, ८३, ८७, ९१, १००-१०४, १०६-११०, संख्यकान्येवावशिष्टानि । पद्येष्वपि-द्वितीयसर्गस्य २-९, ३६-६४ संख्यकानि, तृतीय सर्गस्य १-१६ संख्यकानि, चतुर्थसर्गस्य १४-२०,४०-५३ संख्यकानि, पञ्चमसर्गस्य १-६ संख्यकानि, अष्टमसर्गस्य ८-१४ संख्यकानि, दशमसर्गस्य २७-४०, ४७-५३ संख्यकानि, एकादशसर्गस्य १-१५ संख्यकानि, चतुर्दशसर्गस्य २९-३५ संख्यकानि च पद्यानि तेषु तेषु पृष्ठेषु निहितानि सन्ति । एकादशसर्गस्यैव सर्गान्तपुष्पिकाऽवशिष्टा नान्येषाम् । प्रचुराभिरशुद्धिभिरस्याः पाण्डुलिपेर्यल्लब्धं तत् स्वरूपं दूषितमस्ति । पत्रविन्यासोऽपि नास्ति क्रमानुसारी । दिग्दर्शनार्थमस्या एकादशसर्गस्य पुष्पिका निरूप्यते-

[11]"अथ यदकुलनाथ नाथमासाद्य सद्यो
विविधवनविलासायासजनश्रमेण ॥
धरणिवलयधन्या गोपकन्यास्तटिन्याः ।
तपन .... हितुरेतास्तीरमापुः समेताः ॥
पिता यस्येति । कृते तेन श्रीवंशमधिकविना कृष्णकाव्येऽति भव्येऽगमत्
सर्गो नैसर्गिकगुणमयो भ...... संख्यासमेतः ॥

सर्वाधिकतया खण्डितत्वाद् विश्रृंखलितत्वादशुद्धिबाहुल्याच्चेयं पाण्डुलिपिः "घ" पाण्डुलिपिरिति व्यवहृता ।

---

11. ह.के., घ.पा.लि., पृ. ११० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

केशमध्यगुगर्भकइत्यमाः।१ - "ग" भागशोभा समाप्ता -

केशः केशादि पूर्वः स्यात्तन्द्रि वर्गपूर्वकः। स्यकर्ण वीतिसाम्यथ्या न्मृगपसादि वन्धने २

जयति गर्भकं दाममग्नन्थिवन्धकचिर स्कचभासः। ऊर्ध्वगो वेदनच न्द्रमयूखे ध्वान्तजालमिव पृष्ठपिनद्धः। कामकेलिविपिनेकचभावे सन्निमग्न जनचित्तमृगाणाम्। बन्धनाय निहितं वरवध्वा कालपाश इवराजति वेणी। भालदेशइहवालमृगाक्ष्या भाति नागजरजः क्षतबिन्दुः। पूजितः स्मृति भुवाज मोहबन्धुजीवकुसुमेन किमिन्दुः। यौवनप्रसभरस्मारलीलाभङ्गसाकरः सवारिविबिम्बो।। मोचनेकल

भङ्गःस्तरजमिर्वलमाः।१ मिधुं नागसम्भवमिवाः २

- "द" पाण्डुरपरा समाप्ता -

तमोन्धकारे स्वर्भानौ तमः। शोके गुणान्तरे। इतिनानार्थकोषः।।१

हरिकेली गोप्यः। यदुकुलमणि रपि सहसा तासांमन्तस्तमसिरं श्च को ।। अथयदुकुलनाथनाथमासाद्य सद्यो विविधवनविलासायासजनश्रमेण। धरणिवलयधन्या गोपकन्यास्तरिन्यास्तपनदुहितासीरमा पुःश्रमेताः।। पिता पस्थिति। कृते तेनश्रीवंशमधिक विना कृष्णा काद्ये ऽतिभयेऽग मतुर्गोने तार्गक गुणनयोभसंख्या समेतः।। ।। इति हरिकेली चे कादशः सर्गः।। ।।

११८

CC-0. In Public Domain. Digitization by eGangotri

२.५ निष्कर्षः

अद्यावधि केनाप्यप्रकाशितस्य हरिकेलिमहाकाव्यस्य राष्ट्रियाभिलेखालये काष्ठमण्डपे वर्तःमानाश्चतस्रः पाण्डुलिपयो विमृष्टाः । पञ्चमषष्ठसप्तमाष्टमसर्गाणामध्ययने क.ग. पाण्डुलिप्योः, एकादशद्वादशत्रयोदशचतुर्दशपञ्चदशषोडशसप्तदशसर्गाणामध्यने च क.ख. पाण्डुलिप्योरतुलनीयं, योगदानमस्ति । परं हरिकेलिमहाकाव्यस्य सर्वाङ्गशुद्धये सर्वासामेव पाण्डुलिपीनां न्यूनाधिकं योगदानं सञ्जातमिति निष्कृष्यते ।

☆

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३ हरिकेलिमहाकाव्यस्य विषयवस्तुपरिशीलनम्

वाणीविच्छित्तिशिल्पिना महाकविना वंशमणिना ससंरम्भं प्रणीतस्य हरिकेलिमहाकाव्यस्य कथावस्तु संसृतिनाट्यशिल्पिनः श्रीकृष्णचन्द्रस्य विश्वमङ्गल्याय मङ्गलमयाविर्भावप्रसङ्गतो नृशंसस्य कंसस्यावसानपर्यन्तायां बालकेलिविलसितायां पुराणप्रशस्तायां कथायामाधारितमस्ति । वंशमणिप्रतिभया विजृम्भितं तत्कथावस्तु नवनीतमिव मधुरं परमाह्लादजननं च सञ्जातमस्ति सहृदयानां कृते । अस्मिन् प्रकरणे हरिकेलिमहाकाव्यस्य सर्गसारप्रकाशनपुरःसरं कृष्णकथाया आधिकारिकं महनीयञ्च धरातलं व्याकृत्य हरिकेलिमहाकाव्यस्य मौलानाधारग्रन्थांश्च परामृश्य वंशमणेर्वस्तुगुम्फनवैशिष्ट्यं विविच्यते सोपपत्तिकम् ।

३.१ सर्गसारः

(क) प्रथमो हरिजनिसर्गः

गौरीगिरीश्वरसंस्मरणमङ्गलमयः सर्गारम्भो महाकाव्यारम्भश्च । अशेषकल्मषविनाशिनी कृष्णकथेति विभाव्य मया तद्गुणकीर्तने चापल्यमाचरितमिति वस्तुनिर्देशो वंशमणिना व्यधायि । कृष्णावतारप्रभावितं प्रकृतिस्वास्थ्यं प्रकाश्य शङ्खचक्रादिसमलङ्कृतस्य चतुर्भुजस्यावतरणं च तेन न्यरूपि । भक्तिविह्वलेन वसुदेवेन कृतां हृद्यामनवद्याञ्च भगवतः स्तुतिं हृदयहारितया वचसां विषयीकृत्य कविना वसुदेवस्तुतिमाध्यमेन कंसादिदानवनिर्दलनरूपं कृष्णावतारस्य प्रमुखं प्रयोजनमत्र प्राकाशि । शिशुभावेन वर्तनायानुरोधयन्तं वसुदेवं प्रति मां गोकुलं प्रापयेति कृष्णनिर्देशं निरूप्य तदैव गोकुले यशोदाकुक्षितो योगमाया जनिं लेभे इति तथ्यं कविरत्र निरदिशत् । कविनिरूपणानुसारेण ततो वसुदेवः कृष्णमादाय गोकुलाय प्रतस्थितवान् । तदाऽदृश्यं दृश्यतां यातं वर्त्मापङ्कतां प्राप्तं भोगिनश्च भोगमालासु दीपमालामदीदिपन् । द्वारबन्धाः स्वयं विमुक्ताः । प्रकाशपूरश्चतुर्दिक्षु प्रावर्तत । दुस्तारा यमुनाऽनेनातारि । सर्वमेतद् भगवत्प्रतापजन्यं बभूव । यशोदायाः सूतिभवनं प्राप्य तनयस्थाने योगमायामादाय वसुदेवो मथुरामाजगाम । तदागमनोत्तरकाल एव निद्रावशङ्गता द्वारपाला लब्धचेतना बभूवुः । तेभ्यो देवक्याः सूतिं विज्ञाय कंसस्तत्रागत्य देवकीहस्ताद्दारिकामाच्छिद्य तां पाषाणे पोथयामास । साऽपि जगज्जननी तद्धस्ताद् व्योम गत्वा कंस ! वृथा मां किं हंसि तवान्तकस्तु गूढमिहोत्पन्नोऽन्य एव कश्चनेत्युदीर्यान्तर्हिता । दग्धहृदयः कंसस्तृणावर्तादिभिः सार्धं बालवध्याविषये मन्त्रणां चकार । श्रीकृष्णचन्द्रस्तु सहजेन बालभावेन गोकुले यशोदानन्दयोः प्रीतिराशिं समेधयामास । योगमायेश्वरोऽप्यहं मायावशो जात इति चिन्तयन् कृष्णः स्वैरमहसत् । ममेयं माया घोरा, यया जगच्चक्रं पीड्यत इति स्मारं स्मारं च स रुरोदेति । अन्ते च कविः परब्रह्मणो निखिलब्रह्माण्डहेतुभूतस्य नन्दगृहे जीर्णवस्त्रेषु शयनं विस्मयप्रदमिति निरूप्य पुष्पिकापद्येन स्वपरिचयं प्रस्तुतवान् ।

(ख) द्वितीयो वृन्दावनप्रस्थानसर्गः

शिशुघातपातकेषु दीक्षिता पूतना नृशंसेन कंसेन प्रेरिता मानवान् मदयन्ती मोहयन्ती च गोकुलं प्राप्य यशोदाशयने स्थितस्य श्रीकृष्णस्य मुखे विषाक्तं स्तनं प्रवेशयामास । कृष्णोऽपि तां बालमारीमरिनारीं विदित्वा स्तन्येन सह तस्या असूनपि पपौ । गुरुगर्जकरी सा जगदेव कम्पयन्ती भूमौ पपात । चकिता गोपाः पर्वताकारं तच्छरीरं खण्ड-खण्डं विधाय व्रजादन्यत्र निन्युः । ततः कंसादेशेन कृत्यासहितस्तृणावर्तश्चक्रानिलचालनेन गोकुलमाकुलयाञ्चकार । यशोदाशयनान् मुकुन्दमपहृत्य नाकपालीं प्रपेदे । कृष्णोऽपि स्वमायाबलतस्तमाकृष्य मुष्टिप्रहारेण निष्प्राणं चकार ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्निष्प्राणदेहपतनवेलायां गिरयो वारिधयश्च रयोपपन्ना जाताः । सहसा भयभीतया यशोदया समाकृष्य गृहं नीतो बालकृष्णस्तदङ्कपालौ निषण्णो हेमलतासने निविष्टा मारकती प्रतिमेव व्यराजीत्। एकदा माता यशोदा तं शकटस्य निकटेऽशाययत् । कंसनिदेशतः समागतः शकटासुरो भूतवत् शकटं प्रविष्टः । कृष्णोऽपि शकटं स्वशरीरे पतयालु विद्यत इति विमृश्य चरणाग्रकेण किञ्चित् चालयामास । ततः शकटासुरग्रस्तं शकटं पातकवद् भूमौ पपात । यशोदा द्रुतं समागत्य बालारिष्टशमनपूर्वकं कृष्णं गृहं निनाय । ततो गर्गोदितनामधेयौ रामकृष्णौ गोकुले सानन्दं बालभावेन विचेरतुः । यशोदा च दधिमन्थने प्रवृत्ता जगत्प्रीतिकरं गानं जगौ । तत्पार्श्ववर्ती कृष्णो नवनीतखण्डे सतृष्णो बभूव । सा च सहठं तं पातनकातरेण करेणोदताडयत् । तं नियन्तुमसमर्था सा दाम्ना बद्धुमना बभूव । तदा च सन्दानने यद्यदुपाददे तत्तदेवापर्याप्तं जातम् । यशोदां नितरामुद्विग्नां विलोक्य कृष्णो लघुनैव दाम्नाऽऽत्मानमबन्धयत् । ततो लोके स दामोदर इति प्रथां गतः । ततः सा तं निकटवर्तिन्युलूखले समाबध्य दधिमन्थनपरा जाता । कृष्णश्च सोलूखल एव यमलार्जुनयोर्मध्यं प्राप्य कुन्जरवत् तौ बभञ्ज । पूर्वमभिशप्तौ यक्षौ मणिग्रीवनलकूवरौ कृष्णकृपया पुनः स्वरूपमाप्तौ तं प्रणम्य स्वस्थानं जग्मतुः । तत उपनन्दप्रमुखा नन्दमुख्याश्च गोपा गोकुलमुत्पातपरम्पराकुलं वीक्ष्य वृन्दावनाय प्रतस्थिरे । यत्र गोलोकाधिपतेश्छाया नित्यं सन्निहिता तद् वृन्दावनं निसर्गरमणीयं विलोक्य ते सर्व एव मुमुदुः ।

(ग) <u>तृतीयः कृष्णकिशोरकेलिसर्गः</u>

लताभिस्तरुभिः पुष्पैर्मन्दसमीरैः पिकीपञ्चमनादैर्भृङ्गीकलनादैश्च भृशमानन्दिता नन्दादयो गोपाः सर्वर्तुविराजिते वृन्दावने भानुकन्याया आतिथ्यलाभेन तन्नन्दनमेवामंसत । यमुनापुलिने गोकुलवासिनां प्रभूता घोषा निर्मिता आसन् । यत उद्भूतेन घृतसौरभ्येण सर्वा एव दिशः प्रसेदुः । कृष्णोऽपि वृन्दावने विहरन् लोभनीयेन विलासेन वल्गुना हासेन च पित्रोरन्येषाञ्च प्रीतिनदीं प्रवर्धयामास । ततः क्रमेण स सौन्दर्येण सौजन्येन च व्रजसुन्दरीणां नयनासेचनको बभूव । किङ्किणीकङ्कणमनोहरो बालकृष्णो बलेन गोवत्सपुच्छं विकर्षन् अपरः कामदेव इव वृन्दावने विचचार । एकदा सखिभिर्वारितोऽपि स मृदं भक्षितवान् । तद्वयस्यैस्तद्वृतान्तं ज्ञात्वा माता यशोदा तं परुषाक्षरैस्तर्जिवती । कृष्णस्तु "मातर्नाहं मृदं भक्षितवान् सर्वे सखायो मिथ्याभिशंसिनः, पश्य मम मुखम्" इत्युदीर्य मुखं व्याददे । सा च व्यादीयमाने तन्मुखे ब्रह्माण्डमेव विलोकितवती । चकितायास्तस्या हृदयतः तां घटनां निःसार्य स पुनर्बालभावेन तां मोहयामास । एकदा कस्यचनान्धविप्रस्य पुत्रः केलिसमये कृष्णेन धूलिभिस्ताडितः । स चान्धपुत्रः सत्वरं रुदन् पितरं प्राप्य कृष्णापराधं निजगाद । स चान्धविप्रः सक्रोधं साक्रोशं च कृष्णं प्रति वचनीयं व्याजहार । कृष्णोऽपि "ब्रह्मन् । अहं ब्राह्मणेभ्यो बिभेमि, मया तव पुत्रे कश्चनापराधो न विहितः । यदि नो विश्वसिषि तर्हि पश्य तव पुत्रस्य कुत्र रजोघातम्" इति श्रुत्वा स यदैव दिदृक्षुः समपद्यत तदैव विकसितनयनपङ्कजो निष्पन्नः । लब्धनेत्रशक्तिरसौ विप्रस्ततो भावगम्भीरया गिरा भगवन्तमस्तौत् । भगवन् । भिन्नानन्दकर । शरणार्तिहारिन् । भक्तपालक । नाहं भक्तो नाहं मित्रं न च शरणागतस्तथापि पूर्वमजामिलस्योद्धारो यया रीत्या विहितस्तयैव मामप्युद्धर । तव कृपया बधिरः श्रृणोति पङ्गुर्नरीनृत्यति चक्षुर्हीनश्च पश्यति । त्वया ममात्मा प्रकटीकृत इति । ततः स भगवदनुकम्पया चर्मचक्षुर्ज्ञानचक्षुश्च लब्ध्वा पुत्रेण साकं गृहं जगाम ।

घ) <u>चतुर्थो हरिविक्रमसर्गः</u>

नन्दः "स्ववर्णधर्माश्रयणं श्रियः पदम्" इत्युपदिश्यासन्नयौवनं कृष्णं गोचारणाय निदिष्टवान् । शिखण्डमण्डनो यशोदानन्दनोऽपि गोचारणकैतवाद् वृन्दावने विचचार । हरेरुपस्थित्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृन्दावनप्रकृतिः सर्वकामपूरा समजनि । दुष्टा वृन्दावनं सहसैव स्वयं तत्यजुः । कृष्णमेघदर्शनोन्मत्ता मयूरास्तरौ तरौ नृत्यन्तः सानन्दं केकाध्वनिं चक्रुः । तदैव कंसप्रेरितो वृषासुरो निकषा कृष्णं विननर्द । विकरालं दानवं विलोक्य भयभीतान् पलायितान् गोपान् रिरक्षिषुः कृष्णो वृषाकारस्य तस्य पश्चात्तनौ पादौ विगृह्य कपित्थमूले विनिपात्य तं गतासुं चकार । ततः प्रसन्नै गोपैः सह कृष्णो यमुनाकुञ्जेषु विचचार । तदैव बकाकृतिर्बकासुरो हरिं जिघांसन् समागत्य गुहाकारं मुखं व्यादाय तमगिलत् । अन्तर्गतस्य कृष्णस्य तप्तलौहसमानेन तापेन संतप्तो बको भगवन्तमुज्जगार । ततः कृष्णस्तं नृसिंहो हिरण्यकशिपुमिव व्यदारयत् । कृष्णहस्ताल्लब्धमृत्युरसौ देवैरपि सत्कृतः प्राप्तदिव्यरूपो दिव्यं धाम जगाम । ततोऽपरेद्युर्वृन्दावने सानन्दं कृष्णविहारं विलोक्य क्रुद्धोऽघासुरः पूतनाबकासुरहत्यया समिद्धरोषः पर्वताकारं स्वरूपमास्थाय सर्वान् सकृष्णान् गोपान् स्वोदरे स्थापयामास । तदुदरान्तर्गतः कृष्णस्तस्य शिरोविदारणपुरःसरं प्राणान्तं चकार । बलेन धेनुके हते सति शेषनागशिरसि सुरैः पुष्पवृष्टिरकारि । गोपाश्चानन्दिता गोचारणं चक्रुः ।

(ङ) <u>पञ्चमः कालियदमनसर्गः</u>

भगवति गोविन्दे प्रतिकाननं गोचारणपरे तमेव निषेवितुमिव वृन्दावने ग्रीष्मर्तुराजगाम । रजन्यो दीर्घतमा जाताः । दिवसा अवसानरमणीया संवृत्ताः । चन्दनलेपनं शिरीषसेवनञ्च संतापपरिहारौषधं जातम् । काननेषु मल्लीमुकुलानि रेजुः । पाटलितरवश्च निजेन पाटलिम्ना मन्मथोद्दीपकाः समपद्यन्त । पयः स्वयं तप्तं सत् क्षीणं जातम् । निद्राबाधितैर्जनैर्दिनमपि मध्यमरात्रतां प्रपेदे । भृङ्गाश्च गजपतिगण्डमण्डलानि विहाय पुन्नागेषु पतयालवो बभूवुः । कराले ग्रीष्मकाले सहसा दावाग्निर्जज्वाल । प्रकृतिरेव ज्वालामयी समपद्यत । खगा जन्तवश्च विपन्ना जाताः । गोपाश्च दावाग्निदग्धा भगवन्तं कृष्णचन्द्रमेव संस्मरुः । खगानां सत्रासमुड्डयनं मृगाणां पलायनं सिंहानां गिरिलङ्घनं जम्बुकानां शशानां च काननान्तरेषु विलयनं गोपानामार्तभावं च विलोक्य करुणापारावारः श्रीकृष्णो गोपान् निमीलतनयनान् विधाय सहसा दावानलमगिलत् । तदा प्रकृतिः स्वस्था जाता । सकला जीवाः प्रसन्ना बभूवुः । सन्तापतप्ताश्च गोपा अवगाहितुं भानुकन्यां प्रापुः । तृषार्तास्ते यामुनं सलिलमपिबन् परन्तु क्षणादेव मूर्च्छिताः सन्तो भूमौ पेतुः । कृष्णश्च तान् सत्वरमेव योगबलेनाजीवयत् । ततः स यामुने ह्रदे वसतः कालियस्य दमने प्रवृत्तो बभूव । कालिन्दीह्रदं लोलयन्तं भगवन्तं वीक्ष्य रोषारुणः कालियो मुकुन्दमदशत् । सर्वे गोपा विचेतनं कृष्णं वीक्ष्य संत्रस्ता बभूवुः । केचन गृहं पलायिताः । तमुदन्तं ज्ञात्वा तत्र सम्प्राप्ता गृहवासिनोऽपि कृष्णस्य हृदयविदारिणीमवस्थां विलोक्य मूर्च्छिता बभूवुः । तेष्वेक एव हलधरः स्वस्थ आसीत् । बलरामश्च श्रीकृष्णं स्वरूपमबोधयत् । ततः कृष्णस्य वर्धमाने वपुषि संकीर्णतामापन्नो भुजगबन्धः स्वयमच्छिनत् । कृष्णः कालियमौलीन् भृशमुन्मथ्य सानन्दं ननर्त । मौलिमन्थनेनोत्पीडितः कालियो लोहितवमनं चकार । तदैव भर्तृदुःखेन दुःखितो नागिनीगणो भगवन्तमस्तौत् । ततः प्रसन्नेन कृष्णेन समुद्रप्रयाणायादिष्टः सनागिनीगणः कालियो रमणकं द्वीपं जगाम । कृष्णश्च सबन्धुर्गृहं प्रस्थितः ।

(च) <u>षष्ठो गिरिधारणसर्गः</u>

यामुनेषु कुञ्जेषु गोचारणपरे श्रीकृष्णे कुतुहली विधिः श्रीकृष्णस्य गोवत्सानां गोपानाञ्चापहरणं चक्रे । बहुशो गवेषणेऽपि तेषामलाभेन चिन्तनपरः कृष्णस्तद् विधिकृतं निकृतमेवावैत । ततो भगवान् पशुपालकुटुम्बिनां चिन्तां परिहर्तुं विरिञ्चेश्च कुतूहलं वर्धयितुं सकलवत्सपवत्सवपुर्धरोऽभवत् । ततो ताभिर्निजमूर्तिभिरेव समयं यापयामास । कृतका अपि ते वत्साः स्वाभाविका इवाभवन् । व्रजेऽपि मातरो बालकान् स्वाभाविकानेव मत्वा व्यवहारं चक्रुः । ब्रह्मणा कृष्णस्य सा योगमायेश्वरता व्यलोकि । पुनर्वृन्दावनं प्राप्तेन तेन भगवद्रूपा वत्सा गोपाश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नयनातिथीकृताः । गोपानां भगद्रूपतां भगवन्मयताञ्च विलोक्य विस्मितो ब्रह्मा तं पुराणपुरुषं भगवन्तं-नुनाव । श्रुतिसंस्तुतः पुरुषोत्तमस्त्वमसि भगवन् । अहमस्मि सापराधो जनः, क्षमस्व ममापराधमित्युदीर्य विधिर्विनीतभावेन स्वापहृतान् वत्सादीन् समर्प्य निजधाम जगाम । तदैव वृन्दावने वर्षर्तोर्लक्षणानि प्रादुर्भूतानि । सरितः सरांसि च क्रमेण रसाधिकानि समपद्यन्त । अनुदिनं घनमण्डले मुखरता सरितां रये च प्रखरता ववृधे । तमोमयी निशा झिल्लीझङ्कारैः प्राणिनां त्रासजननी संवृत्ता । वनेषूपवनेषु च मयूरैस्ताण्डवमकारि । कदम्बानां शोभा समृद्धा, केतकरजः सर्वतः प्रसृमरं संवृत्तम् । घनमालया दिनमणौ मुषिते दिनमपि निशामयमभवत् । तदा व्रजवासिभिरिन्द्रयागस्य प्रबन्धः प्रारब्धः । श्रीकृष्णस्तान् "वयममी पशुपालनवृत्तयो गिरिचरा गिरिमेव यजामहे" इत्यभिधाय वासवपूजनान्निवर्त्य गिरिराजस्य गोवर्धनस्य पूजायै प्रवर्तयामास । रोषाविष्टो वासवो मेघान् भूरिवर्षाभिर्व्रजाप्लावनाय निर्दिदेश । ते च जगन्नाशाय प्रवृत्ताः पापगणा इव व्रजं रोद्धुं महारयधारया सकरकाणि पयांसि ववृषुः । तद्वर्षणं दीर्घकालिकं विभीषिकामयं चानुभूय विपन्ना व्रजवासिनः श्रीकृष्णमेव शरणं जग्मुः । भगवानपि भूमितलतो गिरिवरं गोवर्धनमुत्खाय सप्तदिनानि यावद् हस्तेनैकेन दधार । कृष्णेन गोवर्धने छत्रीकृते वासवस्य कृत्यारूपा मेघमण्डली तमेवाजगाम । वृन्दावनञ्च निराविलं मनोहरञ्च संवृत्तम् ।

(छ) <u>सप्तमः शरन्निरूपणसर्गः</u>

वृन्दावनविहारिणो योगमायेश्वरस्य श्रीकृष्णचन्द्रस्य महिमानमात्मसात्कृत्य स्वापराधपरिमार्जनोत्सुको वासवः श्रीकृष्णं शरणमेत्य पुरूक्तिभिस्तुष्टुवे- "यत्तनौ कोटिकोटिब्रह्माण्डान्यालुठन्ति तस्मै शाश्वताय ब्रह्मणे नमः, भगवन् । मया गोकुले यत् कदनं कृतं तत्क्षमस्व, पुत्रेण पितुः शरीरे चरणे स्थापिते पिता प्रसन्न एव भवति, तद्वद् बालस्य वासवस्यापराधं मत्वा भगवन् । मयि करुणां कुरु" 'इत्यादि वचनजातैर्भगवन्तं संस्तूय भगवता सप्रेम निरीक्षितोऽनुमोदितश्च स त्रिदिवं ययौ । क्रमेणोपनिषण्णयौवनः कृष्णो यौवतस्य हृदयानि हर्तुं प्रारभत । यौवते राधैव तस्य प्राणाधिका प्रेयसी संवृत्ताः । कृष्णकेलिकौतुकेनावर्जिताः काश्चन गोप्यस्तच्चिन्तनप्राणा एव व्यजायन्त । काश्चन तच्चिन्तनविस्मृतशरीरधर्माः कामबाणैरपत्रपाश्च संवृत्ताः । काचन गोपी कृष्णमोहसागरे मग्ना जागरेणैव समस्तां रजनीमयापयत् । काचन श्रुत्वैव तन्नाम मूर्च्छिता बभूव । काचन भावविह्वलेत्थं व्याजहार-

"मग्न एव मनसि श्रितः श्रुतौ वाचि बद्ध इव वर्तते सदा ।
लोचनस्य न तथापिगोचरश्चित्रमालि वनमालिचन्द्रमाः ॥" (७२५)

इत्यमनन्यमनसां व्रजसुन्दरीणां गोकुले कृष्णसंबद्धा नैकविधाः कथा ववृतिरे । कृष्णदृष्टिपरिभूतचेतसां दिने दिने मादनं कदनञ्च विहाय नान्या कथा भवति । ईदृश्यां वेलायां भगवन्तं सेवितुमिव शरन्नायिका धरणीतलेऽवततार । श्रीधरसेवायां समर्पितया शरदा गगने नैर्मल्यमाविष्कृतं, धरणीतले निष्पङ्कत्वं साधितं, काननेषु च कमनीयत्वं प्रकाशितम् । कलमगोपीनां गीतयः काननेष्वगुञ्जन् । कलावतो निर्मलं बिम्बं रजन्यां प्रकाशितम् । विष्णोर्नयनरूपौ सूर्याचन्द्रमसौ समानरूपेण ज्योतिर्मयौ संवृत्तौ । कुमुदानि मोदितानि । शारदी विभावरी नितरां शुशुभे । दिशो निर्मलाः प्रसादपूर्णाश्च बभुः । शेफालीवनानि मधुकरगुञ्जनैर्झङ्कृतानि बभूवुः । एतादृशि रसमये शरत्समये रासेश्वरः श्रीकृष्णो गोपीभिः साकं रासानन्दमग्नस्तासां मानसेषु रसकासारं वितेने । राधिकाकृष्णयोर्विहारस्तु सच्चिदानन्दमयो योगिगम्य एव संवृत्तः । एतस्मिन्नानन्दमये समये राधिकां कृष्णञ्च हन्तुमागतोऽरिष्टो भगवता घाटामोटितकमाश्रित्य सगलग्राहं व्यापादितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(ज) अष्टमः कामिनीकेलिसर्गः

परमानन्दधाम्नि परमेश्वरे श्रीकृष्णचन्द्रे व्रजं गते विकासकृतकौतुका वृषभानुनन्दिनी राधा नितरां पर्याकुला सती सखीं मेधां बभाण- "सखि ! मन्मथो मानसं नितरां मथ्नाति, प्राणधारणं दुःसहं जातं मन्मङ्गल्याय नन्दनन्दनं जीवनौषधमिहानीय सख्यं सार्थकं विधेहि" इति । एतद्राधिकावचनेन प्रेरिता मेधा कृष्णसमीपं जगाम । स्वे गृहे कमनीये शयनीये शयानं माधवं सम्बोध्य मेधा राधिकासौन्दर्यं प्रशशंस । ततः पर्युत्सुकं कृष्णमनुभूय राधिकाया विरहविकलां दशां विज्ञाप्य निवेदितवती- "कृष्ण ! तव शोभा प्रेयसी राधिकैव नान्या, कौमुदी शीतकरेण मिलतु नान्येनेति" । मेधावचनेन राधिकासौन्दर्येण चावर्जितहृदयः कृष्णः सपदि राधिकां द्रष्टुं प्रतस्थे । राधिकागृहे मेधा कृष्णचरणौ प्रक्षालितवती । राधिका च समाधुर्यं सव्रीडञ्च वीक्ष्य किमपि किमपि हृदयेश्वरं निवेदितवती । अतः कृष्णो रागवान् भवमिव राधिकाया भोगभवनं प्रविष्टः । तत्र व्रीडामधुरा राधा कृष्णं निकषा चित्रलिखितेव तस्थौ । कृष्णेन स्वशयने विनिवेशिता सा मुग्धा भाषितापि न बभाषे, वसनापहरणे वसनं सम्वकार, साम्मुख्ये विमुखा संवृत्ता तथापि मुग्धात्वात् कृष्णस्य कामोद्दीपनाय स्वयमिन्धनतां प्रपेदे । कृष्णो वसनं हठेन हृतवानेव, व्रीडिता साऽऽभूषणैर्मुखमाच्छादितवती । कृष्णेन वक्षोजे पाणौ प्रापिते सा तत्र निजं करं प्रत्यर्पितवती । कृष्णे नीविग्रन्थिविमोचनपरे तन्निवारणाय सा तत्र निजं पाणिमयोजयत् । तथापि कृष्णस्य प्रीतये संवृत्ता । क्रमशः केलौ प्रगाढायां निष्पन्नायां महीयसि रसे निपतन्ती सा प्रियकण्ठे बाहुबन्धं चकार । मोहाविष्टा सा प्रियदन्तवसने दशनेन समकृन्तत् । राधिकाया नीविसन्धिमवदाय कृष्णे धीधनानि हरति सहचरी मेखला विचकम्पे नूपुरयामी च संरुरोद । राधिकयोच्चारितो ननकारस्तु सच्छलो विधिरेव संवृत्तः । गाढमन्मथरसे निलीनया तया प्रियतमाय सीत्कृतिरूपा सुधावृष्टिः प्रत्यर्पिता । इत्थं नानाविधाभिः कामकलाभिर्विहरतोस्तयोः सा रात्री गतैव परं नित्यनूतनतमा रतिलिप्सा तु प्रतिपलं वर्धमानैव बभूव । तदैव सूर्योदयो जातः । चक्रवाकमिथुनान्या ह्लादितानि सूर्यानुरागिणी प्राची च रागिणीव रागिणी संवृत्ता । श्रीकृष्णश्च मधुकरः कुमुदिन्याः कोषमिव राधिकाया भोगभवनमुत्सृज्य व्रजमाजगाम ।

(झ) नवमो नगनन्दिनीसपर्यासर्गः

सूर्यरश्मिष्वनुरागं वह्नौ कमनीयतां चन्द्रकिरणेष्वरुचिं जनयन् धरणीतले शिशिरः समागत । शीतबाधा नितरां ववृधे । अनलोऽदाहकः संवृतः । प्रियापरिरम्भणं महोष्मणि गर्भगृहे निवासश्च शिशिरोपचारो जनैरमानि । कुहेलिकया कलावान् विधृतः । चक्रवाकमिथुनानि निशाया दीर्घप्रसारत्वात् करुणक्रन्दनवन्ति संवृत्तानि । ईदृशे शीतसन्तापमये समये व्रजबालाः कृष्णं पतिरूपेण वाञ्छन्त्यो नगनन्दिनीसपर्यां चक्रुः । सुगन्धि पुष्पं, निर्मलं कमलं, मधुरं फलं, हृद्यं नैवेद्यञ्च समर्प्य ता व्रजसुन्दर्यः प्रणतिभिः प्रदक्षिणाभिः स्तुतिभिश्च भगवतीं नगनन्दिनीं "कृष्णोऽस्माकं प्राणेश्वरो भवेदिति" प्रार्थयामासुः । नगनन्दिनीसपर्याक्रमे चैकदा ताः सपर्यान्ते यमुनाकूले दुकूलानि निधाय यमुनाजले प्रविविशुः । कृष्णश्च सहसा समागत्य तासां वस्त्राण्यपहृत्य समीपस्थं कदम्बतरुं समारुरोह । धृतव्रतिकास्ता वस्त्रापहरणं विज्ञाय कदम्बे दृष्टिं निधाय भगवन्तं नाथयामासुः- "हे कृष्ण हेजगतीपते नन्दनन्दन कृपया सत्वरं वसनानि देहि शीतार्ता वयम्" । कृष्णोऽपि तच्छ्रुत्वा निजगाद "गोपबालाः ! यूयं कतिकालं यमुनाजले वसत, इहागत्य स्वानि वसनानि लभध्वमिति" । ततो निर्वसनास्ता व्रीडाविह्वलाः कृष्णं प्रत्यूचुः- "'नन्दनन्दन त्वं प्रथमं वसनं हृतवान् सम्प्रति व्रीडावसनमपि हर्तुमिच्छसि किम् ? अबलाजनेषु बलाचरितं महतो न शोभते" इति । तदा कृष्णो निजगाद- "यदि मत्प्रभुता सम्मता तर्हि मदुदीरितं पालयत" इति । ततो निरुपायास्ताः करकिसलयावृतमदनमन्दिरा यमुनाजलात् कृष्णमभीयुः । कृष्णेनार्पितानि तानि वसनानि च परिदधुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः कृष्णाज्ञया ता व्रतभङ्गजनकनिर्वसनस्नानदोषापनोदाय यज्ञपुरुषं प्रणेमुः । कृष्णोऽपि तासां सर्वानभिलाषान् स्वीकृत्य निर्मलं निजं धाम जगाम ।

(ञ) दशमो रसिकहृदयोल्लासकसर्गः

त्रेतायां रामचन्द्ररूपेणावतीर्णो हरिरेव द्वापरे कृष्णचन्द्ररूपेणावतीर्णः । रामावतारे सीतायां निर्वासितायां यज्ञेषु क्लृप्ताः सुवर्णसीता एव सम्प्रति गोपकन्यारूपेणावतीर्णा नरलोकधन्याः संवृत्ताः । अन्येऽपि ये गोपदारा आसन् तेऽपि कृतावतारा देव्य एव । धरणीतले जगन्मोहने वसन्ते समागते नन्दनन्दनस्ताभिर्विहाराय यमुनाकूलकाननानि समाससाद । कृष्णे काननं प्राप्ते प्रकृतिरपि सप्रसारं कामपूरा च संवृत्ता । तदा विलासिनी वशमानिनीषुः श्रीकृष्णो विश्वविमोहिनीं वंशीं वादयामास । समुल्लसिते मुरलीनादे व्रजबालानां हृदयेन मुकुन्दो दृशा वृन्दावनं कर्णेन वंशीनादः, कायेन कन्दर्पतापश्च युगपदेवासादि । मुकुन्दगानमाकर्ण्य सहस्राधिकाः सुन्दर्यः स्वीयान् निषेधान् निमेषान् चानादृत्य वृन्दावनमाजग्मुः । गोपाङ्गनामण्डले वंशिकया जगन्मोहनं गानं गायन् गोविन्दो मूर्तिमान् श्रृङ्गाररस एवाजायत । तदा नितम्बिनीमोहनमूलविद्येव गोविन्दमुरलीध्वनिः समुल्ललास । मृगैः कार्यान्तरं त्यक्तं विहगैः तूष्णीम्भावोऽङ्गीकृतः, जगच्च चिदानन्दसागरे निमग्नं जातम् । व्रजबालाः कन्दर्पविद्धकमनीयावयवाः समपद्यन्त । काचित् कराभ्यां कृष्णस्य कण्ठं धृतवती, पराऽस्याधरसीधुमाधात्, इतरा च वक्षोजयोस्तस्य कोमलं कराम्बुजमानिनाय । गत्या मतङ्गान्, नयनैः कुरङ्गान्, वचनैः पिकान् च लज्जयन्त्योऽङ्गभासा जगदेव विस्मापयन्त्यस्ता व्रजाङ्गना वने विलासान् वितेनुः । व्रजाङ्गनाप्राणनाथो भगवान् धृतकोटिकलेवरस्ता अरीरमत् । प्रसूनाभरणप्रदानैर्नवपल्लवावलितल्पतानैश्च लता अपि तासां नर्मसख्यः संवृत्ताः । कृष्णेन पुष्पावचयायामन्त्रिता काचन बाला लतासु भर्तृरागमनुभूय शोणानना सम्वृत्ता । काचन सपत्नी कृष्णमन्यस्यामासक्तं विज्ञाय वक्रितानना जाता । काचन वनविहारकाले कुञ्जेषु, कपोतीकलकूजितानि निशम्य सङ्केतेन प्रियं तत्र प्रयाणायामन्त्रिवती । अपरा कुञ्जकोषे वल्लभेन सह रन्तुं प्रयातापि स्वदेहदीप्त्या दलितान्धकारा व्रीडया विहारेऽसमर्था मलिनवदना बभूव । कृष्णेन गृहीतवसना काचन शफरीनयना घनस्फीतपलाशपुञ्जं कुञ्जमेव वसनं मेने । सपत्नीनिकटे स्थिता काचन दयितार्पितानि प्रसूनाभरणानि बहुमन्यमाना प्रसूनसङ्गतभृङ्गदंशदूनापि तानि न जहौ । कृष्णेन रन्तुकामाऽपरा लतासद्मनि स्थितं पुष्पं देहीति भणितिभङ्ग्या निवेद्य रमणेन साकं तत्र विवेश । इत्थं नन्दनसंनिकाशे वृन्दावने ते देवदारा इव गोपदाराः प्रहृष्टाः कृष्णेन साकं स्मरकेलिजुष्टा नितरां ननन्दुः । ततो भगवान् प्रियाया वृन्दायाः पाणिं पाणावादाय वसन्तश्रीनिरूपणं प्रारभत ।

(ट) एकादशो वसन्तश्रीवर्णनसर्गः

श्रीकृष्णो वृन्दां व्याजहार- "प्रिये ! वृन्दावनमिदं वसन्तस्य विहारभवनमिव विभाति । पुष्पभारविनीताः शाखिनो रत्नस्तम्भाबलय इव विद्योतन्ते । सखेलं किसलयकरं बिभ्राणाः सभृङ्गनादाः रसाला वयमिव सालापाः संवृत्ताः । पिकाश्च वैतालिका इव मधुरं गायन्ति । भृङ्गा मल्लीमुकुलरसलम्पटाः किमपि गुञ्जन्ति । मदनशरविद्धाः पान्थाश्च कथमपि प्राणान् धारयन्ति । लवङ्गीमालिङ्गन् यूथीमुपचरन् लवलीमुल्लासयन्नेलां च चुम्बन् समीरः कामीव कुतुकैर्दाक्षिण्यं प्रकटयति । मधुकरीभिः सह गायन्ती पिकी लम्पाकीव प्रतिविपिनं विचरति । अरविन्दं कुन्दं वासन्तीञ्च विहाय स्थिरप्रेमा भृङ्गो लवङ्गीमेव कामयते । मधुकरास्तु पथिकानां कृते मोहघटिका गरलगुटिका एव सञ्जाताः । तरुणा गाढमालिङ्गिता वासन्ती ननेति समुदीरितुं किसलयकरं कम्पयन्तीव विभाति । कामबाणैः कुसुमैः पन्थानोऽवरुद्धाः, पाटीरपवनः सोढुमशक्यः, रजनिपतिश्चाकारदहनः, सखि ! मधुमासोऽयं पथिकप्राणघातक एव निर्वृत्तः" । इति कृष्णकृतेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मधुमासनिरूपणेन संमुग्धा मदनविह्वला वृन्दोवाच-" प्राणेश । नाहं पदमपि चलितुं समर्था त्वमपि क्षणं क्षितौ निषीद" इति ब्रुवत्यां तस्यां सहसा हरिरन्तर्हितो बभूव । हरिवियोगेन खिन्ना सा मूलच्छिन्ना कदलीव भूमौ पपात । काचन सखी सत्वरं व्यजनवाहनादिभिस्तां निषेवितवती । लब्धचेतनां ताञ्च कृष्णस्य कपटक्रियाकुशलतां प्रतिपाद्य पतिसेवायाः कुलधर्मस्य महत्त्वं चोपदिदेश । परन्तु वृन्दा बभाण- मधुरिपौ प्रेमाबन्धः, विमलं कुलचरितं, धन्वी कामदेवः, मुग्धं मनश्च मदीयमानसमन्थनाय युगपदेव संप्राप्तं चक्रव्यूहमस्ति, वियोगस्य पीडा वृश्चिकदंशवत् सर्पविषवच्च नितान्तमसह्या, यद्यपीहाधुना कृष्णेन परित्यक्ता, तथापि न केवलमस्मिन् जन्मनि जन्मान्तरेऽपि कृष्णसान्निध्यमेव कामये, वदतु लोको यत् किमपि लोकभयेन नाहं कृष्णं त्यक्तुं समर्था, हेसखि । कदा मुरलीं वादयन् कौशेयवसनः श्यामघनः समागमिष्यति कदा च तेन साकं विहरिष्यामीति । तदैव कृष्णोऽपि सस्मितवदन आत्मानं प्रकटीकृत्य वृन्दां प्रेममयैर्वचनैरानन्दपारावारे आप्लावयामास । ततो वृन्दाप्रमुखाः सर्वा गोप्यो जलविहाराय यमुनामापुः ।

(ठ) द्वादशो हरिविहारसर्गः

व्रजबालाभिः साकं यमुनापुलिनमागत्य तासां मुखपङ्कजेषु पाणिं दधानो मुकुन्दो निजं कमलबन्धुत्वं सत्यापयामास । भूयादुकूले तीरे निधाय करपल्लवेन वक्षः पिधाय वित्रस्तहरिणीलोचने इव लोचने विधाय वृन्दादयो यमुनां प्रविविशुः । नितम्बिनीनां नयनानुबिम्बमनुधावमाना काचन शफरी यमुनाजले सविवर्तनावर्तनं भृशं ननर्त । स्वच्छे यामुने सलिले प्रतिबिम्बितां निजां रोमराजिं नागिनीं मत्वा काचन भर्तारमाश्लिष्य चिरं चकम्पे । तदा कलहंसमाला चिरं चुकूज । तटिन्याः स्थगितो नितम्बिनीनां नितम्बबिम्बः सेतुबन्धायितो बभूव । यमुना जलैराश्लेषदानैश्च तासामातिथ्यं चकार । अरविन्दे मन्दाभिलाषा मधुकरा व्रजसुन्दरीणां वदनानि भेजुः । ततस्ताः सर्वा एव पीनस्तनास्फालनपुरःसरं यामुने जले सानन्दं ममज्जुः । तासां गाढबन्धनमुक्तैः कवरीकलापैः सावर्तविवर्तनं ननर्ति । व्रजबालानां सद्यश्च्युतेनाङ्गरागेण सवितुः सुता रञ्जितेव रराज । यमुनाजलान्यपि व्रजसुन्दरीणां स्तनाभोगविमर्दनेनाश्लेषप्रदानेन तरङ्गसूचितरोमाञ्चेन नैजं कामिभावं प्रकाशयामासुः । कृष्णेन दोर्भ्यां गृहीता काचन कमलचयाय गभीरं नीरं जगाम । जलसेचिकायां सखीं विजेतुमपारयन्ती खिन्नखिन्ना काचिद् भर्तारं समीपे विलोक्य समन्दस्मिता श्रमवारिबिन्दूनपाचकार । यमुनाजलविहारविधौ भगवानपि ताभिः साकं नैकविधा लीलाश्चकार । ततस्तीरमागतास्ता व्रजबालाः स्वानि गृहाणि प्रतस्थिरे । गृहेषु मुकुन्दमायाशयने शयानास्तासां पतयोऽपीमा अत्रैव स्थिता न गृहाद् बहिर्गता इति मन्यमानास्ताभ्यो नाकुप्यन् । इत्थं रामानुजन्मा भगवान् वसन्ते विविधैर्विलासैर्वल्लववल्लिकासु रेमे ।

(ड) त्रयोदशो यामुनपुरनिर्माणसर्गः

अमन्दसौन्दर्यनिधयो रम्भोरवः कमलाननाश्च राधामेधारमारामाप्रभृतयो दश व्रजबालाः स्वकुलानुरूपे तक्रस्य विक्रयणकर्मणि दत्तचित्ता दधि पयस्तक्रं च गृहीत्वा यमुनापारप्रयाणाय गृहात् प्रचलिताः । यमुनाकूलं प्राप्य घोरप्रवाहां तामुत्तर्तुं कमप्युपायविशेषमलभमानाश्चिराय विषण्णवदनास्तत्रैव तस्थुः । तदैव सहसा सह नावा कृष्णचन्द्रस्तासां समक्षे समन्दस्मितवदन आविरासीत् । हर्षातिरेकविकसितवदनारविन्दास्ताः समस्तास्तं यमुनापारनयनाय सविनयं प्रार्थयामासुः । कृष्णश्च- "यूयं तुङ्गस्तन्यः स्थूलनितम्बिन्य उद्दामतारुण्यभारवत्यस्तरुण्यो ममेयं वृद्धा जीर्णा च तरिर्नाहं युष्माननया पारं नेतुं पारये, निजगृहान् प्रतियात, यदि तु युष्माकं पारगमने प्रबला समीहा स्वं स्वं करमर्पयत, लब्धे करे सत्वरमेव युष्मान् सन्तारयिष्यामि इत्युवाच । ततो गोप्यो भगवन्तं जगदिरे- "भगवन् ! तक्रे करः कदापि न दृष्टो न श्रुतो न चानुपालनीयः, भवता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गिरिराजोद्धरणेन वयं त्रातास्तन्निजं करुणामयं सर्वं चरितं विस्मृत्य करयाञ्चा न शोभते । भगवन् ! यः सकृदपि तव पावनं मङ्गलमयञ्च नामोच्चारयति स यमादपि न बिभेति परमस्माकं नित्यं तवाश्रये वर्तमानानां यमभगिनी विघ्नभूता जाता केयं विडम्बना ? संसारकर्णधारेण भवता सञ्चाल्यमानायां नाव्यस्मदुपस्थित्या न संभवति कश्चन भारोऽतोऽस्मत्प्रार्थनामङ्गीकृत्य यमुनापारं नय, सकरुणोऽसि देव ! करुणां विधेहि यमुनापारगमने मार्गं च देहि इति" । इति तासां वचनानि श्रुत्वा कृष्णः प्रणिजगाद- "गोप्यः । यदि पारगमने युष्माकं प्रबला समीहा तदा व्यस्ता अत्रारोहणं कुरुत न समस्ताः । जीर्णा तरिः समस्ता युष्मान् वोढुमसमर्थेति" । तदा ता ऊचुः- "भगवन् । भीमेयं यमभगिनी वयं वनवासिनामनभिज्ञचारा दारा विहाय भवन्तं नान्यः कश्चनाश्रयः, रामावतारे भवता समुद्रे सेतुबन्ध आविष्कृतः, भवतैव नावं विनैव शुकसनन्दनादयः सन्तारिताः, वेदा अपि संसारसिन्धुसन्तारे हरेश्चिन्तनमेव तरिरिति निरूपयन्ति । भगवन् ! नय पारं सत्वरम्" । तत् श्रुत्वा सस्मितवदनः कृष्णस्ता नावि संस्थाप्य पारं नेतुं नावं प्रैरयत् । मध्येतरङ्गिणि भयङ्करवाताघातेन तरिर्यमुनाजले ममज्जे । तदोभयोस्तटयोः कोलाहलो जातः । दुःखितास्तासां पतयोऽपि यमुनापुलिनं समाजग्मुः । विचेतनास्ते स्वजनैराश्वस्ता गृहं जग्मुः । कृष्णोऽपि ताभिः सह रन्तुं यमुनाजलेऽमलं पुरं ससर्ज । ईश्वरस्याघटितघटनापटीयसी माया किं न कारयति ।

(ढ) <u>चतुर्दशो यामुनपुरविहारसर्गः</u>

यमुनाजलाभ्यन्तरे योगमायाबलेन प्रणीतेऽभिनवे पुरे ताभिर्व्रजवनिताभिः सह विहरतो भगवतो दिवसो जगाम । सूर्योऽस्तगिरिशिखरमारूढः । यमिनः सूर्यसमाराधनायां प्रवृत्ताः । पुण्डरीकाणि निद्रितानि, सायं सन्ध्या च विश्वस्मिन् व्याप्तिं चकार । गगनवने किरणरूपागाश्चारयित्वा जलं पाययितुमिव सूर्यो महासागरे निलीन एव संवृत्तः । क्रमशो जगदिदं ध्वान्तधाराच्छन्नं जातम् । अन्धेन तमसा मानवानां नयनमणयो हृताः । पतङ्गा दीप्यमानेऽनलेऽविशन्, सरसि सरसि हंसाश्च मूकीभावं प्रापुः । सति नयने सत्सु सर्वेषु विषयेष्वपि विषयावभासो नासीत् । दिनमणावस्तं गते कालपाटच्चरेण जगदेव मुषितम् । मरालेषु मूकीभावमापन्नेषु उलूका वावदूका बभूवुः । समय एव बलाबलयोर्विधाता, स एव विघटयति संयोजयति च । भीमायां रजन्यां ध्वान्ते सर्वत्र प्रसृमरे भवनेषु दीपा अदीप्यन्त । क्षोणीमण्डलन्तु ग्रस्तमद्वैतेनान्धेन । झिल्लीझङ्कारः प्रतिपलं वर्धमानो बभूव । तदैव रजनिरजकी चन्द्रकिरणरूपैः सलिलैरम्बरं प्रक्षालितवती । औषधीनामीशश्चन्द्रोऽपि स्वभासा जगद् भासयन् प्रकाशितः । ईदृशे चन्द्रोदयदीप्ते रजनीसमये भगवान् योगमायेश्वरोऽपि दश गोपदारैः सह रन्तुं प्रारेभे । भगवान् देहं दशधा विधाय दशकामदशागताभिः ताभिः सह सानन्दं रेमे । रासानन्दे प्रगाढे सति प्रगल्भाभिस्ताभिः सह धीरोदात्तः श्रीकृष्णो वसनापहरणेनाश्लेषेण नीविग्रन्थिविमोचनेन कुन्तलग्रहणेन नखदशनदानैश्चुम्बनैश्चावर्णनीयं रसकासारं समेधयामास । प्रत्येकं तासां स्निह्यता मधुरमालपता स्मितं विस्तारयता सन्तर्पणञ्च समर्पयता भगवता यद् यदाचरितं तत् तत् तासां कृते योगिदुर्लभं सौख्यं बभूव । आत्मीयतया सर्वाभिस्ताभिः सह व्यवहरता प्रीतिप्रवाहञ्च प्रवाहयता श्रीकृष्णेन तासां हृदयेषु पुष्पितः फलितश्च श्रृङ्गारतरुः प्रतिष्ठापितः । इत्थं बहुगणरात्रं ताभिः सह विहृत्य सर्वा एव ताः स्वस्वगृहेषु प्रापयामास ।

(ण) <u>पञ्चदशो मथुराप्रयाणसर्गः</u>

श्रीकृष्णस्य चित्तविस्मापकानि चरितान्यनुभवन्तो जनास्तं कंसहिंसनप्रतिपन्नावतारं नारायणमेवामंसत । एकदा विधिनन्दनो नारदो भुवने भुवने भ्रमन् भोजपतेः कंसस्य भवनं प्राप । पिशङ्गीभिर्जटाभिर्देदीप्यमानस्य मृदुमूर्च्छनया महतीं रणयतो ज्योतिर्मयस्य देवर्षेर्नारदस्यागमने कंसः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ससम्भ्रमं स्वागतं व्याजहार । कृतचरणसपर्यः कंस उक्तवान्-"भगवन् । भवदागमने मदीयं कुलमपेतपातकं सम्वृत्तं जीवनञ्च मदीयं सफलमद्य निर्वृत्तम्, भवत आगमनहेतुं वेत्तुं मदीयं मानसं तरलमस्ति" इति । तदाकर्ण्य नारद उवाच- "भोजाधिपते कंस । देवहितायावतीर्णो नारायणः सम्प्रति नन्दमन्दिरमधितिष्ठति, तेन तव कतमोऽपकारो न विहितः ? पूतना हता, तृणावर्तो निष्पिष्टः, बकाघादयश्च लोकान्तरं नीताः । अधुना समासन्नयौवनः स त्वत्कुलोच्छेदाय व्याधिरिव छिद्रमन्विषन् प्रयततेऽतस्त्वया षाड्गुण्यं प्रवर्तनीयम् । तव हिते स्थितेन मयेदं वस्तुतथ्यमुपस्थापितं तव परा वृद्धिरस्तु" इति । एतदुक्त्वा जिगमिषुं नारदं कंसो निवेदयामास- "भगवन् । भवान् ममावलम्बनाय गुरुविज्ञानमयी महातरिरेव वर्तते । सदा शुभाशिषो देयाः इति" । ततो नारदो निर्गतः । कंसश्च सदसि वसुदेवं कठोराक्षरैर्व्यताडयत्, पुनस्तेनाक्रूरश्च नन्दव्रजं गत्वा धनुर्यागार्थं रामकृष्णयोरानयनाय समादिष्टः । अक्रूरे गोकुलाय प्रस्थिते कंसः केशिनं दानवमाहूय कृष्णरामवध्यायै प्रेरयामास । हयरूपः केशी त्वरितं गोकुलं गत्वा मुखं व्यादाय कृष्णं गिलितुं प्रारभत । तदा तद्वदने निहितं कृष्णस्य करं केशी जग्रसे, परन्तु शरीरान्तर्गतः कृष्णकरः तस्य हृदयमेव जग्रसे । विगतासुः केशी भूमौ पपात देवैश्च सानन्दैः कुसुमवृष्टिरकारि । दानपतिरक्रूरोऽपि सायं समये गोकुलं प्राप । भगवद्दर्शनलालसोऽक्रूरो मनसि भगवन्महिमानमेव विभावयन् कृष्णसमीपं जगाम । कृष्णचरणौ मूर्धनि संस्थाप्य भगवन्तं बलरामं प्रणनाम । तावुभौ रामकृष्णावक्रूरं सत्कृत्य पितुर्नन्दस्य समीपं निन्यतुः । तत्र नन्देन सभाजितो दानपतिः सकलमेव कंसवृत्तं न्यवेदयत् । ततः सोपायनपाणिकाः सकला गोपा धनुर्यागदर्शनार्थं परेद्युर्मथुरायै प्रतस्थिरे । अक्रूरोऽपि भगवन् । कंसं विजित्य पित्रोर्बन्धमोक्षेण तयोः परमां प्रीतिमावहेति सम्प्रार्थ्य निजे स्यन्दने तौ भगवन्तौ रामकृष्णौ प्रतिष्ठाप्य मथुरायै प्रतस्थे । मथुरायामासन्नायां स्यन्दनादवतीर्य दानपतिर्यमुनास्नानाय सलिलं प्रविष्टः तत्र सशेषं नारायणं ददर्श । जलादुत्थाय स्यन्दनेऽपि तमेव सर्वविशेषं सशेषमशेषाधिपतिं ददर्श । विस्मतहृदयः स यामुने जले भगवन्तं नुनाव । ततः स्यन्दनमागतः भगवता किमनुभूतं चित्रमिति स्पृष्टो भावावेशतया संरुद्धवाग्व्यापारो बभूव । ततस्ताभ्यां सह रथेन मथुरां प्राप ।

(त) षोडशो धनुर्भङ्गसर्गः

सरामः श्रीकृष्णो दानपतिं गेहाय विसृज्य त्रिभुवनीशिरोमणिरमणीमणिभूषणरणितां सुवर्णसौधचमत्कृतां वेदवेदाङ्गमुखरितां सकलशिल्पसमेतां सापणकलकलां च मथुरां जनिस्थानतयाऽनुबद्धः सानुरागं ददर्श । मथुरायां भ्रमता कृष्णेन धौतवसनो रजक उक्तः-"अये भ्रातरावयो रङ्गरुचिराणि नृपसमुचितानि वसनानि देहि तेन तव सर्वविधं मङ्गलं सेत्स्यति" इति । तच्छ्रुत्वा रजकः साक्रोशं भगवन्तमाह - "त्वादृशा गोदुहो नृपसमुचितानि वसनानि नार्हन्ति, पुनरीदृशं न वदाऽन्यथा तव दुर्दशां को निवारयति" इति । साहङ्कारमित्यमपलपन्तं रजकं भगवान् सलीलं जघान । तेनानीतानि वसनानि परिधाय मालिकाकारस्य गुणकस्य गृहं जगाम । स तु भक्त्या नुत्वा मालाभिरर्चयित्वा च भगवन्तं प्रसादयामास । तस्मै तदभीष्टं प्रदाय मथुरावीथीषु भ्रमता भगवता सानुलेपनपात्रहस्ता कुब्जा विलोकिता । तद्दत्तचन्दनेनानुलिप्ताङ्गः स तामृज्वीं तथा रमणीयां सम्पाद्य तस्यै श्रेयस्यं समर्प्य तत्प्रार्थनां च स्वीकृत्य मृदङ्गवाद्यादिघोषमुखरितं प्रभूतदीपावलिप्रकाशं सङ्गीतहृद्यं तोरणमालाभूषितं धनुःस्थानं प्राप । अनेकेषां वीरवराणामुपस्थितौ भगवान् करी कान्तारमिव तत्र निहितं चापं लीलया बभञ्ज । धनुर्भङ्गजन्येन ध्वनिना विश्वमेव स्तिमितं विस्मितञ्च समपद्यत । कृष्णपराक्रमेण लज्जिता इव धनुःपालकाः सरोषं कृष्णमाचक्रमुः । तान् सारल्येन स पराबीभवत् । तत आक्रान्तारः कंसभटाः कृष्णमाययुः तैः सार्धं रामकृष्णयोर्घोरः सङ्ग्रामः समजनि । तदा भगवता निजा विलक्षणा शक्तिः प्रदर्शिता । यथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"दृश्योऽदृश्यो दूरवच्चान्तिकस्थः
खस्थो भूस्थो निश्चलो चञ्चलश्च ।
इत्थं वीरश्रेणिमध्ये तदानीम्
देवोऽतानीदिन्द्रजालं करालम् ॥ (१६।४२)

कृष्णाविष्कृतेन करालेनेन्द्रजालेन विस्मिता मूढाः कंसभटाः कंसमेव प्रापुः । कृष्णश्चासन्नं कंसमरणं विभाव्य निजावासभूतं शकटमेव प्राप ।

(थ) सप्तदशो हरिविजयसर्गः

कृष्णः कंसबलध्वंसं कृत्वा शकटं प्राप्य नन्दादिभिः सह कौतकालौपैः तां यामिनीं निनाय। कंसस्तु धनुष्प्रवरभङ्गेन समरे बलभङ्गेन च हताशो मृत्युमासन्नमेव मेने । जागरेण रात्रिं यापितवान्। विलासे भोजने वार्तालापे च निरुत्सुकोऽपि मल्लयुद्धाय मञ्चादिनिर्माणकार्येषु स्वभृत्यानादिश्य मल्लमखदर्शनाय प्रजा आमन्त्रयामास । तत आधोरणमाहूय रङ्गद्वारि निहितेन मतङ्गेन कुवलयापीडेन कृष्णं जहीति निर्दिश्य चाणूरमुष्टिकादीन् मल्लानपि मल्लयुद्धे कृष्णरामौ मारयतेति निर्दिदेश । ततः कंसलब्धादेशा मल्ला रङ्गमञ्चे ववल्गुः । नरा नार्यश्च मल्लयुद्धदर्शनाय सप्रपञ्चेषु मञ्चेषूपाविशन्। ततः समरे सतृष्णौ रामकृष्णौ वीरोचितेन वेशेन चमत्कृतौ तत्र जग्मतुः । रङ्गमञ्चद्वारि पर्वताकारं कज्जलाभं कुवलयापीडं गजं ददृशतुः । तत्र सम्प्राप्तः कृष्ण आधोरणं मार्गं ययाचे । तदाधोरणप्रेरितः कुवलयापीडः सनकसनन्दनादिस्तुतं योगिगम्यं भगवन्तं शुण्डया विचकर्ष । तदाऽसह्यविक्रमो हरिस्तमाक्रम्य पदाशनिप्रहारेण तच्छिरोऽचूर्णयत् । ततो हरेरुरुविक्रमेण निहतः स पक्षच्छेदाकुलो गिरीन्द्र इव भूमौ पपात । आधोरणनिकरोऽपि भगवता तदैव यमलोकं प्रापितः । तदा रङ्गवासिभिर्नारीनरैर्भयकुतूहलानन्दराशिभिस्तौ बालावप्यबालपराक्रमौ वसुदेवकुमारौ विलोकितौ । ईर्ष्याव्याकुला उन्मत्ता इव वल्गन्तः कंसभटा युद्धाय सन्नद्धाः कृष्णान्तिकमापुः । तान् विलोक्य कृष्णो जगाद "मल्लमूर्धन्याः ! भवन्तोऽनेकयुद्धजयिनो विक्रमिणो वयं वनचरा अकृतश्रमा अतो युद्धं न समतावहं नोचितञ्चेति" । तच्छ्रुत्वा चाणूर उवाच "बालौ ! युवां वनचरावकृतश्रमौचेति सत्यं परं कंसोऽनुपालनीयः, सङ्ग्रामविधानमुचितमनुचितं वा यत् किञ्चिदस्तु तत्कर्तव्यमेवेति" । चाणूरघोषणानन्तरं युद्धं प्रारब्धम् । कृष्णश्चाणूरेण बलश्च मुष्टिकेन युयुधाते । सन्तश्च कृष्णरामाभ्यामाशिषः प्रायुञ्जत । शनैः शनैर्युद्धक्रिया घोरतामापन्ना । वारिधयः कुलगिरयो धरामण्डली दिग्गजाः सुरपुरी लोकपालपुर्यश्च घोरेण तेन युद्धेन प्रभाविताः । हस्ताहस्तितलातलिबाहूबाहविगाहनाद् भयङ्करं प्रचण्डारवञ्च तदायोधनं विश्वविस्मापकं संवृत्तम् । तेन मल्लावमर्दनं भूगोलमेवातितरां समकम्पत । तदैव भगवता मुष्टिप्रहारेण चाणूरो निहतो बलदेवेन च मुष्टिको मारितः । शलतोशलकावपि ताभ्यां तदैव निहतौ । जय कृष्ण जय राम जय जयेति विजयध्वनयोऽम्बरं समाच्छादयामासुः । कंसः क्रुधा कालानलोपमो भगवन्तं दुर्वाच्यं वक्तुं प्रारभत। कालज्ञो हरिस्तदैव मञ्चोपरि गत्वा केशेषु गृहीत्वा कंसं नीचैः पातयामास । पतितस्य तस्योपरि विराजमानेन भगवता हरिणा कालनेमिहंसजः पृथिव्या भारो नृशंसः कंसो व्यापादितः । तदैव देवैः सुमनोवृष्टिभिः कृष्णरामौ सभाजितौ । धरणीभारापाकरणं कृत्वा तौ कृष्णरामौ पितरौ देवकीवसुदेवौ प्रणम्य समानन्दयताम् ।

३.२ कृष्णकथाया महनीयं धरातलम्

हरिकेलिमहाकाव्यं कृष्णावतरणप्रसङ्गतः कंसवधपर्यन्ते कथावस्तुनि समाश्रितं बहुश आर्षवाङ्मयनिरूपितकृष्णचरितसंवादि क्वचन कविप्रतिभाविजृम्भितवृत्तविच्छित्तियुतं प्रतिभाप्रज्ञयोरपूर्व सङ्गमस्थलं वर्तते । कवीनां रचनासु निहितं कथावस्तु द्विविधमाधिकारिकं प्रासङ्गिकञ्चेति यदुच्यत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभियुक्तैस्तद्द्वयमेवात्र विलसति । हरिकेलिगतप्रासङ्गिकविषयक्षेत्रस्य प्रकरणान्तरविवेच्यतां निर्दिश्य वेदेषु बीजरूपेण वर्तमानमुपनिषत्स्वङ्कुरितं सामान्यपुराणेतिहासग्रन्थेषु पल्लवितं विष्णुब्रह्मवैवर्तपद्महरिवंशपुराणेषु महाभारते च पुष्पितं श्रीमद्भागवताख्ये महामहापुराणे गर्गसंहितायाञ्च फलितं कृष्णकथातत्त्वं संक्षेपेण निरूप्यते हरिकेलिमहाकाव्यगतकृष्णकथावस्तुन आधिकारिकत्वसिसाधयिषया ।

३.२.१ वेदेषु कृष्णः

ऋग्वेदे कृष्णः[1] श्वेतोऽरुण इति, ऋतौ कृष्णमिति [2], अरुणीषु गोषु यत् कृष्णमिति[3], कृष्णाः[4] रजांसीति च मान्त्रिका प्रयोगा लभ्यन्ते । शुक्लयजुर्वेदे आकृष्णेन[5] रजसा, आखरेष्ठः[6] कृष्णः, आग्नेयः[7] कृष्णग्रीवः, कृष्णग्रीवा आग्नेया इत्यादयः कृष्णपदान्विताः[8] प्रयोगा लभ्यन्ते । शतपथब्राह्मणे[9] यज्ञो देवेभ्योऽपक्रान्तः कृष्णो भूत्वा विचचारेति निर्देशः । सामवेदे[10] कृष्णेति पदं प्राप्यते । अथर्ववेदे[11] च नियानः कृष्ण इति निरुक्तिर्जाता ।

मन्त्रेषु निहितानि तानि तानि कृष्णपदानि देवकीनन्दनस्य वासुदेवस्याथवा नित्यगोलोकाधिपते राधिकारमणस्य व्यञ्जकान्युत वस्तुविशेषणतया प्रयुक्तानीति विषये वैदिका एव प्रमाणम् । आर्षवाङ्मयसंस्तुतस्य कृष्णस्य सकलवाङ्मयबीजरूपे वेदराशौ बीजरूपेण सङ्कीर्तनं स्वाभाविकमेव प्रतिभाति, परं तत्र तत्र निहितानि तानि कृष्णपदानि सर्वसंवेद्यतया कृष्णचरितं न प्रत्याययन्ति । वेदानां मन्त्रमयत्वान् मन्त्राणाञ्चप्रतीकार्थपरत्वादप्रत्यक्षतया यदि कश्चन सङ्केतस्तं मन्त्रपरमार्थविद एव जानन्ति नान्ये । वस्तुतस्तु श्रीकृष्णस्य ब्रह्मरूपत्वाद् वेदेषु च ब्रह्मणो व्याख्यानाद् ब्रह्मव्याख्यया सञ्जातां कृष्णव्याख्यां को नु नाम निवारयितुमीशः ।

३.२.२ उपनिषत्सु कृष्णः

छान्दोग्ये[12] आदित्यस्य निरूपणप्रसङ्गे कृष्णपदं प्रयुक्तमस्ति । तत्रैवादित्यस्य परं कृष्णं रूपं निरूपितमस्ति । छान्दोग्य एव "देवकीसुतः कृष्णः" इति व्यवहृतिर्जाता । परं आर.जी.[13] भण्डारकरादयस्तत्र तत्र प्रयुक्तं देवकीसुतविशेषितं कृष्णपदं वृन्दावनविहारिणः कृष्णस्य न वाचकमपि तु घोरशिष्यस्याङ्गिरसगोत्रस्य कस्यचन योगिनः कृष्णनामधेयस्य वाचकमिति वदन्ति । तेषामस्मिन्

---

1. ऋग्वेदे, १०।२०।९ ।
2. तत्रैव, १।१४०।३ ।
3. तत्रैव, १०।६१।४ ।
4. तत्रैव, ८।४३।६ ।
5. शु.य.सं., ३३।४३ ।
6. तत्रैव, २।१ ।
7. तत्रैव, २९।५८ ।
8. तत्रैव, २४।६ ।
9. शतपथब्राह्मणे, १।१।४।१ ।
10. सामवेदे, १५४७ ।
11. अथर्ववेदे, ६।२२।१ ।
12. छा., ३।४।३ ।, छा. १।६। छा. ३।१७ ।
13. आर.जी. भण्डारकरमहाभागस्य "वैष्णविज्म शैविज्म एण्ड मिरर रिलिजियस सिस्टम्स" इति ग्रन्थमधिकृत्य डा. श्री जगदीशचन्द्ररेग्मिमहाभागा प्रत्यपादयन्नेतत्तथ्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मते सत्यपि कृष्णपदेन सह देवकीपदस्य संयोगो न संयोगमात्रमित्यप्यस्माभिरवधार्यते । आद्यशङ्कराचार्येण प्रमाणितासूपनिषत्सु कृष्णविषये छान्दोग्यादन्यत्र, न क्वापि लभ्यते इत्येतावदेव । इतः परमर्वाचीनासूपनिषत्सु निहिताः केचन कृष्णसंबद्धा विचारा निर्दिश्यन्ते । विशेषतः श्रीकृष्णोपनिषदि गोपालतापिन्युपनिषदि राधिकोपनिषदि च कृष्णचरितमुद्भावितमस्ति । श्रीकृष्णोपनिषदि[14]-रामस्य वनवासप्रसङ्गे कोटिकन्दर्पसुन्दरं रामं वीक्ष्य प्रेमविह्वला ऋषयस्तमालिङ्गितुकामा जाताः । तदा स यूयं गोपिका भूत्वा द्वापरे मया सह विहरिष्यथेति निर्दिदेश । तत्रैव रुद्रादयो देवा अपि तत्स्पर्शं कांक्षमाणाः प्रेमविह्वला बभूवुः । तानपि श्रीरामो द्वापरे मत्परिवारनिकरत्वेन मम स्पर्शनं करिष्यथेति प्रोवाच । ततस्ते सर्व एव द्वापरे तेनैव रूपेणावतीर्णाः । परमानन्द एव नन्दरूपतामापन्नो मुक्तिश्च यशोदारूपं जगृहे । ब्रह्मतत्त्वं देवकीरूपेण साकारं जातं निगमनिकरश्च वसुदेवरूपेणावतीर्णः । परब्रह्मरूपो[15] भगवानपि देवकीवसुदेवयोः पुत्ररूपेणावतीर्णो गोपगोपीजनैः सह दिव्यां लीलां चकार । स्वयमनन्तो बलरामरूपेण, दया रोहिणीरूपेण, सत्यमक्रूररूपेण, शमः सुदामरूपेण, दम उद्धवरूपेण, गरुडश्च भाण्डीरवटरूपेणावतीर्णाः । षोडशसहस्राधिकाः सुन्दर्यो ब्रह्मरूपा ऋच एवासन् । तदा द्वेषश्चाणूरतया मत्सरो मुष्टिकतया, दर्पः कुवलयापीडतया, महाव्याधिरघासुरतया कलिश्च कंसरूपं गृहीत्वा समाजग्मुः । वस्तुतः सर्वैस्तैस्तैस्तत्वैः साकं भगवता भूमौ वैकुण्ठमेवावतारितमिति वर्णना जात । गोपालपूर्वतापिन्युपनिषदि[16]-मुनयो ब्रह्माणं प्रपच्छुः कः परमो देव इति, ब्रह्मा तानुवाच कृष्ण एव परमं दैवतम् । ततो ब्रह्मा तान् श्रीकृष्णतत्त्वमुपदिश्य तच्चिन्तनेन नरः संसृतिचक्रादुन्मुच्यत इति निर्दिदेश । तत्रैव ब्रह्मणा कृष्णस्तुतिमाध्यमेन बर्हापीडाभिरामो गोपिकानन्दन आनन्दरूपः प्रेमरूपो वंशीवादनः केशिचाणूरकंसनिषूदनो गोवर्धनधारी वृन्दावनविहारी कालिन्दीकूलसञ्चारी पूतनाजीवितापहारी तृणावर्तसंहारी रुक्मिणीहारहारी चेति नामभिः कृष्णः कीर्तितः । इत्थं तत्तन्नामभिरेव[17] तत्र श्रीकृष्णावतारस्य लीलाः सङ्केतिताः । राधिकोपनिषदि[18]- षड्विधैश्वर्यपूर्णो गोपगोपीसेव्यो वृन्दाराधितो वृन्दावनाधिनाथः कृष्णः परमदेवत्वेन सङ्कीर्तितः । स च निजाभिः शक्तिभिर्नित्यं विहरणशीलः सर्वप्राचीनो देवः सर्वप्रियया राधाभिधयाऽऽह्लादनीशक्त्या नितरां शोभते । कृष्णोनाराधितेति हेतोः सा राधेति प्रथिता[19] । राधाकृष्णयोर्व्यावहारिके पार्थक्ये वर्तमानेऽपि परमार्थत एकमेव ब्रह्मतत्त्वं क्रीडनार्थं द्विधाभूतमतो यः कृष्णः सा राधा, या च राधा स कृष्ण इति तथ्यं तत्र निरूपितमस्ति । अन्ते च राधा हरेः सर्वेश्वरी सर्वविद्या सनातनी कृष्णप्राणाधिदेवी[20] चेति निरूप्य राधाया राधा रासेश्वरी रम्यादीनि नामानि निर्दिष्टानि । इत्थं कृष्णकथातत्त्वं समाधुर्यमुपनिषत्सून्मीलितमिति कथने न भवेत् काचन विप्रतिपत्तिः ।

---

14. संपादकः श्रीरामशर्मा, <u>१०८ उपनिषद्</u>, 'श्रीकृष्णोपनिषद्' प्रकाशक, संस्कृतिसंस्थान, बरेली, उ.प्र., पृ. ३५५-३६१ ।
15. "शेषनागोऽभवद्रामः कृष्णो ब्रह्मैव शाश्वतम्, तत्रैव,
16. तत्रैव, "गोपालपूर्वतापिन्युपनिषदि", पृ. ३४५ ।
17. "कंसवंशविनाशाय केशिचाणूरघातिने ।
    वृषभध्वजवन्द्याय पार्थसारथये नमः ॥" तत्रैव ।
18. तत्रैव, "राधोपनिषदि" पृ. ५२५-५२८ ।
19. ..."तास्वाह्लादनी वरीयसी परमान्तरीयभूता राधा । कृष्णेनाराध्यत इति राधा ।" तत्रैव ।
20. ... "एषा वै हरेः सर्वेश्वरी सर्वविद्या सनातनी कृष्णप्राणाधिदेवी चेति विविक्ते वेदाः स्तुवन्ति" । तत्रैव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३.२.३ पुराणेषु कृष्णः

भगवता कृष्णद्वैपायनेन पुराणवाङ्मये सर्वाधिकतया कृष्णकथा कीर्तिता । तत्र क्वचित् पूर्णरूपेण क्वचनांशरूपेण कुत्रचिदंशांशरूपेण कुत्रचन सङ्केतरूपेण च गङ्गेव लोकं पुनाना कृष्णकथा विलसति । विद्वत्सम्प्रदाये प्रसिद्धमस्ति निम्नाकारं पद्यम् -

"मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते ॥"

इदमेव पद्यमनुसृत्य पुराणनिहितकृष्णचरितदिग्दर्शनं प्रारभ्यते ।

(क) मत्स्यपुराणे

मत्स्यपुराणस्य ४७तमेऽध्याये कृष्णावतरणप्रसङ्गः संक्षेपेण निर्दिष्टः । धर्मे नष्टे सति[21] धर्मसंस्थापनायासुरकुलविध्वंसाय च वृष्णिवंशे प्रभुर्देवकीवसुदेवयोः पुत्रत्वमङ्गीकृत्य चतुर्बाहुरूपेणावतीर्णः । दिव्यरूपदर्शनानन्तरं वसुदेवः सामान्यशिशुरूपाकलनाय भगवन्तं सम्प्रार्थ्य तदाज्ञया तमादाय नन्दगोकुलं प्रतस्थे । गोकुलं प्राप्य वसुदेवो नन्दमुवाच "एष शिशुस्त्वया पालनीयोऽयमेव यदुकुलस्य भाग्यविधाता भविष्यति । अयं परब्रह्मरूपः परमेश्वरो योगमायया[22] जगन्मोहयन् मानुषीं तनुं स्वीचकारेति" । इत्यादि कृष्णावतरणसंबद्धं प्रारम्भिकं कथावस्तु मत्स्ये निरूपितं लभ्यते ।

(ख) मार्कण्डेये

मार्कण्डेयमहापुराणस्य १-५ अध्यायेषु सामान्यतया कृष्णचरितं निरूपितमस्ति । निर्गुणो भगवान् केन हेतुना कृष्णरूपं धृत्वा मानुषतां पाप्त इति प्रश्नस्योत्तररूपेण[23] कृष्णचरितनिरूपणं प्रारब्धमस्ति पुराणकारेण । धर्मस्य हानौ[24]· पापस्य वृद्धौ च जातायां परमात्मा धर्मसंस्थापनायात्मानं सृजतीति तथ्यमेकत्र निर्दिष्टम् । परमात्मनोऽनेकेऽवताराः सन्ति तेषु सम्प्रति तस्य माथुरोऽवतारः[25]

---

21. (क) "नष्टे धर्मे तदा जज्ञे विष्णुर्वृष्णिकुले प्रभुः ।
कर्तुं धर्मस्य संस्थानमसुराणां प्रणाशनम् ॥" मत्स्ये, ४७।१२ ।
(ख) "देवक्यां वसुदेवस्य तपसा पुष्करेक्षणः ।
चतुर्बाहुस्तदा जातो दिव्यरूपो ज्वलन् श्रिया ॥" तत्रैव, ४७।२ ।
(ग) "श्रीवत्सलक्षणं देवं दृष्ट्वा दिव्यैश्च लक्षणैः ।
उवाच वसुदेवस्तं रूपं संहर वै प्रभो ॥" तत्रैव, ४७.३ ।
22. "अतस्तु सर्वकल्याणं यादवानां भविष्यति ।
अयन्तु गर्भो देवक्यां जातः कंसं हनिष्यति ॥
सोऽवतीर्णो महीं देवो प्रविष्टो मानुषीं तनुम् ।
मोहयन् सर्वभूतानि योगात्मा योगमायया ॥ तत्रैव, ४७।६, ११ ।
23. "कस्मान्मानुषतां प्राप्तो निर्गुणोऽपि जनार्दनः ।
वासुदेवो जगत्सूतिस्थितिसंयमकारणम् ।" मार्कण्डेये, १।१३ ।
24. "यदा यदा हि धर्मस्य ग्लानिर्भवति जैमिने ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजत्यसौ ॥", तत्रैव, ४।५३ ।
25. "अवतारश्च तस्येह माथुरः साम्प्रतं स्वयम् ।" तत्रैव, ४।५६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवर्तत इति सूचितमेकस्मिन् पद्ये । विष्णो[26] प्राद्युम्नी, अनन्ता, सत्वोद्रिक्ता, सात्विकी चेति चतस्रो मूर्तयः सन्ति । तासु सात्विकी पन्नगतल्पगा मूर्तिरिवावतारान् करोति । प्राद्युम्नी च नानारूपेषु सञ्चरणशीला भवति, अनन्ता मूर्ध्ना पृथिवीं धत्ते, सत्वोद्रिक्ता सततं प्रजापालनतत्परा भवतीति तथ्यमेकत्र निरूपितम् । तत्रैव प्रसङ्गतो यदुवंशनिरूपणं कृत्वा श्रीकृष्णस्य बाल-माथुर-द्वारकाचरितानामुद्देशरूपेण कीर्तनं लभ्यते ।

(ग) श्रीमद्देवीभागवते

श्रीमद्देवीभागवतमहापुराणस्य चतुर्थस्कन्धे १७-२५ अध्यायेषु श्रीकृष्णावतारस्य मुख्यानि चरितानि विच्छित्तिपूर्वकं निरूपितानि । १७तमेऽध्याये कृष्णविषयको मार्मिको जनमेजयप्रश्नो जातः । १८ तमेऽध्याये दुष्टराजन्यभारपीडिताया धरित्र्या देवादिभिः सह विष्णुपार्श्वे प्रयाणादिकं वर्णितम् । १९तमेऽध्याये देवैः कृता हृद्या शक्तिस्तुतिर्निरूपिता । २०तमेऽध्याये वासुदेवस्यांशावतारकथा वर्णिता । २१तमेऽध्याये देवकीषट्पुत्राणां वधो निर्दिष्टः । २२तमेऽध्याये देवानामंशावतरणं निरूपितम् । २३तमेऽध्याये श्रीकृष्णजन्मकालिकं[27] विवरणं प्रस्तुतम् । २४तमेऽध्याये कृष्णस्य लीलाविशेषा[28] व्याख्याताः । २५तमेऽध्याये च पुत्रप्राप्तये कृष्णस्य कैलासयात्रां[29] निरूप्य कृष्णकृता शिवाराधना विवृता । नवमस्कन्धस्य १२ तमेऽध्याये राधाकृष्णाङ्गसम्भूताया गङ्गायाः स्वरूपं समुन्मीलितम् । तत्रैव ५० तमेऽध्याये लोकपावनं राधिकाचरितं कीर्तितमस्ति । इत्थं शक्तिमाहात्म्यविशिष्टे श्रीमद्देवीभागवतेऽपि श्रीकृष्णचरितस्य निरूपणं कृष्णस्याप्रतिमं महिमानं ख्यापयति ।

(घ) भविष्यपुराणे

भविष्यपुराणे विकीर्णतया कृष्णचरितं निरूपितमस्ति । प्रतिसर्गपर्वणि तृतीयेऽध्याये संक्षेपेण भगवदवतरणं[30] सूचितम् । ब्राह्मपर्वणि ७६तमेऽध्याये साम्बकथा सविस्तरमुपवर्णिता । तत्रैव

---

26. (क) "द्वितीया पृथिवीं मूर्ध्ना शेषाख्या धारयत्यधः ।
तामसी सा समाख्याता तिर्यक्त्वं समुपाश्रिता ॥
तृतीया कुरुते कर्म प्रजापालनतत्परा ।
सत्वोद्रिक्ता तु सा ज्ञेया धर्मसंस्थानकारिणी ॥
चतुर्थी जलमध्यस्था शेते पन्नगतल्पगा ।
इति सा सात्विकी मूर्तिरवतारान् करोत्यसौ ॥" तत्रैव, ४।४८-५०।

27. "सञ्जाते दशमे मासे मासेऽथ श्रावणे शुभे ।
प्राजापत्यर्क्ष-संयुक्ते कृष्णपक्षेऽष्टमीदिने ॥
बालकं सुषुवे तत्र निशीथे परमाद्भुतम् ।
तं दृष्ट्वा विस्मयं प्राप देवकी बालकं शुभम् ॥" श्रीमद्देवीभागवते, ४।२३।९,१०।

28. "प्रलम्बो निहतस्तेन तथा गोवर्धनो धृतः ।
श्रुत्वैतत् कर्म कंसस्तु मेने मरणमात्मनः ॥", तत्रैव, ४।२४।७ ।

29. "कृष्णं जाम्बवती दीना ययाचे सन्ततिं शुभाम् ।
स ययौ पर्वतं कृष्णः तपस्याकृतनिश्चयः ॥", तत्रैव, ४।२५।२९ ।

30. "स शौरेर्वसुदेवस्य देवक्यां जन्मनाविशत् ।
एवं कृष्णो महावीर्यो रोहिणीनिलयं गतः ॥
पञ्चत्रिंशदुत्तरञ्च शतं वर्षञ्च भूतले ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१३२तमेऽध्याये श्रीकृष्णस्य सुदर्शनकालचक्रप्राप्तिकथा निर्दिष्टा । उत्तरखण्डे कृष्णेन जगन्मङ्गल्यायोपदिष्टा व्रत-धर्म-तीर्थ-गङ्गा-विद्या दान-सत्कर्म-वृक्षारोपणमहिमप्रतिपादनपरा विषयाः सर्वकालोपयोगिनः सन्ति । तत्रैव मानवपतनहेतुभूतानां शतापराधानां सटीकं दिग्दर्शनमस्ति ।

(ङ) <u>ब्रह्मपुराणे</u>

ब्रह्मपुराणे ७२तमादध्यायात् १०३तममध्यायं यावत् सविस्तरं कृष्णचरितं समुपस्थापितमस्ति । कृष्णजन्मतः कंसवधपर्यन्ता कथा ७२-८५ अध्यायेषु निर्दिष्टा । अस्मिन् पुराणे भागवतसंवादिनी कृष्णकथा समाधुर्यं निरूपिता वर्तते । ब्रह्मणा कृतं गोवत्सापहरणं नात्र निरूपितम् । वर्षर्तौ भाद्रमासे कृष्णाष्टम्यां[31] ममावतारो भविष्यति, भगवत्या अवतारस्तु तदैव नवम्यामिति नारायणोक्तिर्विलसति । अत्र समाधुर्यं कृष्णजन्मकालचित्रणं[32] विहितम् । वसुदेवस्य[33] दिव्यरूपसंहरणाय भगवत्प्रार्थना सुष्ठु निरूपिता । कृष्णचरितगतैस्तैस्तैर्विशेषैः सहात्र रासानन्दः[34] सूचितः ।

(च) <u>ब्रह्मवैवर्तपुराणे</u>

ब्रह्मवैवर्तस्य कृष्णजन्माभिधे चतुर्थे खण्डे पूर्वार्धस्य १-५४अध्यायेषु, उत्तरार्धस्य च ५५-१३०अध्यायेषु श्रीकृष्णविषयकं वृत्तं सप्रपञ्चं व्याख्यातमस्ति । ब्रह्मवैवर्ते वर्णिताः कृष्णचरितसंबद्धा विषया ब्रह्मपुराणे, विष्णुपुराणे, हरिवंशे, श्रीमद्भागवते, गर्गसंहितायाञ्च निरूपितैस्तैस्तैः कृष्णचरितसंबद्धैर्वस्तुभिः सादृश्यमाकलयन्तोऽपि कैश्चन नवीनैर्विशेषैर्निजां विशिष्टां विच्छित्तिमुद्भावयन्ति । सर्वाङ्गविलसिता कृष्णलीला चेह व्यासदेवेन व्याख्याता । यस्या राधायाः श्रीमद्भागवते नामापि नावगम्यते तस्या भूलोकीयं गोलोकीयञ्च चरितमत्र कीर्तितमस्ति । भाण्डीरवने राधाकृष्णयोर्विवाहप्रसङ्गः समाधुर्यमत्र निरूपितः । कलावत्या इतिवृत्तं प्रकाशितम् । बक-प्रलम्ब-केशि-धेनुकादीनां पूर्वजन्मप्रसङ्गाः सूचिताः । राधाकृष्णयोः संवादमाध्यमेन सतीशङ्करवृत्तं निरूपितम् । गौरीशङ्करलीला च वचसां विषयीकृता । राधाकृष्णरासवर्णनप्रसङ्गे राधाकृष्णादिनाम्नि कृष्णनाम्नः पूर्वं राधानाम्न उच्चारणे हेतुर्निरूपितः । श्रीकृष्णप्रभावं व्याख्याय प्रसङ्गतो रामावतारविषयकं वृत्तमुपस्थापितम् । कृष्णेन राधायै निरूपितो ज्ञानोपदेशो व्याख्यातः । भगवता कृतं नन्दस्योद्बोधनं निरूपितम् । सर्वे धर्मा व्याख्याताः । राधयोद्धवाय दत्तं ज्ञानमत्र कीर्तितम् । राधया यशोदायै दत्तो ज्ञानोपदेशो निरूपितः । शिवाज्ञया वसुदेवेन सम्पादितस्य राजसूययज्ञस्य चर्चोपात्ता । राधाकृष्णयोरपूर्वः श्रृङ्गारो निरूपितः । श्रीदामराधयोर्मिथः शापप्रदानवृत्तं निर्दिष्टम् ।

उषित्वा कृष्णचन्द्रश्च ततो गोलोकमागतः ॥
चतुर्थचरणान्ते च हरेर्जन्म स्मृतं बुधैः ।" <u>भविष्यपुराणे,</u> प्रतिसर्गपर्वणि, ३।८०-८२ ।

31. "प्रावृट्काले च नभसि कृष्णाष्टम्यामहं निशि ।
उत्पत्स्यामि नवम्याञ्च प्रसूतिं त्वमवाप्स्यसि ॥" ब्रह्मपुराणे, ७२।४४ ।

32. "मध्यरात्रेऽखिलाधारे जायमाने जनार्दने ।
मन्दं जगर्जुर्जलदाः पुष्पवृष्टिमुचः सुराः ॥" तत्रैव, ७३।११ ।

33. "जातोऽसि देवदेवेश शङ्खचक्रगदाधर ।
दिव्यरूपमिदं देव प्रसादेनोपसंहर ॥" तत्रैव, ७३।१४ ।

34. "गोपीपरिवृतो रात्रीं शरच्चन्द्रमनोरमाम् ।
मानयामास गोविन्दो रासारम्भरसोत्सुकः ॥" तत्रैव, ८१।२१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णजन्मकालचित्रणञ्चेहापूर्वतयोपस्थापितम्[35] । इह निरूपितं कृष्णनामनिर्वचनं [36] नैजं मूल्यं धत्ते । राधाशब्दस्यापि विशेषार्थविवृतिरत्रोपात्ता[37] । राधाकृष्णयोः सम्भोगश्रृङ्गारश्च[38] ब्रह्मवैवर्ते वैलक्षण्येन विवृतः । राधापार्वतीसीतानां पितृसंबन्धं व्याख्याय धरणीतलेऽवतरणं कीर्तितम् । वृन्दाय वृन्दावनस्य च महत्त्वं प्रकाशितम् । राधायाः कृष्णप्राणाधिदेवीत्वं[39] कीर्तितम् । उपर्युक्तैरन्यैश्च

---

35. "गते सप्त मुहूर्ते तु चाष्टमे समुपस्थिते ।
वेदातिरिक्तदुर्ज्ञेये सर्वोत्कृष्टे शुभे दिने ॥
शुभग्रहैर्दृष्टियुक्तेऽप्यदृष्टे चाशुभग्रहैः ।
अर्धरात्रे समुत्पन्ने रोहिण्यामष्टमीतिथौ ॥
जयन्तीयोगसंयुक्ते चार्धचन्द्रोदये मुने ।
ववर्षुश्च जलधरा ववुर्वाताः सुशीतलाः ॥
सुप्रसन्ना च पृथिवी प्रसन्नाश्च दिशो दश ।
ऋषयो मनवश्चैव यक्षगन्धर्वकिन्नराः ॥
देवा देव्यश्च मुदिता ननृतुश्चाप्सरोगणाः ।
जगुर्गन्धर्वपतयो विद्याधर्यश्च नारद ॥
सुखेन सुस्रुवुर्नद्यो जज्वलुश्चाग्नयो मुदा ।
नेदुर्दुन्दुभयो नाके आनकाश्च मनोहराः ॥
पारिजातप्रसूनानां महावृष्टिर्बभूव ह ।
जगाम सूतिकागेहे नारीरूपं विधाय भूः ॥
जयशब्दः शङ्खशब्दो हरिशब्दो बभूव ह ।
एतस्मिन्नन्तरे तत्र पपात देवकी सती ॥
निःससार (हि) वायुश्च देवकीजठरात्ततः ।
तदैव भगवान् कृष्णो दिव्यरूपं विधाय च ॥
अतीव कमनीयं तच्छरीरं सुमनोहरम् ॥", ब्रह्मवैवर्ते, ७।६३-६५, ६८-७४ ।

36. "ब्रह्मणो वाचकः कश्च ऋकारोऽनन्तवाचकः ।
शिवस्य वाचकः षश्च नकारो धर्मवाचकः ॥
अकारो विष्णुवचनः श्वेतद्वीपनिवासिनः ।
नरनारायणार्थस्य विसर्गो वाचकः स्मृतः ॥
सर्वेषां तेजसां राशिः सर्वमूर्तिस्वरूपकः ।
सर्वाधारः सर्वबीजस्तेन कृष्ण इति स्मृतः ॥" तत्रैव, १३।५६-५८ ।

37. रेफो हि कोटिजन्माघं कर्मभोगं शुभाशुभम् ।
आकारो गर्भवासञ्च मृत्युञ्च रोगमुत्सृजेत् ॥
धकार आयुषो हानिमाकारो भवबन्धनम् ।
श्रवणस्मरणोक्तिभ्यः प्रणश्यति न संशयः ॥" तत्रैव, १३।१०५-१०६ ।

38. (क) "करे कृत्वा च तां देवः स्थापयामास वक्षसि ।
चकार शिथिलं वस्त्रं चुम्बनं च चतुर्विधम् ॥" तत्रैव, १५।१५० ।
(ख) "कङ्कणानां किङ्किणीनां मञ्जीराणां मनोहरः ।
बभूव शब्दस्तत्रैव श्रृङ्गारसमरोद्भवः ॥" तत्रैव, १५।१५५ ।

39. "प्राणाधिका प्रेयसी च कृष्णस्य परमात्मनः ।
कृष्णाप्राणधिका सा च कृष्णेन परिकीर्तिता ॥" तत्रैव, १७।२२६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तैस्तैर्वृत्तैः सह जन्मतः परमधामप्रयाणपर्यन्ताः कृष्णस्य समग्रा लीला ब्रह्मवैवर्ते निरूपिता विद्योतन्ते ।

(छ) <u>ब्रह्माण्डपुराणे</u>

ब्रह्माण्डपुराणस्योपोद्घाताख्ये तृतीये पादे ७१तमेऽध्याये संक्षेपेण सयदुवंशकीर्तनं कृष्णचरितं निर्दिष्टमस्ति । अन्यपुराणेषु कंसेन पाषाणे विपोथिता योगमाया व्योम प्राप्य कंसं तत्प्राणघातकशत्रुविषये संसूच्यान्यत्र गतेति वृत्तं लभ्यते परमत्र कंसेन कन्यामिमां न हन्मि त्वमेव नयेत्युच्चार्य वसुदेवाय समर्पितेति निर्दिष्टम्[40] । कृष्णावतारविषयकं प्रयोजनं व्याकृत्य कृष्णजन्मावसरस्य चारुतया चित्रणमत्र कृतम्[41] । इह कृष्णस्य बालचरितस्य स्यमन्तकमणिविवादस्य जम्बवतीविवाहस्य च कथा यथावसरं निरूपिताः । वस्तुतो ब्रह्माण्डे वस्तुनिर्देशप्रधाना कृष्णचर्चा लभ्यते ।

(ज) <u>वायुपुराणे</u>

वायुपुराणस्योत्तरखण्डस्य ३४-३५ अध्याययोः श्रीकृष्णविषयकं निरूपणं लभ्यते । श्रीकृष्णजन्मप्रसङ्गे[42] समुपात्तानि पद्यानि ब्रह्माण्डस्य तस्मिन्नेव प्रसङ्गे वर्णितैः पद्यैरक्षरशः समानानि । संक्षेपेणेह कृष्णचरितं कीर्तितम् । यदुवंशवर्णनविधौ निरूपिता पञ्चवीरचर्चा[43] संस्मरणीया । बाणभट्टस्य कादम्बर्यां निहितं "पुराणेषु वायुप्रलपितम्" इति वाक्यमधिकृत्याधुनिकैः समीक्षकैः वायुपुराणस्य[44] सर्वप्राचीनत्वं साध्यते । तत्र कृष्णकथाबीजोपलब्धिश्च कृष्णकथायाः प्राचीनत्वं साधयति तया दृष्ट्यापि ।

(झ) <u>वामनपुराणे</u>

वामनपुराणे कृष्णचरितं क्रमबद्धतया न क्वचन निर्दिष्टम् । तथापि २९,३३, ८६ अध्यायेषु भगवद्गुणगणोदीरणावसरे स्तावकवचनैः कृष्णचरितमपि सूच्यते । एकत्र प्रह्लादस्य[45] कृष्णभक्तिर्निरूपिता । अपरत्र पुण्डरीकाक्षस्य संस्मर्ता सदा[46] शुचिर्भवतीति निरूपितम् । अन्यत्र च

---

40. (क) "तवैषा हि यथा कन्या तथा मम न संशयः ।
न हन्मीमां महाबाहो व्रजत्वेषा यथाविधि ॥", ब्रह्माण्डपुराणे, उपोद्घातपादे, ७१।२१९ ।
(ख) "कन्या सा ववृधे तत्र वृष्णिसद्मनि पूजिता ।" तत्रैव, ७१।२२० ।

41. "सागराः समकम्पन्त चेलुश्च धरणीधराः ।
जज्वलुश्चाग्निहोत्राणि जायमाने जनार्दने ॥" तत्रैव, ७१।२०४ ।

42. "सागराः समकम्पन्च चेलुश्च धरणीधराः ।
जज्वलुश्चाग्निहोत्राणि जायमाने जनार्दने ॥" वायुपुराणे, उतरखण्डे, ३४।१९९।

43. "सङ्कर्षणो वासुदेवः प्रद्युम्नः साम्ब एव च ।
अनिरुद्धश्च पञ्चैते वंशवीराः प्रकीर्तिताः ॥" तत्रैव, ३५।१ ।

44. "अमरनाथपाण्डेयः, <u>बाणभट्टका साहित्यिक अनुशीलन</u>, प्रकाशक, भारतीय विद्याभवन प्रकाशन, प्रथम संस्करण, ई. १९७४, पृ. २३२ ।

45. "तिष्ठत्यनेकसंसारसंघाघौघविनाशिनी ।
कृष्णे भक्तिरहं तावदवेक्ष्यो भवता न किम् ॥", <u>वामनपुराणे,</u> २९।४० ।

46. "अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥" तत्रैव, ३३।६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कैश्चन पद्यैः कृष्णावतारकार्यसूचकानि नामानि कीर्तितानि[47]। इतरत्र गोकुलोल्लेखपुरःसरं भगवत
प्रलम्बपूतनादिविनाशकर्तृत्वं[48] सङ्केतितमस्ति ।

(ञ) वाराहपुराणे

वाराहपुराणे विधिवत्कृष्णचर्चाया अभावेऽपि १५२-१७८ अध्यायेषु मथुरातीर्थनिरूपणवि
माथुरविषयप्रकाशनप्रसङ्गे च विकीर्णतया कृष्णचरितं सूचितमस्ति । श्रीकृष्णस्य[49] मातृभूमि
मथुरामहिमनिरूपणे प्रतिबिम्बितमस्ति । गोपीश्वरवर्णने कृष्णस्य यमलार्जुनभङ्गवृत्तं सूचितम्[50]
तत्रैव शकटभङ्गकथाबीजं निर्दिष्टम् । क्वचन गोपवेषधरस्य कृष्णस्याभिषेकवृत्तं[51] प्रकाशितम
मथुराप्रदक्षिणामहिमप्रकाशने गोपैः सह कृष्णस्य द्यूतक्रीडा[52] सूचिता । सुशीलवैश्यचरित्रनिरूपणप्र
मथुराया भौगोलिकी स्थितिर्निरूपिता[53] वर्तते ।

(ट) विष्णुपुराणे

विष्णुपुराणस्य पञ्चमेंऽशे १-३८ अध्यायैः समग्रं कृष्णचरितं सपरमार्थनिरूपणं सूत्रशैल
व्याख्यातमस्ति । अस्यैव चतुर्थेंऽशे १३ तमेऽध्याये स्यमन्तकमणिचर्चोपात्ता वर्तते । तत्रैव १५
तमेऽध्याये यदुवंशवर्णनविधौ संक्षिप्तं कृष्णचरितं लभ्यते । पञ्चमोंऽशस्तु
देवकीवसुदेवविवाहसंस्कारादारभ्य यादवानामवसानं यावन्निरूपितया कृष्णकथया समलङ्कृतो नितर
महनीयो वर्तते । रासानन्दस्य निरूपणे सत्यपि क्वचन राधानाम न लभ्यते । सम्प्रति विष्णुपुराणस
प्रतिपादनशैलीदिग्दर्शनाय केचन विशिष्टाः प्रसङ्गा उदाह्रियन्ते । जाम्बवतो[54] महाबिला
जाम्बवतीमादाय द्वारकामागच्छतः कृष्णस्य दर्शनेन लब्धजीवनानां यादवानां हर्षातिरेकः सा
चित्रितः । वसुदेवसूनुत्वेन कृष्णावतरणं[55] रोचकतया निरूपितमस्ति । भगवतो योगमाया

---

47. "केशवं केशिहन्तारं कंसारिष्टविनाशनम् ।
प्रणतोऽस्मि महाबाहुं स मे पापं व्यपोहतु ॥" तत्रैव, ८६,१०० ।
48. " कस्त्वामृतेऽन्यो नन्दस्य गोकुले रतिमेष्यति ।
प्रलम्बपूतनादीनां त्वामृते मधुसूदन ॥
नियन्ता ह्यथवा शास्ता देवदेव भविष्यति ।" तत्रैव, ८६।१०४ ।
49. "सा रम्या च सुशस्ता च जन्मभूमिस्तथा मम ।
शृणु देवि यथा स्तौमि मथुरां पापहारिणीम् ।" वाराहपुराणे, १५२।१२ ।
50. "यथा बालेन कृष्णेन भग्नार्जुनयुगन्तथा ।
शकटञ्च तथा भिन्नं घटभाण्डकुटीरकम् ॥" तत्रैव, १५७।२२,२३ ।
51. "गोपवेषधरं देवमभिषेकं चकार ह ।" तत्रैव, १५७।७५ ।
52. "द्यूतक्रीडा भगवता कृता गोपजनैः सह ।" तत्रैव, १६०।५२ ।
53. "गोवर्धनो गिरिवरो यमुना च महानदी ।
तयोर्मध्ये पुरी रम्या मथुरा लोकविश्रुता ॥" तत्रैव, १६५।२३ ।
54. विष्णुपुराणे, ४।१३।५९ ।
55. "तज्जन्मदिनमत्यर्थमाह्लादममलदिङ्मुखम् ।
बभूव सर्वलोकस्य कौमुदी शशिनो यथा ॥
सन्तः सन्तोषमधिकं प्रशमं चण्डमारुताः ।
प्रसादं निम्नगा याता जायमाने जनार्दने ॥
मन्दं जगर्जुर्जलदाः पुष्पवृष्टिमुचो द्विजाः ।
अर्द्धरात्रेऽखिलाधारे जायमाने जनार्दने ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिरण्यकशिपोः षट् पुत्रान् देवकीजठरे प्रापयितुं यः समादेशः स सुष्ठु[56] निरूपितः । विष्णुगर्भाया देवक्या देवैः कृता स्तुतिर्नितरामनवद्या[57] वर्तते । षड्गर्भेषु पातितेषु देवकीवसुदेवौ कारागारादुन्मोच्य कंसेन यत्सान्त्वनं प्रदत्तं तदपि विष्णुपुराणे[58] चारु चित्रितम् । रामकृष्णयोर्बाललीलानिरूपणविधौ निरूपितं वर्षावर्णनं[59] मर्मस्पर्शि वर्तते । नागपत्नीनां भगवद्गुणव्यञ्जिनी स्तुतिरपि विष्णुपुराणस्य विशिष्टो[60] विषयः । कालियकृता भगवत्प्रार्थना[61] गभीरार्थावगाहिनी वर्तते । गोकुलयात्रावसरेऽक्रूरमनसि[62] समुन्मीलितानां भावतरङ्गाणां हृद्यं निरूपणमस्ति विष्णुपुराणे । कृष्णस्य मथुराप्रस्थानवेलायां गोपीभिरभिव्यक्ता तीव्रा वेदना[63] ताभिरेव कृताऽक्रूरतर्जना च साधु निरूपिता । सह गोपीभिः कृष्णस्य महारासो[64] हृदयावर्जकतया चित्रितो वर्तते । इत्येभिर्विषयैः सह समग्राऽध्यात्मगहना कृष्णलीला साधुपात्ता विष्णुपुराणे ।

(ठ) आग्नेयपुराणे

आग्नेयपुराणस्य १२तमेऽध्याये सूत्रात्मकतया कृष्णचरितं निबद्धमस्ति । सर्ववाङ्मयस्रोतोभूतेऽस्मिन्नाग्नेये सूत्ररूपमपि परिपूर्णं कृष्णकथाबीजमुपलभ्यते । यादवेषु सर्वोत्तमो

फुल्लेन्दीवरपत्राभं चतुर्बाहुमुदीक्ष्य तम् ।
श्रीवत्सवक्षसं जातं तुष्टावानकदुन्दुभिः ॥" तत्रैव, ५।३।३,४,७,८ ।

56. तत्रैव, ५।१।७१-७६ ।
57. "प्रसीद देवि सर्वस्य जगतः शं शुभङ्कुरु ।
प्रीत्या तं धारयेशानं धृतं येनाखिलं जगत् ॥" तत्रैव, ५।२।२१ ।
58. तत्रैव, ५।४।१५-१६ ।
59. "न रेजेऽन्तरितश्चन्द्रो निर्मलो मलिनैर्घनैः ।
सद्वादिवादो मूर्खाणां प्रगल्भाभिरिवोक्तिभिः ॥" तत्रैव, ५।६।३५ ।
60. "ततः कुरु जगत्स्वामिन् । प्रसादमवसीदतः ।
प्राणान् त्यजति नागोऽयं भर्तृभिक्षा प्रदीयताम् ॥" तत्रैव, ५।७।५७ ।
61. "यथाहं भवता सृष्टो जात्या रूपेण चेश्वर ।
स्वभावेन च संयुक्तस्तथेदं चेष्टितं मया ॥" तत्रैव, ५।७।७३ ।
62. "विनिर्जग्मुर्यतो वेदा वेदाङ्गान्यखिलानि च ।
द्रक्ष्यामि तत् परं धाम धाम्नां भगवतो मुखम् ॥" तत्रैव, ५।१७।५ ।
63. "एषैष रथमारुह्य मथुरां याति केशवः ।
क्रूरेणाक्रूरकेणात्र निर्घृणेन प्रतारितः ॥" तत्रैव, ५।१८।१९ ।
64. "गतेऽनुगमनंचक्रुर्वलने सम्मुखं ययुः ।
प्रतिलोमानुलोमाभ्यां भेजुर्गोपाङ्गना हरिम् ॥
स तथा सह गोपीभि ररास मधुसदनः ।
यथाब्दकोटिप्रतिमः क्षणस्तेन विनाऽभवत् ॥" तत्रैव, ५।१३।५७-५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यादवः कृष्ण[65] एवेति मधुरा निरुक्तिः क्वचन विलसति । अन्यत्र कृष्णजन्म[66], योगमायाय कंसायादेशः[67], कृष्णरामयोर्बालक्रीडा[68], कंसहत्या[69] चेत्यादयो विषयाः सरलपदैः संसूचिताः सन्ति

(ङ) नारदमहापुराणे

नारदीयपुराणस्य पूर्वार्द्धे ८०तमेऽध्याये कृष्णस्य मन्त्रैराराधना निरूपिता । ८१ तमेऽध्याये कृष्णमन्त्रभेदानां विवरणमुपात्तम् । ८२ तमेऽध्याये राधाकृष्णयोः सहस्रनामानि कीर्तितानि । ८ तमेऽध्याये राधांशभूतानां पञ्चप्रकृतीनां निरूपणं जातम् । ८८ तमेऽध्याये राधावतारभूतषोडशदेवीनां मन्त्रयन्त्रपूजाविधिर्निरूपितः । ९४ तमेऽध्याये कृष्णचरितस्य संक्षि दिग्दर्शनं कृतम् । उत्तरार्द्धस्य ५८ तमेऽध्याये राधाकृष्णत एवाखिलब्रह्माण्डोत्पत्तिः संसूचिता । ५ तमेऽध्याये गोलोकस्थितयो राधाकृष्णयोः पञ्चधारूपग्रहणं निर्दिष्टम् । ६०तमेऽध्याये जेष्ठशुक्लदशमीमारभ्य पौर्णमासीपर्यन्तं रामकृष्णसुभद्राश्रीविग्रहदर्शनेन महाफलावाप्तिविष प्रकाशितः । कृष्णः[70] सगुणो निर्गुणश्चेति विषय एकस्मिन् पद्ये निरूपितः । एकत्र सर्वे लोक प्राकृतिका[71] गोलोकस्तु निर्गुण इति तथ्यं प्रकाशितम् । एकस्मिन् पद्ये प्रकृतेः पराया राधायाः[72] स्वरूपमुद्भावितम् । तस्मिन्नेव प्रसङ्गे राधाकृष्णयोरेकरूपत्वं निर्दिष्टम् । एकत्र राधायाश्चतुर्भुजत्वं वर्णितमपरत्र द्वयोरेव द्विभुजत्वं[74] चित्रितम् । अन्यत्र राधायाः शिवरूपत्वं[75] प्रकाश्य कृष्णस्य प्रकृतिरूपं चित्रितम् । एकस्मिन्नध्याये[76] कृष्णसहस्रनामकीर्तनमुखेन तत्तन्नामभिः समग्रं कृष्णचरि

---

65. "यदुकुले यादवाश्च वासुदेवस्तदुत्तमः ।," आग्नेये, १२।३ ।
66. "कृष्णाष्टम्यान्तु नभसि अर्द्धरात्रे चतुर्भुजः ।
देवक्या वसुदेवेन स्तुतो बालो द्विबाहुकः ॥
वसुदेवः कंसभयाद् यशोदाशयनेऽनयत् ॥" तत्रैव, १२।११ ।
67. "किं मया क्षिप्तया कंसः जातो यस्त्वां वधिष्यति ।
सर्वस्वभूतो देवानां भूभारहरणाय सः ॥", तत्रैव, १२। ११ ।
68. "सर्वस्य जगतः पालौ गोपालौ तौ बभूवतुः ।", तत्रैव, १२।१६ ।
69. मथुराधिपतिं कंसं हत्वा तत्पितरं हरिः ।
चक्रे यादवराजानं .... ॥", तत्रैव, १२।२५ ।
70. "देवि सर्वेऽवतारास्तु ब्रह्मणः कृष्णरूपिणः ।
अवतारी स्वयं कृष्णः सगुणो निर्गुणः स्वयम् ॥" नारदीयमहापुराणे, उत्तरार्धे,५८।४५ ।
71. "स एव रामः कृष्णश्च वस्तुतो गुणतः पृथक् ।
सर्वे प्राकृतिका लोका गोलोको निर्गुणः स्वयम् ॥", तत्रैव, ५८।४६ ।
72. (क) "प्राणाधिकप्रियतमा सा राधा राधिता यया ।
सुवर्णवर्णा देवी सा चिद्रूपा प्रकृतेः परा ॥", तत्रैव, ५९।८ ।
(ख) तयोर्देहस्थयोर्नास्ति भेदो नित्यस्वरूपयोः ।
धावल्यदुग्धयोर्यद्वत् पृथिवीगन्धयोर्यथा ॥", तत्रैव, ५९।९ ।
73. तत्रैव, ५९।१५ ।
74. तत्रैव, ५९।१६ ।
75. तत्रैव, ५९।२२ ।
76. "गोपीकानन्दनः कृष्णो गोपानन्दः सतां गतिः ।
बकप्राणहरो विष्णुर्बकमुक्तिप्रदो हरिः ॥
कालियार्तिकरः क्रूरो नागपत्नीडितो गिरा ।
धेनुकारिः प्रलम्बारिर्वृषासुर-विमर्दनः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूचितम् । अपरस्मिन्नध्याये[77] च भागवतस्य दशमस्कन्धस्य विषयनिरूपणविधौ कृष्णचरितं संक्षेपेण सूचितम् । इत्थमस्मिन् नारदीये विधिवत् कृष्णचरित्रनिरूपणाभावेऽपि कृष्णस्य मुख्या महनीयाश्च लीला: सूचिता: ।

(ढ) पद्मपुराणे

पद्मपुराणस्य पातालखण्डे ६९तमादध्यायात् ८३तममध्यायं यावत् १५ अध्यायेषु विशिष्टीकृतं कृष्णचरितं लभ्यते । उत्तरखण्डे च १-६ अध्यायेषु श्रीमद्भागवतमाहात्म्यनिरूपणविधौ नैकधा कृष्णमहिमा विगीतो वर्तते । पातालखण्डे वृन्दावनसौन्दर्यं, कृष्णपार्षदचर्चा, श्रीकृष्णसुन्दरीगणनिर्देश:, श्रीकृष्णतत्त्वोपदेश:, मथुरामहिमा, राधादर्शने विमोहितस्यार्जुनस्य स्त्रीत्वप्राप्ति:, नारदस्य स्त्रीरूपावाप्ति:, श्रीकृष्णपराक्रम:, कलौ कृष्णनाममहिमा, श्रीकृष्णमन्त्रार्थ:, वृन्दावने कृष्णस्य दैनिकी लीला, राधाकृष्णयोर्दिव्यो विलासश्चेत्यादयो विशिष्टा विषया गभीरया शैल्या निरूपिता: सन्ति । उत्तरखण्डे भागवतमाहात्म्यनिरूपणप्रसङ्गे श्रीमद्भागवतग्रन्थस्य श्रीकृष्णरूपत्वं प्रकाशितम् । सम्प्रति पद्मपुराणस्य विषयशैलीदिग्दर्शनाय द्वित्रा विषया उदाह्रियन्ते ।

गोकुले गोलोकैश्वर्यं[78] द्वारकायां च वैकुण्ठैश्वर्यं वर्तते इति तथ्यमेकस्मिन् पद्ये विवृतमस्ति । अपरस्मिन् प्रसङ्गे[79] कृष्णध्यानविधिरुपात्त: । इतरत्र[80] राधाकृष्णयोरतुलनीयता प्रदर्शिता । अन्यस्मिन् प्रसङ्गे वृन्दावनमहत्त्वमीरितम्[81] । माहात्म्यप्रकाशनविधौ भगवान् भक्त्यैव[82] लब्धुं शक्यत इति निरूपितम् । भागवतोर्जिता कृष्णमेव[83] गायन्ती भक्तिरेकत्र

गोपिकागीतचरितो गोपीनर्तनलालस: ।
गोपीस्कन्धाश्रितकरो गोपिकाचुम्बनप्रिय: ॥", तत्रैव, पूर्वार्धे, ८।४०,६४,७१ ।

77. "कृष्णावतारसंप्रश्नो गोकुलीया कथा तत: ।
पूतनादिवधो बाल्ये कौमारेऽघादिहिंसनम् ॥
कैशोरे कंसहननं माथुरं चरितं तथा ।
ततस्तु यौवने प्रोक्ता लीला द्वारवतीभवा ॥", तत्रैव, पूर्वार्धे, ९४।१२।१३ ।

78. "गोलोकैश्वर्यं यत् किञ्चिद् गोकुले तत् प्रतिष्ठितम् ।
वैकुण्ठवैभवं यद् वै द्वारकायां प्रतिष्ठितम् ॥", पद्मपुराणे, पातालखण्डे, ६९।१० ।

79. "श्रुतिमृग्यमजं नित्यं गोपीजनमनोहरम् ।
परं धाम परं रूपं द्विभुजं गोकुलेश्वरम् ॥
बल्लवीनन्दनं ध्यायेन्निर्गुणस्यैककारणम् ।
सुश्रीमन्तं नवं स्वच्छं श्यामधाममनोहरम् ॥", तत्रैव, ६९।८६-८७ ।

80. "न राधिकासमा नारी न कृष्णसदृश: पुमान् ।", तत्रैव, ७७।५२ ।

81. "वृन्दावनस्य संयोगात् पुनस्त्वं तरुणी नवा ।
धन्यं वृन्दावनं तेन भक्तिर्नृत्यति यत्र च ॥, तत्रैव, उत्तरखण्डे, १।६१ ।

82. "द्रौपदी च परित्राता येन कौरवकश्मलात् ।
पालिता गोपसुन्दर्य: स कृष्ण: क्वापि नो गत: ॥" तत्रैव, २।२ ।

83. "एवं नगाहश्रवणोरुधर्मे प्रकाश्यमाने मुनिभि: सभायाम् ।
आश्चर्यमेकं समभूत्तदानीं तदुच्यते संश्रृणु शौनक त्वम् ॥
भक्ति: सुतौ तौ तरुणौ गृहीत्वा प्रेमैकरूपा सहराविरासीत् ।
श्रीकृष्ण गोविन्द हरे मुरारे नाथेति नामानि मुहुर्वदन्ती ॥" तत्रैव, ३।६६-६७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शव्दैश्चित्रिता । अपरत्र भागवतस्य[84] कृष्णरूपत्वाद् जनैरात्मकल्याणाय भागवतश्रवणं कर्तव्यमिति निगूढतया निरूपितम् ।

(ण) लिङ्गपुराणे

लिङ्गपुराणस्य पूर्वभागे ६८तमेऽध्याये यदुवंशविवरणं निरूपितमस्ति, ६९ तमेऽध्याये च संक्षेपेण श्रीकृष्णचरितं कीर्तितम् । एकस्मिन् प्रसङ्गे भृगुशापेन[85] भगवान् मनुष्यरूपेण यदुकुले जनिं भेजे, इति तथ्यमुद्घाटितमस्ति । संकर्षणे रोहिण्यां जाते सति कृष्णोऽवतीर्ण[86] इति वस्तुतथ्यमेकत्र निरूपितम् । उमांशजा कौशिकी[87] योगमायारूपेणावतीर्णेति तथ्यमेकस्मिन् पद्ये निहितमस्ति । अनन्त एव हलायुधरूपेण[88] प्रादुर्भूत इति वस्तु प्रसङ्गान्तरे प्रतिपादितम् । वसुदेवो यशोदायै शङ्खचक्रगदापद्मयुतं[89] श्रीवत्सलाञ्छनं चतुर्भुजं कृष्णं समर्पयामास न तु द्विभुजमित्येकत्र समुदीरितम् । भगवान्[90] श्रीकृष्णो देवब्राह्मणघातिनो दानवान् नृशंसं कंसञ्च जघानेति तथ्यमेकस्मिन् पद्ये निरूपितम् ।

(त) गरुडपुराणे

गरुडपुराणस्य १४४तमेऽध्याये हरिवंशनिरूपणाख्ये वस्तुसूचनशैल्या कृष्णचरितमुद्दिष्टमस्ति । १३९ तमेऽध्याये भाद्रकृष्णाष्टम्यां कृष्णपूजनविधिरुक्तः । २८ तमेऽध्याये गोपालपूजाप्रकारः प्रकाशितः । २२९ तमेऽध्याये च गीतासारो निरूपितः । प्रेतकल्पे विकीर्णतया कृष्णमाहात्म्यं समुदीरितम् । हरिवंशकथनं[91] हरिचरितदिग्दर्शनमुखेन प्रारब्धम् । भगवतः प्रमुखपत्नीनामेकत्र[92] संसूचनं विहितम् । कृष्णाष्टम्यां हरिपूजनमर्द्धरात्रे[93] विधेयमिति प्रसङ्गान्तरेण निरूपितम् । गोपालमन्त्रः[94] प्रत्यक्षतो निर्दिष्टः स्थलविशेषे । [95]गीतासारनिरूपणक्रमेऽष्टाङ्गयोगस्य

---

84. "श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि ।
स्वीकृतोऽसि मया नाथ मुक्त्यर्थं भवसागरे ॥", तत्रैव, ६,३८ ।
85. "भृगुशापच्छलेनैव मानयन् मानुषीं तनुम् ।
बभूव तस्यां देवक्यां वासुदेवो जनार्दनः ॥", लिङ्गपुराणे, पूर्वभागे, ६३।३८ ।
86. "जाते रामेऽथ निहते षड्गर्भे विनिपातिते ।
वसुदेवो हरिं धीमान् देवक्यामुदपादयत् ॥", तत्रैव, ६९।४६ ।
87. "उमादेहसमुद्भूता योगनिद्रा च कौशिकी ।
नियोगाद् देवदेवस्य यशोदातनया ह्यभूत् ॥" तत्रैव, ६९।४९ ।
88. "हलायुधश्च भगवाननन्तो रजतप्रभः ।", तत्रैव, ६९।४७ ।
89. "चतुर्भुजं विशालाक्षं श्रीवत्सकृतलाञ्छनम् ।
शङ्खचक्रगदापद्मं धारयन्तं जनार्दनम् ॥
यशोदायै प्रदत्त्वा तु वसुदेवश्च बुद्धिमान् ।", तत्रैव, ६९।५१-५२ ।
90. "कंसोऽपि निहतस्तेन कृष्णेनाक्लिष्टकर्मणा । " तत्रैव, ६९।६३ ।
91 "हरिवंशं प्रवक्ष्यामि कृष्णमाहात्म्यमुत्तमम् ।
वसुदेवात्तु देवक्यां वासुदेवः सुतोऽभवत् ॥ इत्यादि, गरुडपुराणे, १४४।१ ।
92. "षोडशस्त्रीसहस्राणि भार्याणां चाभवन् हरेः । तत्रैव, १३९।५९ ।
93. "कृष्णाष्टम्यान्तु रोहिण्यामर्धरात्रेऽर्चनं हरेः । तत्रैव, १३१।५ ।
94. "गोपीजनवल्लभाय स्वाहान्तो मनुरुच्यते ।", तत्रैव, २८।८ ।
95. "यमश्च नियमः पार्थ आसनं प्राणसंयमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चर्चा जाता । समाधिस्वरूपमुपस्थाप्य[96] मोक्षकारणं प्रकाशितम् । यः कृष्णेति मङ्गल[97] नाम कीर्तयति तमहं नरकादुद्धरामीति भगवद्वचनमेकस्मिन् प्रसङ्गे निरूपितम् ।

(थ) कूर्मपुराणे

कूर्मपुराणे २४-२६ अध्यायेषु कृष्णकथा समुद्दिष्टा । २ तमेऽध्याये कृष्णलीलायाः संक्षिप्तं दिग्दर्शनमस्ति । २५ तमेऽध्याये पुत्रप्राप्तये कृष्णकृता शिवाराधना निरूपिता । २६ तमेऽध्याये च कृष्णस्य वरलाभो विवृतः । तत्र कृष्णस्य भगवत्या योगमायायाश्चावतरणं [98] सुष्ठूपात्तम् । कृष्णेन विहितां शिवलिङ्गसपर्यां निरूप्यैकस्मिन् पद्ये कृष्णकृतं देवर्षिपितृतर्पणं[99] संसूचितमस्ति ।

(द) स्कन्दपुराणे

स्कन्दपुराणे वैष्णवखण्डे श्रमिद्भागवतमाहात्म्ये १-४ अध्यायैः कृष्णप्राणस्य श्रीमद्भागवतमहापुराणस्य परमो महिमा प्रकाशितः । ब्राह्मखण्डे सेतुमाहात्म्ये २७ तमेऽध्याये कृष्णप्रतिष्ठापितस्य शिवलिङ्गस्य महिमनिरूपणावसरे प्रसङ्गतः श्रीकृष्णस्यावतरणनिरूपणपुरःसरं व्रजचरितं माथुरचरितञ्च प्रकाशितमस्ति । प्रभासखण्डे १-४४ अध्यायेषु सविस्तरं श्रीकृष्णस्य द्वारकाचरितं विवृतमस्ति । तस्यैव खण्डस्य १००-१०१ तमयोरध्याययोः श्रीरुक्मिणीमहिमा प्रकाशितः । विपुलकलेवरे स्कान्देऽन्यत्रापि विकीर्णतया कृष्णवृत्तं वर्णितमस्ति । वैष्णवखण्डे व्रजैश्वर्यं सुष्ठु निरूपितं [100]व्रजव्युत्पत्तिपुरःसरम् । ब्राह्मखण्डेऽव्ययो हरिरेव देवकीजठराज्जज्ञे[101] इति तथ्यं

प्रत्याहारस्तथा ध्यानं धारणार्जुन सप्तमी ॥
समाधिरिति चाष्टाङ्गो योग उक्तो विकुण्ठये ।", तत्रैव, २२९।१३ ।

96. "अहं ब्रह्म मेत्यवस्थानं समाधिरभिधीयते ।", तत्रैव, २२९।२८ ।

97. "कृष्ण कृष्णेति कृष्णेति यो मां स्मरति नित्यशः ।
जलं भित्वा यथा पद्मं नरकादुद्धराम्यहम् ॥", तत्रैव, प्रेतकल्पे, २८।४ ।

98. "वसुदेवाद् महाबाहुर्वासुदेवो जगद्गुरुः ।
बभूव देवकीपुत्रो देवैरभ्यर्दितो हरिः ।
स एव परमात्मासौ वासुदेवो जगन्मयः ।
हलायुधः स्वयं साक्षाद् देवः संकर्षणः प्रभुः ॥
भृगुशापच्छलेनैव मानयन् मानुषीं तनुम् ।
बभूव तस्यां देवक्यां रोहिण्यामपि माधवः ॥
उमादेहसमुद्भूता योगमायाऽथ कौशिकी ।
नियोगाद्वासुदेवस्य यशोदातनया ह्यभूत् ॥" कूर्मपुराणे, २४ अ ।

99. "चकार देवकीसूनुः देवर्षिपितृतर्पणम् ।
लिङ्गानि पूजयामास शम्भोरमिततेजसः ॥" तत्रैव ।

100. "गुणातीतं परं ब्रह्म व्यापकं व्रज उच्यते ।
सदानन्दं परं ज्योतिर्मुक्तानां पदमव्ययम् ॥
तस्मिन् नन्दात्मजः कृष्णः सदानन्दाङ्गविग्रहः ।
आत्मा रामश्चाप्तकामः प्रेमाक्तैरनुभूयते ॥
आत्मा तु राधिका तस्य तयैव रमणादसौ ।
आत्मारामतया प्राज्ञैः प्रोच्यते गूढवेदिभिः ॥", स्कन्दपुराणे, वैष्णवखण्डे, भागवतमाहात्म्ये, १।१९-२२ ।

101. "ततो दशसु मासेषु गतेषु हरिरव्ययः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरूपितम् । तत्रैव रामकृष्णयोः शिशुक्रीडा[102] साधूपात्ता । [103]कृष्णचरणरजःकामस्योद्धवस्य नित्यं वल्लीरूपेण व्रजे स्थितिरेकत्र निरूपिता ।

(घ) श्रीमद्भागवतमहापुराणे

श्रीमद्भागवतं नाम श्रीकृष्णमयोऽपूर्वो ग्रन्थविशेषः । यस्य महिमानमन्यानि पुराणानि गायन्ति तद् भगवतः स्वरूपमेव निश्चप्रचम् । मानसादपरितोषात्[104] खिद्यतो नारदप्रेरितस्य कृष्णद्वैपायनस्य परमया योगसाधनयाऽऽविष्कृतं शुकमुखस्रोद्रिक्तं भक्तिरसामृतसिक्तं सात्वतसंहितापरनामधेयं[105] महामहापुराणमेतत् श्रीमद्भागवतम् । अस्य पुराणरत्नस्य प्रथम-तृतीय-दशम-एकादश-द्वादशस्कन्धेषु कृष्णकथाकल्लोलिनी प्रवहति लोकं पुनाना । तत्र प्रथमस्कन्धे ८-१० अध्यायेषु १५तमेऽध्याये च कृष्णाश्रितं वस्तु विलसति । तृतीयस्कन्धे २-४ अध्यायेषु संक्षेपेण श्रीकृष्णचरितं कीर्तितमस्ति । ९०संख्यकैरध्यायैः समुपबृंहितो दशमस्कन्धस्तु कृष्णकथाया अपूर्वः कश्चन महानिधिरेव वर्तते । एकादशस्कन्धो भगवता श्रीकृष्णेन परमभक्तायोद्धवाय प्रदत्तेन ज्ञानालोकेनालोकितः । यत्र ६-२९ अध्यायेषु निगमागमनिहिता गोविन्देन प्रवाहिता ज्ञानगङ्गा विद्योतते नितराम् । एकादशस्यैव स्कन्धस्य ३० तमेऽध्याये यदुकुलावसानकथा समुदीरिता वर्तते । द्वादशस्कन्धस्य १२तमेऽध्याये भागवतीयविषयसन्दर्भप्रकाशनविधौ श्रीकृष्णचरितं संक्षेपेण संसूच्य कृष्णपदारविन्दयोरविस्मृतिः[106] सकलदोषविनाशिनी भक्तिज्ञानविरागहेतुभूतेति तथ्यं समुदीरितं विभाति । इह विषयशैलीपरिज्ञानाय भागवतीयानि कानिचन कृष्णसंबद्धानि वृत्तानि निरूप्यन्ते । द्वादशस्कन्धे निरूपणाध्याये कृष्णचरितं सूत्रशैल्या[107] समुद्दिष्टमस्ति । तत्रैवैकादशस्कन्धगता विषया

देवकीजठराज्जज्ञे कृष्ण इत्यभिविश्रुतः ॥" तत्रैव, ब्राह्मखण्डे, २७४९ ।

102. "रामकृष्णौ व्यवर्धेतां गोकुले बालकौ तदा ।
अनेकबालक्रीडाभिरिचक्रीडतुररिन्दम ॥" तत्रैव, ब्राह्मखण्डे, २७७६ ।

103. "गोवर्धनगिरिनिकटे सखीस्थले तद्व्रजःकामः ।
तत्रत्याङ्कुरवल्लीरूपेणास्ते स उद्धवो नूनम् ॥" तत्रैव, वैष्णवखण्डे, २।२४ ।

104. (क) "तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः ।
कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतम् ॥" श्रीमदभागवते, १।४।३२ ।
(ख) "नारदउवाच - यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः ।
न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ॥" तत्रैव, १।५।९ ।
(ग) "उरुक्रमस्याखिलबन्धमुक्तये ।
समाधिनानुस्मर तद्विचेष्टितम् ॥", तत्रैव, १।५।१३ ।

105. "अनर्थोपशमं साक्षाद् भक्तियोगमधोक्षजे ।
लोकस्याजानतो विद्वान् चक्रे सात्वतसंहिताम् ॥" तत्रैव, १।७।६ ।

106. "अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि शमं तनोति च ।
सत्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तम् ॥" तत्रैव, १२।१२।५४ ।

107. "ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशोऽनुकीर्तितः ।
यत्रावतीर्णो भगवान् कृष्णाख्यो जगदीश्वरः ॥
वसुदेवगृहे जन्म ततो वृद्धिश्च गोकुले ।
तस्य कर्माण्यपाराणि कीर्तितान्यसुरद्विषः ॥
पूतनासुपयःपानं शकटोच्चाटनं शिशोः ।
तृणावर्तस्य निष्पेषस्तथैव बकवत्सयोः ॥
धेनुकस्य सहभ्रातुः प्रलम्बस्य च संक्षयः ।" इत्यादि, तत्रैव, १२।१२।२६-२९ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपि संसूचिता:[108] सन्ति । दशमस्कन्धे प्रकाशित: कृष्णजन्मसन्दर्भो[109] नितरामाह्लादजनको वर्तते । गोकुले गोविन्दे विराजिते तद्रमाक्रीडं[110] बभूवेति कथनं बालकृष्णमहिमव्यञ्जकमस्ति । वैष्णवीमायाविमोहिता[111] यशोदा श्रुतिमृग्यं परमेश्वरं पुत्रममन्यतेति निरूपणं योगमायाया अपराजेयतां व्यनक्ति । शुकमुखान्निर्गता[112] परमार्थप्रकाशिनी कृष्णतत्वस्य व्याख्या नितरां हृद्याऽनवद्या च वर्तते । तत्रैव शुकदेवस्य हृदयान्नि:सृता[113] गोपीमहिमगानपरा वाणी हृदयमेव

---

108. "विप्रशापापदेशेन संहार: स्वकुलस्य च ।
उद्धवस्य च संवादो वासुदेवस्य चाद्भुत: ॥
यत्रात्मविद्या ह्यखिला प्रोक्ता धर्मादिनिर्णय: ।
ततो मर्त्यपरित्याग आत्मयोगानुभावत: ॥", तत्रैव, १२।१२।४१-४२ ।
109. "अथ सर्वगुणोपेत: काल: परमशोभन: ।
यर्ह्येवाजनजन्मर्क्षं शान्तर्क्षग्रहतारकम् ॥
दिश: प्रसेदुर्गगनं निर्मलोडुगणोदयम् ।
मही मङ्गलभूयिष्ठपुरग्रामव्रजाकरा ॥
नद्य: प्रसन्नसलिला ह्रदा जलरुहश्रिय: ।
द्विजातिकुलसन्नादस्तवका वनराजय: ॥
ववौ वायु: सुखस्पर्श: पुण्यगन्धवह: शुचि: ।
अग्नयश्च द्विजातीनां शान्तास्तत्र समिन्धत ॥
मनांस्यासन् प्रसन्नानि साधूनामसुरद्रुहाम् ।
जायमानेऽजने तस्मिन् नेदुर्दुन्दुभयो दिवि ॥
जगु: किन्नरगन्धर्वास्तुष्टुवु: सिद्धचारणा: ।
विद्याधर्यश्च ननृतुरप्सरोभि: समं मुदा ॥
मुमुचुर्मुनयो देवा: सुमनांसि मुदान्विता: ।
मन्दं मन्दं जलधरा जगर्जुरनुसागरम् ॥
देवक्यां देवरूपिण्यां विष्णु: सर्वगुहाशय: ।" इत्यादि, तत्रैव, १०।३।१-८ ।
110. "तत आरभ्य नन्दस्य व्रज: सर्वसमृद्धिमान् ।
हरेर्निवासात्मगुणै रमाक्रीडमभून्नृप ॥" तत्रैव, १०।५।१८ ।
111. (क) "इति विदिततत्त्वायां गोपिकायां स ईश्वर: ।
वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभु: ॥" तत्रैव, १०।८।४३ ।
(ख) "त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्वतै: ।
उपगीयमानमाहात्म्यं हरिं सामन्यतात्मजम् ॥" तत्रैव, १०श्र८।४५ ।
112. "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् ।
जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ॥
वस्तुतो जानतामत्र जगत् स्थास्नु चरिष्णु च ।
भगवद्रूपमखिलं नान्यद् वस्त्विह किञ्चन ॥
सर्वेषामपि वस्तूनां भावार्थो भवति स्थित: ।
तस्यापि भगवान् कृष्ण: किमतद् वस्तु रूप्यताम् ॥
समाश्रिता ये पदपल्लवप्लवं महत्पदं पुण्ययशो मुरारे: ।
भवाम्बुधिर्वत्सपदं परं पदं पदं पदं यद् विपदां न तेषाम् ॥" तत्रैव, १०।१४।५५-५८ ।
113. "आसामहो चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनाम् ।
या दुस्त्यजं स्वजनमार्यपथं च हित्वा भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ॥" तत्रैव, १०।४७।६१ .

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समावर्जयति सहृदयानाम् । पुराणेष्वनेकेषु कृष्णतत्वानुप्राणितेषु सत्स्वपि भक्तिविशिष्टाया भागवत कथाया नास्त्युपमा काचन धरणीतले ।

(न) श्रीशिवमहापुराणे

श्रीशिवपुराणस्योमासंहितायाः १-३ अध्यायेषु कृष्णकैलासयात्रोपाख्यान कृष्णस्योपमन्युसम्पर्कः, उपमन्युतः कृष्णेन दीक्षाग्रहणम्, दीक्षितस्य कृष्णस्य शिवाराधना च निरूपित सन्ति । तत्रैव शिवस्य परमभक्तादुपमन्योः कृष्णेन प्राप्तं पाशुपतज्ञानं व्याख्यातमस्ति । शिवसम कृष्णस्य[114] वरदानयाचना हरिहरयोर्मिथ आराध्याराधकभावस्य वैलक्षण्यं सूचयति । पार्वतीसम कृष्णस्य[115] भार्यासहस्राधिपत्वकामना साधु निरूपिता वर्तते । वायवीयसंहितायां पुनः कृष्णकैलासयात्रानिरूपणप्रसङ्गे शिवभक्तस्योपमन्योर्मनोहारि[116] चित्रणं जातम् । कृष्णः[117] शिवप्रसादेन साम्बाभिधेयं सूनुं पाशुपताभिधेयं ज्ञानं च लब्धवानिति तथ्यमेकत्र प्रकाशितमस्ति ।

(प) हरिवंशपुराणे

श्रीमन्महाभारताख्यस्येतिहासग्रन्थस्य खिलपर्वरूपं हरिवंशपुराणं कृष्णचरितकोषमयं वर्तते श्रीमद्भागवते स्कान्दे ब्रह्मवैवर्ते विष्णुपुराणे पद्मपुराणेऽन्यत्र च ये विषया न समग्रत निरूपितास्तेषां समेषां कृष्णसंबद्धानां विषयाणां प्रकाशनमत्र जातम् । अस्य पुराणस्य हरिवंशपर्व ३५ तमेऽध्याये संक्षेपेण कृष्णचरितमुद्दिष्टमस्ति । विष्णुपर्वणि पूर्वार्धे १-८१ अध्यायेषु कृष्णावतरण आरभ्य पारिजातहरणान्ता कृष्णकथोपलभ्यते । उत्तरार्धे ८२-१२८ अध्यायेषूषाहरणपर्यन्ता क निबद्धा वर्तते । भविष्यपर्वणः ७३-१३१ अध्यायेषु दुर्लभतमाः कृष्णचरितसंबद्धा विषयाः प्रकाशित सन्ति । कृष्णचरित्रविस्तारदृष्ट्या पुराणमिदं सर्वाण्येव पुराणान्यतिशेते विहाय गर्गसंहिताम् हरिकेलिमहाकाव्यस्य विषयवस्तुभूता कृष्णजन्मतः कंसवधपर्यन्ता कथाऽस्य पुराणस्य विष्णुपर्वणः १ ३० अध्यायेषु व्याख्याता वर्तते । विषयभाषाशैलीदृष्ट्या पर्यालोचनाय द्वित्राण्युदाहरणानि निरूप्यन्ते

---

114. "कृष्ण उवाच
देवदेव महादेव याचेऽहं ह्युत्तमान् वरान् ।
त्वत्तोऽष्टप्रमितान्नाथ त्वयोद्दिष्टान् महेश्वर ॥
तव धर्मे मतिर्नित्यं यशश्चाप्रचलं महत् ।
त्वत्सामीप्ये स्थिरा भक्तिस्त्वयि नित्यं ममास्त्विति ॥" इत्यादि, शिवपुराणे, उमासंहितायां, ३।२२-२३

115. "देवि भार्यासहस्राणां भवेयमतिवल्लभः ।
अक्षीणा काम्यता तासु प्रसादात्तव शाङ्करि ॥" तत्रैव, ३।२९ ।

116. "पुत्रार्थं हि तपस्तप्तुं गतस्तस्य महामुनेः ।
आश्रममृषिभिर्जुष्टं दृष्टवान् तत्र वै मुनिम् ॥
भस्मावदातसर्वाङ्गं त्रिपुण्ड्राङ्कितमस्तकम् ।
रुद्राक्षमालाभरणं जटामण्डलमण्डितम् ॥
तच्छिष्यभूतैर्मुनिभिः शास्त्रैर्वेदमिवावृतम् ।
शिवध्यानरतं शान्तमुपमन्युं महामुनिम् ॥
नमश्चकार तं दृष्ट्वा हृष्टसर्वतनूरुहः ।" तत्रैव, वायवीयसंहितायां, १।१३-१६ ।

117. "तदेतत् कथितं सर्वं कृष्णस्याक्लिष्टकर्मणः ।
महर्षेर्ज्ञानलाभश्च पुत्रलाभश्च शङ्करात् ॥" तत्रैव, २।२६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जायमाने[118] जनार्दने प्रकृतिविपर्ययः पुराणान्तरवदिहापि निरूपितः । पूतनायाः[119] स्तन्येन सह प्राणहरणस्य वृत्तं सरलैः पदैरुपस्थापितमस्ति । वृन्दावनप्रकृतिः[120] साधु चित्रिता वर्तते ।

३.२.४ महाभारते कृष्णः

लक्षश्लोकान्विते पुण्यश्लोकस्य भगवतः श्रीकृष्णस्य व्यावहारिकेण पारमार्थिकेन च चरितेन परितः समाच्छादिते संस्कृतवाङ्मयस्यापूर्वे ग्रन्थरत्ने श्रीमन्महाभारते कृष्णकथासागरमध्यनिर्गलिता महती ज्ञानसुधा श्रीमदभगवद्गीता विद्योतते । भीष्मपर्वणः श्रीमद्भगवद्गीतापर्वणि २५-४२ अध्यायेषु वर्तमाना श्रीमद्भगवद्गीताऽधुना विश्वस्मिन्नेव कृष्णमहिमानं व्यापयन्ती वर्तते । महाभारतस्यानेकेषु पर्वसु भगवत उत्तरार्धगतानि चरितानि सविस्तरं निरूपितानि । सभापर्वणोऽर्घाभिहरणपर्वणि ३८ तमेऽध्याये श्रीकृष्णस्यावतरणं निरूप्य व्रजलीला-माथुरलीला-द्वारकालीलानां समग्रमेव वैशिष्ट्यं वस्तुसूचनशैल्या प्रकाशितमस्ति । नास्ति तत् पर्व यत्र कृष्णवृत्तं न स्यात् । वस्तुतो महाभारतं नाम श्रीकृष्णस्य राजनीतेर्व्यवहारनीतेरध्यात्मनीतेश्च सङ्गमस्थली त्रिवेणी वर्तते ।[121] भगवदवतरणसन्दर्भोऽत्रापि पुराणान्तरवत् समाधुर्यं निरूपितः । कृष्णलीलानां[122] क्रमिकं वर्णनमत्र लभ्यते । श्रीमद्भगवद्गीतापर्वणि[123] धनञ्जयस्यार्तभावेन कृष्णप्रार्थना कस्य हृदयं न द्रावयति । इत्येभिरन्यैश्च विशेषैः श्रीमन्महाभारतं श्रीकृष्णस्य जीवनस्य व्याख्यारूपं विद्योतते ।

३.२.५ गर्गसंहितायां कृष्णः

श्रीमद्भागवतस्य भाष्यरूपायां गर्गरचितायां गर्गसंहितायां राधाकृष्णयोर्वास्तविकी प्रातिभासिकी पारमार्थिकी च लीला गर्गेण साधनापूतैर्वचोभिर्व्याख्याता । अस्मिन् संहिताग्रन्थे श्रीकृष्णस्य परिपूर्णा सर्वातिशायिनी भगवत्ता कीर्तिता वर्तते । गोलोक-वृन्दावन-गिरिराज-माधुर्य-मथुरा-द्वारका-विश्वजिद्-बलभद्र-विज्ञान-अश्वमेधखण्डाख्यैर्दशभिर्विपुलाकारैः परिच्छेदैर्युतायां

---

118. "सागराः समकम्पन्त श्चेलुश्च धरणीधराः ।
जज्वलुश्चाग्नयः शान्ताः जायमाने जनार्दने ॥" हरिवंशपुराणे, विष्णुपर्वणि, ४।१६ ।

119. "तस्याः स्तनं पपौ कृष्णः प्राणैः सह विनद्य च ।
छिन्नस्तनी तु सहसा पपात शकुनी भुवि ॥" तत्रैव, ६।२६ ।

120. "श्रूयते हि वनं रम्यं पर्याप्ततृणसंस्तरम् ।
नाम्ना वृन्दावनं नाम स्वादुवृक्षफलोदयम् ॥" तत्रैव, ८।२२ ।

121. "सागराः समकम्पन्त मुदा चेलुश्च पर्वताः ।
जज्वलुश्चाग्नयः शान्ता जायमाने जनार्दने ॥
शिवाः सम्प्रववुर्वाताः प्रशान्तमभवद्रजः ।
ज्योतींषि सम्प्रकाशन्ते जायमाने जनार्दने ॥" इत्यादि, महाभारते, सभापर्वणोऽर्घाभिहरणपर्वणि, ३८ अ. ।

122. क) "वसुदेवस्ततो जातं बालमादित्यसन्निभम् ।
नन्दगोपकुले राजन् भयात् प्राच्छादयद् हरिम् ॥" तत्रैव ।
ख) "हत्वा कंसममित्रघ्नः सर्वेषां पश्यतां तदा ।
अभिषिच्योग्रसेनं तं पित्रोः पादमवन्दत ॥", तत्रैव ।

123. "सखेति मत्वा प्रसभं यदुक्तं हेकृष्ण हेयादव हेसखेति ।
अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि" ॥
तत्रैव, भीष्मपर्वणः, श्रीमद्भगवद्गीतापर्वणि, २५।४१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गर्गसंहितायां वर्तमानेषु २६२ संख्यकेष्वध्यायेषु परमात्मनो वासुदेवस्य गोलोकीया भूलोकीया च सम्पूर्णा लीला समाधुर्य सभक्ति निरूपिता भगवता गर्गमुनिना। सर्व एव खण्डाः कृष्णावतारसंबद्धाः सर्व एव कृष्णव्यूहनिबद्धाः सर्व एव श्रीकृष्णस्य परिपूर्णब्रह्मरूपप्रकाशकाः सन्ति। कृष्णचरितरसपानायेदृशं सुमधुरं सुविस्तृतं सुन्दरं सचिन्तनं ग्रन्थरत्नं नान्यद् विलोक्यते। गोलोकखण्डे-गोलोकधामचर्चया सह कृष्णावतरणसन्दर्भः सप्रपञ्चमुपस्थापितः। भाण्डीरवने राधाकृष्णयोर्विवाहप्रसङ्गो बालकृष्णचरितं यशोदाया विश्वरूपदर्शनं पूतनाबकादीनामुद्धारश्चेत्यादयोऽनेके विषया विद्यन्ते। द्वितीये वृन्दावनखण्डे-यमुनाया गोलोकाद् व्रजप्राप्तिः, कृष्णरामयोर्गोचारणम्, बकवत्साघासुरादीनां समुद्धारस्तत्तत्पूर्वजन्मनिरूपणम्, विधिमोहभङ्ग, धेनुकवधः, कालियदमनम्, दावानलपानम्, राधायाः प्रेमाकुलता, श्रीकृष्णस्य गोपीरूपाकलनम्, महारासः, जलविहारः, यामुनकुञ्जविहारश्चेत्यादयो विषयाः प्रकाशिताः सन्ति। माधुर्यखण्डे-श्रुतिरूपाः, ऋषिरूपाः, कौसलनागरीरूपाः, यज्ञसीतारूपाः, पुलिन्दकन्यारूपाः, लक्ष्मीसखीरूपाः, भूलोकीयनारीरूपाः, देवाङ्गनारूपाः, बर्हिष्मतीनागरीरूपाश्च गोप्यो वर्णिताः कृष्णस्य ताभिर्लीलाविहारादिकं च कीर्तितम्। चतुर्थे गिरिराजखण्डे- गोवर्धनपूजा इन्द्रकोपः, गोवर्धनोद्धारणम्, इन्द्रस्तुतिः, कृष्णाभिषेकः, वृषभानुवैभवम्, गोवर्धनतीर्थानि, गोवर्धनमहिमा चेत्यादयो विषया निरूपिताः। मथुराखण्डे-कंसमन्त्रणा, केशिवधः, व्रजमण्डलेऽक्रूरागमनम्, श्रीकृष्णस्य ब्रह्मरूपदर्शनम्, कुब्जादिषु कृष्णानुकम्पा, मल्लक्रीडा, चाणूरकंसादीनां वधः, मालिकाकाररजकसूचिकाकारकुब्जानां पूर्वजन्मप्रसङ्गाः, कंसस्य पूर्वजन्मकथा, उद्धवस्य व्रजगमनम्, गोपीनां करुणोद्गारः, उद्धवप्रत्यागमनम्, श्रीकृष्णेन कदलीवने कृता राधिकास्तुतिः, मथुरामाहात्म्यमित्यादयो विषया विवृताः। षष्ठे द्वारकाखण्डे- श्रीकृष्णजरासन्धयुद्धम्, द्वारकानिवासः, रुक्मिणीकृष्णविवाहः, कृष्णस्य विवाहान्तराणि, द्वारकागतानां तीर्थानां वर्णना, राधासौन्दर्यम्, सिद्धाश्रमे राधाकृष्णयो रासोत्सवः, सुदाम्नश्चरितञ्चेत्यादयो विषयाः प्रपञ्चिताः। सप्तमे विश्वजित्खण्डे-प्रद्युम्नस्य राज्याभिषेकः, विजयाभियानम्, उग्रसेनस्य राजसूयमखश्चेत्यादयो विषया विवृताः। अष्टमे बलभद्रखण्डे-बलभद्रावतरणहेतुनिरूपणम्, श्रीकृष्णबलयोर्जन्मवृत्तम्, रामकृष्णयोर्व्रजलीला, माथुरलीला, द्वारकालीला, बलस्य रासलीला, बलभद्राराधनाविधिश्चेत्यादयो विषया निरूपिताः। नवमे विज्ञानखण्डे-द्वारकायां व्यासागमने व्यासेनोपदिष्टानां कर्मोपासनाज्ञानानां विस्तृता चर्चा निरूपिता। दशमेऽश्वमेधखण्डे-गर्गनारदसंवादः, गर्गद्वारा कृष्णलीलानिरूपणम्, पारिजातहरणम्, अनिरुद्धविजयः, यादवानां व्रजयात्रा, राधाकृष्णयोर्महारासः, यज्ञसमाप्तिः, उग्रसेनाभिषेकः, राधाकृष्णयोर्गोलोकारोहणञ्चेत्यादयो विषया निरूपिताः। गर्गसंहितायाः शैलीज्ञानाय किमपि वस्तुजातमुदाह्रियते। गर्गसंहितायां परिपूर्णतमस्य कृष्णस्यावतरणं[124] साधु निरूपितम्।

---

124. "अथ मैथिलराजेन्द्र। जन्मकाले हरेः सति।
अम्बरं निर्मलं भूतं निर्मलाश्च दिशो दश॥
उज्वलास्तारका जाताः प्रसन्नं भूमिमण्डलम्।
नदा नद्यः समुद्राश्च प्रसन्नापः सरोवराः॥
सहस्रदलपद्मानि शतपत्राणि सर्वतः।
विकचानि मरुत्स्पर्शैः पतद्गन्धिरजांसि च॥
तेषु नेदुर्मधुकरा नदन्तश्चित्रपक्षिणः।
शीतला मन्दयानाश्च गन्धाक्ता वायवो ववुः॥
ऋद्धा जनपदा ग्रामा नगरा मङ्गलायनाः।
देवा विप्रा नगा गावो बभूवुः सुखसंवृताः॥
देवदुन्दुभयो नेदुर्जयध्वनिसमाकुलाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामकृष्णयोर्नाम्नो:[125] परमार्थ: साधु प्रकाशित: उद्धवगीतं राधाकृष्णयोर्मूल्यवन्मननीयं[126] च महिमगानं साधु समुन्मीलितम् । अस्यां गर्गसंहितायामन्यत्र दुर्लभा नारायणस्य षट्प्रकारा अवतारप्रकृतय:[127] सुष्ठु वर्गीकृता: ।

यत्र तत्र महाराज सर्वेषां मङ्गलं परम् ॥
ननृतुर्दिवि गन्धर्वा विद्याधर्यो मुदान्विता: ।
पारिजातकमन्दारमालतीसुमनांसि च ॥
मुमुचुर्देवमुख्याश्च गर्जन्तश्च घना जले ।
भाद्रे बुधे कृष्णपक्षे धात्रर्क्षे हर्षणे वृषे ॥
कर्णेऽष्टम्यामर्द्धरात्रे नक्षत्रेशमहोदये ।
अन्धकारावृते काले देवक्यां शौरिमन्दिरे ॥
आविरासीद् हरि: साक्षादरण्यामध्वरेऽग्निवत् ॥
-गर्गसंहितायाम्, गोलोकखण्डे, ११।१५-२४।

125. (क) "रमन्ते योगिनो ह्यस्मिन् सर्वत्र रमतीति वा ।
गुणैश्च रमयन् भक्तान् तेन रामं विदु: परे ॥
(ख) "ककार: कमलाकान्त ऋकारो राम इत्यपि ।
षकार: षड्गुणपति: श्वेतद्वीपनिवासकृत् ॥
णकारो नारसिंहोऽयमकारो ह्यक्षरोऽग्निभुक् ।
विसर्गौ च तथा ह्येतौ नरनारायणावृषी ॥
सम्प्रलीनाश्च षट् पूर्णा यस्मिन् शुद्धे परात्मनि ।
परिपूर्णतमे साक्षात् तेन कृष्ण इति स्मृत: ॥"
- <u>गर्गसंहितायां,</u> गो.ख., १५।२५, २९-३१ ।

126. "सदास्ति कृष्ण: परिपूर्णदिवो
राधे सदा त्वं परिपूर्णदिवी ।
श्रीकृष्णचन्द्र: कृतनित्यलीलो
लीलावती त्वं कृतनित्यलीला ॥" तत्रैव, मथुराखण्डे, १५,२२ ।

127. "अंशांशोंऽशस्तु तथावेश: कला पूर्ण: प्रकथ्यते ।
व्यासाद्यैश्च स्मृत: षष्ठ: परिपूर्णतम: स्वयम् ॥
अंशांशस्तु मरीच्यादिरंशा ब्रह्मादयस्तथा ।
कला: कपिलकूर्माद्या आवेशा भार्गवादय: ॥
पूर्णो नृसिहो रामश्च श्वेतद्वीपाधिपो हरि: ।
वैकुण्ठोऽपि तथा यज्ञो नरनारायण: स्मृत: ॥
परिपूर्णतम: साक्षात् श्रीकृष्णो भगवान् स्वयम् ।
असंख्यब्रह्माण्डपतिर्गोलोके धाम्नि राजते ॥
कार्याधिकारं कुर्वन्त: सदंशास्ते प्रकीर्तिता: ।
तत्कार्यभारं कुर्वन्तस्तेंऽशांशा विदिता: प्रभो ।
येषामन्तर्गतो विष्णु: कार्यं कृत्वा विनिर्गत: ।
नानावेशावताराश्च विद्धि राजन् महामते ॥
धर्मं विज्ञाय कृत्वा य: पुनरन्तरधीयत ।
युगे युगे वर्तमान: सोऽवतार: कला हरे: ॥
चतुर्व्यूहो भवेद्यत्र दृश्यन्ते च रसा नव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३.२.६ अन्येष्वार्षग्रन्थेषु कृष्णः

श्रीकृष्णचरितस्य महनीयस्रोतोभूतैरुपरिप्रकाशितैरार्षैग्रन्थैः कृष्णचन्द्रस्य लीलाया निर्वचनं समग्राः पक्षा उद्भासिताः । यत्तस्यानिर्वचनीयं स्वरूपं तद्गोपीगम्यं भक्तिगम्यं योगिगम्यञ्च एतदतिरिक्तैरन्यैरपि ग्रन्थविशेषैरुपपुराणैरौपपुराणैः श्रीकृष्णचन्द्रस्य चान्द्री छटा सप्रपञ्चं निरूपि श्रीपुराणसंहितायां सात्वतसंहितायां तदितरेषु वैष्णवतन्त्रेषु, जैमिनीयाश्वमेधे योगवासिष्ठेऽन्य श्रीकृष्णचरितं न्यूनाधिकतया निरूपितमस्ति । इमानेव पूर्वोक्तानत्र सूचितांश्चार्षग्रन्थानधि परवर्तिभिः कविभिर्महाकविभिश्चिन्तकैः पण्डितैर्भक्तजनैश्च सहस्राधिकेषु काव्यमहाकाव्ये श्रीकृष्णस्य काव्यकलाकमनीया व्याख्या प्रस्तुता । परिणामतः पारावार इव गभीरः कृष्णसाहित्यसं भुवने विजृम्भितः । भारतीयोपमहाद्वीपस्य नैकविधासु भाषासु रसियनजर्मनांग्लादिभाषासु च प्र कृष्णपराणां ग्रन्थानां यावत्तामियत्ताञ्च विवरीतुं दशाधिकतवर्षाणां प्रयास एव कदाचन । समर्थः ।

३.३ हरिकेलिमहाकाव्यस्याधिकारिकं वृत्तं मुख्या आधारग्रन्थाश्च

३.३.१ हरिकेलिमहाकाव्यस्याधिकारिकं वृत्तम्

वंशमणिना प्रणीते हरिकेलिमहाकाव्ये पुराणनिकरनिरूपितानि निम्ननिर्दिष्टानि वृ काव्यशैल्या प्रकाशितानि सन्ति । तानि यथा- श्रीकृष्णावतरणम्, वसुदेवकृता कृष्णस्तुतिः, कृष्णम तस्य गोकुलयात्रा, योगमायोत्पत्ति, कृष्णयोगमाययोर्विनिमयः, योगमायया कंसतर्जना, कंसमन बालकृष्णस्वरूपसौन्दर्यम्, पूतनावधः, तृणावर्तवधः, शकटभङ्गः, उलूखलबन्धनम् यमलार्जुनो व्रजवासिनां वृन्दावनप्रस्थानम्, कृष्णकिशोरलीला, गोचारणम् वृषबकाघासुराणां वधः, धेनुक दावाग्निपानम्, कालियदमनम्, प्रलम्बवधः, कृष्णगोचारणलीला, ब्रह्मणा वत्साहरणम्, श्रीकृ योगशक्तिप्रदर्शनम्, ब्रह्ममोहभङ्गः, इन्द्रमखभङ्गः, गोवर्धनपूजा, इन्द्रकोपः, गोवर्धनोद्धार इन्द्रस्तुतिः, गोपीनां कृष्णचिन्तनपरता, राधाकृष्णयोर्विलासः, अरिष्टवधः, गोपीनां कात्यायनी गोपीचीरहरणम्, गोपीभिः साकं कृष्णस्य वसन्तविहारः, कृष्णरामयोरानयनायाक्रूरस्य गोकुल केशिवधः, रामकृष्णयोर्गोपैः साकं मथुरायात्रा, अक्रूरकृतमनन्तनारायणयोर्दर्शनम्, कृ मथुराभ्रमणम्, रजकवधः, मालाकारे कृष्णानुग्रहः, कुब्जायां करुणा, धनुर्भङ्गः, कुवलयापीड चाणूरमुष्टिककंसानां वधः, कृष्णरामाभ्यां पित्रोर्दर्शनञ्चेमानि विषयवस्तूनि हरि सन्त्याधिकारिकाणि ।

३.३.२ मुख्या आधारग्रन्थाः

हरिकेलिमहाकाव्यस्य सप्तदशसर्गेषु वर्णिता कथा श्रीमद्भागवतस्य दशमस्कन्धस्य पूर्वा कथामवलम्बते । राधायाश्चर्चा श्रीमद्भागवते नास्ति, हरिकेलौ राधाकृष्णयो रासानन्द उन्मीलित हेतोर्हरिकेलिमहाकाव्यं ब्रह्मवैवर्तेन गर्गसंहितयापि प्रभावितमस्तीति निश्चीयते । विशेषतो ब्रह्मवै सामान्यनायिकानायकयोरिव राधाकृष्णयोः श्रृङ्गारो निरूपितस्तेनैव रूपेण हरिकेलावपि राधाकृ श्रृङ्गार आविष्कृत इति हेतोर्ब्रह्मवैवर्तस्य विशेषप्रभावोऽनुभूयते । हरिकेलिमहाक गोपीगणचर्चाजाता, तादृशी चर्चा पद्मपुराणे गर्गसंहितायाञ्च लभ्यते । अतः पद्मपुराणस्यापि कथा

अतः परं च वीर्याणि स तु पूर्णः प्रकथ्यते ॥
यस्मिन् सर्वाणि तेजांसि विलीयन्ते स्वतेजसि ।
तं वदन्ति परं साक्षात् परिपूर्णतमः स्वयम् ॥" तत्रैव, गोलोकखण्डे, १।१६-२५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिकेलावाहृतमस्ति कविनेति वक्तुं शक्यते । यद्यपि विष्णुपुराणे हरिवंशे ब्राह्मे देवीभागवते च कृष्णकथाया विस्तृतं रूपं लभ्यते तथापि समग्रविषयवस्तुन: परिशीलने कृते भागवतस्य यादृशी व्युत्पत्ति: कृष्णचरित्रविशिष्टीकरणे न तादृशी तेषां समेषाम् । सैव विशिष्टीकृता कृष्णकथा हरिकेलौ प्रतिबिम्बितेतिहेतोर्भागवतस्य सर्वाधिक: प्रभाव: स्वत: सिद्ध: । एतावता हरिकेलिमहाकाव्ये श्रीमद्भागवतस्य ब्रह्मवैवर्तस्य पद्मपुराणस्य, गर्गसंहितायाश्च प्रभावविशेषदर्शनात् त एव मुख्या आधारग्रन्था इति निश्चीयन्ते । तेष्वपि हरिकेलिमहाकाव्यस्य चरम: परमश्चोपजीवकग्रन्थ: श्रीमद्भागवतमेवेति निष्कृष्यते ।

३.४ प्रासङ्गिकवृत्तनिर्वाहे कथावस्तुप्रस्तावे च हरिकेलिमहाकाव्यस्य कश्चन विशेष:

३.४.१ प्रासङ्गिकवृत्तनिर्वाह:

हरिकेलिमहाकाव्यस्य कविना यथावश्यकं मुख्याधिकृतग्रन्थेभ्य: कथातत्त्वं परिगृहीतम् । केचन तदाधारिता विषया: परित्यक्ता: केचनाभिनवा विषया: काव्योत्कर्षाय चरितनायकगौरवाय च स्वोपज्ञतया विनिवेशिता: सन्ति । तेषां प्रासङ्गिकानां कविकल्पितवृत्तानां संक्षिप्तं निरूपणमिह प्रस्तूयते ।

(क) तृतीयसर्गे निरूपिताऽन्धविप्रस्य कृष्णकृपया नयनप्राप्तिविषयिणी[128] कथा कविना कल्पनया प्रस्तुता भगवन्महिमद्योतनाय ।

(ख) अष्टमसर्गे राधिकादूत्या मेधयाऽऽहूत: कृष्णो राधिकागृहमागत्य तया सह श्रृङ्गारं रचयन् समस्तामेव रात्रीं विच्छित्तिपूर्णैर्विलासैरतिवाहयामासेति वर्णना[129] कविकल्पनापरिष्कृता वर्तते ।

(ग) त्रयोदशसर्गे[130] राधा-वृन्दा-मेधाप्रभृतीनां दशगोपीनां दधितक्रादिविक्रयार्थं गृहान्निस्सरणम्, यमुनाकूलं प्राप्य घोरवेगां यमुनां विलोक्य पारप्रयाणोपायाभावेन तासां खेद:, तदैव, नावा सह कृष्णाविर्भाव:, गोपीकृष्णसंवाद: पारप्रयाणविधौ सहयोगाय तासां वैकल्यपूर्णोऽनुरोध:, कृष्णस्य कपटक्रीडा, ततो नावि ता आरोप्य नौकाचालनम्, मध्येतरङ्गिणि नौकादुर्घटना, उभयोस्तटयोर्हाहाकार:, चन्द्रसेनादीनां दशगोपानां पत्नीजलपाते सति महामोह:, कृष्णद्वारा जलमध्येऽभिनवपुरनिर्माणञ्चेति निरूपिता विषया: कविकल्पनाप्रसूतास्तेषां प्रमुखस्रोतोभूतेषु ग्रन्थेषु क्वचनापि नोल्लेख: ।

(घ) कंसस्य[131] राजभवने नारदागमनम्, नारदकंससंवाद:, नारदस्य कंसाय राजनीतिकज्ञानोपदेशश्चेति पञ्चदशसर्गे निरूपिता विषया: प्रासङ्गिका: सन्ति ।

(ङ) एकादशसर्गे वृन्दाकृष्णावनविहारो[132] वसन्तश्रीनिरूपणं च मूलकथाभित्तौ कविकल्पनया निर्मितं वस्तु वर्तत इति विज्ञेयम् । तत्रैव वृन्दाया मूर्च्छावस्था कृष्णविरहवेदनाजन्यस्तीव्रो ज्वरश्च कविनैव सविशेषं भङ्गीवैचित्र्येण प्रकाशितौ विषयौ ।

---

128. "इति ब्रुवाणे पतगेशयाने यावत् समुन्मीलति तं दिदृक्षु: ।
एतावदेव क्षितिदेव आसीत् प्रफुल्लदिन्दीवरसुन्दराक्ष: ॥" ह.के.. ३।५४ ।

129. "इति रजनिविरामं वीक्ष्य रामानुजन्मा नयनकुमुदचन्द्रश्चन्द्रसेनप्रियाया: ।
अलिरिव कुमुदिन्या: कोषमुत्सृज्य भेजे निजसदनसरोजं गोपतिप्रीतिदायी ॥" तत्रैव, ८।४५ ।

130 तत्रैव, १३।१-४२ ।

131. तत्रैव, १५।२-२३ ।

132. तत्रैव, ११।१-४४ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(च) चतुर्दशसर्गे यमुनाभ्यन्तरे[133] पुरे गोपीभिः सहोन्मुक्तभावेन विहरतः कृष्णस्य बहुगणरात्रमेव व्यतीतम् । यमुनाभ्यन्तरे योगमायाबलेन निर्मिते पुरे सूर्योदयो जातः, ध्वान्तं प्रसृतम्, चन्द्रोदयश्च जातः । जाते चन्द्रोदये दश गोपीभिः सह कृष्णो दशधा रूपं निर्माय विजहारेति निरूपणं कविकल्पनाप्रसूतमेव ।

इत्थमत्र कविकल्पनासमूर्जितैः प्रासङ्गिकैः कृष्णकेलिवृत्तैर्हरिकेलिमहाकाव्यं रोचकं सरसं च निर्वृतमस्ति । यथार्थस्य धरातले किर्मीरिता बहुरङ्गा चित्रकला भावकान् रसिकान् च समाह्लादयति नितराम् । रघुवंशकुमारसंभवादीनां महाकाव्यानां लोकप्रियताऽत्र प्रमाणम् ।

३.४.२ कथावस्तुप्रस्तावः

हरिकेलिमहाकाव्ये श्रीमद्भागवतादिषु निरूपितस्य कृष्णचरितस्य केचन विषयाः परित्यक्ताः केचिच्च क्रमव्यत्ययेन प्रस्तुताः सन्ति । मुख्यतया प्रतीयमानानां तादृशानां विषयाणां दिग्दर्शनं प्रस्तूयते ।

(क) श्रीमद्भागवते तृणावर्तवधानन्तरं भगवतो नामकरणसंस्कारस्य निरूपणं विधाय कृष्णकृतं मृद्भक्षणं प्रस्तुतमस्ति, हरिकेलौ तु गोपानां वृन्दावनागमनानन्तरमेव मृद्भक्षणप्रसङ्ग उपात्तः ।

(ख) श्रीमद्भागवते मृत्तिकाभक्षणानन्तरमेव भगवत उलूखलबन्धनं यमलार्जुनोद्धरणं च निर्दिष्टे । परं हरिकेलौ तदुभयमेव कार्यजातं मृद्भक्षणात् पूर्वमेव वर्णितम् ।

(ग) श्रीमद्भागवते पूतनावधशकटभङ्गयोरनन्तरमेव तृणावर्तवधः प्रस्तुतो हरिकेलौ तु शकटभङ्गात् पूर्वमेव तृणावर्तवधो निरूपितः ।

(घ) श्रीमद्भागवते यज्ञपत्नीष्वनुग्रहो निर्दिष्टः, शङ्खचूडकथा च प्रकाशिता परन्तु हरिकेलौ तदुभयमेव वृत्तं न निबद्धम् ।

(च) श्रीमद्भागवते वर्षाशरद्वर्णने क्रमेण निरूपिते, परन्तु हरिकेलौ विधिवृत्तानन्तरं वर्षर्तुवर्णनं कृतं गोवर्धनधारणान्ते च शरन्निरूपणं विहितम् ।

(छ) श्रीमद्भागवते कामधेनुपुरन्दराभ्यां कृतः कृष्णाभिषेको निरूपितः परं हरिकेलौ नैष प्रसङ्गो लभ्यते ।

(ज) श्रीमद्भागवते वरुणकृतं नन्दापहरणं निर्दिष्टमजगरस्य मुखे नन्दस्य प्रवेशश्च वर्णितः । परमेतदुभयमेव वृत्तं हरिकेलौ परित्यक्तम् ।

(झ) श्रीमद्भागवते व्रजाङ्गनाभिः कात्यायनीसमर्चा हेमन्ते कृतेति निर्देशः । हरिकेलौ च शिशिरे कात्यायनीपूजा व्रजाङ्गनाभिः कृतेति निरूपणमस्ति ।

(ञ) श्रीमद्भागवते नन्दव्रजाद् रामकृष्णयोर्मथुराप्रयाणप्रसङ्गे गोपीनामुद्विग्नताऽक्रूरोपालम्भश्च वर्णितौ, परन्तु हरिकेलौ तत् प्रसङ्गद्वयं कविना परित्यक्तम् ।

☆

---

133. तत्रैव, १४।१-५५
तत्रत्यमेकं पद्यं प्रस्तूयते दिग्दर्शनार्थम्-
"इति कतिपयरात्रं कामिनीः क्रीडयित्वा
निजनिजवसतीस्ताः प्रापयामास कृष्णः ।
तपनदुहितृनीरोन्मग्ननौलब्धपाराः
जगति हि किमसाध्यं योगमायेश्वरस्य ॥" तत्रैव, १४।५५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४. संस्कृतसाहित्ये कृष्णकाव्यपरम्परा

संस्कृतसाहित्यस्य विदग्धकाव्यपरम्परायां पाणिनिना "जाम्बवतीजयमहाकाव्यं" निर्माय सर्वप्रथमं कृष्णकाव्यरचनाया: शुभारम्भो विहित: । यद्यपि पाणिनिप्रणीतं तन्महाकाव्यमधुना नोपलभ्यते तथापि ग्रन्थान्तरेषु समुद्धृतानि तदीयानि कानिचन पद्यानि सत्यापयन्ति तथ्यमेतत्[1] । तत: पूर्वमपि कृष्णचरितमधिकृत्य विदग्धकाव्यानि प्रणीतानि स्यु: किन्तु प्रमाणाभावान्न शक्यते तद्विषये वक्तुं किमपि । तत: परं संस्कृतसाहित्यसम्वर्धने बद्धपरिकरै रचनाधर्मिभि: पौराणिकचरितेषु श्रीकृष्णचरितमेव सर्वाधिकतया समादृतम् । श्रीकृष्णस्य परिपूर्णतमां भगवत्तामङ्गीकुर्वद्भिर्भक्तकविभिस्तस्य षोडशकलोज्ज्वलां सर्वातिशायिनीं पूर्णतमां सम्प्रभुतां स्वीकुर्वद्भिरन्यै: कविभिश्च प्रणीतं कृष्णकाव्यवाङ्मयमितरचरिताश्रितकाव्येभ्यो नितरां समृद्धं स्फीतञ्चास्ति संस्कृतसाहित्ये । पाणिनि- व्याडि- वाकाटकसर्वसेन- भास- समुद्रगुप्त प्रभृतिभिर्मनीषिभिरारब्धे महनीये वर्त्मनि प्रवर्तितै: परवर्तिभि: कविभिर्महाकविभिश्च प्रणीतैर्विविधकाव्यमहाकाव्यचम्पूकाव्यरूपकादिभि: समलङ्कृतं तत् कृष्णाश्रितं काव्यवाङ्मयं महासागर इव गभीरं हिमालय इवोत्तुङ्गं सज्जगति निजां ज्योतिर्मयीमभिख्यां व्यापयति । कृष्णकाव्यपरम्पराया: प्रवर्धने जनसङ्ख्याभूभागयोर्दृष्ट्या विचारिते नेपालभारतयो: समानमेवावदानं प्रतीयते । अत्रोभयोरेव राष्ट्रयोरवदानपरिचयाय प्रसिद्धिमागतानां प्रमुखानां कृष्णकाव्यानां विवरणी प्रकाश्यते ।

४.१. भारतीयमवदानम्

क) महाकाव्यानि

क्र.सं.	महाकाव्यनामानि	कवय:	समयसङ्केता:
१.	जाम्बवतीजयमहाकाव्यम्[2]	पाणिनि:	ई.पू.कश्चन समय:
२.	बालचरितमहाकाव्यम्[3]	व्याडि:	ई.पू.कश्चन समय:
३.	हरिविजयमहाकाव्यम्[4]	वाकाटक:सर्वसेन:	ई.पू.कश्चन समय:
४.	शिशुपालवधमहाकाव्यम्[5]	माघ:	ई. ७ शतकम्
५.	हरिविलासमहाकाव्यम्[6]	वैद्यराजो लोलिम्बराज:	ई. ११ शतकम्
६.	दशावतारचरितमहाकाव्यम्[7]	क्षेमेन्द्र:	ई. ११ शतकम्
७.	नरनारायणानन्दमहाकाव्यम्[8]	वस्तुपाल:	ई. १३ शतकम्

---

1. डा. केशवराव मुसलगांवकर, संस्कृत महाकाव्य की परम्परा, चौ.सं.सि. वाराणसी, प्र.सं.,वि.सं २०२६, पृ. १८५-१८६ ।
2. तत्रैव ।
3. तत्रैव ।
4. "राज्ञा श्रीसर्वसेनेन रचितं विजयं हरे:" तत्रैव, पृ. १९१ ।
5. तत्रैव, पृ. ३९० ।
6. डा. राजवंश सहाय हीरा, संस्कृत साहित्यकोष, चौ.सं.सि. अफिस, वाराणसी, प्र.सं., ई. १९७३, पृ. ६८२ ।
7. तत्रैव, पृ. १५५ ।
8. तत्रैव, पृ. २५५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८.	यादवाभ्युदयमहाकाव्यम्[9]	वेदान्तदेशिक:	ई. १४ शतकम्
९.	मथुराविजयमहाकाव्यम्[10]	गङ्गादेवी	ई. १४ शतकम्
१०.	यादवाभ्युदयमहाकाव्यम्[11]	वेंकटनाथ:	ई. १४ शतकम्
११.	अच्युतरामाभ्युदयमहाकाव्यम्[12]	राजनाथतृतीय:	ई. १६ शतकम्
१२.	पारिजातहरणमहाकाव्यम्[13]	कर्णपूर: (परमानन्ददास:)	ई.१६शतकम्
१३.	वासुदेवविजयमहाकाव्यम्[14]	वासुदेव: (केरलीय:)	ई. १८ शतकम्
१४.	कृष्णलीलामृतमहाकाव्यम्[15]	म.म. लक्ष्मणसूरि:	ई. १९ शतकम्
१५.	गोविन्दचरितामृतमहाकाव्यम्[16]	कविराज: कृष्णदास:	ई. १९ शतकम्
१६.	बालचरितामृतमहाकाव्यम्[17]	शङ्करलाल: ई. १९ शतकम्	
१७.	सत्यभामापरिग्रहमहाकाव्यम्[18]	हेमचन्द्रराय:	ई. १६ शतकम्
१८.	पारिजातहरणमहाकाव्यम्[19]	उमापतिशर्म्मा	ई. १६ शतकम्
१९.	रुक्मिणीहरणमहाकाव्यम्[20]	पं. काशीनाथद्विवेदी	ई. २० शतकम्
२०.	ईश्वरविलासमहाकाव्यम्[21]	श्रीकृष्ण:	ई. २० शतकम्
२१.	चक्रपाणिविजयमहाकाव्यम्[22]	लक्ष्मीधरभट्ट:	ई. २० शतकम्
२२.	यदुवंशमहाकाव्यम्		
२३.	हरिसम्भवमहाकाव्यम्		
२४.	हरिविजयमहाकाव्यम्		
२५.	पाण्डवोदयमहाकाव्यम्		

(२२ संख्यात: २५ संख्यापर्यन्तं निर्दिष्टानि महाकाव्यानि गवेषणाविषयसूची, प्रकाशक सम्पूर्णानन्दसंस्कृत विश्वविद्यालय:, वाराणसी, ई. १९९१, इति ग्रन्थस्य साहित्यसम्बद्धेषु पत्रे सूचितानि सन्ति ।)

---

9. तत्रैव, पृ. ५५८ ।
10. तत्रैव, पृ. ६६८ ।
11. तत्रैव, पृ. ५३८ ।
12. तत्रैव, पृ. ६२८ ।
13. तत्रैव, पृ. २८१ ।
14. तत्रैव, पृ. ५०२।
15. तत्रैव, पृ. ६२९ ।
16. तत्रैव, पृ. १६७ ।
17. तत्रैव, पृ. ६२९ ।
18. तत्रैव, पृ. ६२९।
19. तत्रैव, पृ. १६० ।
20. तत्रैव, पृ. ४७७ ।
21. "राजस्थानसंस्कृतग्रन्थमालात: प्रकाशितं, ग्रन्थमालात: प्रकाशितेषु, पुस्तकेषु, प्रकाशितग्रन्थविवरणे सूचितञ्च ।
22. तदेव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ख) <u>सामान्यकाव्यानि</u>

क्र.सं.	काव्यनामानि	कवयः	समयसङ्केताः
१.	कृष्णचरितकाव्यम्[23]	समुद्रगुप्तः	ई. ४ शतकम्
२.	गीतगोविन्दकाव्यम्[24]	जयदेवः	ई. १२ शतकम्
३.	गोपालविंशतिः[25]	वेंकटनाथः	ई. १४ शतकम्
४.	यदुवंशकाव्यम्[26]	वेंकटनाथः	ई. १४ शतकम्
५.	कृष्णकर्णाभरणकाव्यम्[27]	विल्वमङ्गलः	ई. १५ शतकम्
६.	कृष्णकर्णामृतकाव्यम्	लीलांशुकः	ई. „ शतकम्
७.	उत्कलिकामञ्जरी	रूपगोस्वामी	ई. „ शतकम्
८.	आनन्दमहोदधिः	„	ई. „ शतकम्
९.	गोविन्दविरुदाबली	„	ई. „ शतकम्
१०.	मुकुन्दमुक्तावली	„	ई. „ शतकम्
११.	मथुरामहिमा	„	ई. „ शतकम्
१२.	लघुभागवतामृतम्	„	ई. „ शतकम्
१३.	स्तवमाला	„	ई. „ शतकम्
१४.	पद्यावली	„	ई. „ शतकम्
१५.	भक्तिरसामृतसिन्धुः	रूपगोस्वामी	ई. १५ शतकम्
१६.	उज्ज्वलनीलमणिः	„	ई. १५ शतकम्
१७.	बाणासुरविजयकाव्यम्	भट्टबाणः	ई. „ शतकम्
१८.	आर्याशतकम्	कर्णपूरः	ई. १६ शतकम्
१९.	पारिजातहरणम्	„	ई. १६ शतकम्
२०.	कृष्णाह्निककौमुदी	„	ई. „ शतकम्
२१.	दानलीलाकाव्यम्[28]	माधवभट्टः	ई. „ शतकम्
२२.	मुकुन्दविलासकाव्यम्	भगवंतः	ई. १७ शतकम्
२३.	रुक्मिणीकल्याणकाव्यम्	राजचूडामणिः	ई. „ शतकम्
२४.	अमृतलहरी	„	ई. „ शतकम्
२५.	पद्यमुक्तावली	श्रीकृष्णः	ई. „ शतकम्
२६.	मुकुन्दमालास्तोत्रकाव्यम्	कुलशेखरः	ई. „ शतकम्
२७.	आलवन्दारस्तोत्रकाव्यम्	यामुनाचार्यः	ई. „ शतकम्

---

23. डा. मुसलगांवकरः, पूर्ववत्, पृ. १५२ ।
24. गीतगोविन्दप्रभृतीनि काव्यानि प्रसिद्धानि, तानि च संस्कृत साहित्यकोषस्य विभिन्नेषु पृष्ठेषु वर्णितानि ।
25. एतत् काव्यं रा.अ. नेपाले, पाण्डुलिपिरूपेण लभ्यते ।
26. २४ संख्याङ्कितटिप्पण्यां निर्दिष्टं तथ्यम् ।
27. आनन्दवृन्दावनचम्पूकाव्ये भूमिकायां निर्दिष्टानि काव्यानि ।
28. इतः परं निर्दिष्टानि काव्यानि <u>संस्कृतसाहित्यकोषस्य</u> विभिन्नेषु पृष्ठेषु वर्णितानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग) कृष्णपराणि चम्पूकाव्यानि[29]

क्र.सं.	काव्यनामानि	कवय:	समयसङ्केता:
१.	भागवतचम्पू:	अभिनवकालिदास:	ई ११ शतकम्
२	रुक्मिणीपरिणयचम्पू:	अमलानन्द:	ई १४ शतकम्
३.	गोपालचम्पू:	जीवगोस्वामी	ई १५ शतकम्
४.	आनन्दवृन्दावनचम्पू:	कर्णपूर:	ई १६ शतकम्
५.	पारिजातहरणचम्पू:	शेषकृष्ण:	ई १६ शतकम्
६.	सुभद्राहरणचम्पू:	नारायणभट्ट:	ई १६ शतकम्
७.	नृगमोक्षचम्पू:	"	ई १६ शतकम्
८.	माधवचम्पू:	चिरञ्जीवभट्टाचार्य:	ई १६ शतकम्
९.	मद्रकन्यापरिणयचम्पू:	गङ्गाधर:	ई १७ शतकम्
१०	मन्दारमरन्दचम्पू:	श्रीकृष्ण:	ई १७ शतकम्
११.	भैष्मीपरिणयचम्पू:	श्रीनिवासमखिन्	ई १७ शतकम्
१२.	रुक्मिणीपरिणयचम्पू:	चक्रकवि:	ई १७ शतकम्
१३.	श्रीकृष्णविलासचम्पू:	नरसिंहसूरि:	ई १७ शतकम्
१४.	बाणासुरविजयचम्पू:	वेङ्कटाचार्य:	ई १८ शतकम्

घ) दूतकाव्यानि[30]

क्र.सं.	दूतकाव्यनामानि	कवय:	समयसङ्केता:
१.	हंसदूतम्	वेदान्तदेशिक:	ई. १४ शतकम्
२.	उद्धवसन्देशकाव्यम्	रूपगोस्वामी	ई. १५ शतकम्
३.	मनोदूतम्	विष्णुदास:	ई. १६ शतकम्
४.	हंससन्देश:	पूर्णसारस्वत:	ई. १७ शतकम्
५.	उद्धवदूतम्	माधवकवीन्द्र:	ई. १७ शतकम्
६.	भृङ्गदूतम्	श्रीकृष्णदेव:	ई. १८ शतकम्
७.	पदाङ्कदूतम्	श्रीकृष्णसार्वभौम:	ई. १८ शतकम्
८.	मनोदूतम्	तैलङ्गव्रजनाथ:	ई. १९ शतकम्
९.	गोपीदूतम्	लम्बोदरवैद्य:	ई. १९ शतकम्

29. एतेषां चम्पूकाव्यानां विवरण्य: पूर्वनिर्दिष्टे हीरामहोदयप्रणीते "संस्कृतसाहित्यकोषे", विभिन्नेषु पृष्ठेषु विलोकनीया: ।
30. एतेषां दूतकाव्यानां विवरण्योऽपि तद्वदेव तत्रैव द्रष्टव्या: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ङ) रूपकाणि

क्र.सं.	रूपकनामानि	कवय:	समयसङ्केता:
१.	बालचरितनाटकम्[31]	भास:	ई. पू. ६ शतकम्
२.	दूतवाक्यम् (व्यायोग:)	„	ई. पू. „ शतकम्
३.	वेणीसंहारनाटकम्	भट्टनायक:	ई. ७ शतकम्
४.	रुक्मिणीहरणम्	वत्सराज:	ई. १२ शतकम्
५.	विदग्धमाधवनाटकम्	रूपगोस्वामी	ई. १५ शतकम्
६.	ललितमाधवनाटकम्	„	ई. „ शतकम्
७.	नाटकचन्द्रिका	„	ई. „ शतकम्

४.१.१ निष्कर्ष:

भारतीयैर्मनीषिभि: श्रीकृष्णमधिकृत्य रचितेषु काव्येषु प्रमाणै: परिचितानां प्रमुखानामिह सङ्केतप्रधाना विवरणी प्रकाशिता । अनुसन्धित्सुभिरितोपि समधिकानि प्रकाशितान्यप्रकाशितानि च लब्धुं शक्यन्ते । पुराणप्रथितचरितस्य श्रीकृष्णस्य विषये पूर्वनिर्दिष्टानि काव्यानि देववाचि निबद्धानि वस्तुतो नाल्पानि ।

४.२. कृष्णकाव्यपरम्पराप्रवर्धने नैपालमवदानम्

विश्वस्मिन् नितरां विश्रुते निसर्गसुषमासमन्विते गिरिराजवक्षसि सानन्दं विराजमाने राष्ट्रदेवेन भगवता पशुपतिनाथेन सनाथितेऽस्मिन् नेपालराष्ट्रे लिच्छवियुगेऽपि (वि.सं. ५१६-७९०) सश्रद्धं कृष्णोपासना जनैरकारीति तथ्यस्य परिचायिका लिच्छविकालस्य मूर्तय: शिलालेखाश्च विद्योतन्ते । यद्यपि तस्मिन् युगे प्रणीतं कृष्णपरकं साहित्यमधुना नोपलभ्यते । तदुत्तरवर्तिनो मल्लशासनकालस्य प्रथमे चरणे प्रणीतानामपि कृष्णकाव्यानां विवरणी नोपलब्धा । मल्लकालस्योत्तरार्द्धेऽत्र कृष्णकाव्यानां संरचनाया महान् संरम्भोऽत्रत्यै: कविभि: प्रदर्शित: । वस्तुत: खिष्टस्य पञ्चदशात् शतकात् विंशशतकपर्यन्तं जन्मना नेपालमातरमलङ्कुर्वद्भिरनेकै: कविभिर्महाकविभि: कवित्वान्वितैर्भूपतिभिश्च प्रचुरं कृष्णचरिताश्रितं साहित्यं सृष्ट्वा कृष्णकाव्यपरम्पराप्रवर्धने नेपालपक्षतोऽनवद्यमवदानं कृतम् । नेपाले नेपालै: प्रणीतस्य कृष्णसाहित्यस्य दिग्दर्शनप्रधाना विवरणी निरूप्यते ।

(क) महाकाव्यानि

क्र.सं.	महाकाव्यानामानि	कवय:	समयसङ्केता:
१.	हरिकेलिमहाकाव्यम्[32]	वंशमणिशर्म्मा	ई. १७ शतकम्
२.	यदुवंशमहाकाव्यम्[33]	काशीनाथो द्विज:	ई. „ शतकम्

31. एतानि रूपकाणि संस्कृतसाहित्यकोषानुसारेण, निरूपितानि ।
32 प्रकृतं महाकाव्यं यस्य समग्र: परिचय: पूर्वमुपात्त: ।
पृष्ठेषु 33. पथिकृत्-शिवराजआचार्य: कौडिन्यायन:, तत्सहायकाश्च, कतिपय नैपालसंस्कृतग्रन्थकारपरिचये, पृ. १४ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३.	श्रीकृष्णचरितामृतमहाकाव्यम्[34]	कृष्णप्रसादघिमिरे	ई. २० शतकम्

(ख) सामान्यकाव्यानि

क्र.सं.	काव्यनामानि	कवयः	समयसङ्केताः
१.	गीतकेशवम्[35]	मान्धातृसिंहः	ई. १७ शतकम्
२.	उद्धवदूतम्[36]	राधावल्लभोऽर्याल:	ई. १८ शतकम्
३.	हरिचरितकाव्यम्	चतुर्भुजः	ई. १५ शतकम्
४.	कृष्णमहिमा	शिवशर्म्मसूरिः	ई. १९ शतकम्
५.	गोविन्दगुणानन्दः	,,	ई. ,, शतकम्
६.	वासुदेवरसानन्दः	,,	ई. ,, शतकम्
७.	कृष्णकर्णाभरणकाव्यम्	कुलचन्द्रगौतमः	ई. ,, शतकम्
८.	वन्दनायुगलम्	,,	ई. ,, शतकम्
९.	भागवतमञ्जरी	,,	ई. ,, शतकम्
१०.	श्रीकृष्णचरितामृतकाव्यम्	दधिराममरासिनिः	ई. ,, शतकम्
११.	रुक्मिणीपरिणयम्	गुणराजखनालः	ई. २० शतकम्
१२.	कृष्णाभिसर्पणकाव्यम्	भरतराजमन्थलीयः	ई. ,, शतकम्
१३.	मधुमण्डनकाव्यम्[37]	बालकृष्णशर्मा	ई. अज्ञातं शतकम्
१४.	राधाविनोदकाव्यम्	रामचन्द्रः	ई. ,, शतकम्
१५.	वृन्दावनकाव्यम्	मानाङ्कः	ई. ,, शतकम्

ग) नाटकानि[38]

क्र.सं.	काव्यनामानि	कवयः	समयसङ्केताः
१.	पाण्डवविजयनाटकम्	शुभराजः	ई १५ शतकम्
२.	श्रीकृष्णनाटकम्	त्रैलोक्यमल्लः	ई १६ शतकम्
३.	कुञ्जविहारनाटकम्	जगज्ज्योतिर्मल्लः	ई १७ शतकम्
४.	उषाहरणनाटकम्	जगत्प्रकाशमल्लः	ई १७ शतकम्
५.	पारिजातहरणनाटकम्	,,	ई १७ शतकम्
६.	कालियमथनोपाख्याननाटकम्	जयजितामित्रमल्लः	ई १७ शतकम्
७.	गोपीचन्द्रनाटकम्	,,	ई ,, शतकम्
८.	उषाहरणनाटकम्	भूपतीन्द्रमल्लः	ई ,, शतकम्
९.	कंसवधनाटकम्	,,	ई ,, शतकम्

34. तत्रैव, पृ. ५५ ।
35. रा.अ. साहित्यविषयके सूचीपत्रे विषयसं. १४८ ।
36. पूर्वमुद्दिष्टस्य कतिपयनैपालसंस्कृतग्रन्थकारपरिचयस्य, क्रमशः- २३, ३१, ४१-४२, ४४, ५४, ५८ पृष्ठेषु २-११ संख्यासु निहितानां काव्यानामुल्लेखः ।
37. १३-१५ संख्याकानि काव्यानि रा.अ. साहित्यविषयके सूचीपत्रे निर्दिष्टानि ।
38. वेणीमाधवढकालः, मल्लकाले काष्ठमण्डपोपत्यकायां लिखितानां नाटकानां समालोचनात्मकमध्ययनम् इति त्रि.वि.वि. संस्कृतानुसन्धानसमित्या स्वीकृतेऽनुसन्धानलघुप्रबन्धे, ३२, ३६, ३८, ४०, ४३, ४६, ५३, ६० संख्यकेषु पृष्ठेषु तेषां समेषां नाटकानां समुल्लेखो विद्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०.	गोपीचन्द्रोपाख्याननाटकम्	"	ई ,, शतकम्
११.	रुक्मिणीपरिणयनाटकम्	"	ई ,, शतकम्
१२.	गोपीचन्द्रनाटकम्	सिद्धिनरसिंहमल्लः	ई ,, शतकम्
१३.	इन्द्रविजयनाटकम्	जयरणजिन्मल्लः	ई १८ शतकम्
१४.	कृष्णकैलासयात्रोपाख्याननाटकम्	,,,,	ई ,, शतकम्
१५.	उषाहरणनाटकम्	"	ई ,, शतकम्
१६.	कृष्णचरित्रनाटकम्	"	ई ,, शतकम्
१७.	कृष्णचरित्रोपाख्यानम्	"	ई ,, शतकम्

४.२.१. निष्कर्षः

लब्धैः प्रमाणैः सत्यापितानामेवात्र विवरणी प्रस्तुता । अतो नेपालराष्ट्रस्य संस्कृतसाहित्यसंवर्धने कृष्णकाव्यपरम्पराप्रवर्धने च यदवदानं तन्महनीयं नूनम् ।

४.३. कृष्णचरितप्रधानेषु काव्येषु हरिकेलिमहाकाव्यस्य स्थानम्

कृष्णकाव्यपरम्परा सामान्यतो द्विविधा वर्तते वैष्णवसम्प्रदायमूला सम्प्रदायाननुविद्धा च । वैष्णवकाव्यानि भक्तिरसानुप्राणितानि तदितराणि च शृङ्गारवीरकरुणादिरसप्रधानानि सन्ति । प्रकृतं हरिकेलिकाव्यं सम्प्रदायाननुविद्धं ललितैः पदैर्गम्भीरैरर्थैः स्वतःसमुद्भूतैरलङ्कारैरलङ्कृतं शृङ्गाररसेनानुप्राणितं काव्यकलायाश्चूडान्तस्पर्शि कृष्णलीलामयं महाकाव्यमस्ति । कृष्णकाव्यपरम्परायां कृष्णलीलामृतमहाकाव्यम्[39] , मथुराविजयमहाकाव्यम्, बालचरितमहाकाव्यम्, हरिविलासमहाकाव्यम्, ईश्वरविलासमहाकाव्यम्, वासुदेवविजयमहाकाव्यम्, यादवाभ्युदयमहाकाव्यम्, भागवतचम्पूः, गोपालचम्पूः, आनन्दवृन्दावनचम्पूः, बालकृष्णचम्पूः, श्रीकृष्णविलासचम्पूरित्यादिषु कृष्णलीलाप्रधानेषु काव्यरत्नेषु निरूपिता विषया हरिकेलिमहाकाव्यगतैर्विषयैः सादृश्यभाजः सन्ति । कालिदासेन भारविणा माघेन श्रीहर्षेण च यां रीतिमवलम्ब्य यां विषयचयननैपुणीं निरूप्य यां काव्यकलावैशारदीमनुसृत्य याञ्च शास्त्रव्युत्पत्तिवैदुषीमभिव्यज्य निजनिजानि महाकाव्यानि प्रणीतानि ताभिरेव रीति - नैपुणी- वैशारदी- वैदुषीभिः सर्वात्मना समलङ्कृतस्यास्य हरिकेलिमहाकाव्यस्य प्रतिभाप्रकर्षचमत्कृतेषु कृष्णकाव्येषु मध्ये गौरवपूर्णं स्थानमस्ति । यत्र तत्र निजेनापूर्वेण पदलालित्येन कालिदासस्य कुमारसम्भवमहाकाव्यमपि मन्दीकुर्वतः कल्पनाया उत्तालैस्तरङ्गैः पाठकानाह्लादयतोऽस्य महाकाव्यस्य यादृशो रमणीयः काव्यकलासौन्दर्यपक्षस्तादृश एव चिन्तनगहनः शास्त्रव्युत्पत्तिपक्षः । काव्यकलायां सर्वात्मनानुप्रविष्टा शास्त्रव्युत्पत्तिजटिल्यजन्यं वैरस्यं दूरत एव परिहृत्य सच्चिदानन्दरूपतत्त्वत्रयस्य विलक्षणं सन्तर्पणं समर्प्य सहृदयान् रञ्जयति नितराम् । अतो भारतीयोपमहाद्वीपे प्राचीनकालादर्वाचीनकालपर्यन्तं निर्मितेषु कृष्णचरितप्रधानेषु विशिष्टेषु महाकाव्येष्वन्यकाव्येषु च नैपालकमहाकवेरिदं हरिकेलिमहाकाव्यं निजेन काव्यकलावैभवेन गौरवमयं स्थानं धत्ते नूनम् ।

☆

---

39. अत्र निर्दिष्टानि महाकाव्यानि चम्पूकाव्यानि च पूर्व भारतीयावदानप्रसङ्गे सूचितानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५. महाकाव्यपरम्परायां हरिकेलिमहाकाव्यम्

५.१. महाकाव्यपरम्परा

वेदेषु वेदाङ्गेषु पुराणेषु रामायणे महाभारते च महाकाव्योपयोगिनां गद्यानां पद्यानां संवादा सूक्तीनां गीतीनां स्तुतीनां कल्पनावैचित्र्यस्य च सद्भावाद् महाकाव्यपरम्परा वैदिककाला प्रवर्तितेति विषये न स्यात् कस्यचन काप्यनुपपत्तिः । शास्त्रीयविषयप्राबल्यात् सत्स्वपि तेषु काव्यगुणेषु तानि महाभारतरामायणपुराणादीन्यार्षकाव्याभिधया व्यपदिश्यन्ते [1]पाणिनिव्याडिप्रणीतयोर्महाकाव्ययोरधुना प्राप्त्यभावाद् विदग्धकाव्यपरम्परा कालिदासादेव प्रारब्धे निरूपणे विवशा वयम् । संस्कृतमहाकाव्येषु,[2] कालिदासस्य रघुवंशमहाकाव्यम्, अश्वघोष बुद्धचरितमहाकाव्यम्, भारवेः किरातार्जुनीयमहाकाव्यम्, माघस्य शिशुपालवधमहाकाव्यम्, श्रीहर्ष नैषधचरितमहाकाव्यञ्चेति पञ्च महाकाव्यानि सर्वोत्तमानि सन्ति । अद्यावधि पाण्डुलिपि वर्तमानत्वाद् हरिकेलिमहाकाव्यं न ज्ञायते भारतीयोपमहाद्वीपवासिभिः साहित्यानुरागिभिः प्रकाशितेऽस्मिन् पूर्वाग्रहराहित्येन देशविशेषपक्षपातबुद्धिपरिहारेण च मूल्याङ्किते चास्मिन् तदेतन्महाकाव्यं सर्वोत्तममहाकाव्यवर्गे निजं स्थानं लप्स्यते नूनम् । कालिदासस्य कमनीयां काव्यक भारवेरर्थगौरवं महाकवेः श्रीहर्षस्य विलक्षणं वैदुष्यमङ्गीकुर्वतोऽस्य महाकाव्य कालिदासभारविश्रीहर्षादिप्रणीतमहाकाव्यपङ्क्तौ निर्बाधा प्रविष्टिरिति विषये नास्ति कश्च शङ्कावसरः । नेपालजन्मनो महाकवेरिदं काव्यं निजया महनीययोपस्थित्या प्रणेतारं वंशमपि प्रणयनपावनां नेपालावनीं च सर्वतोभावेन संवर्धयाञ्चकारेति मामकीना प्रतीतिः ।

५.२. महाकाव्यत्वसमीक्षा

भामहदण्डिरुद्रटादीनां सतां महाकाव्यलक्षणानि परिष्कृत्य कविराजो विश्वनाथो निजनिर्मि साहित्यदर्पणाख्ये लक्षणग्रन्थे सविस्तरं महाकाव्यलक्षणं निरूपयामास । चरित्र- संघटना- रस भावानां समुचितः परिपोष एव महाकाव्यत्वाधायक इति यदीयो निष्कर्षः । तल्लक्षणं विदु कृतेऽद्यावधि सर्वोत्तममादर्शभूतमस्ति पारम्पर्यक्रमागतानां महाकाव्यानां मूल्याङ्कनविधौ ।

विश्वनाथो निजगाद-

[3]"सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ।
श्रृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ॥
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः ।
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ॥
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत् ।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ॥
क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्तनम् ।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ॥

---

1. डा. मुसलगांवकरः, पूर्ववत्, पृ. ११२ ।
2. साहित्यिकसमाजे प्रसिद्धमेतत्तथ्यम् ।
3. सा.द., ६।३१५-३२४ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह ।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ॥
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।
सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः ॥
प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः ।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ॥
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ॥"

उक्तलक्षणमधिकृत्य हरिकेलिमहाकाव्यसमीक्षया निम्ननिर्दिष्टो निष्कर्षः फलितः । स च यथा- नायको देवानां देवः श्रीकृष्णः, यः स्वयं धीरोदात्तलक्षणेन समलङ्कृतः, रसानामधिराजः शृङ्गारोऽङ्गी रसः, वीरशान्ताद्भुतभयानकरौद्राभिधेयाः सहायाः, आदौ नमस्कारात्मकं मङ्गलाचरणम्, स्थले स्थले शुकसनातनसनन्दननारदशेषादीनां गुणकीर्तनम्, सर्गबन्धता, सर्गानामष्टाधिकता मध्यमाकारता च, सर्गान्ते भाविवृत्तसूचना, सर्गान्ते वृत्तपरिवर्तनम्, क्वचन सर्गेषु वृत्तविशेषाधिक्यम्, सर्गविशेषे नैकविधानां वृत्तानां विनिवेशः, मुग्धा महानायिका वृषभानुनन्दिनी राधा, ऋतु-सन्ध्या- रजनी-प्रदोष- प्रभात- मध्याह्न- सूर्योदय- चन्द्रोदय- ध्वान्त- वन- नदी- पर्वतादीनां स्वाभाविकं कलाकोमलं च चित्रणम्, मन्त्रणापरता, विप्रलम्भस्य विलक्षणं पाषाणद्रावकं चित्रणम्, सम्भोगशृङ्गारस्य चूडान्तगामि निरूपणञ्चास्य महाकाव्यस्य महाकाव्यत्वाधायका गुणा विद्योतन्ते । स्वयं कविना सर्वमेतन्निभाल्य "हरिकेलिनाम[4] महाकाव्यम्" इति व्यवहृतम् । पुनश्चात्र श्रीकृष्णस्य व्रजलीलाया माथुरचरितस्य च सर्वाङ्गीणं सुसङ्घटितं रसभावपरिपाकहृद्यमनवद्यं निरूपणं सञ्जातमस्तीति विभावयन्ती सहृदयहृदयानुभूतिः स्वयं साक्षिभूताऽस्य काव्यस्य महाकाव्यकोटिप्रतिष्ठाविधौ ।

५.३. <u>नामौचित्यसमीक्षा</u>[5]

कविसंज्ञया चरित्रसंज्ञया चरित्रनायकसंज्ञया वा महाकाव्यस्य नामकरणं शास्त्रैः सन्दिष्टम् । हरिकेलिमहाकाव्यस्य चरित्रनायकः कृष्णरूपेण देवकीवसुदेवयोः सूनुत्वं स्वीकृत्यावतीर्णो हरिरेवेति हरिकेलीति काव्यनाम सार्थकम् । कविशिरोमणिना वंशमणिना प्रथमसर्गस्यावसाने सप्तदशसर्गस्य पुष्पिकावाक्ये कविकाव्यनामचित्रपद्ये च हरिकेलीति नाम निर्दिश्य स्वयमेव निजनिर्मितस्य महाकाव्यस्य नामकरणं विहितमिति तथ्यं निर्भ्रान्तम् । परं प्रतिसर्गं पुष्पिकापद्येषु "कृष्णकाव्येऽतिभव्ये" इति पदावली स्वयं कविनैव प्रयुक्तेति काचन भ्रान्तिर्मनसि तरङ्गिता भवति । यतो हि काव्यस्यास्य नामद्वयमुत "कृष्णकाव्ये" इत्यत्र वर्तमानं कृष्णपदं हरिपदस्य पर्यायरूपेण प्रयुक्तमिति सन्देहो जागर्ति । तत्रेदं विचारणीयं यदि "कृष्णकाव्ये" इति पदस्य स्थाने "हरिकाव्ये" इति पदं प्रयुज्यते तर्हि वृत्तभङ्गदोषोऽपरिहार्यः । तस्माद् यो हरिः स एव कृष्ण इत्यनुभावयितुं हरिपदस्योपलक्षणत्वेन कविना कृष्णपदव्यवहारो व्यधायीत्यस्मत्सम्मतं समाधानम् । कृष्णवतारसन्दर्भं हृदि निधाय "कृष्णकेलिमहाकाव्यम्" इति नामकरणे कवेः प्रवृतिः कथं न जाता ? तया का हानिः संभविनी ? इत्यादयः प्रश्ना अपि समुन्नेतुं शक्यन्ते । मम विचारे "कृष्णकेलिमहाकाव्यम्" इति नामकरणे झटिति हरिरेव कृष्ण इति वस्तुतथ्यबोधे सामान्यजनानां वैकल्यं भवति, "हरिकेलिमहाकाव्यम्" इति

---

4. सप्तदशसर्गान्तपुष्पिकावाक्यम् ।
5. "कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ।
नामास्य सर्गोपादेयकथया सर्गनाम तु ॥ सा. द. ६।३२४-३२५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामकरणेन कृष्णलीलोपस्थापने विहिते हरिरेव कृष्ण इति तथ्यं झटिति सर्वसंवेद्यं जायते । अतः कृष्णस्य सर्वातिशायिनीं पूर्णतमां भगवत्तां ख्यापयितुं कवेरेष सहजः प्रयासोऽवगन्तव्यः । अस्मिन्नेव सन्दर्भे पुरातनकवीनां प्रवृत्तौ निभालितायां ज्ञायते यत् कालिदासपूर्वभाविना वाकाटकनृपतिना सर्वसेनेन[6] तादृशवस्तुप्रधानमेव काव्यं "हरिविजयमहाकाव्य"-नाम्ना व्यपदिष्टम्, चतुर्भुजकविना तादृशमेव कृष्णकेलिप्रधानं काव्यं "हरिचरिताभिधानेन" अभिहितम्, वैद्यराजलोलिम्बराजेन च हरिकेलिमहाकाव्यसदृशविषयवस्तुसमन्वितं स्वीयं महाकाव्यं "हरिविलासमहाकाव्यम्" इति संज्ञया ख्यापितम् । एभिः कविभिर्हरिकेलिमहाकाव्यस्य प्रणेत्रा वंशमणिना च श्रीमद्भागवतस्याधोनिर्दिष्टं पद्यं हृदि निधाय निजनिजानां महाकाव्यानां शीर्षकनिर्धारणं कृतमिति निश्चीयते । तच्च यथा -

[7]"स विस्मयोत्फुल्लविलोचनो हरिम्
सुतं विलोक्यानकदुन्दुभिस्तदा ।
कृष्णावतारोत्सवसम्भ्रमोऽस्पृशन्
मुदा द्विजेभ्योऽयुतमाप्लुतो गवाम् ॥"

[8]श्रीमद्भागवतेऽनेकस्थलेषु श्रीकृष्णो हरिरूपेण कीर्तितः । अनेकेषु पुराणेषु महाभारते च कृष्णावतरणसमयनिरूपणावसरे "जायमाने जनार्दने"[9] इति पदव्यवहारो लभ्यते । गर्गसंहितायान्तु[10] "आविरासीद् हरिः साक्षात्" इति प्रयोगो जातः । अतो निखिलब्रह्माण्डनायकस्य हरेः पूर्णावतारः श्रीकृष्ण इति प्रमाणयितुं कृष्णचरितप्रधानस्य प्रकृतमहाकाव्यस्य "हरिकेलिमहाकाव्यम्" इति नामकरणं शास्त्रसम्मतं लोकसन्मतञ्चेति निष्कृष्यते ।

५.४ हरिकेलिमहाकाव्यरचनायां प्रेरकतत्त्वानि

विक्रमस्य सप्तदशे शतके नेपालस्य काष्ठमण्डपोपत्यकायां विराजिते भक्तपुरनगरे वंशमणिशर्म्मणा जगज्ज्योतिर्मल्लाश्रितेन महाकविना काव्यकलासमृद्धं भव्यमेतद् हरिकेलिमहाकाव्यं प्रणीतम् । तदानीन्तनाः शासका वर्णाश्रमसंस्कृतिपरिपालने बद्धपरिकराः साहित्यसङ्गीतकलानुरागिणो विदुषां कवीनाञ्चाश्रयदातारो धर्मप्राणाश्चासन् । जनजीवनं वर्णाश्रमसंस्कृत्यनुगतं शान्तं शिष्टं मर्यादितञ्च बभूव । तदा प्रकाण्डपण्डितस्य पुत्रो विदुषो राज्ञो जगज्ज्योतिर्मल्लस्याश्रितः स्वयं विद्वान्

---

6. कृष्णकाव्यपरम्पराप्रकरणे निर्दिष्टानि काव्यानि ।
7. श्रीमद्भागवते, १०।३।११।
8. (क) "अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल ।
सुभद्रा च महाभागा तव राजन् पितामही ॥" तत्रैव, ९।२४।५५।
(ख) "यदा यदेह धर्मस्य क्षयो वृद्धिश्च पाप्मनः ।
तदा तु भगवानीश आत्मानं सृजते हरिः ।" तत्रैव, ९।२४।५६।
(ग) "कर्माण्यपरिमेयाणि मनसापि सुरेश्वरैः ।
सहसंकर्षणश्चक्रे भगवान् मधुसूदनः ॥" तत्रैव, ९।२४।६०।
(घ) राजधानी ततः साभूत् सर्वयादवभूभुजाम् ।
मथुरा भगवान् यत्र नित्यं सन्निहितो हरिः ॥" तत्रैव, १०।१।२८।
(ङ)"देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः ।
आविरासीद् तथा प्राच्यां दिशीन्दुरिव पुष्कलः ॥" तत्रैव, १०।३।८।
(च) "इत्युक्त्वासीद् हरिस्तूष्णीं भगवानात्ममायया ।", तत्रैव, ११०।३।४६
9. "पुराणनिरूपितकृष्णचरितवर्णनाविधौ विलोकनीयं तृतीये प्रकरणे ।
10. गर्गसंहितायां गोलोकखण्डे, ११।२४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिभाशाली च महाकविर्वंशमणिरधोनिरूपितैः प्रेरकहेतुभिरनुप्रेरित एतन्महाकाव्यं प्रणिनाय । हेतवश्च यथा -

(क) श्रुतिस्मृत्यनुमोदिताया युगसंस्कृतेरग्रेसारणम् ।
(ख) वेदवेदाङ्गदर्शनगतानां जटिलविषयाणां कान्तासम्मिततया प्रकाशनम् ।
(ग) पुण्यश्लोकस्य सकलवाङ्मयसंस्तुतस्य कृष्णस्य चरितकीर्तनेन पुण्यलाभः कीर्तिलाभश्च ।
(घ) कवेः परम्परागतमहाकविपङ्क्तौ प्रवेशाय तीव्रोऽभिलाषः ।
(ङ) उत्तमसाहित्यसंरचनया स्वस्थसमाजसर्जनमुत्तमभावानां प्रसारः प्रचारश्च ।
(च) आनन्दानुगतमानवप्रकृतेरानुकूल्येन स्वान्तःसुखलाभः ।
(छ) आश्रयदातुः सुकवेर्विदुषश्च जगज्ज्योतिर्मल्लस्य महती प्रेरणा ।
(ज) [11]मम्मटादिनिर्दिष्टानि विशिष्टानि प्रयोजनानि च ।

५.५ हरिकेलिमहाकाव्यस्याङ्गिरसविषयकं विमर्शनम्

हरिकेलिमहाकाव्यं नैकविधैरसैर्भावैश्चानुप्राणितमुत्तमोत्तमकाव्यं वर्तते । सामान्यतयाङ्गिरसनिर्धारणविधावत्र विचिकित्सा प्रादुर्भवति विवेचकानां मानसपटले । कृष्णजन्मत आरभ्य कंसवधपर्यन्ता कथा निबद्धेति धियाऽऽलोडनेऽत्र वीररसस्याङ्गित्वमङ्गीकर्तव्यं भवति । कृष्णः स्वयं ब्रह्मरूपस्तस्य पुण्यचरितकीर्तनं ब्रह्मरूपसाधनमेव, एतावतेदं महाकाव्यं शान्तरसप्रधानमपि निगदितुं शक्यते । कृष्णस्याद्भुततमानां कार्याणां पदे पदे निरूपणादत्राद्भुतप्राधान्यमपि स्वीकर्तुं नास्ति काचन बाधा । कृष्णभक्तिरेवात्र प्रथमा सर्वभावेषु, तस्माद् भक्तिरसप्रधानमथवा भावप्रधानं महाकाव्यमिदमिति निर्देष्टुं शक्यते । यस्य यादृशी प्रकृतिरभिरुचिर्वा स तादृशरसस्य प्रतिष्ठां कर्तुं प्रभवति । परन्तु सत्स्वेतेषु पक्षेष्वपि पदे पदे श्रृङ्गाररसस्य परिपाकात्, स्वयं कविना श्रृङ्गाररसप्राधान्यविषये सङ्केतितत्वाच्चेदं महाकाव्यं श्रृङ्गारप्रधानं महाकाव्यमिति सहृदयैर्निर्णेतुं शक्यते । यतो हि "समापत्[12] सर्गोऽयं शिशिरकरसंयुक्तश्रृङ्गारसंख्यः" इत्यात्मकं काव्यस्यान्तिमपदमेव श्रृङ्गारपदम् । एतावता स्वयं कविः श्रृङ्गाररसस्याङ्गित्वं स्वीचकारेति तथ्यं स्वयमेव स्पष्टम् । पुनश्च [13]सप्तमाष्टमनवमदशमैकादशद्वादशत्रयोदशचतुर्दशसर्गेषु क्वचन पूर्वरागस्य, कुत्रचित् प्रवासस्य, क्वचनेर्ष्यायाः, क्वचित् करुणविप्रलम्भस्य क्वचिच्चोन्मुक्तस्य सम्भोगश्रृङ्गारस्य परिपाकविशेषात् सर्वेषु रसेषु श्रृङ्गारस्यैव प्राधान्यं सहृदयानां प्रतीतिगोचरं भवति । अतोऽन्ये रसाः सहायाः श्रृङ्गारोऽङ्गी रस इति निष्कृष्यते ।

---

11. (क) "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥", काव्यप्रकाशे, १।२।
(ख) "चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव .... ॥", साहित्यदर्पणे, १।२।
(ग) "......कीर्तिपरमाह्लादगुरुराजदेवताप्रसादाद्यनेकप्रयोजनकस्य
काव्यस्य .... ।", रसगङ्गाधरे, १ आनने ।
12. ह.के., १७६४।
13. हरिकेलिमहाकाव्यस्य सप्तमसर्गे पूर्वरागस्य, अष्टमसर्गे संभोगश्रृङ्गारस्य, नवमसर्गे अभिलाषस्य, दशमसर्गे संभोगस्य, एकादशसर्गे विप्रलम्भस्य द्वादशसर्गे ईर्ष्यायाः संभोगस्य च, त्रयोदशसर्गे करुणविप्रलम्भस्य चतुर्दशसर्गे चोन्मुक्तस्य संभोगश्रृङ्गारस्य परिपाकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५.६. हरिकेलिमहाकाव्यस्य मुख्यः पुरुषार्थः

पारम्पर्यक्रमागतानां महनीयानां संस्कृतमहाकाव्यानां चरमप्रयोजनत्वे लक्षणशास्त्रकारैश्चतुर्वर्गफलप्राप्तिरेव सन्दिष्टा विशेषतः । कस्मिन्नपि काव्ये चतुर्वर्गसंज्ञया ख्याते धर्मार्थकाममोक्षेषु कस्यचनैकतमस्य प्राधान्यं भवति । अस्मिन् महाकाव्ये कृष्णकीर्तनरूपपुण्यजनककर्मणः पदे पदे निरूपणाद् धर्माख्यः पुरुषार्थः कविना प्रकाशितः कामसाधककानामर्थविशेषाणां यत्र तत्र य उल्लेखः सोऽर्थाख्यपुरुषार्थस्य निरुक्तिरूपो नूनम् । स्थले स्थले संसारसिन्धुसन्तरणाय ब्रह्मचिन्तनस्योपदेशात्, ब्रह्मचिन्तकानां शुकसनातनसनन्दनादीनां महिमगानात्, मायाप्राबल्यव्याख्यानात्, कृष्णस्य ब्रह्मरूपेण महिमोदीरणाच्च मोक्षाख्यः पुरुषार्थोऽपि कविना निरूपितः । परन्तेषामपेक्षया श्रृङ्गारमाध्यमेन कामतत्त्वस्य सर्वाङ्गपरिपोषाद् राधाकृष्णयोः[14] वृन्दाकृष्णयोः,[15] दशगोपीनां कृष्णस्य[16] च मिथः सन्तर्पणरूपस्यानुरागस्य पूर्णपरिपाकात् कामाख्यपुरुषार्थस्य प्राधान्यमत्र मन्तव्यम् । सौन्दर्यचित्रणपरः कविः रूपसौन्दर्यनादसौन्दर्याभ्यां परं कामपुरुषार्थस्य पर्यायरूपं कमनीयं कान्तासौन्दर्यमभिव्यज्यैव विश्रान्तो भवति कान्तासौन्दर्यस्य सर्वसौन्दर्यातिशायित्वात् । उक्तञ्च-

"इष्टा ह्येकैकशो ऽप्यर्थाः परं प्रीतिकराः स्मृताः ।
किं पुनः स्त्रीशरीरेऽस्मिन् संघातेन व्यवस्थिताः ॥
संघातो हीन्द्रियार्थानां स्त्रीषु नान्यत्र विद्यते ।" (चरके चिकित्सा अ.२.)

वस्तुतो धर्मार्थौ साधकौ कामः साध्यः । तस्मादत्र कामपुरुषार्थस्यैव प्राधान्यं नेतरेषाम् आनन्दवर्धनाचार्येणाप्युक्तम् -

"श्रृङ्गार एव मधुरः परः प्रह्लादनो रसः ।
यन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ॥" (ध्वन्यालोके, २।७) एतत्कथनं पूर्णतः

कामप्राधान्यपोषकम् । कविनाऽपि स्वमुखेनैवाधोनिर्दिष्टे पद्यविशेषे कामसिद्धेर्निर्दिशेन कामाख्यपुरुषार्थस्य पूर्णा प्रतिष्ठा कृता । तच्च पद्यमीदृशमस्ति-

[17] "यत्रान्यथासिद्धिसमर्थितोऽर्थः
सदैव धर्मोऽपि समीपवृत्तिः ।
निमेषसङ्गात् सह कामसिद्ध्या
करस्थिता कस्य न मुक्तिकन्या ॥"

अस्मिन् पद्येऽर्थाख्यपुरुषार्थस्य समर्थनं जातम्, धर्मस्य समीपवृत्तितैव निरूपिता, मोक्षस्य स्थितिः कामपुरुषार्थस्याधीनतायां निर्दिष्टा, परन्तु कामाख्यपुरुषार्थस्य सिद्धिरेव निरुपिता । अत एव कविदृष्टावपि कामाख्यः पुरुषार्थ एवास्य महाकाव्यस्य मुख्यः पुरुषार्थ इति निष्कर्षः ।

५.७. हरिकेलिमहाकाव्यस्य नेपालस्य सर्वप्रथममहाकाव्यत्वम्

अधुना नेपाले राष्ट्रभाषाया राष्ट्रियभाषाणां संस्कृतभाषायाश्च रचनाधर्मिणां साधनाप्रणीतानि बहुमूल्यानि काव्यानि महाकाव्यानि विविधविद्यान्तर्गतानि ग्रन्थरत्नानि च बाहुल्ये

---

14. ह.के., अष्टमसर्गे ।
15. तत्रैव, दशमसर्गे ।
16. तत्रैव, चतुर्दशसर्गे ।
17. तत्रैव, ३।९।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्योतन्ते । परं मल्लकालात् पूर्वं नेपाले महाकाव्यरचना सञ्जाताऽथवा नेति विषये किमपि प्रमाणं न लभ्यते । १८१४तमे ख्रिष्टाब्दे लब्धजन्मनो नेपालीभाषाया आदिकवेर्भानुभक्ताचार्यादनुमानतः[18] २३५वर्षपूर्व समुत्पन्नेन भक्तपुरमधिवसता वंशमणिना यदा हरिकेलिमहाकाव्यं प्रणीतं तदा संभवतो नेपाले नैपालेन कविना रचितं महाकाव्यं नासीत्, कस्यचनाऽस्तित्वेऽपि तस्य किमपि प्रमाणं सम्प्रति नोपलभ्यते । प्रसिद्धस्य कार्तवीर्योदयमहाकाव्यस्य रचयिता सुकृतिदत्तश्चानुमानतो[19] वंशमणेर्जन्मसमयात् २९५ वर्षानन्तरमुत्पन्नः । अपरो महाकविर्मल्लकालिकः काशीनाथशर्म्मा विद्यते, येन यदुवंशमहाकाव्यं[20] रचितम्, स १६१८ तमे ख्रिष्टाब्दे महाकाव्यं प्रणिनाय । वंशमणिः १६१४ तमे ख्रिष्टाब्दे कविरूपेणोपस्थितः, यतो हि स जगज्ज्योतिर्मल्लस्य समकालिक आसीत् । वंशमणिना कृष्णचरितस्य पूर्वार्द्धो व्याख्यातः । काशीनाथश्च रुक्मिणीपरिणयपर्यन्तां कथां निजे महाकाव्ये प्रस्तुतवान् । वंशमणेः पूर्वार्द्धकथां विलोक्यैवाभिप्रेरितः काशीनाथशर्म्मा श्रीकृष्णस्योत्तरचरितरचनायां प्रवृतो बभूवेति निश्चीयते । एतावता, हरिकेलिमहाकाव्यस्य सर्वप्रथममहाकाव्यत्वं वंशमणेश्च सर्वप्रथममहाकवित्वं प्रमाणितं भवति नेपालपृष्ठभूमौ । अधुनावधि समधिगतं नैपालं संस्कृतवाङ्मयमधिकृत्यैव हरिकेलिमहाकाव्यस्य सर्वप्रथमत्वप्रतिष्ठा कालान्तरे प्राप्तव्येषु पुरातनग्रन्थेषु यदि वंशमणिपूर्वकालिकस्य कस्यचन महाकाव्यस्य सम्प्राप्तिस्तदा तदेव प्रथमं भविष्यति नेदं हरिकेलिमहाकाव्यम् ।

५.८.नेपालस्य संस्कृतमहाकाव्यानि तेषु हरिकेलिमहाकाव्यस्य स्थानञ्च

५.८.१. नेपालस्य संस्कृतमहाकाव्यानि

नेपालेऽद्य यावत् त्रयोदशसंख्यकानि संस्कृतमहाकाव्यानि दृष्टिपथमागतानि सन्ति । तान्यत्र समयक्रमानुसारेण निर्दिश्यन्ते ।

(क) हरिकेलिमहाकाव्यम्[21]

भक्तपुरवास्तव्येन महाकविना वंशमणिना प्रणीतं श्रीकृष्णस्य व्रजलीलानां माथुरलीलानाञ्च प्रकाशकं प्रतिभाभास्वरं सम्प्रति वर्णनविषयीभूतञ्च हरिकेलिमहाकाव्यं सरस्वत्याः शिरोरत्नमिव विभाति ।

(ख) यदुवंशमहाकाव्यम्[22]

महाकविना द्विजेन काशीनाथेन (ई. १७१८) प्रणीतं यदुवंशप्रवर्तनतो रुक्मिणीविवाहपर्यन्तायां कथायामाधारितं महाकाव्यमस्ति ।

---

18. वेणीमाधव ढकालः, अरुणोदय, 'नेपालको प्रथम महाकाव्य र प्रथम महाकवि" वर्ष २५, १-४, २०४६ पौष, पृ. ८१-८६ ।
19. तत्रैव ।
20. रा.अ., साहित्यविषयके सूचीपत्रे ।
21. प्रथमप्रकरणे विलोकनीयम् ।
22. रा.अ., साहित्यविषयके सूचीपत्रे, "कतिपयनैपालसंस्कृतग्रन्थकारपरिचयस्य" १३ पृष्ठे च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(ग) कार्तवीर्योदयमहाकाव्यम्[23]

वागलुङ्गवास्तव्येन सुकृतिदत्तपन्तेन (ई. १८२३-१८७३) निर्मितं माहिष्मतीनायकस्य कार्तवीर्यस्य चरितवर्णनपरं वैदुष्यपूर्णं महाकाव्यमस्ति ।

(घ) चन्द्रसम्भवमहाकाव्यम्[24]

पोखरावास्तव्येन यज्ञदत्तसूरिणा (ई.१९ शतकम्) प्रणीतं चन्द्रसम्भवमहाकाव्यं चन्द्रवंशप्रसूतानां महापुरुषाणां चरितानि प्रस्तौति ।

(ङ) श्रीकृष्णचरितामृतमहाकाव्यम्[25]

काष्ठमण्डपवास्तव्येन श्रीकृष्णप्रसादघिमिरेमहोदयेन (ई. १९१९-१९९३) रचितं ५५ सर्गात्मकं विपुलकलेवरयुतं सभागद्वयं श्रीकृष्णचरितामृतमहाकाव्यं श्रीमद्भागवतस्य दशमस्कन्धस्य पूर्वार्द्धस्य कथां प्रस्तौति ।

(च) नाचिकेतसं महाकाव्यम्

श्रीकृष्णप्रसादघिमिरेमहोदयेन प्रणीतं द्वात्रिंशत्सर्गात्मकं कठोपनिषद्याधारितं दर्शनभूयिष्ठं नाचिकेतसं महाकाव्यमस्ति ।

(छ) ययातिचरितं महाकाव्यम्

श्रीकृष्णप्रसादघिमिरेमहोदयेन प्रणीतं श्रीमद्भागवतादिपुराणनिरूपितस्य ययातिचरितस्य पृष्ठभूमौ कल्पितं ययातिचरितमहाकाव्यं पुराणेषु सीमितं ययातिचरितं काव्यशैल्या नावीन्येन प्रस्तौति।

(ज) गौरीगिरीशं महाकाव्यम्

श्रीकृष्णप्रसादघिमिरेमहोदयेन प्रणीतं नवसर्गात्मकं गीतिप्रधानमिदं गौरीगिरीशमहाकाव्यं शिवपुराणाश्रितं पावनं गौरीगिरीशलीलाविलासं प्रस्तौति ।

(झ) वृत्रवधमहाकाव्यम्

श्रीमद्भागवतस्य वृत्रवधप्रसङ्गमादाय श्रीकृष्णप्रसादघिमिरेमहोदयेन प्रणीतं काव्यगुणानुप्राणितं हृद्यमनवद्यञ्चेदं पञ्चदशसर्गात्मकं महाकाव्यं कवेः परिपक्वां काव्यकलां प्रत्याययति नितराम् ।

(ञ) सत्यहरिश्चन्द्रमहाकाव्यम्[26]

गोर्खाभिजनेन पूर्णप्रसादब्राह्मणेन (ई. १९२१-१९९१) प्रणीतं सत्यनिष्ठस्य सूर्यवंशप्रसूतस्य राज्ञो हरिश्चन्द्रस्य त्यागोज्ज्वलचरितस्य प्रकाशकं प्रेरणादायकं महाकाव्यमस्ति ।

---

23. कतिपयनैपालग्रन्थकारपरिचये, पृ. ३२ ।
24. रा.अ., साहित्यविषयके सूचीपत्रे ।
25. कतिपयनैपालग्रन्थकारपरिचये, पृ. ५५, गौरीगिरीशमहाकाव्यस्य रचनाविवरणे च ।
26. तत्रैव, पृ. ५६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(ट) महेन्द्रोदयमहाकाव्यम्[27]

रामेछापवास्तव्येन भरतराजघिमिरेमन्यलीयेन (जन्म ई. १९२५) प्रणीतं नेपालस्य स्वर्गीयस्य राज्ञो महेन्द्रवीरविक्रमस्य चरिताश्रितं महाकाव्यमस्ति ।

(ठ) नेपालसाम्राज्योदयमहाकाव्यम्[28]

मिथिलावास्तव्येन पशुपतिझानाम्ना (जन्म ई. १९२६) कविना प्रणीतं नेपालस्यैतिहासिकगौरवप्रकाशकं महाकाव्यममस्ति ।

ड) गोरक्षशाहवंशमहाकाव्यम्[29]

हरिप्रसादाचार्येण (जन्म ई. १९३६) प्यूठनाभिजनेन दाङवास्तव्येन प्रणीतं शाहवंशमहिमप्रकाशकं महाकाव्यमस्ति ।

५.८.२ नैपालसंस्कृतमहाकाव्येषु हरिकेलिमहाकाव्यस्य स्थानम्

नेपाले नेपालीयैः संस्कृतमहाकविभिः प्रणीतेषु तेषु त्रयोदशसंख्यकेषु महाकाव्येषु शास्त्रीयगाम्भीर्येण विद्योतितं कार्तवीर्योदयमहाकाव्यं नैषधचरितशैल्यां प्रणीतं नैषधचरितप्रतिस्पर्धि महाकाव्यमस्ति । परन्तत्र काव्यसौन्दर्यपक्षो हरिकेलिनिहितकाव्यसौन्दर्यस्य तुलनायां मन्द इव प्रतिभाति । बृहत्कलेवरं श्रीकृष्णचरितामृतमहाकाव्यं कलेवरानुरूपं काव्यसौन्दर्यं न धत्ते विशेषतस्तत्र भागवतस्यैव विषया भागवतीयां शैलीमाश्रित्य व्याख्याताः । वंशवृत्तप्रकाशकानि पुराणशैल्या प्रणीतानि दर्शनभूयिष्ठानि व्यक्तिविशेषवर्णनपराणि चेतसाणि महाकाव्यानि काव्यकलादृष्ट्या हरिकेलिमहाकाव्यान्न्यूनगुणवन्ति सन्ति । हरिकेलिमहाकाव्यन्तु शास्त्रीयव्युत्पत्तिविधौ कार्तवीर्योदयमहाकाव्यात् किञ्चिदूनमपि काव्यकलायाश्चूडान्तस्पर्शि मधुवर्षि ललितमहाकाव्यमस्ति । शास्त्रव्युत्पत्तिविषये यथा कार्तवीर्योदयमहाकाव्यस्य नास्ति प्रतिमानं तथैव काव्यसौन्दर्याभिव्यञ्जनपक्षे हरिकेलिमहाकाव्यस्य प्रतिमा न विद्यते । अतो नैपालेषु संस्कृतमहाकाव्येषु काव्यकलादृष्ट्या हरिकेलिमहाकाव्यं सर्वोत्तमं महाकाव्यमिति निष्कर्षोऽवगन्तव्यः ।

☆

27. तत्रैव, पृ. ५८ ।
28. तत्रैव, पृ. ५८ ।
29. तत्रैव, पृ. ५९ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६. प्रभावसमीक्षा

कविर्यस्मिन् परिवेशे वर्धते जीवनञ्च यापयति तस्य परिवेशस्य सहजप्रभावस्तस्मिन् स्वाभाविकः । यान् ग्रन्थानधीते तेषामपि तस्य चिन्तनसरणौ दूरगामी प्रभावो भवति । यदा स रचनाधर्मितामङ्गीकुरुते तदा तेनाधीता मानसपटले संस्कारबद्धाश्च विषयाः तद्रचनासु प्रत्यक्षाप्रत्यक्षतया प्रतिबिम्बिता भवन्ति । हरिकेलिमहाकाव्यं पौराणिकचरितमवलम्ब्य निर्मिता रचना वर्तते । तत्र पुराणानां विषयसाम्यं स्वतः सिद्धमेव, परन्तु क्वचन शैलीसाम्यं शब्दसाम्यमपि दृष्टिपथमायाति तत्सर्वं साम्यजातं प्रभावव्यञ्जकमेव भवति । विषयान्तरमादाय पुरा निर्मितानां विदग्धकाव्यानामपि नूत्ने काव्यविशेषे शब्दसाम्यभावसाम्यरूपो विशेषः प्रभावोऽनुभूयते । क्वचन विश्वव्यापिनश्चिन्तनस्य साम्यमपि दृष्टिपथमायाति तच्च काव्यविशेषस्य प्रभावं विनापि नूत्नेषु काव्येषु प्रभावमिव द्योतयति । तत्तु संयोगमात्रमेव । इह हरिकेलिमहाकाव्ये तेषामार्षकाव्यानां विदग्धकाव्यानाञ्च वास्तविकप्रभावस्य विषये किमपि विमृश्यते ।

६.१. आर्षकाव्यानां प्रभावः

क) श्रीमद्भागवतस्य प्रभावः

एकदा यशोदा कृष्णसखिभिः कृष्णस्य मृद्भक्षणवृत्तमाकर्ण्य समीपे वर्तमानं बालकृष्णं तर्जयति सरोषम् । भयभीतो बालकृष्णो जननीं निवेदयति – "मातर्नाहं मृत्तिकां भक्षितवान् । इमे सखायस्तु मिथ्याभिशंसिनो यदि मयि तव न विश्वासस्तर्हि मन्मुखं विलोकयेति ।" ततः स तस्याः समक्षे मुखं व्यादत्ते । तदा सा कृष्णमुखाभ्यन्तरे ब्रह्माण्डमेव विलोकितवतीति वृत्तं श्रीमद्भागवतेऽनेन प्रकारेण निरूपितमस्ति यथा-

"नाहं भक्षितवानम्ब[1] । सर्वे मिथ्याभिशंसिनः ।
यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखम् ॥
सा तत्र ददृशे विश्वं जगत् स्थास्नु च खं दिशः ।
साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नीन्दुतारकम् ॥"

हरिकेलिमहाकाव्येऽयमेव प्रसङ्गश्चेत्थं प्रकाशितः-

"सर्वेऽप्यमी[2] देवि । मृषाभिधानाः जानासि तन्मे मुखमीक्षमाणा ।
विलोकिते वस्तुनि यत् पुरस्थे न पृच्छ्यते तुच्छधियापि साक्षी ॥
तदा समालोकत नन्दजाया मायाकिशोरस्य महेश्वरस्य ।
व्यादीयमाने वदनारविन्दे कुक्षौ निविष्टानि चराचराणि ॥
महीमहीनद्रुमशैलसारां वारां निधीनिद्धबृहत्तरङ्गान् ।
द्वीपानुपद्वीपपुरःसराणि विलोक्य विश्वानि विसिस्मिये सा ॥"

वस्तुसाम्ये भावसाम्ये च स्वतः सिद्धे सत्यपि प्रतिपादनशैल्यपि दृष्टान्तद्वयस्य समानी । तस्मिन्नेव सन्दर्भे ब्रह्माण्डदर्शनविस्मिताया यशोदाया मानसास्तरङ्गा भागवतेऽनेन प्रकारेण निरूपिताः-

"किं स्वप्न एतदुत देवमाया[3], किम्वा मदीयो वत बुद्धिदोषः ।
अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पतिक आत्मयोगः ॥"

---

1. श्रीमद्भागवते, १०।८।३५,३७
2. ह.के., ३।३८-४०
3. श्रीमद्भागवते, १०।८।४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एष एव विषयो हरिकेलिमहाकाव्ये कविनेत्थं वर्णित: -

"अचिन्तयत् सा[4] पुनरेतदेव देवस्य मायैव उत स्वमोह: ।
शिशोरमुष्यैव हि किन्तु वाऽसौ लोकातिपाती महिमातिमान: ॥"

शैलीभावशब्दसाम्यैरनुप्राणितं दृष्टान्तद्वयमतो भागवतस्य प्रत्यक्ष: प्रभावोऽस्मिन् महाकाव्ये इति विषये नास्ति कश्चन सन्देह: । गोपीनां कात्यायनीपूजाप्रसङ्ग: श्रीमद्भागवते भगवता व्यासदेवेनेत्थं निरूपित: -

"हेमन्ते[5] प्रथमे मासि नन्दव्रजकुमारिका: ।
चेरुर्हविष्यं भुञ्जाना: कात्यायन्यर्चनव्रतम् ॥
आप्लुत्याम्भसि कालिन्द्या जलान्ते चोदितेऽरुणे ।
कृत्वा प्रतिकृतिं देवीमानर्चुर्नृप सैकतीम् ॥
गन्धैर्माल्यै: सुरभिभिर्बलिभिर्धूपदीपकै: ।
उच्चावचैश्चोपहारै: प्रवालफलतण्डुलै: ॥
कात्यायनि महामाये महायोगिन्यधीश्वरि ।
नन्दगोपसुतं देवि पतिं नो कुरु ते नम: ॥
इति मन्त्रं जपन्त्यस्ता: पूजां चक्रु: कुमारिका: ।"

हरिकेलिमहाकाव्ये स एव विषयश्चेत्थं प्रकाशित: ।

"अथ चक्रुरत्र समये गिरिजायजनव्रतं व्रजसरोजदृश:[6] ।
कमलापतिं मनसिकृत्य पतिं प्रथमानभासि प्रथमे वयसि ॥
कुसुमं सुगन्धि विमलं कमलं विनिवेद्य खाद्यमपि हृद्यतमम् ।
असभाजयन् मृगकिशोरदृशो नगनन्दिनीं प्रणतिभिस्तुतिभि: ॥
अयि देहि मम नन्दसुतं पतिमित्युदीतपुलकोत्कलिका: ।
मिलिता: प्रदक्षिणपरिक्रमणे बहु वव्रिरे वरमरालदृश: ॥"

शब्दपार्थक्ये सत्यपि भावशैल्यो: प्रतीयमानं सादृश्यमत्र भागवतप्रभावव्यञ्जकमेव नूनम् ।

(ख) <u>ब्रह्मवैवर्तपुराणस्य प्रभाव:</u>

ब्रह्मवैवर्तमहापुराणस्य पूर्वार्द्धे निरूपितस्य राधाकृष्णयो: सम्भोगश्रृङ्गारस्य प्रत्यक्ष: प्रभावो हरिकेलिमहाकाव्यस्याष्टमे दशमे द्वादशे चतुर्दशे च सर्गे द्रष्टुं शक्यते । यादृशो रतिराज उन्मुक्तरुपेण ब्रह्मवैवर्ते निरूपितो न तादृशोऽन्येषु पुराणेषु । दिग्दर्शनार्थमत्र पद्यद्वयमुदाह्रियते । यथा श्रीकृष्णो राधां समाकृष्य शय्यायां च नीत्वा कवरीबन्धवासोमुक्तां कारयति तदेवात्र निरूपितम्-

"पुनस्तां च समाकृष्य[7] शय्यायां च निवेश्य ह ।
चकार रहितां राधां कवरीबन्धवाससा ॥"

एतादृशमेव वस्तु हरिकेलौ निरूपितं यथा-

"तां विधृत्य स करे[8] कमनीये सन्निनाय शनकै: शयनीये ।
नागरी निधुवने किल पत्यु: प्राक्करग्रहमपेक्षत एव ॥"

---

4. ह.के., ३।४१।
5. श्रीमद्भागवते, १०।२२।१-४।
6. ह.के., ९।१६-१८।
7. ब्रह्मवैवर्ते, पूर्वार्द्धे, १५।१५५।
8. ह.के., ८।२४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri
दृष्टान्तद्वयमिदं समानव्यवहारद्योतकं नूनम् । ब्रह्मवैवर्ते श्रृङ्गारसमरस्य चित्रणे किङ्किणीकङ्कण ध्वनिमाधुर्यमित्थं निरूपितम्-

"कङ्कणानां[9] किङ्किणीनां मञ्जीराणां मनोहरः ।
बभूव शब्दस्तत्रैव श्रृङ्गारसमरोद्भवः ॥"

स एव वृतान्तो हरिकेलावित्थं कविना प्रस्तुतः । यथा-

"ह्रीधनानि[10] हरति प्रियपाणौ नीविसन्धिमवदाय मृगाक्ष्याः ।
मेखला सहचरी विचकम्पे संरुरोद बहु नूपुरयामी ॥"

शैल्यन्तरे सत्यपि विषयवस्तु नितान्तमेव समानं दृष्टान्तद्वये । अतो हरिकेलिमहाकाव्ये ब्रह्मवैवर्त प्रभावः सहृदयगम्यो निश्चप्रचम् ।

(ग) गर्गसंहितायाः प्रभावः

समाधुर्यं सविस्तरञ्च कृष्णचरितप्रस्तुतौ गर्गसंहिताया उपमा नास्ति कृष्णसाहित्यसंसारे । तत्र हरिकेलिमहाकाव्ये आंशिकः प्रभावविशेषो मानसपटलं स्पृशति । श्रीरामस्त्रेतायां सीतानिर्वासनानन्तरं सुवर्णमयीः सीताप्रतिकृतीर्निर्माय विधिपूर्वकं यज्ञानुष्ठानं चकार, ताश्चानेकाः सौवर्ण्यः सीताप्रतिकृतयः द्वापरे गोपीरूपेणावतीर्य श्रीकृष्णं सेवितवत्य इति गर्गसंहितायामित्थं विशदीकृतमस्ति-

"सीतां तत्याज[11] राजेन्द्रो वने लोकापवादतः ।
अहो सतामपि भुवि भवनं भूरिदुःखदम् ॥
यदा यदाऽकरोद् यज्ञं रामो राजीवलोचनः ।
तदा तदा स्वर्णमयीं सीतां कृत्वा विधानतः ॥
यज्ञसीतासमूहोऽभून्मन्दिरे राघवस्य च ।
ताश्चैतन्यघना भूत्वा रन्तुं रामं समागताः ॥
ता आह राघवेन्द्रेशो नाहं गृह्णामि हे प्रियाः ।
तदोचुस्ताः प्रेमपरा रामं दशरथात्मजम् ॥
कथं चास्मान् न गृह्णासि भजन्तीर्मैथिलीः सतीः ।
अर्धाङ्गीर्यज्ञकालेषु सततं कार्यसाधिनीः ॥
धर्मिष्ठस्त्वं श्रुतिधरोऽधर्मवद् भाषसे कथम् ।
करं गृहीत्वा त्यजसि ततः तापमवाप्स्यसि ॥
श्रीराम उवाच-
समीचीनं वचः सत्यो युष्माभिर्गदितं च मे ।
एकपत्नीव्रतोऽहं हि राजर्षिः सीतयैकया ॥
तस्माद् यूयं द्वापरान्ते पुण्ये वृन्दावने वने ।
भविष्यथ करिष्यामि युष्माकन्तु मनोरथम् ॥
श्रीभगवानुवाच-
ता व्रजेऽपि भविष्यन्ति यज्ञसीताश्च गोपिकाः ।
अन्यासाञ्चैव गोपीनां लक्षणं श्रृणु तद्विधे ॥"

---

9. ब्रह्मवैवर्ते, पूर्वार्द्धे, १५।१५४।
10. ह.के., ८।३१।
11. गर्गसंहितायां गोलोकखण्डे, ४।६०-६८।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गर्गसंहितायां निरूपितमिदं कथावस्तु हरिकेलिमहाकाव्यस्य दशमसर्गे काव्यशैल्यां बीजरुपेण प्रकाशितम् । यथा-

"पुरा[12] मुरारिः किमु रामदेवदेहे विदेहेन्द्रसुतावियोगैः ।
खिन्नो विनोदाय पुनः स एव जातोऽधुना वृष्णिषु कृष्णदेवः ॥
सुवर्णसीताः परिहृत्य सीतां यास्तेन क्लृप्ताः सवनेषु सख्यः ।
तन्न्यस्तजीवा इव गोपकन्यास्ता एव जाता नरलोकधन्याः ॥
अन्येऽपि ये केचन गोपदाराः कृतावतारा भुवि देव्य एव ।
ताभिर्विहाराय मनो दधार विचित्रचारित्रमयो मुकुन्दः ॥"

उपरि निर्दिष्टस्य सन्दर्भद्वयस्य कथावस्तुसाम्यं सर्वसंवेद्यमेव नूनम् ।

६.२. विदग्धमहाकाव्यानां प्रभावः

(क) कुमारसंभवमहाकाव्यस्य प्रभावः

कालिदासकोमलकल्पनाकमनीयं कुमारसम्भवमहाकाव्यं ललितकाव्येषूत्तमं महाकाव्यमिति तद्विदो विदन्ति । तत्र पर्वतराजपुत्र्याः पार्वत्याः शैशवसौन्दर्यसमुज्जृम्भणविधौ कालिदासस्येयं निरुक्तिर्नितरां मनोहारिणी-

"दिने दिने सा [13] परिवर्धमाना लब्धोदया चान्द्रमसी कलेव ।
पुपोष लावण्यमयान् विशेषान् ज्योत्स्नान्तराणीव कलान्तराणि ॥

महाकविर्वंशमणिश्च नन्दनन्दनस्य कृष्णस्य शैशवसौन्दर्यमित्थं प्रकाशयामास-

[14]"गोरोचनाचन्दनपङ्कलेखा भाले रराज व्रजराजसूनोः ।
चन्द्राधिके चारुणि वक्त्रबिम्बे सम्वर्धिता सप्तदशी कलेव ॥"

शैलीसाम्यं सहजतयैवावगम्यते निरूपितयोः सन्दर्भयोः । कलान्तराविर्भावदृष्ट्या विवेचिते शब्दार्थसाम्यमपि स्पष्टमेव । कुमारसम्भवमहाकाव्ये पार्वत्याः शैशवकालिकं पावनं सौन्दर्यमनुभूय पितुर्हिमालयस्य दृष्टिरतृप्तेव बभूवेति तथ्यं हृदयस्पर्शितया निरूपितं यथा-

"महीभृतः[15] पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसङ्गा ॥"

हरिकेलौ च निर्निमेषाभ्यां नयनाभ्यां बालमुकुन्दमुखमाधुर्यं साक्षात्कुर्वतोर्यशोदा- नन्दयोर्हृदयाभ्यामजस्रतया प्रवाहिता प्रीतिर्नैव कदाचन विरता जातेति वस्तु समाधुर्यमुपस्थापितं यथा-

"सम्पश्यतोरस्य[16] मुखेन्दुबिम्बमसम्बरेणाक्षिसरोरुहेण ।
प्रीतेव तस्मिन्नतिगाढलग्ना प्रीतिर्नपित्रोर्विरराम चित्तात् ॥"

उक्तसन्दर्भयोः स्पष्टमनुभूयमानानि शैलीशब्दार्थसाम्यानि कविकृतायाः कालिदासकलानुकृतेर्व्यञ्जकानि नूनम् । गौरीशङ्करयोः प्रथमे रतिरागावसरे गौर्याः किशोरीसुलभान् चेष्टाविशेषान् शब्दैश्चित्रयता कालिदासेनेत्थं समुदीरितम्-

---

12 ह.के., १०।१-३।

13. कुमारसंभवमहाकाव्ये, १।२५।

14. ह.के., ३।२५।

15. कु.सं., १।२७

16. ह.के., ३।२६।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"व्याहृता[17] प्रतिवचो न सन्दधे गन्तुमैच्छदवलम्बितांशुका ।
सेवते स्म शयनं पराङ्मुखी सा तथापि रतये पिनाकिनः ॥"

वंशमणिश्च हरिकेलौ राधाकृष्णयोः प्रथमे समागमे किशोर्या राधायास्तास्ताश्चेष्टा इत्थं निरूपयामास ।

"सम्मुखे[18] विमुखतामुपजाताऽ नुत्तरा किमपि पृच्छति कान्ते ।
मुष्टिरुद्धवसनापि बभूव प्रीतये नववधूरिव तस्य ॥"

केवलमत्र शब्दभेदो वर्तते, समानी शैली समानश्च भावोऽनुभूतिगम्यौ, समान्येव विलसति का विच्छित्तिजनकता निरूपितयोरुभयोः सन्दर्भयोः । कुमारसम्भवमहाकाव्ये कुमारस्य शिशुसुलभां चे निरूपयता महाकविना स्वभावोक्तिमवलम्ब्य कुमारो मूर्तिमानिव विहितः । यथा-

[19]"क्वचित् स्खलद्भिः क्वचिदस्खलद्भिः क्वचित् प्रकम्पैः क्वचिदप्रकम्पैः ।
बालः स लीलाचलनप्रयोगैः तयोर्मुदं वर्धयति स्म पित्रोः ॥
गृह्णन् विषाणे हरवाहनस्य स्पृशन्नुमाकेसरिणं सलीलम् ।
स भृङ्गिणः सूक्ष्मतरं शिखाग्रं कर्षन् बभूव प्रमदाय पित्रोः ॥"

तत्सामान्येन वंशमणिर्हरिकेलौ कृष्णकिशोरस्य लीलाचलनादिरूपां शैशवचेष्टामित्थं निरूपयामास-

"व्रजन् प्रगृह्य[20] व्रजसुन्दरीणां कराङ्गुलीमङ्गुलिभिः कुमारः ।
पदे पदे च स्खलितं दधानः ततान पित्रोर्मुदमत्युदाराम् ॥
सकिङ्किणीकङ्कणकर्णभूषाकपोलमूलास्खलितालकश्रीः ।
गोवत्सपुच्छं बलतो विकर्षन् व्रजाङ्गणेऽरिङ्गदनङ्गरूपः ॥"

सन्दर्भद्वयमिदं नितान्तमेवाकर्षकं हृद्यमनवद्यं शैलीसाम्यभावसाम्यानुप्राणितं क्वचन शब्दसाम्ययुक्त ललितकविर्वंशमणिः कुमारसम्भवेन नितान्तं प्रभावितोऽपि निजप्रतिभयाऽऽह्लादकं नावीन्यमुपस्था विलक्षणमेतन्महाकाव्यं ससर्ज । कुमारसम्भवहरिकेलिमहाकाव्ययोरनेके प्रसङ्गाः सादृश्यभाजः सन्ति स्थालीपुलाकन्यायेन दिग्दर्शनार्थमेवेयं प्रस्तुतिर्विहिता ।

(ख) <u>रघुवंशमहाकाव्यस्य प्रभावः</u>

महाकाव्यपञ्चके निहिते पारम्पर्यक्रमागतेषु महाकाव्येषु सर्वाधिकसमादृते रघुवंशमहा हरिकेलौ च क्वचन भावसाम्यं प्रतीतिगोचरं भवति । दिग्दर्शनाय भावसाम्यस्यैकमुदाहरणं निरूप्य रघुवंशमहाकाव्यस्यारम्भे कालिदासो रघुवंशस्योदात्तां छविं निजामल्पज्ञताञ्च ख्याप तयोराकाशपातालवन्महदन्तरं प्रकाशयामास यथा-

[21]"क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।"

वंशमणिरपि तत्तुल्यतया निजां शिशुप्रकृतिं श्रीकृष्णचरितस्य च गुर्वीमभिख्यां ख्यापयन्नाह -

[22]"अयं मम समारम्भो गोविन्दगुणकीर्तने ।
मेरुहेमसमाहारं शिशोरनुकरोति हि ॥"

---

17. कु.सं., ८।२।
18. ह.के., ८।२९।
19. कु.सं., ११।४२, ४४।
20. ह.के., ३।२८, ३१।
21. <u>रघुवंशमहाकाव्ये</u>, १।२।
22. ह.के., १।२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालिदास उडुपेन सागरतरणमिव दुष्करं रघुवंशमहिमगानमित्यभिधाय स्वकार्यं मोहप्रेरितमिति निरूपितवान्, वंशमणिश्च कृष्णमहिमगानं बालकस्य मेरुपर्वताद् हेमाहरणमिव दुष्करं मत्वा प्रवर्तितो बभूव । शैलीभावसाम्यानुप्राणितं सन्दर्भद्वयम् । रघुवंशमहाकाव्ये राज्ञोऽग्निवर्णस्य प्रियाभीरमणं चारु निरूपितम् । तस्यान्यतमः प्रकारो यथा -

[22.1]"चुम्बने विपरिवर्तिताधरं हस्तरोधि रशनाविघट्टने ।
विघ्नितेच्छमपि तस्य सर्वतो मन्मथेन्धनमभूद् वधूरतम् ॥

हरिकेलिमहाकाव्येऽपि तत्सादृश्येन राधाकृष्णयोर्लीलाविहारः कविना वचसां विषयीकृतः । यथा-

[22.2]भाषिता न यदभाषत बाला सम्ववार वसनं विहृतौ यत् ।
वल्लभस्य तदभूदतिमानं द्रागनङ्गदहनेन्धनदानम् ॥

महाकविर्वंशमणि यत्र तत्र कालिदासकलामाहरन्नपि निजया प्रतिभाविच्छित्त्याऽमन्दमानन्दसंदोहं वितनुते नूनम् ॥

(ग) <u>किरातार्जुनीयमहाकाव्यस्य प्रभावः</u>

बृहत्त्रयीवर्गे, समादृते भारविणा साहित्यशास्त्रीयमर्यादामवलम्ब्य प्रणीते किरातार्जुनीयमहाकाव्ये वनविहार- जलविहार- सूर्योदय- चन्द्रोदय- वसन्तादिनिरूपण- युद्धवर्णनप्रभृतयो विषयाः समाहिताः सन्ति । चित्रकाव्यस्य प्रयोगोऽत्रैव सर्वप्रथमं विदग्धतामुपपन्नः । हरिकेलौ वंशमणिनापि ते सर्व एव विषया यथावसरं निरूपिताः चित्रकाव्यस्य प्रयोगश्च व्यधायि । उभे एव महाकाव्ये पौराणिककथावस्तुभ्यां समलङ्कृते । वर्ण्येतिवृत्तस्य पार्थक्येऽपि वर्णनशैली तयोरुभयोः समानी । अतो वंशमणिर्भारवेः किरातार्जुनीयं समयगनुशील्यैव हरिकेलिप्रणयने प्रवृत्त इत्यनुमातुं शक्यते । शैलीसाम्यभावसाम्यानुप्राणितानि कानिचन पद्यानि दिग्दर्शनार्थमुदाह्रियन्ते । किरातार्जुनीयमहाकाव्ये पाण्डवानां समक्षे समागतस्य पिशङ्गीर्जटा बिभ्रतो भगवतो व्यासस्य स्वरूपं कविनेत्थं प्रकाशितम्-

"ततः[23] शरच्चन्द्रकराभिरामैरुत्सर्पिभिः प्रांशुमिवांशुजालैः ।
बिभ्राणमानीलरुचं पिशङ्गीर्जटास्तडित्वन्तमिवाम्बुवाहम् ॥"

हरिकेलिमहाकाव्ये वंशमणिः कंसराजभवने सहसा सम्प्राप्तं देवर्षिं नारदं निरूपयन्नित्थं जगाद-

"बहुपुण्यजलोक्षिताः[24] क्षितावुदिता प्राप्य महत्तपोवनम् ।
फलपाकपिशङ्गदीधितीर्दधदुच्चैर्विकटा जटालताः ॥"

जटावर्णनमिदं निरूपितयोः पद्ययोः शैलीशब्दभावैः समानमस्ति । किराते व्यासदर्शनलाभेन कृतकृत्यो युधिष्ठिरो निजमहोभागित्वमित्थं वर्णितवान् -

[25]"अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः सम्प्रति भूमिदेवाः ।
आसंसृतेरस्मि जगत्सु जातस्त्वय्यागते यद् बहुमानपात्रम् ॥"

हरिकेलौ भोजराजः कंसो नारददर्शनजनितां निजां धराधुरीणतां ख्यापयन्नित्थं निजगाद-

[26]"विमलं कुलमक्षि सत्फलं जननं जातमपेतपातकम् ।
अमुना भवदीक्षणेन मे ध्रुवमाधायि धराधुरीणता ॥"

22.1. <u>रघुवंशमहाकाव्ये</u>, १९।२७
22.2. <u>हरिकेलिमहाकाव्ये</u> ८।२५।
23. <u>किरातार्जुनीयमहाकाव्ये</u>, ३।१।
24. ह.के., १५।५।
25. कि.म., ३।६।
26. ह.के., १५।३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपरि निर्दिष्टयोरुभयोरेव पद्ययोर्विषयवस्तुनी समाने, प्रस्तुतिशैली समानी, पद्याधीत्युत्तरकालं जायमानो बोधश्च समानः । किरातकाव्ये व्यासदर्शनजन्यानि फलानि विवृण्वता युधिष्ठिरेणेत्थं समुदीरितम् -

27"श्रियं विकर्षत्यपहन्त्यघानि श्रेयः परिस्नौति तनोति कीर्तिम् ।
संदर्शनं लोकगुरोरमोघं तवात्मयोनेरिव किं न धत्ते ॥"

हरिकेलौ च कंसो नारददर्शनजन्यफलानीत्थं निरूपयति -

28"द्वयमेतदघापहं नृणां द्रुपदा वारि तवांघ्रिजं रजः ।
शिरसोऽपगृहीतमादिमं चरमं सङ्गतमात्रमङ्गणे ॥"

अघविनाशित्वरूपफलवर्णनमुभयत्र समानम् । किराते कविनान्धकारव्याप्तिर्नितरां हृद्यया शैल्या निरूपिता । सा च यथा -

29"रञ्जिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु ।
पूरिता नु विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण ॥"

हरिकेलिमहाकाव्ये स एवान्धकारव्यापनविषय इत्थं प्रकाशितः -

30"नयनमिह तदेव ग्राहकास्तेऽपि लोके
तदपि हि विषयाणामास नैवावभासः ।
गतवति दिननाथे तेन साकं गतं वा
मुषितमिव जगद्वा कालपाटच्चरेण ।"

प्रतिभाप्रकर्षोद्दीप्तयोरुभयोरेव कविपुङ्गवयोः समाने विषये शैलीभेदेन समानभावाविष्करणं स्वस्ववैशिष्ट्यव्यञ्जकमेव नूनम् । उपरि निरूपितैरुदाहरणैः किरातार्जुनीयस्य हरिकेलिमहाकाव्ये प्रतिभानावीन्यविलक्षणः कश्चन प्रभावः स्पष्टं प्रतीतिगोचरः ।

(घ) <u>शिशुपालवधमहाकाव्यस्य प्रभावः</u>

बृहत्त्रयीवर्गान्तर्गतं शास्त्रकाव्यगुणैरोतप्रोतं माघकाव्यमथवा शिशुपालवधमहाकाव्यं व्युत्पत्तिविशेषाज्जगति नितरां समादरणीयमस्ति । किरातार्जुनीयमहाकाव्यस्य प्रतिस्पर्धायां प्रणीतमिदं महाकाव्यं किरातवर्णितविषयैरन्वितमपि व्युत्पत्त्या किरातकाव्यमतिशेते । हरिकेलौ शिशुपालमहाकाव्यप्रभावसूचकानि कानिचन पद्यानि दिग्दर्शनहेतुभूतानीह विमृश्यन्ते । माघकाव्ये महतीं रणयतो नारदस्य द्वारकागमनं निम्ननिर्दिष्टे पद्ये कविना कल्पनातूलिकयेत्थं चित्रितम् -

31"रणद्भिराघट्टनया नभस्वतः पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः ।
स्फुटीभवद्ग्रामविशेषमूर्च्छनामवेक्षमाणं महतीं मुहुर्मुहुः ॥"

हरिकेलौ च महतीं प्रवादयतः कंसराजभवनं प्राप्तवतो नारदस्य स्वरूपं कविनेत्थं विशदीकृतम् -

32"मृदुमूर्च्छनया मुहुर्मुहुर्महतीमप्रहतिं प्रवादयन् ।
जनरञ्जनकृत्यकैतवं कलिबीजं स्वरमुद्गिरन्निव ॥"

---

27. कि.म., ३।७
28. ह.के., १५।१२।
29. कि.म., ९।१५।
30. ह.के., १४।१७
31. <u>शिशुपालवधमहाकाव्ये</u>, १।१०।
32. ह.के., १५।६।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र नारदागमनरुपं वृत्तं समानं प्रतिपादनशैली समानी यत्र तत्र शब्दाः समानाः केवलं वर्णनतारतम्यगतमन्तरमेवानुभूयते । तेजोमण्डलावृतस्य नारदस्य माघमहाकाव्येऽनेन प्रकारेण निरूपणं जातम् -

[33]"स तप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः ।
विदिद्युते वाडवजातवेदसः शिखाभिराश्लिष्ट इवाम्भसां निधिः ॥"

हरिकेलौ च ज्योतिर्मयस्य नारदस्वरूपस्य निरूपणमित्थं सञ्जातम् -

[34]"गुरुगैरिकरागरोचिषा परिवीतस्तरुवल्कवाससा ।
परिरब्ध इव स्वशुद्धये ज्वलनेनापि हि सर्वभक्षिणा ॥"

दृष्टान्तभेदेऽपि समानी शैली समानश्च भावोऽनुभूयते सन्दर्भद्वयस्य । माघकाव्ये श्रीकृष्णेन विहिता नारसपर्या कविनेत्थं चित्रिता -

[35]"तमर्घ्यमर्घ्यादिकमादिपूरुषः सपर्यया साधु स पर्यपूपुजत् ।
गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः ॥"

हरिकेलौ च कंसेन कृतां नारदसपर्यां कविरित्थं निरूपयामास -

[36]"अथ भोजपतिस्तमागतं मुनिमानर्च यथोचितार्हणैः ।
द्विषतामपि सङ्गमे सतां महतामप्रहता हि सत्क्रिया ॥"

उभयोः सन्दर्भयोर्वस्तुविश्लेषणे सपर्याप्रकारः समानरूपेणोपात्तः प्रतीयते, परं पूजकपात्रानुकूल्येन कविद्वयेन दृष्टान्ते भिन्नता कल्पिता । माघमहाकाव्ये प्रणयव्यापारचित्रणविधौ मेखलावलयादीनां शिञ्जनमित्थं निरूपितम् -

[37]"अम्बरं निनयतः प्रियपाणेर्योषितश्च करयोः कलहस्य ।
वारणामिव विधातुमभीक्ष्णं कक्षया च वलयैश्च शिशिञ्जे ॥"

अनयैव रीत्या हरिकेलौ राधाकृष्णयोः प्रणयव्यापारे मेलखानूपुरयोः शिञ्जनं निरूपितमस्ति । तच्च यथा -

[38]"ह्रीधनानि हरतः प्रियपाणौ नीविसन्धिमवदाय मृगाक्ष्याः ।
मेखला सहचरी विचकम्पे संरुरोद बहु नूपुरयामी ॥"

भणितिभङ्गीभेदः केवलमुभयोः सन्दर्भयोः । शब्दसाम्यं भावसाम्यं च स्पष्टम् । इत्थमनेकानि हरिकेलिगतानि पद्यानि शिशुपालप्रभावव्यञ्जकानि सन्ति । परं शिशुपालप्रभावेऽभिव्यक्तेऽपि हरिकेलिमहाकाव्यस्य प्रतिभासंस्कृता विषयप्रतिपादनपरिपाटी नितरां हृद्या ।

(ङ) नैषधचरितमहाकाव्यस्य प्रभावः

कालिदासात् प्रवर्तिता विदग्धकाव्यपरम्परा नैषधचरितस्य प्रणेतारं श्रीहर्षमाप्य विकासस्य चरमां चूडामेव लब्धवतीति भूयसां विदुषामवधारणा वर्तते । नैषधे वैदुष्येण सह कलाया व्युत्पत्तिरपि पूर्णतामाप । दार्शनिकैः साहित्यिकैश्च भृशमभिनन्दितस्य नैषधचरितमहाकाव्यस्य हरिकेलिमहाकाव्ये कश्चन प्रभावोऽनुभूयत एव । श्रीहर्षेण नैषधचरितस्यारम्भे यस्य नलस्य कथा स्मृतापि कल्मषविध्वंसिनी, सा नूनमाविलामपि मद्वाणीं पावयिष्यतीति निरूप्य नायके नले समादरोऽभिव्यक्तः । स चेत्थंरूपः -

---

33. शि.म., १।२०।
34. ह.के., १५।४।
35. शि.म., १।१५।
36. ह.के., १५।९।
37. शि.म., १०।६२।
38. ह.के., ८।३१।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[39]"पवित्रमत्रातनुते जगद् युगे स्मृता रसक्षालनयैव यत्कथा ।
कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति ॥"

हरिकेलौ च तेनैवरूपेण कविर्वंशमणिर्यस्य पादाङ्गुष्ठान्निर्गता भगवती भागीरथी निरतिशयं पापप्रणाशिनीति धिया भगवता देवाधिदेवेन शङ्करेण स्वशिरसि धृता, तादृशो मङ्गलमयः सर्वपावनो भगवान् हरिः कीर्तिते सति पापपुञ्जसंहारक एव भविष्यति नूनमिति भावमाविश्चकार । स च यथा-

[40]"यस्य पादजलं गङ्गाऽनङ्गारेर्मौलिमण्डनम् ।
कीर्तितः स कथं न स्यादंहःसंघहरो हरिः ॥"

अत्र शैलीसाम्यं भावसाम्यञ्च स्पष्टमेव प्रतीतिगोचरम् । श्रीहर्षो नैषधचरितस्य सर्गान्तपुष्पिकापद्येषु मातापित्रोः, स्वस्य, स्वानुष्ठिताया मन्त्रसाधनायाः, स्वप्रणीतस्य काव्यस्य, संबद्धसर्गाश्रितविषयवस्तुनश्च सूत्रात्मकं परिचयं निरूपयामास । यथा-

[41]"श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतम्
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः ॥"

प्राय इमामेव सरणिमनुसरता वंशमणिनाऽपि सर्गान्तपुष्पिकापद्येषु मातापित्रोः, स्वस्य, स्वनिर्मितकाव्यस्य, सर्गाश्रितकथावृत्तस्य च सूत्रात्मकमपि गुरुत्वपूर्णं निरूपणमकारि । तच्च यथा-

[42]पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽतिभव्येऽ-
भवत्पूर्णः पूर्णो हरिजनिगुणैरादिमः सर्ग एषः ॥"

वंशमणेरस्मिन् प्रयोगे श्रीहर्षस्य प्रत्यक्षः प्रभावो नूनम् । यतो हि विहाय श्रीहर्षं नान्येन केनापि महाकविना सर्गान्तपुष्पिकापद्येषु परिचयमूल ईदृशः प्रयोगो व्यधायि । नैषधचरिते हंसो नलस्य गुणगणोदीरणावसरे दमयन्तीं प्रति कथयति "भैमि ! तव लोचनासेचनकस्तु नलमुखेन्दुरेवेति" । तदेवात्र निरूप्यते-

[43]"एकः सुधांशुर्न कथञ्चन स्यात् तृप्तिक्षमस्त्वन्नयनद्वयस्य ।
त्वल्लोचनासेचनकस्तवास्तु नलास्यशीतद्युतिरद्वितीयः ॥"

हरिकेलौ च नवः कलावानिव वर्धमानः श्रीकृष्णो रमणीनां विलोचनासेचनको बभूवेति निरुक्तिर्विलसति । यथा -

[44]"दिने दिनेऽसौ वपुषा त्विषा च नवः कलावानिव वर्धमानः ।
रामानुजन्मा रमणीजनानां विलोचनासेचनको बभूव ॥"

विलोचनासेचनकपदं वंशमणिना नैषधचरितमवलम्ब्यैव प्रयुक्तमित्यनुमीयते । इत्थं हरिकेलिमहाकाव्यस्य प्रभावकग्रन्थविशेषेषु नैषधचरितस्यापि महत्त्वपूर्णं स्थानमस्तीति तथ्यमवगन्तव्यम् ।

---

39. <u>नैषधचरितमहाकाव्ये,</u> १।३।
40. ह.के., १।४।
41. नै.च., १।१४५।
42. ह.के., १।६६।
43. नै.च., ३।११।
44. ह.के., ३।३०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६.३ निष्कर्षः

हरिकेलिमहाकाव्ये विषयगुम्फने, शैलीसंस्तरणे, चरित्रविनियोजने, मानवीयमूल्यमहिमोदीरणे चान्येषां कृष्णचरितप्रधानानां पुराणानां महाकाव्यानां चम्पूकाव्यानां गीतगोविन्दकाव्यादीनां च योगदानमाकलनीयम् । प्रभावविशेषे विशदीकृतेऽपि हरिकेलिमहाकाव्यस्य निजायाः प्रभूतप्रतिभाप्रसूतायाः काव्यकलाविच्छित्तेः सर्ववैशिष्ट्यप्रत्यायको भिन्न एव पन्था इति निष्कर्षः ।

☆

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७- हरिकेलिमहाकाव्यस्य काव्यात्मकमनुशीलनम्

रसभावदीक्षागुरोः सकलवाङ्मयप्राणतत्त्वस्य परब्रह्मणः परिपूर्णरूपस्य श्रीकृष्णस्य लोकपावनं सकलकलाभिव्यञ्जकं सङ्गीतसुमधुरं चरितमादाय कविना वंशमणिना प्रणीतमेतद् हरिकेलिमहाकाव्यं श्रीकृष्णस्योदात्तानामलौकिकानाञ्च लीलाविलासानां वर्णनाविच्छित्त्या साहित्यसङ्गीतकलानां मधुवर्षि स्वरूपमिव जगति जागर्ति।

रीतिगुणालङ्कारादिभिस्कलात्मकैस्तत्वै रसभावादिभिः साहित्यिकैस्तत्वैः सुन्दरीरथोद्धताप्रहर्षिणीवसन्ततिलकाप्रभृतिभिः सङ्गीतात्मकैस्तत्वैः समलङ्कृतस्य हरिकेलिमहाकाव्यस्य काव्यसौन्दर्यसमीक्षाविधौ तद्घटकतत्त्वानां तारतम्यविवेचनमनिवार्यमपरिहार्यञ्चेति मनसिकृत्य साहित्यशास्त्रमधिकृत्य तत्र प्रवर्त्यते।

७.१ छन्दोयोजना

छन्दसामथवा वृत्तानां सङ्गीतधर्मिता लोकविश्रुता। भावानुसारेण प्रयुक्तानि छन्दांसि काव्येषु प्राणान्' सञ्चारयन्ति । क्वचन तान्येव सुप्रयुक्तानि प्रतीकार्थाभिव्यञ्जनपराणि संपद्यन्ते । हरिकेलिमहाकाव्ये प्रयुक्तानां छन्दसां विवरणी प्रस्तूयते तद्विदां पुरतः।

प्रस्तुतमहाकाव्ये श्लोक- शिखरिणी- मन्दक्रान्ता- विस्मिता - उपजाति -गीति - उपगीति- प्रहर्षिणाी- शार्दूलविक्रीडित- इन्द्रवज्रा- उपेन्द्रवज्रा- मत्तमयूर- वंशस्थ- मालिनी- स्रग्विणी- द्रुतविलम्बित- वसन्ततिलका- वसन्तमालिका- हरिणी- रथोद्धता- प्रमिताक्षरा- पुष्पिताग्रा- स्वागता- पृथ्वी- आर्या आर्याभेद- स्रग्धरा- वियोगिनी- सुन्दरी- भुजङ्गप्रयात- शालिनी- गाथाभेद- पञ्चचामर- अपरान्तिका- इन्दिराभिधानां ३५ संख्यकानां वृत्तानां विनियोगो लभ्यते। वृत्तानां विनियोजने क्वापि नावलोक्यते कवेः स्खलनम्।

वृत्ततालिका

सर्गः	श्लो.सं.	ससंख्यानि वृत्तानि
प्रथमे	६६	अनुष्टुभ्-६२, शिखरिणी-२, मन्दाक्रान्ता-१, विस्मिता-१।
द्वितीये	६६	वसन्तमालिका-४१, शार्दूल.-२, गीतिभेदः ३, उपजातिः-१८, प्रहर्षिणी-१, विस्मिता-१।
तृतीये	६५	उपजातिः-५९, शार्दूल.-३, इन्द्रवज्रा १, मत्तमयूरम्-१, विस्मिता-१।
चतुर्थे	५४	वंशस्थम्-५१, इ.व.-१, मालिनी-१, विस्मिता-१।
पञ्चमे	६३	प्रहर्षिणी-५३, स्रग्विणी-८, शार्दूल.१, विस्मिता-१।
षष्ठे	६३	द्रुतविलम्बितम्-५९, वसन्तति. २, हरिणी-१, विस्मिता-१।
सप्तमे	५०	रथोद्धता-४३, शिख.-४, शार्दूल.-१, विस्मिता-१ स्रग्धरा.-१।
अष्टमे	४६	स्वागता-४२, शार्दुल.-२, मालिनी-१, विस्मिता-१।
नवमे	४८	प्रसिताक्षरा-४६, पुष्पिताग्रा-१, विस्मिता-१।
दशमे	५७	उपजातिः-५५, पुष्पिताग्रा-१, विस्मिता-१।
एकादशे	४५	शिख. ४२, उपगीतिः-१, मालिनी-१, विस्मिता-१।
द्वादशे	५०	उपजा.-४४, इन्द्रव. २, उ.व.-२, स्रग्धरा-१,विस्मिता-१।
त्रयोदशे	४३	वसन्तति. ४०, रथोद्धता-१, पुष्पि. १, विस्मिता-१।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्दशे	५६	उपजाति:-१, उपगीति:-३, आर्या-१, मालिनी-२६, शार्दू.-१२, स्रग्धरा-१, वसन्ततिलका-२, शिखरिणी-१, मन्दाक्रान्ता-३, हरिणी-१, आर्याभेद:-२, अनुष्टुभ्-१, पृथ्वी-१, विस्मिता-१ ।
पञ्चदशे	५९	वियोगिनी-४९, वंशस्थम्-२, उ.जा.-२, शार्दूल.-२, अनुष्टुभ्-२, मालिनी-१, विस्मिता-१ ।
षोडशे	४७	उ.जा.-१५, शार्दूल.-४, व.ति.-३, सुन्दरी-२, भुजङ्गप्रयातम्-१०, शालिनी-१, पुष्पि.-२, गाथाभेद:-९, विस्मिता-१ ।
सप्तदशे	६४	अनु.-३३, उ.जा.-२, पञ्चचामरम्-१, गीति:-१, उ.गी.-१, इन्दिरा-२, शार्दूल.-३, पृथ्वी-१, शिख.-१, वियोगिनी-१, अपरान्तिका-३, गाथाभेद:-१५, विस्मिता-१ ।

ग्रन्थादौ [1]मङ्गलपद्ये श्लोकच्छन्दसि पञ्चमाक्षरस्य ह्रस्वत्वे वाञ्छितेऽपि कविना यद् दीर्घाक्षरप्रदानं कृतं तत् श्लोकवृत्तस्य भेदविशेषप्रत्यायकं न तु कवे: स्खलनम् । चतुर्दशसर्गे कविना चतुर्दश (१४) वृत्तानां प्रयोगोऽकारि । एष प्रयोगोऽपि महाकाव्यलक्षणमनुसृत्य सञ्जात: । ललितभावोद्‌बोधकानां प्रहर्षिणीहरिणीपृथ्वीवसन्ततिलकावियोगिनीसुन्दरीप्रभृतीनां वृत्तानां बाहुल्येन प्रयोग: कवेर्ललितकवित्वं प्रत्याययति । सर्ववृत्तविनियोगे वंशमणेर्या समानी सहजोच्चार्यता रसभावानुकूलता सुकोमलता च सहृदयैरनुभूयते सा तस्य छन्दोव्यापारे सिद्धहस्तत्वं ज्ञापयति । सर्वेषां वृत्तानामुदाहरणभूतानि पद्यानि मूलपाठखण्डे निहितानीति नात्र पिष्टपेषणं क्रियते । कुत्र कस्य वृत्तस्य विनियोग इति विषयो हि तालिकायां विवृतो वर्तते ।

७.२. अलङ्कारसौन्दर्यम्

कविप्रतिभोपात्तानां शब्दार्थालङ्काराणां दिव्यं नन्दनमिव विभाति हरिकेलिमहाकाव्यम् । प्रतिपद्यं शब्दार्थालङ्कारयोराह्लादजनक: सङ्गमो लभ्यते हरिकेलौ । नैकमपि पद्यमलङ्कार- विवर्जितमत्र, सैषा वंशमणेर्विशिष्टा शक्तिमत्ता । ये कवेरष्टौ भेदा महाकवित्वसाधका राजशेखरेण सङ्केतितास्तेषां समेषां गुणा वंशमणौ चमत्कुर्वन्ति । प्राय: सहस्रपद्यैर्गुम्फितस्यास्य महाकाव्यस्य प्रारम्भतोऽवसानपर्यन्तं कविमनुधावन्निवानुप्रास: प्रतिपद्यं विच्छित्त्या विद्योतते । उपमाया रूपकस्यातिशयोक्तेरुत्प्रेक्षाया: स्वभावोक्तेरन्येषां केषाञ्चनालङ्काराणां यत् सौन्दर्यमयमस्तित्वं तत् सौन्दर्यसरसि कृतावगाहस्य सारस्वतस्य कविहृदयस्य छायाङ्कनमेव । अलङ्कारप्राचुर्येऽपि हरिकेलिमहाकाव्यं रसभावपरिपाकविधौ न क्वचन स्खलितं नैव विश्रृंखलितञ्चानुभूयते । शिष्टा सुकोमला गम्भीरार्थावगाहिनी भाषा, कलात्मकानि काव्यघटकोपकरणानि, ब्रह्माण्डनायको रासेश्वरो नायक:, गोलोकेश्वरी राधा नायिका, लोकपावनमलौकिकलीलाविलासमयं कथावस्तु चेति सर्वमेतद् विलक्षणं हरिकेलौ । इह सविशेषं प्रतीतिपथमुपेयुषां केषाञ्चन काव्यसौन्दर्यघटकानामलङ्काराणां निदर्शनानि विविच्यन्ते कवेरलङ्कारप्रयोगपाटवप्रत्यायनधिया ।

1. "वन्दे सन्देहमन्देहदुरीकरणभारवी ।
नित्यप्रकाशौ जगतो गुरू गौरीगिरीश्वरौ , ह.के., १।१।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(क) शब्दालङ्काराः

प्रकर्षतयोपात्तेन [2]वर्णसाम्येनानुप्रणितस्यानुप्रासस्य हरिकेलौ लालित्यमयं साम्राज्यमस्ति । एकमेव तन्निरूपकं विवेचनं पर्याप्तं स्यात् कवेरनुप्रासपरिपाकप्रकर्षप्रत्यायनकर्मणि । "नृशंसेन[3] कंसेन नुन्ना शिशुघातपातकेषु प्रतिपन्ना घनापत्पतिता पूतना कदाचिन्नन्दनिकेतनं समगच्छत" इत्यात्मकं निरूपणं पद्यविशेषे समाहितमस्ति । तत्र घात- पात- प्रतिपन्ना- नुन्ना- घनापत्पतिता- पूतना- नन्द- निकेतनादिपदानां स्वरवर्णसाम्येनाविष्कृता चमत्कृतिराह्लादविशेषं जनयति सहृदयहृदयभित्तौ । इत्थमेव कविना हरिकेलौ यमकश्लेषावपि सुप्रयुक्तौ । उक्तेनानुप्रासविन्यासमहिम्नैव यमकादीनामपि[4] परिपाकशैली विवृता भवतीति नाधिकमुच्यते ।

(ख) अर्थालङ्काराः[5]

हृदयविस्फारकविशेषार्थप्रत्यायनोद्धुराणामर्थालङ्काराणां काव्यसौन्दर्योद्भावने महती भूमिका भवतीति तथ्यं नाविदितं शेमुषीमतां सहृदयानाम् । हरिकेलिमहाकाव्ये कविना समाधुर्यमाविष्कृताः सर्व एवालङ्काराः कविताकामिन्याः समुचितालङ्करणनिष्पादितममन्दं सौन्दर्यमाभिजात्यञ्च स्फटिकवत्शुभ्रं प्रत्याययन्ति ।

अत्र सकलालङ्कारजीवातुभूतोपमा कविना नैकधा प्रपञ्चिता । कृष्णावतरणानन्तरं भगवती योगमाया यशोदया जनिं लेभे । तज्जन्मवर्णनविधौ कविः कथयति "सायं[6] सन्ध्या चन्द्रिकामिव यशोदा योगमायां कुमारिकां जनयामासेति" । अत्र तेन विनैव विशेषप्रयासमुपमाऽऽविष्कृता । ईदृशानि सन्त्यनेकान्युपमाचमत्कृतानि पद्यानि हरिकेलौ । "श्रीकृष्णेन[7] लालितान् गोवत्सानपहृत्य कृष्णमायावितानेऽनु प्रविष्टो विरिञ्चिः पशूनां पशुत्वं विनिवार्य स्वात्मन्येव पशुत्वं प्रतिष्ठापयामासेति" निरूप्य कविनाऽपह्नुतेश्चारुतरः प्रयोगो व्यधायि । वर्षर्तुर्वर्णनविधौ कविः "पयोधरभारेण[8] दिशो विनम्रा जाताः सरितश्च रजस्वलाः सम्वृत्तास्तादृशं तासां स्वरूपं विलोक्य जगत्कर्ता नारायणोऽपि विधुरवी नयने सममीलयत् किमु "इति निरूप्य समासोक्तिभित्तावुत्प्रेक्षां प्रतिष्ठापयामास । बालमुकुन्दस्य मृद्भक्षणलीलाया निरूपणपरः कविः "नन्दस्य भामिनी[9] यशोदा

---

2. का.प्र., ९।७९।
3. "अथ कंसनृशंसवाक्यनुन्ना प्रतिपन्ना शिशुघातपातकेषु ।
समगच्छत पूतना घनापत्पतिता नन्दनिकेतनं कदाचित् ॥", ह.के., २।१
4. "यपुरिति मनसिकृत्य वृन्दावनमथ बकुलविकासम् ।
समुदितरागपरागपरागतपाटलिपाटलिताशम् ॥" तत्रैव, २।६१।
5. "अर्थालङ्काराणां तानि तानि लक्षणानि सुप्रसिद्धानि लक्षणग्रन्थेषु
सुलभानीति नात्र तेषामिहोद्धरणं कृतम् ।
6. "अथास्मिन्नेव समये सायं सन्ध्येव चन्द्रिकाम् ।
यशोदा जनयामास योगनिद्रां कुमारिकाम् ॥" ह.के., १।३५ ।
7. "वनजनीरतृणाभ्यवहारिणः प्रभुनियोगभृतो भृतका इव ।
न पशवः पशवः पशवो वयं व्यवसिता यदमुष्य विडम्बने ॥" तत्रैव, ६।३३।
8. "स्फुटपयोधरभारभृतो दिशः समभवन् सरितोऽपि रजस्वलाः ।
इति किमु त्रपया कमलापतिर्विधुरवी नयने सममीलयत् ॥" तत्रैव, ६।३७
9. "तदा समालोकत नन्दजाया मायाकिशोरस्य महेश्वरस्य ।
व्यादीयमाने वदनारविन्दे कुक्षौ निविष्टानि चराचराणि ॥" तत्रैव, ३।३९ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिशोर्मुखाभ्यन्तरे स्थावरजङ्गमात्मकं विश्वमेव विलोकितवतीति" निरूप्याधिकालङ्कारस्य विच्छित्तिं व्युत्पादयामास । कृष्णानुकम्पाकलितनयनयुगलस्य कस्यचनान्धस्य कृष्णस्तुतिमाध्यमेन कविना "भगवतो मूर्धा[10] द्यौः, पृथिवी पदम्, पदवारि गङ्गा, दृष्टी सूर्यचन्द्रौ, निरुक्तं वेदाः, अङ्गानि जगत्प्रपञ्चो वर्तन्त" इत्यभिधाय रूपकस्याह्लादमयं रूपमाविष्कृतम् । रूपकस्य शताधिकान्युदाहरणानि हरिकेलौ विलसन्ति । ग्रीष्मर्तुवर्णने धावालपुष्पस्य सौवर्णी कान्तिं निरूपतया कविना पतत्परागस्य[11] तस्योपहाररूपे परिणमनं विधाय परिणामलङ्कारः समुद्भावितः । "यदीयं चिन्तनं[12] संसारपारावारतरिरूपं स एव वसुदेवशिरसि विराजते, अतो यमुनातरणकर्मणि का नाम बाधा" इति प्रतिपाद्य कविना काव्यलिङ्गमाविष्कृतम् । वृन्दावने मुरलीमोहनस्य मुरलीनिनादे स्फीते सति नन्दनन्दनसान्निध्यलाभाय[13] धावन्तीनां व्रजाङ्गनानां हृदयेन मुकुन्दः, दृशा वृन्दावनम्, कर्णेन मुरलीनिनादः, कायेन कन्दर्पज्वालावसादश्च युगपदेव समासादि" इति निरूपयता कविनैकस्या आसादनक्रियाया अनेकैः प्रस्तुतैः सह यौगपद्येन सम्बन्धमाविष्कृत्य तुल्ययोगितालङ्कारो निष्पादितः । मथुरावैभववर्णनावसरे कविः "यदीयानां[14] प्रासादानां भित्तिषु सौवर्णो लेपः, अजिराणां कर्पूरपूरैरुपचारः, मणिभिः प्रसाधा च नित्यं दृष्टिपथमायान्ति सैव महिमामयी मथुरा विद्योतते" इति निरूप्योदात्तालङ्कारं निष्पादयामास । चन्द्रोदये चान्द्रीमभिख्यां ख्यापयता कविना चन्द्रबिम्बस्य[15] शुक्लत्वापादनविधौ नैकविधाः सम्भावनाः स्फुटीकृत्य सादृश्यबोधे संशय एवाविष्कृतः । एतेन सन्देहालङ्कारस्य निष्पत्तिः ससौन्दर्यं निर्वृता । "मेघपङ्क्तिकलुषीकृता[16] शरदा च प्रसादमापन्ना दिगङ्गना निजे भर्तरि गगने खञ्जरीटनयनान्यपातयन्" इति निरूप्यैकस्मिन् पद्ये कविना मानवेतरतत्त्वेषु मानवव्यवहारारोपेण निष्पद्यमानायाः समासोक्तेः प्रादुर्भावो विहितः । दावाग्निवर्णनविधौ "विप्रियो[17] विधाता येन केनापि रूपेण व्यथयतीति" निरूप्य कविनाऽप्रस्तुतस्य विधातुः शंसनेनाप्रस्तुतप्रशंसालङ्कारो निष्पादितः । "वृन्दावने[18] नन्दनन्दनस्योपस्थित्या बाधां विनैव दुष्टजन्तवस्तद् वनं परिहृतवन्तः । सत्यौषधे रोगाः शरीरिणां शरीराणि मुञ्चन्त्येव" इति निरूप्य कविनोपमानोपमेयवाक्ययोर्बिम्बप्रतिबिम्बभावप्रतिष्ठया दृष्टान्तसौन्दर्यं प्रकाशितम् । एकस्मिन् पद्ये

---

10. "द्यौरुत्तमाङ्गं पृथिवी पदन्ते दृष्टी चरन्तौ दिवि पुष्पवन्तौ ।
वेदा निरुक्तं पदवारि गङ्गा देव त्वदङ्गानि जगत्प्रपञ्चः ॥, तत्रैव, ३।५९ ।

11. "वासन्ती कुसुमसमूहतो बभासे धावालो धरणितले पतत्परागः ।
ग्रीष्मेण प्रकटमुपायनीकृतोऽसौ भूपाय स्मरसुहृदे सुवर्णदण्डः ॥" तत्रैव, ५।११ ।

12. "संसारसिन्धुसन्तारे चिन्ता यस्य तरिः सताम् ।
कालिन्दी कियती कृष्णे सति लोचनगोचरे ॥", तत्रैव, १।४६।

13. "सम्रं समासादि हृदा मुकुन्दो दृशा च वृन्दावनमङ्गनानाम् ।
कर्णेन मुग्धो मुरलीनिनादः कायेन कामज्वलनावसादः ॥", तत्रैव, १०।८।

14. "सुवर्णलेपो भवनस्य भित्तौ कर्पूरपूरैरजिरोपचारः ।
प्रतिप्रयाणं मणिभिः प्रसाधा साधारणी सर्वजनस्य यस्याम् ॥ तत्रैव, १६।१०।

15. "उद्धृतं जलदपङ्कजालतः पङ्कजन्नु शरदा मरीचिभिः ।
क्षालितन्नु घटितन्नु किन्नवं बिम्बमम्बरतले कलावतः ॥ तत्रैव, ७।३५।

16. "अम्बुदालिकलुषीकृताः पुनः प्रापिताश्च शरदा प्रसन्नताम् ।
खञ्जरीटनयनान्यपातयन् भर्तरीव गगने दिगङ्गनाः ॥" तत्रैव, ७।२१।

17. "शार्दूलैः करयुगलेन मर्दितोऽपि व्याधूतः श्वसितभरेण पातितश्च ।
लग्नोऽङ्गे तदपि शशास नो कृशानुः कैर्वा न व्यथयति विप्रियो विधाता ॥" तत्रैव, ४।७

18. "अमोचि दुष्टैरपि जन्तुभिर्वनं विनैव बाधां सति नन्दनन्दने ।
महौषधे तिष्ठति देहिनां तनौ गदैरवस्थातुमलं न भूयते ॥" तत्रैव, ५।७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोपीनां जगद्विस्मापकं सौन्दर्यं वर्णयता कविना "व्रजाङ्गना[19] गत्या मतङ्गान् नयनैः कुरङ्गान् वाचा कोकिलान् समधिकं लज्जयन्त्यः सौन्दर्येण संसारमेव विस्मापयन्त्यो विलासान् विस्तारयाम्बभूवुः" इत्यभिधायोपमानादुपमेयस्याधिक्ये सम्पद्यमानस्य व्यतिरेकस्य छटाविष्कृता । वृन्दावनैश्वर्यनिरूपणावसरे दवाग्निं[20] विनैव निष्कण्टकानां जलसेकं विनैव शीतलानां वसन्तं विनैव पुष्पफलभारनम्राणां महीरुहाणां वैभवं प्रकाश्य कारणाभावेऽपि कार्यसिद्धिरूपा विभावना परिपाकं नीता कविना । कृष्णवियोगेन नवमीं कामदशामापन्नाया: कुसुमशरप्रहारखिन्नाया वृन्दायाः सखीनां समक्षे "सख्य:[21] । प्रियस्य दूरदेशवर्तिता, मलयसमीरस्योद्वेजकः सञ्चारः पद्मानां प्राणघातको विकासः, कामदेवमल्लस्य कठोरः प्रहारः, सर्वमेतत् मम प्राणधारणविरुद्धं तथापि प्राणा न यान्ति" इति कथनं निरूप्य कविना कारणसद्भावेऽपि कार्याभावरुपाया विशेषोक्तेराविष्कृतिर्व्यधायि । सूर्यास्तं निरूपयन् कविरेकस्मिन् पद्ये" [22]भ्रष्टविभवोऽपि भास्वान् द्विजानामादरणीयो निर्वृतः" इति विरोधं निरूप्य वस्तुतो भास्वान् भगवतो नारायणस्यांश एव न तस्य पतनं नवोत्थानं स तु सर्वदैकरूप इति विरोधपरिहारावसरं च प्रदाय विरोधाभासं ससर्ज । वृन्दावनवर्णनविधौ कविः वल्लीभ्यः[23] पुष्पस्य पुष्पाद् भृङ्गानां भृङ्गेभ्यो मधुरकूजितानां चोत्तरोत्तरमुत्कर्षं सृष्ट्वा सारालङ्कारचमत्कृतिं वितेने । भगवतो बालमुकुन्दस्य प्रकृतिमधुरां सहजां[24] शिशुलीलां वर्णयन् कविः "निजाभिरङ्गुलीभिर्व्रजसुन्दरीणां कराङ्गुलीमाकृष्य पदे पदे स्खलन् बालकृष्णो नाहमीदृशीं त्रुटिं पुनः करिष्यामीति धिया करयोजनेन तासामुद्वेलमानन्दसिन्धुं ततान" इति निरूप्य बालादीनां स्वक्रियारूपवर्णने लब्धप्रसरायाः स्वभावोक्तेश्चारुचित्रणं चकार । मथुरामहिमनिरूपणप्रसङ्गे कविः "मधुरायामर्थवादश्रुतिस्तु[25] मीमांसाया अध्ययन एव न तु जनजीवने, कोशपरिक्षयः शस्त्राणामेव न तु जनानाम्, करग्रहार्तिः प्रियकेलिसङ्गे कामिनीनामेव न तु प्रजानाम्" इत्यभिधाय परिसंख्यामवतारयामास । अन्यत्र च माथुरसुन्दरीणां[26] वदनानुबिम्बे कमलधिया विनिवेशितकराणां

---

19. "गत्या मतङ्गान् नयनैः कुरङ्गान् गिरा पिकानप्यतिलज्जयन्त्यः ।
विस्मापयन्त्यो जगदङ्गभासा वने विलासानबला वितेनुः ॥" तत्रैव, १०।२३।
20. "विना दवाग्निं रहिता हि कण्टकैर्विनाम्बुसेकं च तले सुशीतलाः ।
ऋतुं विना पुष्पफलोदयाधिका हरिप्रसादेन वने महीरुहः ॥," तत्रैव, ४।६।
21. "प्रिये दूरे क्रूरे मलयपवने पङ्कजवने
समन्तादुत्फुल्ले कुसुमशरमल्ले प्रहरति ।
न हि प्राणा यान्ति प्रियसखि विरुद्धे बहुविधे
विधेयव्यत्यासो मयि बत विधेः कोऽयमधुना ॥," तत्रैव, ११।४२।
22. "यदपि वहति रागं वारुणीसङ्गदोषात् पतति गगनकोशादस्तविन्यस्तपादः ।
रविरभवदयापि श्लाघनीयो द्विजानां सवितुरतिविकारेऽप्यादरः कस्य न स्यात् ॥" तत्रैव, १४।२।
23. "वल्लीषु वल्लीषु सुगन्धि पुष्पं पुष्पेषु पुष्पेषु च मत्तभृङ्गाः ।
भृङ्गे च भृङ्गे कलकूजितानि जितानि यैरात्मभुवो जगन्ति ॥," तत्रैव, ३।६।
24. "व्रजन् प्रगृह्य व्रजसुन्दरीणां कराङ्गुलीमङ्गुलिभिः कुमारः ।
पदे पदे च स्खलितं दधानस्ततान पित्रोर्मुदमत्युदाराम् ॥" तत्रैव, ३।२८ ।
25. "यत्रार्थवादश्रुतिरेव शास्त्रे शस्त्रे शिते कोशपरिक्षयोऽभूत् ।
करग्रहार्तिः प्रियकेलिसङ्गादङ्गे कुरङ्गायतलोचनानाम् ॥" तत्रैव, १६।८।
26. "त्वं क्रीतमत्र कमलं कलयेति ताभिः,
उक्ता निवेशितकरा वदनानुबिम्बे ।
यत्र स्फुटस्फटिकवीथिषु मालिकीनाम् ।
बन्तःस्मितानि जनयन्ति न के युवानः ॥ तत्रैव, १६।१६।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यूनां चित्रणेन कविना भ्रान्तिमानाविष्कृतः । कविना वृन्दावियोगव्यथानिरूपणप्रसङ्गे वृन्दाया[27] भूतकालानुभूतकृष्णस्वरूपानुसारि भविष्यत्कालिककृष्णस्वरूपविभावनं व्युत्पाद्य भाविकालङ्कारः सृष्टः ।

इत्थं हरिकेलिमहाकाव्येऽर्थान्तरन्यास-समुच्चय- परिवृत्ति- परिकर- व्याजस्तुति- प्रत्यनीक- तद्गुणप्रभृतीनां सप्तत्यधिकानामलङ्काराणामाविर्भावः कविना कृतः । दिग्दर्शनबुद्ध्या केचन एवालङ्कारा अत्र संकेतिताः ।

७.३ गुणव्यक्तिः

हरिकेलिमहाकाव्ये चित्तवृत्तेर्द्रुतिदीप्तिस्फीतिहेतुभूतानां सर्वेषां गुणानामेव सहजे परिपाके सत्यपि माधुर्यं निरतिशयं दीव्यति । तन्न्यूना प्रसादस्य स्थितिः । ओजोगुणस्तन्न्यूनरूपेण वर्तमानोऽपि सहृदयहृदयदीप्तौ चमत्कारकारितामपूर्वां धत्ते ।

(क) माधुर्यम्

मधुरैर्ललितैः सरसैः सुकोमलैश्च पदैरभिव्यज्यमानस्य माधुर्यस्य हरिकेलिमहाकाव्यस्य तृतीयचतुर्थसप्तमाष्टमनवमदशमैकादशद्वादशत्रयोदशचतुर्दशपञ्चदशसर्गेषु सविशेषं निरतिशयं प्रभावोऽनुभूयते । अवशिष्टेषु सर्गेष्वपि तस्य न्यूनरूपेणाविर्भावस्तु विलसत्येव । स्मरविह्वलाया राधाया यौवनरागरञ्जितसौन्दर्याविर्भावप्रसङ्गे मेधानाम्नी काचन राधासहचरी कृष्णमुवाच-

[28]"ऊरुयुग्मवरकाञ्चनरम्भास्तम्भमौलिमिलितो मदिराक्ष्याः ।
मन्मथक्षितिपतेरभिषेके रुद्रपीठमिव भाति नितम्बः ॥"

शृङ्गारोद्दीपिनी रचना, काञ्चन- रम्भा- स्तम्भ- मन्मथ- नितम्बप्रभृतीनि पञ्चमाक्षरचमत्कृतानि पदान्यत्र विलसन्ति । एतेषां श्रवणत एव रसिकहृदयं क्रमशो द्रुतिमाप्नोतीति निरूपितपद्ये माधुर्याख्यो गुणोऽवगन्तव्यः । निदर्शनार्थमेवेदमुदाहरणम्, तत्साम्येनान्येषु पद्येषु माधुर्यजन्यं सौन्दर्यं सहृदयैः स्वयमूह्यम् ।

(ख) ओजः

कठोरैर्वर्णैः प्रगाढैः पदबन्धैश्चाभिव्यज्यमान ओजोगुणो हरिकेलिमहाकाव्ये युद्धप्रसङ्ग एव सविशेषमवतारितः । कठोरवर्णजन्यस्यौजोगुणस्यापेक्षया गाढबन्धजन्यस्यौजोगुणस्य विच्छित्तिविशेषो विभाति हरिकेलिमहाकाव्ये । कृष्णकृतं कोदण्डभङ्गं चित्रयतो वंशमणेः प्रतिभापरिचायकमिदमुदाहरणम्-

[29]"भ्रश्यद्भूधरचक्रमक्रमचलत्पाथोधिनक्रोत्करम्
व्यस्यद्दिश्यकरीन्द्रवृन्दमवनीचक्रं न चक्रे परम् ।
कृष्णाकर्षितकंसकार्मुकदलद्वैतप्रभूतो ध्वनिः
किं प्रध्वस्तसमाधिबन्धमतनोदद्धा मनो वेधसः ॥"

अत्र कविना प्रगाढबन्धमाध्यमेनाविष्कृत ओजोगुणो धनुर्भङ्गस्य विकरालं दृश्यं प्रत्यक्षमिव कारयति ।

---

27. "व्रजस्त्रीणां चेतो मधुरमुरलीनादमधुभिः
समासिञ्चन्नुच्चैः कनकरुचिकौशेयवसनः ।
कदा नः कालिन्दीतटभुवि भवेदक्षिविषयो
विषक्तः शृङ्गारे सकलसुखसारे हरिघनः ॥" तत्रैव, ११।३७

28. तत्रैव, ८।१५।

29. तत्रैव, १६।३२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(ग) प्रसाद:

सर्वरसेषु सर्वभावेषु च सञ्चारी प्रसाद: कविना हरिकेलौ सोत्कर्षमभिव्यक्त: । काव्यारम्भे निजामल्पज्ञतां ख्यापयतो भगवतोऽनन्तगुणगभीरां सम्प्रभुताञ्च विभावयत: कवेरियं भणितिर्नितरां हृद्या वर्तते । यथा-

[30]"अनन्तगुणता गुर्वी तवाल्पा मामकी मति: ।
तथापि स्तूयसे देव ! केवलं भक्तिचापलात् ॥"

उक्तपद्ये भाषाया ललित- ललितया मधुर- मधुरया- प्रसन्न- प्रसन्नया च गत्या सह या सहजाऽर्थप्रतीति: सा कवे: प्रसादाभिव्यञ्जने क्षमताविशेषं प्रत्याययति ।

इत्थं माधुर्यस्य महनीयायां धरायां प्रणीतेऽस्मिन् महाकाव्ये ओज:प्रसादयोरपि स्तम्भयोरिव मूल्यवती सहभागिताऽवगन्तव्या । उक्तैरुदाहरणजातैरेव कवेर्गुणाविर्भावसामर्थ्यं विवृतं भवति नूनम् ।

७.४ रीतिस्थापना

पदसंघटनाऽथवा वर्णगुम्फनशैली साहित्यशास्त्रे रीतिनाम्ना व्यवहृता । काव्यस्य कलात्मक-भावात्मक- बौद्धिकसौन्दर्याणामाविष्कारेऽस्या गुर्वी भूमिका भवति । सभेदप्रपञ्चेयं हरिकेलौ कथङ्कारं विन्यस्ता कविनेति परिज्ञानाय किमपि विमृश्यते ।

(क) वैदर्भी

असमासाऽल्पसमासा मधुरा ललितक्रमेयं वैदर्भी श्रृङ्गारकरुणशान्तरसेषु निरतिशयं स्वरूपसौन्दर्यमाविष्करोति । वंशमणिर्वैदर्भ्या उपासक: । स बाहुल्येन वैदर्भीमेव विच्छित्तिपूर्वकं व्युत्पादयामास हरिकेलौ । उदाहरणार्थं सद्योजातस्य कृष्णस्य बालरूपवर्णनविधौ निरूपितं पद्यमेकं प्रस्तूयते केवलं दिग्दर्शनधिया-

[31]कल्पे कल्पे भुवनमखिलं येन सृष्टं विसृष्टम्
यस्यैवासौ जगति भगवानंशुमानंश एक: ।
क: प्रत्येतु प्रथयतु च को धाम तत् सामगम्यम्
नन्दालिन्दे गलितवयसा वाससाऽऽच्छन्नमास ॥"

अंशुमान्, अंश:, कल्पे कल्पे, धाम, सामगम्यम्, नन्दालिन्दे, वाससाच्छन्न इत्यादीनि ललितानि पदानि वैदर्भीशैल्या प्रयुक्तानि ।

(ख) गौडी

ओजोव्यञ्जकवर्णसद्भावा विकटबन्धमयी समाससमृद्धा च रचना गौडीरीतिरिति प्रथिता । हरिकेलौ भगवतो दानवनिर्दलनरूपेषु व्यवहारेष्वियं प्रायो वंशमणिना व्यवहृता । रामकृष्णयोश्चाणूरमुष्टिकाभ्यां सह समरे प्रारब्धे विश्वमेवास्तव्यस्तं भयग्रस्तञ्च बभूवेति वर्णयता कविना चैतादृशी विकटबन्धमयी रचना पुरस्कृता -

[32]"वेल्लद्वारिधिविस्खलत्कुलगिरिव्यस्यद्धरामण्डलि -
भ्रश्यद्दिश्यकरित्रसत्सुरपुरिप्रध्वानदीर्यद्दरि ।
हस्ताहस्तितलातलिप्रहरणे प्रोद्यत्प्रचण्डारवम्
बाहूबाहविगाहनाथ तयो: प्रावर्ततायोधनम् ॥"

---

30. तत्रैव, १।२५ ।
31. तत्रैव, १।६५ ।
32. तत्रैव, १७४५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इह समासेन शतृप्रत्ययेन विषयवस्तुना च विकटतामाप्ता कवेरचना गौडीत्वमाप्तवती । एतादृशान्यनेकानि पद्यानि गौडीरीत्यामाधृतानि सन्ति ।

(ग) पाञ्चाली

वैदर्भ्या गौड्याश्च गुणैर्मिश्रिता समस्तपञ्चषपदैर्बन्धैर्युता रचना पाञ्चालीपदवाच्या भवति । हरिकेलिमहाकाव्ये कान्यपि पद्यानि पाञ्चाल्यां निबद्धानि सन्ति । उदाहरणार्थं धनु:स्थानवर्णनाप्रयुक्तमेकं पद्यमवतार्यते -

[33]"महामखारम्भविजृम्भमाणमृदङ्गशङ्खादिनिनादिवाद्यम् ।
द्वारोदयत्तोरणपुष्पमालानिपातिपुष्पं लयगीतहृद्यम् ॥"

बन्धदृष्ट्या गौडीमनुगता, वर्णविन्यासदृष्ट्या माधुर्यगुञ्जिनीं वैदर्भीमनुगतेयं रचना निरूपितरीतिद्वयमिश्रितत्वात् पाञ्चालीलक्षणमात्मसात् कुरुते ।

(घ) लाटी

वैदर्भ्या: पाञ्चाल्याश्च गुणैरन्विता मृदुपदसुभगोचितपूरितवस्तुविन्यासा संघटना लाटीति साहित्यिकेषु परिचिता वर्तते । हरिकेलावस्या: प्रचुरप्रयोगो जात: । निदर्शनार्थं तेष्वेकतमं पद्यप्रयोगमवतार्यते-

[34]"सकिङ्किणीकङ्कणकर्णभूषाकपोलमूलास्खलितालकश्री: ।
गोवत्सपुच्छं बलतो विकर्षन् व्रजाङ्गणेऽरिङ्गदनङ्गरूप: ॥"

अत्र पूवार्धे पाञ्चालीलक्षणमुत्तरार्धे वैदर्भीलक्षणं च संगेच्छेते । तयोर्लक्षणाभ्यामनुप्राणिततत्त्वादत्र मिश्रितस्वभावा लाटीनाम्नी संघटनाऽवगन्तव्या ।

७.५ रसभावाभिव्यञ्जनम्

काव्यस्यात्मतत्त्वमेव रसो भावो वा । तत्र स्खलितं विशृङ्खलितं वा काव्यं नाद्रियते विबुधै: । सद्य:परनिर्वृतिश्च काव्यस्य मुख्यं प्रयोजनम् । तामेवाङ्गीकृत्य प्रणीतेऽस्मिन् महाकाव्ये कविप्रतिभानिष्यन्दिता रसभावस्रोतस्विनी सहृदयानां चर्वणाविषयताङ्गताऽमन्दमानन्दं वितनुते नूनम् । इह महाकाव्ये सहृदयहृदयानुभूतिविषयाणां तेषां तेषामभिव्यक्तिप्रकारो निरूप्यते संक्षेपेण ।

७.५.१ रसाभिव्यञ्जनम्

(क) विप्रलम्भशृङ्गार:

हरिकेलिमहाकाव्यस्यैकादश: सर्गो विप्रलम्भशृङ्गारानुप्राणितो वर्तते । तत्र पदे पदे कृष्णविरहखिन्नाया वृन्दाया विरहवेदना मर्मस्पर्शितयाऽभिव्यक्ता । विप्रलम्भपोषकं वृन्दाहृदयनिर्गलितं भावकुसुममेकमत्रावतार्यते । यथा-

[35]"विषव्याला माला मलयपवनो दावदहनो
मृणाली पाशाली कुसुमितवनं कालभवनम् ।
क्षतक्षाराकारा: शिशिरघनसारा मम हरे-
र्वियोगैराधीनामजनि खनिरेषा मम तनु: ॥"

---

33. तत्रैव, १६।२९ ।
34. तत्रैव, ३।३१ ।
35. तत्रैव, ११।३३ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र कविना चरमा विरहवेदनाऽऽविष्कृता । संयोगेऽनुकूलानि वस्तूनि वियोगे कथङ्कारं प्रतिकूलायन्त इति तथ्यमितोऽनुभूतिगम्यं भवति । आलम्बनं घनश्यामः, उद्दीपनं मलयपवन-कुसुमितवनादिकम्, कृष्णस्वरूपभावनाजन्या विवर्णताऽनुभावः, तदप्राप्तिजन्या चिन्ता सञ्चारिभावः । एतैरभिव्यक्ता कृष्णविषयिणी रतिविर्प्रलम्भश्रृङ्गाररूपतामापन्ना ।

(ख) सम्भोगश्रृङ्गारः

सम्भोगश्रृङ्गारेणाप्लावितमिदं हरिकेलिमहाकाव्यम् । अत्राष्टमदशमद्वादशचतुर्दशसर्गेषु रसराजः सम्भोगश्रृङ्गारश्चरमचूडामधिरूढो वर्तते, श्रृङ्गाराधिराजस्य श्रीकृष्णस्य कामिनीकेलिव्यञ्जनविधौ । मुग्धायामाविष्कृतस्य सम्भोगश्रृङ्गारस्योदाहरणद्वयमत्र निर्दिश्यते केवलं दिग्दर्शनधिया । यथा-

[36]"वाससि प्रियतमेन विकृष्टे सार्प्पिपत् करसरोजमुरोजे ।
नूनमर्चितवती शशिमौलिं नित्यसङ्गरतिरङ्गसुखाय ॥"

आलम्बनं नन्दननन्दनः, उद्दीपनं तत्कृतो वस्त्रापहारः, मुखवैवर्ण्यादिकमनुभावः, लज्जा सञ्चारिभावः, एतैरभिव्यक्ता कृष्णविषयिणी वृन्दाया रतिः साधारणीकरणव्यापारेण सहृदयहृदयमनुप्रविष्टा रसरूपे परिणता । यथा वा-

[37]"सरोरुहदृशा मदनतापमापन्नया
त्रपावसनमुज्झितं निपतितञ्च केलीरसे ।
स्तनौ गलितचन्दनौ पुलकराजिरुज्जृम्भिता
विलोचनमनञ्जनं समुदिता मुखे सीत्कृतिः ॥"

श्यामसुन्दर आलम्बनम्, तत्कृता केलिचेष्टा चोद्दीपनम्, रोमाञ्चस्मितादयोऽनुभावाः, आवेगमदमोहादयश्च सञ्चारिणः, एतैरभिव्यक्ता रतिः सम्भोगश्रृङ्गारतामापन्ना ।

(ग) करुणविप्रलम्भः

नायिकाया अथवा नायकस्य पुनर्लभ्यतया लोकान्तरप्राप्तौ या रतिनिष्यन्दमयी विरहजन्या तीव्रा वेदना सैव सुपुष्टा करुणविप्रलम्भरसरूपतां प्राप्नोति । दिग्दर्शनार्थं हरिकेलिगतं करुणविप्रलम्भपोषकं पद्यमेकमुदाह्रियते-

[38]"कान्तावियोगवडवानलकीलदुःस्थे
मोहार्ण्णवे महति निष्पतिता हताशाः ।
ते बन्धुभिः सुवचनैरुपदिश्यमानाः
प्राणानिव स्वभवनानि चिरेण भेजुः ॥"

मेधादीनां दशगोपीनां कृष्णेन साकं यमुनाजले नावा सहैव निसज्जितानां घोरां विपत्तिं स्मारं स्मारं तासां तास्ताः प्रेमनिर्भराश्चेष्टा ध्यायं ध्यायं तद्गतप्राणाश्चन्द्रसेनप्रभृतयो गोपा मूर्च्छोत्तरामवस्थां प्राप्येव पुनर्ज्ञातीनां सुवचैनरुपदिश्यमानाः प्राणान् भेजुः । हताशाश्च ते पुनर्दर्शनाकांक्षां हृदि पालयन्तो गृहाणि भेजुरिति तात्पर्यम् । अत्र मेधादय आलम्बनम्, नौकादुर्घटनया यमुनाभ्यन्तरे तासां पतनमुद्दीपनम्, अश्रुपातादयोऽनुभावाः, मूर्च्छा सञ्चारिभावः । एतैः पुष्टा रतिः रसतां प्रतिपन्ना ।

---

36. तत्रैव, ८।२७ ।
37. तत्रैव, १४।३६ ।
38. तत्रैव, १३।४१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(घ) <u>रौद्ररसः</u>

कृष्णनिहतसैन्यः सर्वात्मनाऽऽत्मानं पराजितं तिरस्कृतं च मन्यमानः कृष्णविजयसूचकं वाद्यघोषमाकर्ण्य समुद्दीप्तरोषानलो नृशंसः कंसो निजमुल्बणं क्रोधमित्थं प्रकटीकृतवान् -

39"अलं खलास्तूर्यरवैरमित्रौ बहिष्क्रियेतां वसुदेवपुत्रौ ।
निहन्यतामेष विलुण्ठितार्थं खलीकुरुध्वं पशुपालसार्थम् ।"

अत्र रामकृष्णादय आलम्बनरूपाः, रामकृष्णकृता चाणुरादिहतिरुद्दीपनरूपा, नेत्रोष्ठकम्पनादिकमनुभावरूपम्, आवेगश्च सञ्चारी । एतैरभिव्यक्तः क्रोधो रौद्ररूपे परिणतः ।

(ङ) <u>वीररसः</u>

हरिकेलौ शृङ्गारप्राधान्येऽपि यत्र तत्राङ्गरसरूपेण वीरस्यापि परिपाको जातः । वीरपरिपोषकमेकं पद्यं निदर्शनार्थं विमृश्यते । यथा-

40"ततः परं पौरुषचुञ्चुरुच्चकैः
विधृत्य चञ्चूयुगले करेण तम् ।
विनिर्गतस्तद्वदनादनाकुलम्
हरिर्हिरण्याख्यमिव व्यदारयत् ।"

बकासुर आलम्बनम्, तत्कृतमनुचितचेष्टादिकमुद्दीपनम्, स्थैर्यादिकमनुभावः, धृत्यादिकं च सञ्चारिभावः । एतैरभिव्यक्त उत्साहो रसरूपे परिणतः ।

(च) <u>भयानकरसः</u>

हरिकेलिमहाकाव्येऽनेकधा भयानकरसः पोषमापन्नः । तेष्वेकतममुदाहरणं यथा-

41"अवनी समकम्पतातिमात्रं पततस्तस्य कलेवराभिघातात् ।
न च सैव परेऽपि तत्प्रनुन्ना गिरयो वारिधयो रयोपपन्नाः ॥
अथ गोपगणैरलोकि बालो विकरालोदरदानवोपरिष्ठः ।
शवसाधनकर्म किन्तु कुर्वन्नमरद्वेषिकुलानि सञ्जिहीर्षुः ॥"

निष्प्राणं पर्वताकारं तृणावर्तकलेवरमालम्बनम्, सवेगं तत्पतनमुद्दीनरूपम्, कायवैवर्ण्यादयोऽनुभावाः, त्रासावेगजुगुप्सादयो व्यभिचारिणः । एतैरभिव्यक्तं भयं भयानकतामापन्नम् ।

(छ) <u>बीभत्सरसः</u>

हरिकेलौ क्वचनैव लभ्यन्ते बीभत्सपोषकानि पद्यानि । इह कृष्णनिपीतप्राणतत्त्वायाः पूतनाया दैहिकीं विकृतिमवलम्ब्य निष्पन्नस्य बीभत्सस्य निरूपकं पद्यमवतार्यते । यथा-

42"अवकृष्य किशोरमङ्गतोऽस्या जनता विस्मयसागरे निमग्ना ।
लवशो लवशो विधाय देहानतिदूरादकिरन्ननोभिरुच्चैः ॥"

अत्र पूतनायाश्छिन्नभिन्नान्यङ्गान्यालम्बनानि, अङ्गेषु दृश्यमानानि जुगुप्सितास्थिमांसपिण्डादीन्युद्दीपनानि, नासिकानर्तनमुखवैवर्ण्यादिकमनुभावः, त्रासादयश्च संचारिणः । एतैरभिव्यक्ता जुगुप्सा बीभत्सतामापन्ना ।

---

39. तत्रैव, १७५९ ।
40. तत्रैव, ४।२३ ।
41. तत्रैव, २।१९-२० ।
42. तत्रैव, २।९ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(ज) अद्भुतरस:

कृष्णचरितमेव सकलं विस्मयाभिव्यञ्जनरूपम् । तस्मिन् वर्ण्ये सति, कवौ निहितं विस्मयाभिव्यक्तिपाटवं प्रदर्शयितुमत्र निदर्शनमेकं निरूप्यते । यथा-

43"स्थितावेक एव प्रयाणे शतञ्च प्रदाने रिपूणां सहस्रायमाण: ।
प्रगाढं वलन् वीरलीलावितानो विपक्षैरलक्षि प्रभुर्लक्षसंख्य: ॥"

अत्र विस्मयसागर: श्रीकृष्ण: स्वयमालम्बनरूप:, रणाङ्गणीयं पर्यावरणमुद्दीपनम्, मुखनयनविस्फारादयोऽनुभावा:, आवेगत्रासादिकं सञ्चारि । एतैरभिव्यक्तो विस्मयोऽद्भुतरूपे परिणत: ।

(झ) शान्तरस:

श्रीकृष्णो ब्रह्मरूप: सच्चिदानन्दमूर्ति: । सकलमेव तस्य चरितं वस्तुत: परमपुरुषार्थस्य मोक्षस्योपदेशकम् । हरिकेलौ कविना कृष्णस्य तन्महिममयं रूपं स्थले स्थले विभावितम् । कृष्णदर्शनाकांक्षया गोकुलगामिनोऽक्रूरस्य चिन्तनमुखेन कविना शान्तो रसोऽभिव्यक्त: । यथा-

44"इह संसृतिनाट्यमीहते श्रुतिनान्दीनिगदेन यत् स्वयम् ।
स्वयमेव निरीक्षते च य: प्रकटं तं नटमीशमाश्रये ॥"

श्रीकृष्ण आलम्बनम्, तदलौकिकं मोक्षाधारं स्वरूपमुद्दीपनम्, संसारस्य नाट्यरूपत्वाद् विनाशधर्मिताया विभावनेनात्मस्फीतिरनुभाव:, स्मृतिधृत्यादय: सञ्चारिण: । एतैरभिव्यक्त: शम: शान्तरसतां परिणत: ।

(ञ) वात्सल्यरस:

बालकृष्णचरितं ललितं मधुरं जगद्वशीकारहेतुभूतञ्च वर्तते । पित्रो: प्रीतिनदीं प्रवाहयता कृष्णेन तयो: समक्षे यद् यदाचरितं तेन वात्सल्यसृष्टि: समपद्यत । तस्यैकतममुदाहरणमुपस्थाप्यते । यथा-

45मुखमिन्दुसखं विलोकयन्त्या: पिबत: स्तन्यरसं तनूभवस्य ।
सुहितत्त्वभरेऽपि चन्द्रसेनश्वसुरासीत् सुहितं कदापि नाक्षि ॥"

अत्र कृष्णस्य बालरूपमालम्बनम्, स्तन्यपानादिकमुद्दीपनम्, रोमाञ्चादयोऽनुभावा:, गर्वहर्षादय: सञ्चारिण: । एतैरभिव्यक्ता मातूरतिर्वात्सल्ये परिणता ।

७.५.२ भावाभिव्यञ्जनम्

इह हरिकेलौ भावनया भाव्यमानस्य भावस्य हृद्यमभिव्यञ्जनं जातम् । ध्वनितानां सञ्चारिणां निर्वेदादीनां यद्वा स्थायिभावानां प्राणतत्त्वरूपस्याथवा देवादिरतिप्राणस्य भावस्य स्थले स्थले मधुराऽभिव्यक्तिर्लभ्यते इह देवादिविषयकस्य भावस्यैवोदाहरणं प्रस्तूयते केवलं दिग्दर्शनधिया । यथा-

46"देव दु:खमपि मे सुखावहं यत्र नाम भवतामुदीर्यते ।
स्वर्गसम्पदपि कम्पकारिका हारिका भवति या तव स्मृते: ॥"

अत्र श्रीकृष्णरूपमालम्बनम्, तन्नामादिमहिमा चोद्दीपनम्, आत्मस्फीतिनेत्रविस्ताराश्रुपातादयोऽनुभावा:, हर्षावेगादय: सञ्चारिण: । एतैरभिव्यक्ता कृष्णविषयिणी रतिरत्र भावस्वरूपमुपपन्ना ।

---

43 तत्रैव, १६।४२ ।
44. तत्रैव, १५।४३ ।
45. तत्रैव, २।२६ ।
46. तत्रैव, ७।६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७.६ ध्वनिविमर्शः

ध्वनिमूर्धन्यो रसध्वनिर्व्याख्यातपूर्वः । लक्षणामूलध्वनेरपि हरिकेलौ स्थले स्थले हृदयहारितया कविना विनिवेशो विहितः । "प्राची,[47] रागिणी संवृत्ता, दिवासुन्दरी सिन्दूरद्युतिपूरमण्डितमुखी दीप्तमम्बरं दधार" इत्यादयः सहस्राधिकाः प्रयोगाः कवेर्लक्षणाप्रयोगनैपुणीं प्रकाशयन्ति । पूर्वादिकाष्ठानां नीरूपत्वाद् जडत्वाच्च प्राच्या अनुरागस्याथवा लोहितवर्णस्यानुपन्नत्वात् तत्रार्थान्तरसंक्रमितवाच्यध्वनिमाध्यमेन, उदयाचलसन्निहिता दिक् सूर्यसान्निध्येन हृद्यसौन्दर्यहेतुभूता निष्पन्नेत्यर्थो लक्ष्यते । तथैव दिवासुन्दरी पदव्यवहारेऽपि तस्यैव ध्वनेश्चमत्कारो बोध्यः । अभिधामूलध्वनेरेकतमभेदस्य शब्दशक्तिमूलध्वनेरपि कविना स्थले स्थले चारुतराः प्रयोगाः कृताः । तेषु सैष एकतमः प्रयोगः -

[48]"चापल्ये चलति स्थिरीभवति च स्थैर्ये द्युतौ द्योतते
नित्यं शीतलतागुणेन मधुरा म्लानौ पुनर्म्लायति ।
आकृष्टापि करेण चण्डमहसा मूलं महीजन्मनाम्
छाया तत्र कुटुम्बिनीवकुलजा नो जातुचिन्मुञ्चति ॥"

संयोगाद्यैः "वकुलजा छाया" इत्यस्य वकुलस्यातपाभावः, इत्यर्थे स्थिरीकृतेऽपि शब्दशक्तिमूलध्वनिना कुलजा कुटुम्बिनीव कृष्णस्य छाया वृन्दावनं न मुञ्चतीत्यर्थोऽप्यवगम्यते यद्वा कुलजानामुत्तमानां जनानां कुटुम्बिनीव पत्नीव वृन्दावने कृष्णस्य छाया तिष्ठतीत्यर्थः । अनेनैव प्रकारेणार्थशक्तिमूलध्वनेरपि प्रयोगाः ससौन्दर्यं विहिताः कविना । तेष्वेकतमः प्रयोगो यथा-

[49]"तां विधृत्य स करे कमनीये सन्निनाय शनकैः शयनीये ।
नागरी निधुवने किल पत्युः प्राक्करग्रहमपेक्षत एव ॥"

राधया विहरन् कृष्णः करग्रहं विधायैव रन्तुं प्रवृत्तः, यतो हि पाणिग्रहणसंस्कारं विना कुलजा नार्यो रन्तुं नेहन्ते, इत्यर्थान्तरन्यासाख्योऽलङ्कारः । तन्माध्यमेन राधा पूर्वं कृष्णेन सह पाणिग्रहणसंस्कारेण बद्धा नासीत्, अपि तु परकीया नायिका, परन्तु कृष्णेन विहारात् पूर्वं करग्रहणेन तस्याः परकीयात्वं निवारितमिति वस्तु ज्ञायते । इत्थमसंख्या ध्वनिसम्बद्धाः प्रयोगा हरिकेलिमहाकाव्ये विलसन्ति ।

७.७ दोषदृष्टिः

कवेरसामर्थ्येन प्रमादेन च काव्येषु यत्र तत्रोद्भूयमानानि काव्यसौन्दर्यघातकानि तत्वानि दोषरूपतां प्राप्य काव्यानन्दमधरीकुर्वन्तीति तेषां परिहार्यता शास्त्रकारैर्निर्दिष्टा । यद्यपि हरिकेलिमहाकाव्यं सर्वाङ्गसुन्दरं तथापि कवेर्नररूपत्वात् नररूपस्य च निर्दोषत्वासम्भवात् तस्य प्रमादेनाऽनवधानतया वा सविशेषं प्रतीतिपथमागतानां दोषाणां दिग्दर्शनं क्रियते ।

(क) क्लिष्टत्वदोषः

पदानां दुर्बोध्यतया प्रयोगे प्रसरणशील एष दोषो हरिकेलौ केवलमघोनिर्दिष्टे पद्ये सामान्येन प्रतीयते । यथा-

[50]"सम्प्रबोध्य शनकैरथ मेधा माधवं मधुरवाणि बभाण ।"

अत्र मेधा माधवं मधुरवाणि बभाणेत्यन्वयः । मधुरा वाणी यस्मिन् तद् भणनमिति क्रियाविशेषणत्वेन प्रयोगोऽत्रार्थप्रतीतौ विलम्बं जनयति ।

---

47. तत्रैव, ८।४४ ।
48. तत्रैव, २।५९ ।
49. तत्रैव, ८।२४ ।
50. तत्रैव, ८।५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(ख) च्युतसंस्कृतिदोष:

शास्त्रवैपरीत्येन पदानां प्रयोगे सति काव्येषु च्युतसंस्कृतिनामा दोषो भवतीति तथ्यं शास्त्रकारैः सन्दिष्टम् । कविर्वंशमणिः कादाचित्कतया च्युतसंस्कृतिदोषदुष्टानि पदानि प्रायुक्त । तेष्वेकतममुदाहरणं यथा-

"सुधाधिकं साधु मरन्दवृन्दमकिञ्चनो याचति किं द्युसद्भ्यः" । (३।४)

इति पद्ये प्रयुक्तं "याचति" इति पदं शब्दशास्त्रानुसारेण दुष्टमस्ति । यतो हि तत्र "याचते" इत्यात्मनेपदीयः प्रयोग एव साधुतया स्वीक्रियते न तु "याचति" इति परस्मैपदीयो व्यवहारः ।

(ग) स्वशब्देन रसस्योक्तिः

"शृङ्गाररसारो रस एव जज्ञे" "शृङ्गारशाखी शतपल्लवोऽभूत् "इत्यादयः प्रयोगाः कविना विहिताः । यद्यपि तत्र तत्र श्रीकृष्णः स्वयं शृङ्गाररसरूपे[51] परिणत इति कथनमथवा शृङ्गारवृक्षः[52] पल्लवशतैरलङ्कृत इति कथनञ्च भणितिभङ्ग्या नितरामेवाह्लादकं तथापि साहित्यशास्त्रीयमर्यादानुसारेण शृङ्गारस्य स्वशब्देनोक्तिर्दोषावहेव मन्तव्या ।

(घ) अङ्गिनोऽननुसन्धानम्

हरिकेलिमहाकाव्यस्य पञ्चदशे सर्गेऽक्रूरस्य गोकुलप्राप्तिकथा वर्णिता । तत्र स कंसादेशं निर्दिश्य कृष्णरामयोः साकं मथुरामाजगामेति कथावस्तु विद्यते । पुराणधरातले विरचितेऽस्मिन् महाकाव्ये पुराणनिरूपितस्याङ्गिनः शृङ्गारस्य प्रमुखघटकस्य गोपीनां कृष्णविरहविषादस्य सूक्ष्मोऽपि संकेतो न प्रदत्त इत्यङ्गिनोऽननुसन्धानाख्यो दोषः ।

(ङ) रसस्यास्थाने प्रथनम्

कविरष्टमे दशमे द्वादशे च सर्गे सम्भोगशृङ्गारस्य चारुतयाऽभिव्यञ्जनं चकार । एतेन स्फीतेन शृङ्गाराभिव्यञ्जनेन पाठकः पूर्णतया लब्धतोषः सम्पद्यते, परन्तु कविरसन्तुष्ट इव पुनः चतुर्दशसर्गे सम्भोगशृङ्गारस्य प्रथनं कृतवान् । शृङ्गारविलसिते चारुणि सत्यपि रसस्यास्थाने प्रथनात्मिका काचन वितृष्णा हृदि प्रादुर्भवतीति दोषः ।

(च) प्रकृतिविपर्ययः

हरिकेलिमहाकाव्यस्याष्टमे सर्गे राधाकृष्णयोरुन्मुक्तशृङ्गारस्य निरूपणमस्ति । उत्तमदेवतयोर्जगतः पित्रोस्तयोः सम्भोगवर्णनं पित्रोः सम्भोगवर्णनमिवानुचितमिति[53] दोषः ।

७.८ चित्रकाव्यविमर्शः

शब्दालङ्कारविषयभूतं प्राचीनैर्मम्मटविश्वनाथादिभिर्विशेषज्ञैरनादृतं चित्रमिह कवेश्चित्रकाव्यप्रणयनपाटवदिग्दर्शनार्थमेव विमृश्यते । वंशमणिना भारवेर्माघस्य च काव्यवर्त्मनि

51. तत्रैव, १०।११ ।
52. तत्रैव, १०।१६ ।
53. ..."प्रकृतयो दिव्या अदिव्या दिव्यादिव्याश्च । तेषामपि उत्तममध्यमाधमत्वम् । तेषु च यो यथाभूतस्तस्यायथावर्णने प्रकृतिविपर्ययो दोषः । यथा - कुमारसम्भवे उत्तमदेवतयोः पार्वतीपरमेश्वरयोः सम्भोगशृङ्गारवर्णनम् । इदं पित्रोः सम्भोगवर्णनमिवात्यन्तमेवानुचितमित्याहुः ।" सा.द., ७।१५ वृत्तौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरणचारं विदधता निजा काव्यकलासम्बद्धा सर्वतोमुखी वैशारदी हरिकेलौ प्रदर्शिता । सर्वतोभद्र[54] - कामधेनु- गोमूत्रिका- मुरजबन्ध- गतप्रत्यागत- विगलितक- गलितक- संगलितक- भूषणा- खञ्जरक- विलम्बित- सुन्दरा- कल्पतरुबन्ध- एकाक्षर- द्व्यक्षर- अष्टदलबन्ध- कविकाव्यनामेति प्रसिद्धानां चित्रकाव्यस्य सप्तदशभेदानां प्रसङ्गानुसारितया गुम्फने निजं कौशलं प्रदर्शितम् । तेषु केचन भेदा दिग्दर्शनार्थमिह प्रकाश्यन्ते ।

(क) एकाक्षरबन्धः

केवलमेकं व्यञ्जनमादायार्थवती पद्यरचना "एकाक्षरबन्धः" इति विश्रुता । हरिकेलौ प्रयुक्तमेकमुदाहरणं यथा-

"रे रे रुरो रुरो रारै रररोरा ररै ररम् ।
रूरो ररे रुरू रूरो ररूरेरोऽरिरारौ ॥" (१७-४३)

(ख) द्व्यक्षरबन्धः

वर्णद्वयमेव प्रयुज्य कविनोपस्थापितार्थवती पद्यरचना "द्व्यक्षरबन्धः" इति परिभाष्यते चित्रकाव्यवेदिभिः । हरिकेलिगतमुदाहरणम्-

"वेला वेलाऽवले वाले वाले ववि वलावलः ।
वलल्लीलां लवल्लीलां लाली लीलालवल्ललौ ॥" (१७४९)

(ग) गतप्रत्यागतम्

कश्चन पद्यविशेषोऽनुलोमगत्या यया वर्णानुक्रमणिकया प्रारभ्यते, तयैव वर्णानुक्रमणिकया प्रतिलोमगत्याऽपि यदि तस्योपस्थितिस्तदा गतप्रत्यागताख्यं चित्रं निष्पद्यते । येन रूपेण गतं तेनैव रूपेण प्रत्यागतमिति विधिवशात् तस्य सार्थकं नाम । हरिकेलौ यथा-

"या मता हि विभाधारा सा रामा सुरनायिका ।
कायिनारसुमारासा राधा भाविहिता मया ॥"(१७।१८)

७.९ स्तुतिकाव्यदिग्दर्शनम्

सुदूरप्राचीनकाले लिच्छविशासने स्तवकाव्यप्रणयनव्यापारस्य प्रमाणपुष्टत्वान्नेपाले स्तवकाव्यसर्जनपरम्परा नार्वाचीना । इदं हरिकेलिमहाकाव्यं रसपरिपाकेन भावपोषेण च नितरां हृद्यं वर्तत इति विषयो बहुभिः साक्ष्यैः प्रमाणितः । हरिकेलौ निहिता ललित-ललिता मधुर-मधुरा भावप्रवणाश्च स्तुतयः कवेर्वैदुषीं काव्यकलावैशारदीञ्च प्रमाणयन्ति । इह महाकाव्ये दशविधा मुख्याः स्तुतयो[55] विलसन्ति । कविः स्वयं भगवन्तौ गौरीगिरीश्वरौ[56] नित्यप्रकाशौ मत्वा वन्दते । एतेन

---

54. हरिकेलिमहाकाव्यस्य सप्तदशसर्गस्य क्रमशः १०, ११, १२ ,१३, १८, २१, २२, २३, २५, २७, २८, ३०, ४३, ४९, ५०, ५२, ६३, संख्यकेषु पद्येषु ।

55. १) कविकृता गौरीगिरीश्वरस्तुतिः (प्रथमसर्गे),२) वसुदेवकृता बालकृष्णस्तुतिः (प्रथमसर्गे),३) यक्षयुग्मविहिता कृष्णस्तुतिः (द्वितीयसर्गे),४) अन्धविप्रकृता कृष्णस्तुतिः (तृतीयसर्गे),५) नागिनीगणकृता कृष्णस्तुतिः (पञ्चमसर्गे), ६) ब्रह्मकृता कृष्णस्तुतिः (षष्ठसर्गे) ७) इन्द्रकृता कृष्णस्तुतिः (सप्तमसर्गे), ८) गोपीजनकृता कृष्णस्तुतिः (त्रयोदशसर्गे),९) अक्रूरकृता कृष्णस्तुतिः (पञ्चदशसर्गे),१०) कंसकृता नारदस्तुतिः (पञ्चदशसर्गे) विलसन्ति ।

56. "वन्दे सन्देहसन्देहदूरीकरणभारवी ।
नित्यप्रकाशौ जगतो गुरू गौरीगिरीश्वरौ ॥" ह.के., १।१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्तिशिवयोः स्वप्रकाशधर्मिता कविना भक्तिभावनयाऽनुभूतेति विषयः संस्फुटः । यदुशिरोमणिर्वसुदेवः[57] सद्यो लब्धजन्मानं भगवन्तं त्रिदेवरूपं परमेश्वरं मत्वा सर्वत्र तदीयामाकृतिं प्रकृतिञ्च विलोकयति । नलकूबरमणिग्रीवौ[58] भगवदङ्गसङ्गो वासनाहतानामपि चिन्तामणिरेवेति विभावयतः । लब्धज्ञाननेत्रः[59] प्राप्तचर्मचक्षुष्कश्च कश्चनान्धो विप्रो भगवन्तं कृष्णचन्द्रं मित्रानन्दक- भक्तपालक- शरणागतसन्तापहारक- पतितपावनादिभिः कार्यानुसारिभिरधानैर्गीयमानचरितं मत्वा भावविह्वलः सन् जगत्प्रपञ्चमेव भगवदङ्गत्वेन सम्भावयति । भर्तृभिक्षां कामयमानो[60] नागिनीनां गणः सदसतोरपि परतमायां स्थितौ दिव्ये धाम्नि विराजमानं सर्वदेवरूपं योगीश्वरं भगवन्तमार्तभावेन स्तौति । ब्रह्मा[61] श्रीकृष्णं योगमायेश्वरं विश्वम्भरञ्च मनुते । इन्द्रस्तु[62] पितृभावेन तमेव शरणं गच्छति । मेधाराधावृन्दादया[63] दश गोप्यो नन्दनन्दनं भगवन्तं करुणावरुणालयं मत्वा स्वानि स्वानि हृदयानि समर्पयन्ति । [64]भक्तशिरोमणिरक्रूरो धर्मावतारं मत्वा योगमायेश्वरं जगन्नाट्यसूत्रधारं भगवन्तं स्तौति । कंसस्तु[65] राजभवनेऽभ्यागतरूपेण सम्प्राप्तं देवर्षिं परमगुरुत्वेन सम्भावयति । ताभ्यस्ताभ्यः स्तुतिभ्यः खण्डशो गृहीता इमे भावा हृदयसमर्पणेनाराध्यस्याराधनाया महनीयां महीयसीञ्च परम्परां पुरस्कृत्य कविहृदयस्य निष्कल्मषां सच्चिदानन्दकिर्मीरितां पावनाञ्चावस्थां प्रत्याययन्ति ।

७.१० सूक्तिकाव्यसमीक्षणम्

हरिकेलौ वर्ण्यविषयपरिपोषाय सहृदयहृदयतोषाय च मूल्यभाञ्जि नीतिनवनीतानीव सूक्तिसुन्दराणि वाक्यानि कविना पुरस्कृतानि । इह सवर्गीकरणं तानि समीक्ष्यन्ते ।

---

57. "हरिः पाता हरो हर्ता कर्ता च कमलासनः ।
जना जल्पन्तु जगतां वस्तुतस्तु त्वमेव ते ॥" तत्रैव, १।२३।

58. "प्राप्ताः स्वरूपं भवदङ्गसङ्गादङ्गारदाहं परिहृत्य देहम् ।
नमो नमस्ते भगवन्निदानीं प्रसाधयामो निजराजधानीम् ॥" तत्रैव, २।५५।

59. "मित्रानन्दक भक्तपाल शरणापन्नार्तिहारिन्निति
व्यक्तं कोऽपि भवामि तेषु न हरे जिहेमि जल्पन्नतः ।
श्रुत्वाजामिलपद्धतिं परमया किन्त्वाशया चिन्तयन्
एकं त्वां पतितस्य पावनमतो हृष्यामि तुष्यामि च ॥" तत्रैव, ३।५७

60. "त्वं हरिस्त्वं हरस्त्वं विधिर्वासवस्त्वामृते किञ्चिदप्यस्ति नासच्च सत् ।
त्वद्गुणोदीरणे का वयं योषितः केन मूकायते यत्र योगीश्वरः ॥" तत्रैव, ७।६५ ।

61. "जयजयाजितनिर्जितदानव सकलमानवदेवगणावन ।
तव पदाय सदा मम भो नमः पुनरमुष्य विशिष्य कृतागसः ॥" तत्रैव, ६।२९ ।

62. "यत्कृतं कदनमत्र गोकुले तन्मम क्षममुपेक्षितुं प्रभो ।
पुत्रपादपतनं तनौ पितुः प्रीतये न कुपिताय कर्हिचित् ॥", तत्रैव, ७।८ ।

63. "दीने जने सकरुणोऽसि गुणाकरोऽसि
लोकातिगप्रथितपौरुषभूषणोऽसि ।
श्रीनन्दनन्दन कलिन्दसुता प्रवाह-
पारं प्रणीय कुरु नः परिपूर्णकामाः ॥" तत्रैव, १३।१७ ।

64. "असतां लवनाय यत्सतामवनायावतरद् युगे युगे ।
व्यवहारपयोपदेशकः प्रणमामस्तममानवं नवम् ", तत्रैव, १५।४२ ।

65. "भ्रमता भुवने सह त्वया क्षणसङ्गोऽपि तमोपहः सताम् ।
जलधाविव यानवाहिनां बहुमूल्यस्य मणेरुपागमः ॥" तत्रैव, १५।११।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(क) सज्जनसौजन्यसूचकानि सूक्तिवाक्यानि -

दयाधनानां सज्जनानां महिमगानपराणि निम्ननिर्दिष्टानि सूक्तिवाक्यानि मानवहृदयेषूदात्त-भावप्रतिष्ठापनविधौ साहाय्यमाचरन्ति । यथा-

१- अहो महद्‌भिर्विहितो हि निग्रहोऽप्यनुग्रहो दुष्टनरस्य जायते । (४।३८)
२- दयालुता खेदयते महान्तम् । (२।४९)
३- दयालुता कं न वशीकरोति । (३।६२)
४- यत्सतां निग्रहोऽनुग्रहानन्तरः । (५।५८)
५- सदयोदयो भवति को न महान् । (९।४३)

(ख) जीवननीतिनिर्देशकानि सूक्तिवाक्यानि -

मानवैर्निजनिजासु जीवनयात्रासु पालनीयां व्यवहारसरणिमङ्गीकरणीयां विचारसरणिञ्च पुरस्कुर्वन्ति निर्दिश्यमानानि सूक्तिवाक्यानि । यथा-

१- अतिप्रकर्षे महतो हि मानः । (३।५५)
२- कः क्षीणं भजति जनं जहाति को वा
संपन्नं धनमभिलाषुकः सचेता : ।(५।१४)
३- गुणग्राही प्रायो न पदमपदं वा गणयति । (११।१६)
४- न कस्य सम्पाति परापराधकलङ्कपङ्कस्य मृजासु चेतः । (३।५१)
५- निहतो निजकर्मणैव पापः सुकृती च सुकृतेन शर्म लेभे । (२।२३)
६- पराभियोगं सहते हि को बली । (४।४८)
७- परा हि सौहृद्यभरस्य हृद्यता सहोपभोगे सति सम्पदापदोः । (४।३५)
८- पापासक्तस्य का कृपा । (१।५६)
९- प्रायेण तृष्णातरलीकृतस्य महानपि स्वल्पतरोऽर्थलाभः । (२।४८)
१०- पुत्रपादपतनं तनौ पितुः प्रीतये न कुपिताय कर्हिचित् । (७।८)
११- महौषधे तिष्ठति देहिनां तनौ गदैरवस्थातुमलं न भूयते ।(४।७)
१२- मुञ्चन्ति वाचमुचितां न कदापि धीराः । (१३।३२)
१३- विलोकिते वस्तुनि यत् पुरस्थे
न पृच्छ्यते तुच्छधियापि साक्षी । (३।३८)
१४- रूपं विपर्य्येति हि सङ्गदोषात्
सचेतनानामपि किं जडानाम् । (१२।१९)
१५- सम्भाविताय गमनं न कदापि धीमान्
कर्मारमेत पुनरल्पफलं विशिष्य । (१३।२०)
१६- स्ववर्णधर्माश्रयणं श्रियः पदम् । (४।२)।

(ग) रतिमहिमव्यञ्जकानि यौवनप्रतापप्रकाशकानि च सूक्तिवाक्यानि-

सर्वमेव जीवजातं वासनासञ्चालितं प्रेमाश्रितञ्च वर्तते । रतिरागेणानाविद्धस्य महापुरुषस्य दर्शनं भुवि दुर्लभं नूनम् । रतेः समुचितो मर्यादितश्चोपयोगो जीवनं कृतकृत्यं सन्तृप्तं च विदधाति, दुरुपयोगस्तु जीवनस्य दुर्गतिमेव कारयति नूनम् । अनेकैः सूक्तिवाक्यैरीदृशं किमपि सूच्यते । यथा-

१- अहह विरहनामा दारुणो वज्रपातः । (१४।१९)
२- क्व धीरता वैरिणि पञ्चबाणे । (१४।४३)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३- खलोक्तिः सोढव्या न पुनरतनुव्याधविहतिः (११।४०)
४- नित्यनूतनतमा रतिलिप्सा । (८।४०)
५- प्रमाथी पापानां प्रतिनिधिरयं बन्धुविरहः । (११।३२)
६- प्राणेशः पिबति प्रियाधरमधु प्राक्पुण्यसम्भारतः । (१४।४०)
७- प्रियाः प्रियाणां हि विहारकाले
कांक्षन्ति वैयात्यविजृम्भितानि । (१०।३७)
८- विशति हि प्रकृतिं पुरुषो गुणैः (६।१३)
९- शोभातिरेको हि विवेकनाशे ।
बीजं विशेषेण मलीमसानाम् ॥ (१२।१३)

(घ) विधिविधानबोधकानि सूक्तिवाक्यानि -

नियतिनियमाधीनं जगतां जीवनम् । इह कदा किं घटत इति वेत्तुं प्रायः समर्था न सन्ति जना भूमितले । निग्रतिसहयोगिनः कर्मकालादयो मानवजीवनं संचालयन्तीत्यादि वस्तुजातं सूचयन्तीमानि सूक्तिवाक्यानि । यथा-

१- आर्य्यस्यापि विपर्य्येति कार्य्यरूपसनाविलम् । (१।३४)
२- उपचितोऽपचितो भवति ध्रुवम् । (६।३५)
३- कैर्वा न व्यथयति विप्रियो विधाता । (५।२१)
४- भवतु विधिविधानं बाधितुं कः समर्थः । (१४।३)
५- विघटयति विधत्ते किन्न किन्नेह कालः । (१४।१८)

(ङ) ईश्वरमहिमव्यञ्जकानि सूक्तिवाक्यानि -

संसारसाम्राज्यस्य सञ्चालकः कश्चनातिमानवविशेष एवेति तथ्यन्तु प्रायो विश्वाधिवासिनो बुद्धिजीविनो जानन्ति । स्वस्वसम्प्रदायानुसारेण तदुपासनाचिन्तनादिकर्मसु निरतैर्जनैर्भिन्नैरभिधानैरभिधीयमानोऽपि स वस्तुत एक एव । तस्य सम्प्रभुता सर्वप्रभुतामतिशेते । इह तदीयं वैलक्षण्यं विभिन्नैर्वाक्यैः सूचितमस्ति । यथा-

१- किम्वा न लोकोतरमुत्तमानाम् । (३।३२)
२- जगति हि किमसाध्यं योगमायेश्वरस्य । (१४।५५)
३- न खलु प्रभुः क्वचन भक्तजने
श्वसितावसादि कदनं कुरुते । (९।३)
४- न दुर्लभं दुर्लभमीश्वराश्रये
नृणां हि किञ्चित् सुलभन्तु किम्पुनः । (४।४७)
५- सवितुरतिविकारेऽप्यादरः कस्य न स्यात् । (१४।२) ।

अस्मिन् सूक्तिवाक्यसमीक्षाक्रमे समीक्षितानि काव्यमयानि कवेरनुभवैः संपृक्तानि सूक्तिवचनानि वस्तुतः कविस्वभावव्यञ्जकानि । वंशमणिर्चिन्तनस्य यां कोटिमङ्गीचकार साऽत्र विवृता । अनया तस्य ज्ञानगहना शुक्लैः कर्मभिः पावना च जीवनसरणिः प्रमाणिता भवति । यतो हि तस्य हृदयतो निर्गलितानीमानि वाक्यानि यथार्थां जीवनकलामाकलयन्ति, महापुरुषचरितं समर्चयन्ति, जनान् पापाचरणान्निवारयन्ति, करुणामहिमानं कीर्तयन्ति, कामाख्यस्य पुरुषार्थस्य सदुपयोगमुपदिशन्ति, विश्वनियन्तुर्विलक्षणतां वरेण्यतां च विभावयन्तीति सार्वकालिकं सार्वदेशिकञ्च महत्त्वमेषां सूक्तिवाक्यानां नूनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७.११ प्रकृतिसौन्दर्यम्

हरिकेलौ कविना प्रकृतेरालम्बनोद्दीपनमयं स्वरूपद्वयमेव हृदयहारितया साक्षात्कृतम् । उद्दीपनमयं तस्याः सुन्दरं स्वरूपं सर्गसारप्रकरणेऽस्माभिर्निर्दिष्टमेव[66] । आलम्बनरूपायाः प्रकृतेर्यत् सौन्दर्यमुद्भावितं कविना तन्नितान्तमेव रोचकमस्ति हरिकेलौ । महाकविपरम्परायां विहाय कालिदासं नेदृशं प्रकृतेर्मानवीकृतं रूपं केनापि साक्षात्कृतम् । विशेषतः समासोक्तिमवलम्ब्य कविनाऽऽलम्बनरूपायाः प्रकृतेर्यादृशी छविरवतारिता सा चाऽन्यत्र दुर्लभा । इह प्रथमं प्रकृतेरुद्दीपनरूपमेकं पद्यं दिग्दर्शनाय निवेद्यालम्बनमयं स्वरूपं निरूपयिष्यते ।

(क) उद्दीपनात्मिका प्रकृतिः-

[67]"वल्लीषु वल्लीषु सुगन्धि पुष्पम्
पुष्पेषु पुष्पेषु च यत्र भृङ्गाः ।
भृङ्गे च भृङ्गे कलकूजितानि
जितानि यैरात्मभुवो जगन्ति ॥"

अत्र वृन्दावनवर्णनविधौ कविना वृन्दावनस्य कुसुमसमृद्धिं सूचयता मधुकरझङ्कारस्योद्दीपनात्मा स्वभावश्चारु चित्रितः ।

(ख) आलम्बनरूपा प्रकृतिः

यमुना व्रजवासिनां वृन्दावनागमनेऽतिथिपूजनं चकारेति वर्णयता कविनोदीरितम्-

[68]"सम्पाद्य पाद्यादिजलं निवेद्य फलानि वृन्दावनजानि तेषाम् ।
मधूनि धृत्वा मधुपर्क्कमर्क्कपुत्रीचकारातिथिपूजनानि ॥"

अत्र कविना यमुना काचन साध्वी मानवीव चित्रिता ।

कान्तेव कान्तदर्शने मयूरमाला कृष्णदर्शने सति केकारावैर्वातावरणं गुञ्जयन्ती भृशं ननर्तेति निरूपयन् कविः कथयति-

[69]"अमुं घनश्याममलमीक्षमाणया वितत्य बर्हाणि मयूरमालया ।
प्रसन्नषड्जस्वनभिन्नकेकया तरौ तरौ नृत्यमकारि नैकया ॥"

अत्र कविना नृत्यन्ती काचन युवतिपङ्क्तिरिव मयूरपङ्क्तिर्निरूपिता । वर्षाकालं वर्णयता कविना प्रकृतेर्मानवीकृतं स्वरूपमित्थमुद्भावितम्-

[70]"स्फुटपयोधरधारभृतो दिशः समभवन् सरितोऽपि रजस्वलाः ।
इति किमु त्रपया कमलापतिर्विधुरवी नयने सममीलयत् ॥"

अत्र दिशां सरिताञ्च युवतिधर्मता प्रतिभावैलक्षण्येन कविना विवृता । शरत्सौन्दर्यमाविष्कुर्वता कविना समुदीरितम्-

[71]"निर्मलेन्दुरभिरामतारका तारकान्तिहसिता सिताम्बरा ।

---

66. "हरिकेलिमहाकाव्यस्य विषयवस्तुपरिशीलनम्" इति मूलशीर्षकान्तर्गते "सर्गसारः" इत्युपशीर्षके प्रतिसर्गस्थविषयवस्तुविवरणक्रमे क्रमशो वृन्दावन- ग्रीष्म- दावाग्नि- वर्षा- शरत्- शिशिर- वसन्त- सूर्योदय- सूर्यास्त- ध्वान्त- चन्द्रोदयप्रभृतीनि प्रकृत्यङ्गानि निरूपितानि ।
67. ह.के., ३।६ ।
68. तत्रैव, ३।१७ ।
69. तत्रैव, ४।८ ।
70. तत्रैव, ६।३७ ।
71. तत्रैव, ७।४१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शारदी विरुरुचे विभावरी मारदीप्तिरसिकेव नागरी ॥"

अत्राभिसारायोत्सुका काचन नागरीव शारदी विभावरी कविना मानवीकृता नितरां हृदयमावर्जयति। दिगङ्गनानां हावभावादिकं निरूपयत् कविर्ब्रूते-

72"अम्बुदालिकलुषीकृताः पुनः प्रापिताश्च शरदा प्रसन्नताम् ।
खञ्जरीटनयनान्यपातयन् भर्तरीव गगने दिगङ्गनाः ॥"

अत्र कटाक्षकुशलानां युवतीनामिव दिगङ्गनानां प्रगल्भाचरितं कविना ससौन्दर्यमुद्भावितम् । तत्रैव नदीनां सौन्दर्यं निरूपयन् कविः तासु समलङ्कृतानां पतिगृहगामिनीनां रमणीनां दर्शनं कुरुते । यथा-

73"आपगाः स्फुरितसैकताम्बरा हंसराजिरसनाः कलस्वनाः ।
स्वं पतिं शुचिरसेन भेजिरे योषितोऽभिनवयौवना इव ॥"

वसन्तवर्णनविधौ प्रेमाकुलस्य तरुणस्येव भृङ्गस्य चरितं निर्दिशन् कविः कथयति-

74"निरानन्दः कुन्दे विकसदरविन्देऽपि विमुखो
न वासन्तीवासे रसवति विलासे न वलते ।
लतास्तास्ता हित्वा बहु विहरति त्वामहमिव
स्थिरप्रेमा भृङ्गो लवमिह लवङ्गीमुपगतः ॥"

अत्र भृङ्गस्य नायकचरितं कविना साधूपात्तम् । समीरस्य विटचरितं निरूपयता कविनोदीरितम्-

75"लवङ्गीमालिङ्गत्युपचरति यूथीमवितथम्
गतायातैरुल्लासयति लवलीवल्लिमवलाम् ।
चिरं चुम्बत्येलां मलयवनवेलासहचरः
समीरो दाक्षिण्यं प्रकटयति कामीव कुतुकैः ॥"

इह समीरे कामुकस्य स्वरूपं विलोकयता कविना मानवेतरप्राणिषु मानवव्यवहारस्यापूर्वा नैपुणी निरूपिता । पुनर्नायिकेनालिङ्गितां मुग्धां नायिकामिव तरुणा परीरब्धां वासन्तीलतां वर्णयन् कविः कथयति -

76"मरन्दप्रस्वेदा विपुलमुकुलाकारपुलका
नकारं कुर्वाणा मधुकरवधूमन्दरसितैः ।
परीरब्धा गाढं तरुतरुणकान्तेन तरुणी
त्रसन्ती वासन्ती किसलयकरं कम्पयति किम् ॥"

अत्र वासन्ती वल्ली कविना मानवीकृता नितरां रञ्जयति मानसम् । यामिनीं कामिनीरूपेण निरूपयन् कविः कथयति-

77"मुखं मृगाङ्कस्तिलकानि तारा धम्मिल्लभारो निबिडान्धकाराः ।
शोकाय कोकस्य जनी रजन्या सिन्दूरबिन्दू रविरुत्सवाय ॥"

इह मानवीकृता रजनी शृङ्गारचमत्कृता तिलकाचिता निबिडवेणीबन्धा सस्मितवदना सीमन्तिनीव नितरां हृदयमावर्जयति सहृदयानाम् । व्रजवनितानां यमुनाजलविहारविधौ जलानामपि कामिभावं विशदीकुर्वन् कविः कथयति -

---

72. तत्रैव, ७४२ ।
73. तत्रैव, ७४३ ।
74. तत्रैव, ११।८ ।
75. तत्रैव, ११।६ ।
76. तत्रैव, ११।१० ।
77. तत्रैव, १२।८ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

78"आश्लेषदानैस्तरुणीजनानां पृथुस्तनाभोगविमर्दनेन ।
तरङ्गसंसूचितरोमहर्षैर्जातं जलानामपि कामिभावैः ॥"

अत्र कविः, मानवस्वभावसंवादितया जलस्यापि कामुकं स्वरूपं निरूप्य प्रकृतेर्मानवीकरणस्यापूर्वां छटामाविर्भावयामास । तरूणां भुजङ्गत्वं निरूपयता कविनोदीरितम् -

79"कुचौ लिखन्तः कचमामृशन्तः श्रोणीतलादम्बरमाहरन्तः ।
आश्लिष्य शाखाभुजया भुजङ्गाः तदा वधूनां तरवो बभूवुः ।"

इह कविना कामुकरूपेण चित्रितास्तरवस्ताभिः कविप्रतिभोपात्ताभिर्विलासचेष्टाभिर्मानुषरूपसमलङ्कृताः तरुणा इव प्रतीयन्ते ।

एतावता, प्रकृतेरालम्बनरूपचित्रणे वंशमणेर्नास्ति प्रतिमानमिति कथने न स्यात् काचन विसङ्गतिः ।

७.१२ समष्टिगतं काव्यसौन्दर्यम्

अमृतवर्षिभिर्ललित-ललितैः सुपेशलैश्च पदैः, सहृदयहृदयभृङ्गारिभिरतिगंभीरैरर्थैः, सङ्गीतधर्मिभिः कलात्मकैर्वृत्तैः, स्वतः समुद्भूतैश्चमत्कृतिप्रवणैरलङ्कारैः, रसानुकूलैर्गुणैः, रचनानुकूलाभिः पदसंघटनाभिः, पूर्णपरिपाकमाप्तैः श्रृङ्गारादिरसैः, भव्यैर्भावसम्पोषैः, विलक्षणाभिः कल्पनाभिः, विचित्रैश्चित्रालङ्कारैः, दर्शनगहनाभिः परमेश्वरपदयोरात्मसमर्पणप्रयोजनेन निर्गलिताभिर्निश्छलाभिः प्रसन्नाभिश्च स्तुतिभिः, अनुभूतिगर्भाभिरुदात्तभावसञ्चारसमर्थाभिः, सूक्तिभिः, हृदयहारितया कल्पनातूलिकया चित्रिताभिः प्रकृतिछटाभिश्च नितान्मेवोतप्रोतं नेपालमातुः सुपुत्रेण सरस्वत्या वरदपुत्रेण महाकविवंशमणिना महाकविना वंशमणिना प्रणीतमिदं हरिकेलिमहाकाव्यं कृष्णकाव्यपरम्परायां अद्वितीयं रत्नं संस्कृतमहाकाव्यपरम्परायां विशिष्टमवदानं नेपाले प्रणीतेषु सर्वभाषिकेषु महाकाव्येषु प्रथमं नैपालेः संस्कृतकविभिर्निर्मितेषु संस्कृतमहाकाव्येषु ज्येष्ठं श्रेष्ठं च वर्तते ।

काव्यकलादृष्ट्या सर्वातिशायि मङ्गलमयमुदात्तभावसम्प्रेषणसमर्थं सर्वकालनमस्यं सार्वदेशिकसहृदयसमुदायप्रशस्यञ्चेदं महाकाव्यं संस्कृतवाङ्मयवाटिकायाः पतत्परागमम्लानं पारिजातपुष्पमेवास्तीति निष्कृष्यते ।

☆

78. तत्रैव, १२।२१ ।
79. तत्रैव, १०।२७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८. हरिकेलिमहाकाव्ये शास्त्रव्युत्पत्तिः

विश्वव्यापि ज्ञानसाम्राज्यं यस्या विषयक्षेत्रं तस्या व्युत्पत्तेर्महिमाऽवर्णनीयो नूनम् । प्राचीनसमयत एव संस्कृतवाङ्मये श्रुतिस्मृतिपुराणेतिहासवेदाङ्गदर्शनराजशास्त्रार्थशास्त्र-कामशास्त्रायुर्विज्ञानगान्धर्वविज्ञानधातुवादादयो विषया व्युत्पत्तिवेद्यत्वेन परिगणिता विद्याविद्योतितान्तःकरणैर्विद्वज्जनैः[1] ।

वंशमणिना हरिकेलिमहाकाव्यमिदं व्युत्पत्तिसमेधितया प्रतिभयाऽऽविष्कृतम् । अत एव स स्वयं तत्र निजनिर्मितस्य महाकाव्यस्य भव्यतां निरूप्य स्वव्युत्पत्तेर्व्यापकतां निर्दिदेश । इह हरिकेलौ व्युत्पन्नानां वेदवेदाङ्गादिविषयाणां संक्षेपेण समीक्षार्थं प्रवर्त्यते ।

८. १. वेदव्युत्पत्तिः

हरिकेलावनेकधा वेदस्योल्लेखो जातः । कविरघमर्षणपदं[2] प्रयुक्तवान् । अघमर्षणञ्च[3] ऋग्वेदीयं सूक्तमस्ति । तस्य ऋषिश्च मधुच्छन्दसः पुत्रोऽघमर्षणोऽस्ति । श्रुतिभिर्नारायणः[4] पुरुषोत्तमसंज्ञया संस्तुत इति हरिकेलौ व्यपदेशः । शुक्लयजुर्वेदसंहितायाः पूरुषसूक्ते तमेव नारायणं विदित्वा मानवो मृत्युं[5] विजयत इति निर्देशः । [6]द्रुपदाऽभिमन्त्रितं वारि हरिकेलौ पावनवस्तुतयोद्दिष्टम् । यज्ञीयजलस्याघनाशकत्वं[7] वेदे निर्दिष्टमस्ति । श्रुतिर्हरिकेलौ नान्दीरूपेण[8] कीर्तिता । श्रुतेर्मङ्गलमयत्वं निगमागमनिर्णीतं तथ्यम् । श्रुतिमृग्यस्य भगवतश्चर्चा[9] हरिकेलौ निर्वृता । वस्तुत उपनिषदस्तस्यैव परमात्मनः स्वरूपमावेद्य तत्प्राप्तिद्वारं सूचयन्तीति विषयो न तिरोहितो विदुषाम् । संसारसागरसन्तरणाय[10] तरिरूपो विष्णुरिति हरिकेलौ निरूपितम् । उपनिषत्स्वपि तदेव

---

1. (क) महान् हि शब्दस्य प्रयोगविषयः -सप्तद्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः साङ्गाः सरहस्या बहुधा विभिन्नाः, एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिर्वाह्वृच्यम्, नवधाथर्वणो वेदः, वाकोवाक्यम्, इतिहासः, पुराणं, वैद्यकम्, इत्येतावान् शब्दस्य प्रयोगविषयः ।
   - पातञ्जलमहाभाष्यस्य पस्पशाह्निके ।
   (ख) न स शब्दो न तद्वाच्यं न स न्यायो न सा कला ।
   जायते यन्न काव्याङ्गमहो भारो महान् कवेः ॥ भामहः, काव्यालङ्कारे ५।४।
2. " महदाश्रयणं श्रियः पतेः पतिताघप्रकराघमर्षणम् ।
   रुचिरं चरणाम्बुजं भजे भजतामप्रतिबन्धमङ्गलम् ॥ ह.के. १५।४१ ।
3. "ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत । ऋग्वेदे, १०।१९०।१।
4. "श्रुतिभिरप्यत एव निगद्यसे लिखितपूज्यतमः पुरुषोत्तमः । ह.के. ६।३१।
5. " तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय । शु.य.सं. ३१।१८।
6. "द्वयमेतदघापहं नृणां द्रुपदा वारि तवांघ्रिजं रजः । ह.के. १५।१२।
7. द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव ।
   पूतं पवित्रेणैवाज्यमापः शुन्धन्तु मैनसः ॥ शु.य.सं., २०।२०।
8. इह संसृतिनाट्यमीहते श्रुतिनान्दीनिगदेन यत् स्वयम् ।
   स्वयमेव निरीक्षते च यः प्रकटं तं नटमीशमाश्रये ॥ ह.के. १५।४३।
9. (क) नवनीरदनीलमद्भुतं श्रुतिमृग्यं मम धाम धास्यति । तत्रैव, १५।४४।
   (ख) कः प्रत्येतु प्रथयतु च को धाम तत्सामगम्यम् । तत्रैव, १।६५।
10. संसारसिन्धुतरणे तरणिस्तवैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वस्तु बहुधा कीर्तितमस्ति[11] । हरिकेलौ श्रीकृष्णोऽजरूपेण संस्तुत:[12] । कठोपनिषदि[13] परमात्माऽजनाम्ना व्यपदिष्ट: । हरिकेलौ वेदा:[14] परमात्मनो निरुक्तमिति निरुक्तिर्जाता । [15]बृहदारण्यकेऽपि वेदानां ब्रह्मणो निश्वासरूपत्वं निर्दिष्टम् । स्थालीपुलाकन्यायेन हरिकेलिमहाकाव्यादुद्धृतानीमानि वेदसंबद्धानि वचनानि वंशमणेर्वेदविषयकं प्रौढं ज्ञानं प्रत्याययन्ति ।

८. २ वेदाङ्गव्युत्पत्ति:

(क) ज्यौतिषम्

हरिकेलौ कृष्णावतरणनिरूपणविधौ फलितज्यौतिषस्य केचन विषया: कविना सङ्केतिता: । श्रीकृष्णस्य जन्मकुण्डल्या:[16] प्रथमभावे सर्वेषामेव ग्रहाणां दृष्टिर्निरूपिता हरिकेलौ । सर्वग्रहाणां प्रथमभावे दृष्टौ सत्यां जातकस्य प्रतापशालित्वं भाग्यशालित्वञ्च ज्यौतिषशास्त्रस्य प्रसिद्धो विषय: । सूर्यस्य[17] सिंहराशौ सत्ता सूचिता । भाद्रमासे सूर्य: सिंहराशौ प्राप्नोतीति ज्यौतिषस्य निश्चितो नियम: । कवि: कृष्णकुण्डल्यां चन्द्रमस[18] उच्चां स्थितिं निरूपयामास । रोहिणीनक्षत्रे जातस्य चन्द्रमा[19] उच्चो बहुफलदायी च भवतीति ज्यौतिषशास्त्रसम्मतं तथ्यम् । [20]मनसश्चन्द्रेणात्मीय: संबन्धो हरिकेलौ निर्दिष्ट: । चन्द्रस्योत्पत्ति:[21] परमात्मनो मनसो जातेति तथ्यं वेद एव निरूपितम् । इत्थं निर्दिष्टैरेभिरुदाहरणैर्वंशमणेज्यौतिषशास्त्रज्ञानं प्रमाणितं भवति ।

चिन्ता सतामिति वदन्ति हि वेदवादा: । तत्रैव, १३।३५।

11. आदि: स संयोगनिमित्तहेतु:
परस्त्रिकालादकलोऽपि दृष्ट: ।
तं विश्वरूपं भवभूतमीड्यम्
देवं स्वचित्तस्थमुपास्य पूर्वम् ॥ श्वेताश्वतरोपनिषदि, ६।५।

12. अजोऽपि जायते देवश्चित्रमत्रेति कौतुकात् । ह.के. १।१२।

13. अजो नित्य: शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे । कठोपनिषदि, १।२।१८।

14. वेदा निरुक्तं पदवारि गङ्गा देव त्वदङ्गानि जगत्प्रपञ्च: । ह.के. ३।६०।

15. अरेऽस्य महतो भूतस्य निश्वसितमेतद् ऋग्वेदो यजुर्वेद: सामवेदोऽथर्वाङ्गिरस: ....।
बृहदारण्यकोपनिषदि, ४।५।११।

16. "तज्जन्मलग्नं ददृशे समस्तैरपि किञ्चग्रहै: । ह.के. १।१२।

17. पुरा परभयादेव देवो निजगृहं जहौ ।
अध्युवास किमत्रास: पुनस्तद्वासरप्रभु: ॥ तत्रैव, १।१३

18. योगिनामप्यगम्योऽसौ गम्यो भवतु तक्षुषो: ।
इत्युत्सुकतया किं स्विदिन्दुरुच्चस्थले स्थित: । तत्रैव, १।१४।

19. वृषे सेन्दौ लग्ने सवितृगुरुतीक्ष्णांशुतनयै:
सुहृज्जायाखस्थैर्भवति नियमान् मानवपति: ।
अच्युतानन्दझा, (टीकाकार:), बृहज्जातके । ११।६,
चौखम्भा अमर भारती प्रकाशन, वाराणसी, च.सं., ई. १९८१।

20. विधिं याचे नत्वा मम सखि शरीराद् विगलितम्
मनो युक्त्वा चन्द्रं विशतु मुखचन्द्रं मधुरिपो: । ह.के. ११।३४।

21. चन्द्रमा मनसो जातश्चक्षो: सूर्योऽजायत । शु.य.सं., ३१।२२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(ख) व्याकरणम्

हरिकेलिमहाकाव्ये[22] शब्दशास्त्राभिधानेन व्याकरणं व्यपदिष्टम् । महाभाष्येऽपि शब्दशास्त्रापरपर्यायं "शब्दानुशासनम्"[23] इति नाम पतञ्जलिना निरूपितमस्ति । हरिकेलिमहाकाव्येऽनुबन्धलोपस्य[24] चर्चा जाता। अनुबन्धा [25]व्याकरणशास्त्र एकान्तानेकान्तभेदाभ्यां विवेचिता: । ते चेत्संज्ञका एव भवन्ति । तेषां लोपस्य[26] विषयो व्याकरणे नितरां प्रथित: । हरिकेलौ वर्णस्य स्थाने मात्राया[27] आदेश: सङ्केतित: । व्याकरणे[28] मात्रा आदिश्यन्ते । हरिकेलिमहाकाव्यं सुबन्ततिङन्तपदानां प्रत्ययानां समासानां कारकाणां च साधुप्रयोगद्वारा वंशमणिना विशिष्टया वैदुष्या प्रणीतं ग्रन्थरत्नमस्ति । सुबन्तप्रयोगस्य विषयस्तु ख्यात एव । तिङन्तप्रयोगजन्यं माधुर्यमिह दिग्दर्शनाय निरूप्यते । एकस्मिन् पद्ये सदकारि,[29] अनावि, उदगायि चेति क्रियापदानि सानुप्रासमुपस्थापितानि । अन्यस्मिन्[30] पद्ये, अजाहसीत्, अरारसीत् , अचर्क्करीत्, अनरीनरीच्चेति क्रियापदानि क्रियासमभिहारेणोपस्थाप्य कविना काव्यकलासौन्दर्यां व्याकरणस्य वैदुषी विनिवेशिता । क्वचन[31] परित्यक्ता, परिहृता, कृता, गणिता, इत्यादिपदानि सहैव प्रयुज्य कविना निष्ठायां निर्दिष्टस्य क्तप्रत्ययस्य माधुर्यमुपस्थापितम् । अपरत्र [32]मग्न-श्रित-बद्ध-पदानां यौगपद्येन सङ्कीर्तनेन लालित्यमाविष्कृतं कविना । एकस्मिन् पद्ये काव्यसौन्दर्यसंवर्धनपुर:सरं लिखन्त:,[33] आमृशन्त:,

---

22. एकस्त्वशब्दायत शब्दशास्त्रपदावलीनामनुबन्धलोप: । ह.के. १६।७
23. "अथ शब्दानुशासनम्" (पतञ्जलिकृतस्य व्याकरणमहाभाष्यस्य वस्तुनिर्देशात्मकं मङ्गलवचनम्) तत्रैवोक्तं "लौकिकानां वैदिकानां शब्दानामनुशासनं शब्दानुशासनमिति" ।
    अनुवादक:, चारुदेवशास्त्री, व्याकरणमहाभाष्यम्, मोतीलाल बनारसीदास, वाराणसी, पुनर्मुद्रणम्, ई. १९८४ पृ. ४ ।
24. पदावलीनामनुबन्धलोप:, । ह.के. १६।७
25. (क) इत्संज्ञका अनुबन्धास्तेष्ववयवानवयवत्वसन्देह आह - अनेकान्ता अनुबन्धा इति ।४। व्याख्याकार:, आचार्यविश्वनाथ:, परिभाषेन्दुशेखर: चौखम्भा सुरभारती प्रकाशन, वाराणसी, द्वि.सं. ई. १९९०, पृ.१९।
    (ख) वस्तुतस्तु एकान्ता: ।५। पूर्ववत्, पृ.२५ ।
26. (क) अष्टाध्याय्याम्, उपदेशेऽजनुनासिक इत् ।१।३।२।
    (ख) तत्रैव, तस्य लोप: ।१।३।९।
27. तामेव तनयस्थाने वर्णे मात्रामिवादिशत् । ह.के. १।५१।
28. सर्वव्याकरणसिद्धो विषय: ।
29. तदा बकारि: सदकारि दैवतै-
    रुदारमन्दारजपुष्पवृष्टिभि: ।
    जयारवै: सम्यगनावि मानवै-
    रमानवैरप्युदगायि गायनै: ॥ ह.के. ४।२४।
30. सुरानुकृत्या वयसामरारसीत् समं वयस्यै रभसादजाहसीत् ।
    कदाचिदेभि: क्रमणीमचर्क्करीदभीष्टलाभादनरीनरीदपि ॥ तत्रैव, ४।१७ ।
31. परित्यक्ता नीति: कुलविमलरीति: परिहृता
    कृतावज्ञा पत्यौ गुरुजनगिरो नापि गणिता: । तत्रैव, ११।४०।
32. मग्न एव मनसि श्रित: श्रुतौ वाचि बद्ध इव वर्तते सदा ।
    लोचनस्य न तथापि गोचरश्चित्रमालि वनमालिचन्द्रमा: ॥ तत्रैव, ७।२५।
33. कुचौ लिखन्त: कचमामृशन्त: श्रोणीतलादम्बरमाहरन्त: । तत्रैव, १०।२०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आहरन्तः, इति पदानां सहव्याहारेण शतृप्रत्ययप्रयोगपाटवं प्रदर्शितं कविना । अन्यस्मिन् पद्ये, ददानः,[34] दिहानः, वितन्वानः, इति शानजन्तानां पदानां सनिपुणं संयोजनेन कविर्निजां शब्दशास्त्रसंबद्धां वैदुर्षी ख्यापितवान् । इतरस्मिन् पद्यविशेषे विनिधाय,[35] पिधाय, विधाय चेति ल्यबन्तपदानां मधुरसंयोजनं कृत्वा कविः, काव्यसौन्दरीं कामपि व्युत्पादयामास । एकस्मिन् पद्ये हरसि,[36] कर्षसि, करोषि, असिचेत्यादीनां लोट्लकारस्य मध्यमपुरुषस्यैकवचने निष्पन्नानां क्रियापदानां सकौशलं प्रसङ्गानुसारितया विच्छित्तिजनकतया च कविर्निरूपणं चकार । एभिरेवोदाहरणैः कवेर्व्याकरणबोधवैशारदी विदृता भवति नूनम् ।

८. ३ दर्शनव्युत्पत्तिः

कस्मिन्नपि काव्ये कविप्रतिभया परिपोषमापन्नानां रसानां भावानाञ्च परमानन्दसन्दोहनिधानभूते वाचां स्पन्दे दार्शनिकविचाराणां वस्तुसंयोजनकौशलजन्योऽकृत्रिमः सन्तुलितश्च विन्यासः कल्पनाचिन्तनयोः सङ्गमजन्यं माधुर्यं चैतन्यञ्चाविष्कृत्य तत् काव्यं सदा सङ्ग्राह्यं सर्वसम्वेद्यं चिरतरुणञ्च निष्पादयति । इदं हरिकेलिमहाकाव्यमपि तादृशमेवोल्लेखनीयं काव्यरत्नमस्ति यत्र निगमागमानां काठिन्यनिर्मुक्ताः सर्वकालोपयोगिनो विचाराः कान्तासम्मितया शैल्या प्रकाशिताः सन्ति । इह तत्तद्दर्शनक्रमेण स्पष्टं प्रतीयमानाः केचन तादृशा विचारा निर्दिश्यन्ते संक्षेपेण ।

(क) चार्वाकदर्शनम्

कविनाऽस्मिन् महाकाव्ये व्रजवासिभिरिन्द्रमखे प्रारब्धे तन्मखभङ्गाभिलाषिणः कृष्णस्य मुखेन चार्वाकदर्शनस्य चिन्तनमाविष्कृतम् । तदनुसारेण य[37] इन्द्रो न कदापि केनापि नयनगोचरीकृतः स कथङ्कारमस्माकं रक्षको ऽभवीति, यद् यद् दृष्टिपथमवतरति तदेव सत्यं यन्नायाति तदसत्यमसुन्दरमसङ्गतञ्चेति इति कृष्णनिरूपितं चार्वाकदर्शनबीजम् । चार्वाकदर्शने भूतचतुष्टयस्यैव[38] सत्यत्वं, प्रत्यक्षस्यैव प्रामाण्यं स्वभाववादस्यैव परमार्थत्वञ्च व्याख्यातमस्ति । इदं मतमाश्रित्य श्रीकृष्णेन व्रजवासिनां हृदयपरिवर्तनं विधाय वासवमखभङ्गो विहितः । परमार्थतोऽस्य दर्शनस्य वैफल्येऽपि तदुत्तरवर्तिदर्शनानां प्रवेशाय पृष्ठभूमित्वेनास्य दर्शनस्य गहना भूमिकाऽवगन्तव्या ।

(ख) न्यायदर्शनम्

हरिकेलिमहाकाव्यस्य षोडशसर्गे माथुरजीवनसौन्दर्यनिरूपणविधौ कविर्न्यायविद्याया महिमभाञ्जि तत्वानि निरूपयामास । छलस्य, अपार्थस्य, बाधस्य, असिद्धितत्वस्य, प्रतिज्ञाहानेः,जातिदोषचयस्य, प्रसिद्धानां पञ्चावयवानाञ्च परिसंख्यालङ्काराऽऽविष्कृतिं कुर्वता कविना

---

34. ददानो दौर्बल्यं वपुरपि दिहानो जडतया
वितन्वानो दौस्थ्यं शिव शिव दशन् वृश्चिक इव । तत्रैव, ११।३१।

35. भूषादुकूले विनिधाय कूले पिधाय वक्षः करपल्लवेन ।
विधाय वित्रस्तचमूरुनेत्रे नेत्रे सुनेत्रा विविशुः पयांसि ॥ तत्रैव, १२।३।

36. तत्रैव, १२।२६।

37. शतमखस्य न कस्यचिदीक्षणं तदवनं च कुतः परिशङ्क्यताम् ।
दृगुपनीतमवैत सदन्यथा त्वधिगमं धिगमञ्जुमसङ्गतम् ॥ तत्रैव, ६।४९।

38. भूतचतुष्टयमेव सत्यं, प्रत्यक्षमेवैकं प्रमाणं, स्वभाववाद एव पारमार्थिकः ।
डा. चन्द्रिकाप्रसादशुक्लः, नैषधपरिशीलन, हिन्दुस्थानी एकेडेमी,
इलाहाबाद, प्र. सं., ई. १९६०,पृ. ३८६।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामान्युद्दिष्टानि[39] । तदनुसारेणेमानि तत्वानि विद्वत्संसदि शास्त्रार्थावसरे मथुरायां खण्डनमण्डनबुद्ध्या चर्चितानि, परं जनजीवने छलस्य व्यर्थताया बाधाया: कार्यासिद्धीनां सङ्कल्पत्यागस्य जातिगतसाङ्कर्यादिदोषाणां च किञ्चनास्तित्वं नासीदिति निष्कर्ष: । न्यायदर्शने[40] वादिनोऽभिमतस्य विपरीतार्थकल्पनयोद्भूतस्य वादिवाक्यविरोधरूपवाक्छलसामान्यछलोपचारछलेतिभेदत्रयोपपन्नस्य छलस्य प्रभूता चर्चा लभ्यते । अपार्थस्यार्थे[41] अनैकान्तिकरूपस्य सव्यभिचारस्य निरूपणमस्ति । विरोधार्थे[42] विरुद्धस्य बाधस्यार्थे कालातीतस्य[43] असिद्धस्यार्थे साध्यसमस्य,[44] प्रतिज्ञाहतेरर्थे प्रतिज्ञाहाने:,[45] जाते:,[46] दोषचयस्य,[47] प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपस्य[48] पञ्चावयववाक्यस्य च न्यायदर्शने व्यापकं विवेचनं जातम् । पञ्चावयवप्रयोगविधौ छलादीनामुपयोगो नैयायिकेषु नितरां प्रथितो विषय: । महाकविर्वंशमणिर्हरिकेलिमहाकाव्यस्य प्रतिसर्गं सर्गान्तपद्येषु मातापित्रो: परिचयप्रदानकर्मणि[49] "अन्वीक्षाम्बुधिबहलने चन्द्रमा इव रामचन्द्राख्यो मदीय: पिता" इति तथ्यमुपस्थाप्य पितु: सर्वतन्त्रस्वातन्त्र्यं निर्दिदेश । एतावता प्रतिभाशालिनो नैयायिकस्य पितु: पुत्रो वंशमणि: स्वयमपि न्यायदर्शनस्य विद्वानासीदित्यनुमीयते । इह कविना स्वोपज्ञतयाविष्कृता नैयायिका विचारास्तस्य न्यायनैपुर्णीं विनिवेद्य विक्रमस्य सप्तदश्यां शताव्दौ नेपाले न्यायविद्याया बद्धमूलामधीतिपरम्परामावेदयन्ति ।

(ग) <u>मीमांसादर्शनम्</u>

मथुरायां शास्त्रचर्चावसर[50] एव मीमांसासम्मतस्यार्थवादस्य चर्चा बभूव, न तु जना अर्थवादप्रेरिता नीतिपराङ्मुखाश्च बभूवुरिति निरूपयता वंशमणिनाऽर्थवादस्योपस्थापना कृता । वैदिकवाक्यं[51] द्विविधं भवति विधिरूपमर्थवादरूपञ्च । विधिवाक्यं च यथा- "स्वर्गकामो ज्योतिष्टोमेन यजेत" इति । विधेरनुमोदकं दृष्टान्तैर्विधिरूपोपस्थापकं विध्यनुगामिप्रशंसकं विधिप्रतिगामितादोषदिग्दर्शकं च वाक्यमर्थवादसंज्ञया प्रथितम् । स चार्थवादो मीमांसानुसारेण त्रिविध:- अनुवाद:, शाब्दीभावना, आर्थीभावना चेति । न्यायदर्शनानुसारेण च स

---

39. यत्र छलापार्थविरोधबाधासिद्धिप्रतिज्ञाहतिजातिदोषा: ।
विभान्ति विद्वत्परिषन्मुखेन्दुसञ्चारिपञ्चावयवप्रयोगे ॥ ह.के. १६।९।

40. (क) वचनविघातोऽर्थविकल्पोपपत्त्या छलम् । <u>न्यायदर्शने</u>, १।२।१०।
(ख) तत्त्रिविधं सामान्यछलं वाक्छलमुपचारछलञ्चेति । तत्रैव, १।२।११।

41. अनैकान्तिक: सव्यभिचार: । तत्रैव, १।२।५।

42. सिद्धान्तमुपेत्य तद्विरोधी विरुद्ध: । तत्रैव, १।२।६।

43. कालत्ययापदिष्ट: कालातीत: । तत्रैव, १।२।९।

44. साध्याविशिष्ट: साध्यसम: । तत्रैव, १।२।८।

45. प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानि: । तत्रैव, ५।२।२।

46. साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जाति: । तत्रैव, २।१।१८।

47. प्रवर्तनालक्षणा दोषा: । तत्रैव, १।१।१८ ।

48. प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवा: । तत्रैव, १।१।३२।

49. पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो, जगत्ख्याता माता
जयमतिरिति श्रीभवानीव वन्द्या ॥ ह.के. १।६६।

50. यत्रार्थवादश्रुतिरेव शास्त्रे शस्त्रे शिते कोशपरिक्षयोऽभूत् ।
करग्रहार्ति: प्रियकेलिसङ्गादरे कुरङ्गायतलोचनानाम् ॥ ह.के. १६।८।

51. <u>अर्थसङ्ग्रहे</u>, पृ. ९-११ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुतिनिन्दापरकृतिपुराकल्पेतिभेदैश्चतुर्विधः[52]। हरिकेलौ निर्दिष्टोऽयमर्थवादशव्दो मल्लकाले नेपाले मीमांसाया व्यापकमध्ययनं प्रचलितमासीदिति प्रमाणयति नूनम्।

(घ) साङ्ख्यम्

हरिकेलौ सांख्यदर्शनानुमतानां गुणप्रकृतिपुरुषाणां सूत्रात्मकतया[53] निर्देशो जातः। दिवसे गाश्चारयित्वा सायं स्वमायाकल्पितैः पशुभिः सार्धं व्रजं विशतः कृष्णचन्द्रस्य महिमनिरूपणविधौ कविना कृष्णकृतो व्रजप्रवेशः, पुरुषस्य गुणैः प्रकृतिप्रवेश इवेति निर्दिश्य स्वार्जितस्य सांख्यबोधस्य व्युत्पत्तिर्निरूपिता। सांख्यदर्शने च गुणानां[54] प्रकृतेः[55] पुरुषस्य[56] च स्वरूपविजृम्भणविषयिणी प्रभूता चर्चा लभ्यते।

(ङ) योगदर्शनम्

हरिकेलौ कविर्यमनियमसंपन्ना[57] योगिनो यमेव साधयितुं सततं प्रयत्नशीला भवन्ति तादृशं भगवन्तं मदान्धमतयः कंसादयः कथं जानन्त्विति निरूप्य योगसंबद्धानां[58] यमनियमादीनां निरूपणं चकार। ब्रह्मणाऽणिमादिविभूतिभिरलङ्कृता[59] नारायणरूपा गोपा विलोकिता इति निर्दिश्य कविर्योगसंबद्धां विभूतिमेकां[60] निर्दिदेश। हरिकेलौ कविर्ध्येयत्वेन[61] कृष्णं निरूपयामास। योगदर्शने ध्यानस्य[62] ध्येयस्य[63] च विषये विचारो जातः। शुकसनन्दनादीनां[64] योगिनां हरिकेलौ चर्चा जाता। ते च महापुरुषा योगित्वेन लोके शास्त्रे च सन्ति प्रथिताः। दिग्दर्शनमिदं कवेर्योगज्ञानं सत्यापयति निस्सन्देहम्।

---

52. न्या.द. २।१।६४।
53. इति विहृत्य वने पशुपालकैः स पशुभिः सहितो निजमूर्तिभिः।
    व्रजमुपागमदेष दिनात्यये विशति हि प्रकृतिं पुरुषो गुणैः॥ ह.के. ६।१३।
54. सत्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः।
    गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः॥ सांख्यकारिकायास्त्रयोदशं (१३)पद्यम्।
55. मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
    षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥ तत्रैव, तृतीयं (३) पद्यम्।
56. पूर्ववत्।
57. धृतनियमयमा यमामनन्ति मुनयः
    कथमिह विदन्तु तं पुरुषं मदान्धमतयः। ह.के. १७।२८।
58. (क) शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः। योगसूत्रे,२।३२।
    (ख) अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः। तत्रैव, २।३०।
59. निखिलवेदपुराणतदङ्गकैरुपनुतान् कृतरूपपरिग्रहैः।
    परिवृतानणिमादिविभूतिभिः शतमुखप्रवरैरुपसेवितान्। ह.के. ६।२७।
60. ततोऽणिमादिप्रादुर्भावः कायसंपत् तद्धर्मानभिघातश्च। यो.सू. ३।४५।
61. जय ध्येय जय गेय जय जेयाजशत्रुश। ह. के. १७।५२।
62. तत्र प्रत्ययैकतानता ध्यानम्। यो.सू. ३।२।
63. (क) तस्य वाचकः प्रणवः। तत्रैव, १।२७।
    (ख) तज्जपस्तदर्थभावनम्। तत्रैव, १।२८।
64. सन्तारिताः शुकसनन्दसनातनाद्याः
    नावं विनैव भवता भवतारसिद्धाः।
    तन्नः कथं कथय कृष्ण कलिन्दकन्या-
    सन्तारणे सतरणेरपि ते विलम्बः॥ ह.के. १३।३४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(च) अद्वैतवेदान्तदर्शनम्

कविर्हरिकेलौ निद्रा,[65] घोरा माया,[66] अघटितघटनापटीयसी मायेत्यादिपदैर्मायाया निरूपणं[67] चकार । वेदान्तपण्डितेन धर्मराजाध्वरीन्द्रेणापि अविद्यारूपेयं [68] मायेति निरूपितम् । श्रीकृष्णश्च हरिकेलौ योगमायेश्वरत्वेन[69] कीर्तितः । श्वेताश्वतरोपनिषदि [70] ईश्वरो मायिकत्वेन निरूपितः । हरिकेलौ चतुर्षु पुरुषार्थेषु मोक्षाख्यपुरुषार्थस्य[71] मुक्तिनाम्ना व्यपदेशो जातः । मोक्षस्य[72] वेदान्तदर्शने प्रभूता चर्चा लभ्यते । सकलानि दर्शनानि तत्साधनायैव प्रवृत्तानि । अनादिरूपस्येश्वरस्य[73], मायाविजयस्य, आत्मसाक्षात्कारस्य च विषया हरिकेलौ विवृताः सन्ति । ते विषया [74]वेदान्तेऽपि बहुशश्चर्चिताः । आत्मज्ञानमेव [75] मोक्षस्योपायभूतमिति वेदान्तस्य महान्

---

65. इयं निद्रामुद्रा मम सकलसम्मीलनकरी । तत्रैव, १।६३।
66. अहो घोरा माया मम बहुविधायासजननी
जनानामज्ञाने महति निहितानामिह मुहुः । तत्रैव, १।६४।
67. अघटितघटनापटीयसीयम्
घटयति किन्न महेश्वरस्य माया । तत्रैव, १३।४२।
68. "अविद्यात्मिका माया" । धर्मराजाध्वरीन्द्रः, वेदान्तपरिभाषायाम्,
चौ सं. सि., वाराणसी, ई. १९५५,पृ, १७९ ।
69. जगति हि किमसाध्यं योगमायेश्वरस्य । ह.के. १४।५५।
70. छन्दांसि यज्ञाः क्रतवो व्रतानि
भूतं भव्यं यच्च वेदा वदन्ति ।
अस्मान् मायी सृजते विश्वमेतत्
तस्मिन् चान्यो मायया संनिरुद्धः ॥ श्वेताश्वतरोपनिषदि, ४।९।
71. निमेषसङ्गात् सहकामसिद्ध्या
करस्थिता कस्य न मुक्तिकन्या । ह.के. ३।९।
72. अनाद्यनन्तं कलिलस्य मध्ये
विश्वस्य स्रष्टारमनन्तरूपम् ।
विश्वस्यैकं परिवेष्टितारम् ।
ज्ञात्वा देवं मुच्यते सर्वपापैः ॥ श्वेताश्वतरोपनिषदि, ५।१३।
73. अनादिरप्यादिरसि त्वमस्य विश्वस्य विश्वम्भर विश्ववन्द्य ।
मायाविधेयीकृतमानसेन विज्ञायसे वल्लवमल्लबाल ॥
न केवलं चार्मणमेव चक्षुरदायि दामोदर दिव्यचक्षुः ।
यतस्त्वयात्मा प्रकटीकृतो मे दयालुता कं न वशीकरोति ॥ ह.के. , ३।६१-६२।
74. (क) विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो बाहुरुत विश्वतस्पात् ।
संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देव एकः ॥ श्वेताश्व. ३।३।
(ख) कामस्याप्तिं जगतः प्रतिष्ठाम् क्रतोरानन्त्यमभयस्य पारम् स्तोममहदुरुगायं प्रतिष्ठां दृष्ट्वा धृत्या धीरो नचिकेतोऽत्यस्राक्षीः॥ कठोपनिषदि, २।२।११।
(ग) एको वशी सर्वभूतान्तरात्मा
एकं रूपं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीराः
तेषां सुखं शाश्वतं नेतरेषाम् ॥ तत्रैव, २।२।२।
75. एको हंसो भुवनस्यास्य मध्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राद्धान्तो वर्तते । इत्थं वंशमणिर्हरिकेलौ वेदान्तदर्शनस्य निगूढतमानां सिद्धान्तानां प्रतिपादनेन निजां वेदान्तवैदुषीं ख्यापयामास ।

(छ) काश्मीरीयशैवदर्शनम् (प्रत्यभिज्ञादर्शनम्)

हरिकेलौ वंशमणिनाऽस्य प्रत्यभिज्ञादर्शनस्यैकवारमेव चर्चा व्यधायि । तत्र गौरीगिरीश्वरौ[76] नित्यप्रकाशरूपाविति निरूप्य शक्तिशिवयोरैक्यं प्रतिपादितम् । यथाऽद्वैतवेदान्तदर्शने मायां तीर्त्वैव नित्यप्रकाशरूपं ब्रह्म साक्षात्क्रियत इति निर्देशः, परमत्र मायापि ब्रह्मरूपा सच्चिदानन्दरूपा वा । [77]प्रत्यभिज्ञादर्शनस्य शक्तिशिवयोरैक्यमेव वास्तविकमद्वैतमिति विदुषामवधारणा वर्तते । शक्तिं विना शिवः स्पन्दितुमपि न समर्थः शिवेन विना शक्तिरपि क्षीणा दीनदीना चेति तयोरभेदः, तादात्म्यमथवा सामरस्यम् । शक्तिसाहाय्येन शिवः परिपूर्णो भवति । भगवत आदिशङ्कराचार्यस्यापीदमेव[78] मतम् । अनयैव दृष्ट्या कविर्वंशमणिः शक्तिशिवयोर्नित्यप्रकाशरूपत्वं निरूप्य विक्रमस्य सप्तदश्यां शताब्दौ नेपाले प्रत्यभिज्ञादर्शनस्य पूर्णां व्याप्तिं सूचयामास ।

(ज) भागवतदर्शनम्

श्रीमद्भागवतीयकथातत्त्वेनानुप्राणितं हरिकेलिमहाकाव्यं श्रीमद्भागवतनिर्दिष्टेन भागवतदर्शनेनापि प्रभावितमस्ति । नारदशाण्डिल्यादिसम्वर्धितस्य पाञ्चरात्रदर्शनस्यैवापरमभिधेयं भागवतदर्शनमिति बोध्यम् । श्रीसम्प्रदाय - हंससम्प्रदाय-ब्रह्मसम्प्रदाय-रुद्रसम्प्रदायेषु विभक्तानां विष्णुभक्तानामुपासनायां चिन्तने च भागवतदर्शनस्यैव तारतम्येन प्रभावो विद्यते । भगवत इदं भागवतमिति व्युत्पत्त्या श्रीकृष्णस्य परब्रह्मरूपेण चिन्तनं मननं तत्प्राप्तिधिया तदाराधना च भागवतदर्शनस्य प्रमुखा विषयाः सन्ति । हरिकेलावस्य दर्शनस्य प्राणतत्वरूपा भक्तिः स्तुतिभिः सम्वादैः कथावस्तुभिश्च बहुधा विवृता वर्तते । पादाङ्गुष्ठाद् महादेवमौलिमण्डिताया गङ्गाया आविर्भावकः[79], अजामिलस्योद्धारकः,[80] द्रौपद्या लज्जापटीरूपः, गजेन्द्रस्योद्धर्ता, श्रीकृष्णो विश्वनियन्ता वर्तते । तस्मिन् प्रसन्नेऽन्धः पश्यति, बधिरः श्रृणोति, पङ्गुश्च नरीनृत्यतीति निरूप्य कविना तस्मिन् निजा परमा भक्तिः प्रकटीकृता । स एव त्रिदेवरूप[81] इति भावेनापि कृष्णः कविना वाग्भिरीडितः । मायां[82] जितवतो निर्मलचेतसो भक्तजनस्य प्रतीतिगोचरो भवतीति विषयोऽपि हरिकेलौ प्रकाशितः । त्रिभुवनीभवनस्य[83] स्थपतित्वेन, शुकसनन्दनादिसन्तारकत्वेन[84] चास्य कीर्तनं

स एवाग्निः सलिले संनिविष्टः ।
तमेव विदित्वातिमुत्युमेति
नान्यः पन्था विद्यतेऽयनाय ॥ श्वेताश्वः, ६।१५।

76. बन्दे सन्देहमन्देहदूरीकरणभारवी ।
नित्यप्रकाशौ जगतो गुरू गौरीगिरीश्वरौ ॥ ह. के. १।१

77. डा. उमेशमिश्रः, भारतीय दर्शन, हिन्दी समिति, उत्तरप्रदेश शासन, राजर्षि पुरुषोत्तमदास टण्डन, हिन्दी भवन, महात्मागान्धी, मार्ग, लखनऊ, चतुर्थ संस्करण, ई. १९७५, पृ. ३८८-३८९ ।

78. शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि । (आनन्दलहरीस्तोत्रे) पूर्ववत्, पृ. ३८३।

79. ह.के., १।४।

80. तत्रैव, ३।५९।

81. तत्रैव, १।२३।

82. मायाविधेयीकृतमानसेन विज्ञायसे वल्लवमल्लबाल । तत्रैव, ३।६१।

83. त्रिभुवनीभवनस्यपतिः पतिस्त्वमसि देव परे तव सेवकाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कविनाऽकारि । इन्द्रमुखेन भागवतदर्शनस्य चरमं सत्यं निरूपयता कविना भक्तिभावस्य पूर्णा प्रतिष्ठा व्यधायि । यदनुसारेण[85] केवलं कीर्तिते भगवन्नाम्नि, श्रुते वा भगवन्नाम्नि सन्तापसाम्राज्यमपि सुखायते, तन्नामवैमुख्ये स्वर्गसाम्राज्यमपि यन्त्रणादायकमिति निष्कर्षः फलति । वस्तुत इदमेव भागवतदर्शनस्य प्राणतत्वम् । गोपीभिः प्रियत्वेन, कंसादिभिररित्वेन, शुकादिभिर्योगेश्वरत्वेन, वसुदेवादिभिः शिशुत्वेन, धनञ्जयादिभिश्च मित्रत्वेन सम्भावितो भगवान् तेषां समेषां जन्ममृत्युभङ्गं विधाय मङ्गलं कृतवान् । वृन्दा[86] गोपी, शरीराद्, विगलितं निजं मनश्चन्द्रं प्राप्य तन्माध्यमेन मुकुन्दस्य मुखचन्द्रं प्रविश्य तदधरमधु पीत्वा जन्मान्तरगतां मामनुसरेदिति वाञ्छन्ती भागवतदर्शनस्य चरमं मन्तव्यमेव स्वचरितेन प्रस्तुतवतीति तथ्यमत्र प्रतिपादितमस्ति । ब्रह्मणः, इन्द्रस्य, गोपीनाम्, अक्रूरस्य च माध्यमेन कविना कृष्णस्य ब्रह्मरूपत्वं व्याख्याय भक्तिरेव तत्प्राप्तिविधौ सहायिकेति निरूपितम् । [87]श्रीमद्भागवतेऽपि भागवतदर्शनस्य भागवतानां च महिमा विवृतो वर्तते । एतावता, हरिकेलौ नवनीरदनीलस्य[88] श्रुतिमृग्यस्य सामगम्यस्य[89] शुकादितारकस्य[90] पावनानां पावनस्य मङ्गलानां मङ्गलस्य श्रीकृष्णचन्द्रस्य चरितमाध्यमेन भागवतदर्शनस्य निष्कर्षो निरूपित इति निष्कृष्यते ।

८. ४ धर्मशास्त्रव्युत्पत्तिः

हरिकेलौ धर्मशास्त्रस्य मूल्यवन्तो निष्कर्षा यत्र तत्र प्रसङ्गानुसारेण कविनोपस्थापिताः । गर्गेण कृष्णरामयोर्नामकरणं[91] कृतमिति तत्र निरुक्तिः । [92] धर्मशास्त्रेऽपि दशमेऽथवा द्वादशे दिवसे नामकरणसंस्कारो विधेयतया निरूपितः । पापः स्वपापेनैव निहतो भवति पुण्यवन्तश्च योगिवद्रससन्ततिं प्रभिण्वन्ति, इति शास्त्रीयमर्यादामनुसृत्य तृणावर्तरूपः पापो निजकर्मणैव जीवनसुखाद्

श्रुतिभिरप्यत एव निगद्यसे निखिलपूज्यतमः पुरुषोत्तमः ॥ तत्रैव, ६।३१।

84. तत्रैव, १३।३४।

85. देव दुःखमपि मे सुखावहं यत्र नाम भवतामुदीर्यते ।
स्वर्गसम्पदपि कम्पकारिका हारिका भवति या तव स्मृतेः ॥ तत्रैव, ७।६।

86. विधिं याचे नत्वा मम सखि शरीराद् विगलितम्
मनो युक्त्वा चन्द्रं विशतु मुखचन्द्रं मधुरिपोः।
यदास्वाद्य स्फीतं तदधरमधुप्रीतमधिकम्
सदेतन्मां जन्मान्तरतनुगतामप्यनुसरेत् ॥ तत्रैव, ११।३४।

87. (क) वाग्गद्गदा द्रवते यस्य चित्तम्
रुदत्यभीक्ष्णं हसति क्वचिच्च ।
विलज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति ॥ श्रीमद्भागवते, ११।१४।२४।
(ख) न साधयति मां योगो न सांख्यं धर्म उद्धव ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥ तत्रैव, ११।१४।२०।

88. नवनीरदनीलमद्भुतं श्रुतिमृग्यं मम धाम धास्यति । ह.के. १५।४४।

89. कः प्रत्येतु प्रथयतु च को धाम तत्सामगम्यम्
नन्दालिन्दे गलितवयसा वाससाच्छन्नभास । तत्रैव, १।६५

90. सन्तारिताः शुकसनन्दसनातनाद्याः । तत्रैव, १३।३४।

91. क्रमेण गर्गोदितनामधेयौ तौ रामकृष्णौ गृहपालिकासु । तत्रैव, २।४१।

92. नामधेयं दशम्यान्तु द्वादश्यां वाऽस्य कारयेत् ।
पुण्यतिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ॥ मनुस्मृतौ, २।३०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वञ्चित इति हरिकेलौ निरूपितम्[93] । स्ववर्णधर्माश्रणं[94] हरिकेलौ कविना प्रशस्तम् । धर्मशास्त्रेषु वर्णधर्मस्याश्रमधर्मस्य च मूल्यवन्तो विचारा विद्योतन्ते । अतिथिसेवाया[95] महत्वं हरिकेलौ गीतं धर्मशास्त्रेष्वपि बहुधाऽतिथिसेवा[96] कर्तव्यतयोपदिष्टा । पातिव्रत्यं[97] हरिकेलौ कविना सश्रद्धं चर्चितम् । पतिव्रतानां महिमा[98] धर्मशास्त्रेषु सादरं प्रकाशितो वर्तते । हरिकेलौ नग्नस्नानं[99] निन्दितम् । सोऽयं विषयो धर्मशास्त्रेषु प्रसिद्धः । [100]रजस्वलादर्शनं कविना नादृतम् । रजस्वलादर्शनस्पर्शनादयो[101] विषया धर्मशास्त्रेषु निषिद्धाः । इत्थं हरिकेलौ प्रतिबिम्बितानां केषाञ्चन धर्मशास्त्रीयाणां विषयाणामिह दिग्दर्शनात्मकमेव निरूपणं कृतं केवलं कवेः स्मृतिमर्मज्ञत्वप्रतिपिपादयिषया ।

८. ५ पुराणेतिहासव्युत्पत्तिः

पुराणनिकरेषु विशेषतः श्रीमद्भागवते निरूपितस्य कृष्णचरितस्य भित्तौ प्रतिभानावीन्येनोपस्थापितेऽस्मिन् महाकाव्ये पुराणव्युत्पत्तिः स्वाभाविकी । कवेः कृष्णचरितातिरिक्तविषयबोधव्युत्पत्तिदृष्ट्या पुराणव्युत्पत्तिरियं प्रवर्त्यते ।

वंशमणिः[102] सर्वप्रथमं हरिकेलौ गणनाथं संस्मृतवान् । शिवपुराणे[103] गणेशप्रथमार्चनप्रसङ्ग उपात्तो गणेशश्च सश्रद्धं कीर्तितः । कविना[104] नारायणस्य चरणजलमेव गङ्गेति न्यरूपि । श्रीमद्भागवते[105] विष्णुपादाङ्गुष्ठनिर्गताया गङ्गायाश्चर्चा जाता । हरिकेलौ भक्तमूर्धन्यानां

---

93. निहतो निजकर्मणैव पापः सुकृती च सुकृतेन शर्म लेभे । ह.के. २।२३।
94. स्ववर्णधर्माश्रयणं श्रियः पदम् । तत्रैव, ४।२।
95. सम्पाद्य पाद्यादिजलं निवेद्य फलानि वृन्दावनजानि तेषाम् ।
मधूनि धृत्वा मधुपर्कमर्कपुत्री चकारातिथिपूजनानि ॥ तत्रैव, ३।१७
96. अतिथित्वेन वर्णानां देयं शक्त्यानुपूर्वशः ।
अप्रणोद्योऽतिथिः सायमपि वाग्भूतृणोदकैः ।या. स्मृ. ५।१०७
97. आजन्मावधि तदुपाश्रयस्थितानामाजीवं समसुखदुःखभोगभाजाम् ।
दग्धानामपि तरुणा धवेन साकं वल्लीनामजनि पतिव्रतं बलीयः ॥ ह.के. ५।२६।
98. (क) नास्ति स्त्रीणां पृथग्धर्मो न व्रतं नाप्युपोषणम् ।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते । मनुस्मृ. ५।१५५ ।
(ख) मृते जीवति वा पत्यौ या नान्यमुपगच्छति ।
सेह कीर्तिमवाप्नोति मोदते चोमया सह ॥ या. स्मृ. ३।७५।
99. वसनं विनैव सलिलाप्लवनं लवनं व्रतस्य यदतोऽजनि वः ।
तदघापनोदविधये विधिवन्नमतेह यज्ञपुरुषं प्रमदाः ॥ ह.के. ९।४१।
100. स्फुटपयोधरभारभृतो दिशः समभवन् सरितोऽपि रजस्वलाः ।
इति किमु त्रपया कमलापतिर्विधुरवी नयने सममीलयत् ॥ तत्रैव, ६।३७
101. नोदक्ष्ययाभिभाषेत यज्ञं गच्छेन्नचावृतः । मनुस्मृ., ४।५७
102. ॐ नमो गणपतये । ह.के. ग्रन्थादौ ।
103. शिवपुराणे, रु.सं., कुमारखण्डे, १३-२० अध्यायेषु ।
104. ह.के. , १।४।
105. श्रीमद्भागवते ५।७।१-१०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुकसनातनादीनामुल्लेखो[106] जात: । श्रीमद्भागवते [107] च ते योगित्वेन व्यपदिष्टा: । हरिकेलौ [108] मत्स्य - कूर्म- वराह- नृसिंह- वामन- रामादीनामवतारपुरुषाणां नामानि निर्दिष्टानि । एतेषां[109] श्रीमद्भागवतस्य विभिन्नेषु सन्दर्भेषु चरितचर्चा लभ्यते । हरिकेलौ[110] शेषावतारो बलराम इति निरूपणं लभ्यते । श्रीमद्भागवते बलस्यानन्तांशत्वं [111] निरूपितमस्ति । हरिकेलौ[112] हरिरजामिलमुद्धृतवानिति सङ्केत: । [113]श्रीमद्भागतेऽजामिलस्योद्धारप्रसङ्ग: सविस्तरमुपपादित: । हरिकेलिमहाकाव्ये[114] देवर्षि: कीर्तित: । श्रीमद्भागवते [115] व्यासदेवेन प्रकाशिता नारदस्य जीवनी मननीया वर्तते । भगवद्भक्तरूपेण व्यासनन्दनस्य शुकदेवस्य[116] हरिकेलावुल्लेखो जात: । श्रीमद्भागवते[117] शुको भगवद्भक्तरूपेण भृशं कीर्तितो वर्तते । हरिकेलौ कृष्णेनादितिकश्यपौ [118] पूर्वपितृत्वेन संस्मृतौ । श्रीमद्भागवते तयोश्चरितचर्चा[119] जाता । हरिकेलौ हरिणा ग्राहाद्[120] गज: समुद्धृत इति निर्देश: । श्रीमद्भागवतस्य[121] गजेन्द्रमोक्षसन्दर्भो नितरां मननीयो वर्तते । हरिकेलौ[122] देवासुरै: संभूय कृतस्य सागरमथनस्य शिवगरलपानस्य च विषयौ सूचितौ । [123] श्रीमद्भागवतस्याष्टमस्कन्धे सविस्तरं सागरमथनकथा निरूपिता । हरिकेलौ[124] द्रौपद्याश्चीरहरणे सति तद्रक्षार्थं हरि: स्वयं लज्जापटीरूपमङ्गीचकारेति निरुक्ति: । महाभारते[125] चीरहरणस्य वृत्तं

---

106. ह.के. १३।२४।
107. श्रीमद्भा., २।७।५,३।१५।१२।
108. विभिन्नेषु सर्गेषु केवलं नामतो निर्दिष्टा: ।
109. श्रीमद्भा., ७-९ स्कन्धेषु ।
110. तावत् प्रैक्षत शेषवेषममलं नीलाम्बरं सुन्दरम् । ह.के. १५।५४।
111. श्रीमद्भा., ५।२५। अध्याये ।
112. ह.के. ३।५९।
113. श्रीमद्भा., ६।१-४।
114. कमलासनमानसात्मज: कलिकेदारकृषीवलो मुनि: । ह.के. १५।३।
115. श्रीमद्भा., १।५-६। अध्याययो: ।
116. ह.के.. १३।३७।
117. श्रीमद्भा., १।१९।२५-२८।
118. ह.के. १।३१।
119. श्रीमद्भा., १०।३।४२।
120. ह.के. ३।५९।
121. श्रीमद्भा., ८।२-४ अध्यायेषु ।
122. ह.के. ५।३०।
123. श्रीमद्भा., ८।७ अध्याये ।
124. ह.के. ३।५९।
125. ततो दु:शासनो राजन् द्रौपद्या वसनं बलात् ।
     सभामध्ये समाक्षिप्य व्यपाक्रष्टुं प्रचक्रमे ॥
     आकृष्यमाणे वसने द्रौपद्याश्चिन्तितो हरि: ।
     त्यक्त्वा शय्यासनं पद्भ्यां कृपालु: कृपयाभ्यगात् ॥
     आकृष्यमाणे वसने द्रौपद्यास्तु विशाम्पते ।
     तद्रूपमपरं वस्त्रं प्रादुरासीदनेकश: ॥ महाभारते, सभापर्वण:, द्यूतपर्वणि ८८।४०,४२,४६।४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सविस्तरं व्याख्यातमस्ति । हरिकेलौ कुमारः[126] कविना संस्मृतः । शिवपुराणे[127] कुमारचरितं सविस्तरं निरूपितमस्ति । हरिकेलौ शिवस्य[128] तृतीयं नयनमुपमानतया प्रयुक्तम् । शिवपुराणे[129] तृतीयलोचनाश्रिता वर्णना लभ्यते । हरिकेलौ गोपीभिः पूजिता भगवती नगनन्दिनी कविना सभक्ति कीर्तिता । कात्यायन्याः पूजाप्रसङ्गः श्रीमद्भागवते लभ्यते । उपरि निरूपिता अनेके सन्दर्भाः पुराणान्तरेष्वपि भृशं चर्चिताः सन्ति । निरूपितैरेभिः प्रसङ्गैर्वंशमणेः पुराणज्ञानं सर्वसंवेद्यं भवति नूनम् ।

८. ६ आयुर्विज्ञानव्युत्पत्तिः

हरिकेलिमहाकाव्यस्य प्रणेतायुर्वेदशास्त्रस्य मुख्यान् विषयान् नैकविधेषु प्रसङ्गेषु संसूच्य निजामायुर्वेदविज्ञतां सूचयामास । नयनसौन्दर्यसंवर्धनाय नयनसन्तर्पणाय च हरिकेलौ "आसेचनकं"[130] निर्दिष्टम् । आयुर्वेदे तस्य[131] महत्ता निरूपिताऽस्ति । वर्षाकालिकानि[132] गोचरक्षेत्रेषूत्पद्यमानानि तृणानि पशूनां बलवर्धकाणीति तथ्यं पद्यविशेषे कविर्निरूपितवान् । रोगार्तानां[133] शरीरह्रासः सूचितः । मनोविज्ञानानुसारेण प्रियविरहितानां प्रियलाभः परमौषधं भवति । हरिकेलौ कामसंतप्तायाः[134] राधायाः कृते कृष्ण औषधरूपेण निरूपितः । विरोधिनां मोहाय गरलगुटिकानिर्माणं[135] हरिकेलौ सूचितम् । लोकेऽपि आततायिनस्तत्कर्म कुर्वन्त्येव । कविना हरिकेलौ [136]औषधनिर्माणप्रक्रियायां तत्स्थायित्वाय वटिकानिर्मितिः सूचिता । वैद्याः सम्प्रत्यपि वटिकां निर्मायौषधं व्यवहरन्ति । ज्वरो मानवानामङ्गानि[137] भिन्दतीति तथ्यं हरिकेलौ कविनोपपादितम् । वैद्यकशास्त्रे[138] ज्वरस्य प्रभूता चर्चा लभ्यते । विषपानजन्या[139] विकृतिरिव प्रियविरहजन्या विकृतिरिति हरिकेलौ वर्णितमस्ति । विषपानजन्या[140] विकृतिः, तद्हरणोपायाश्च वैद्यके निरूपिताः । हरिकेलौ अचिकित्स्यस्यामयस्य[141] निरूपणं कविनाकारि । वैद्यशास्त्रे

---

126. ह.के. ४।३७
127. शि.पु. रु.सं., कु.ख., १।१२। अध्याये ।
128. तार्तीयं नयनमिव त्रिशूलपाणेः । ह.के. ५।१८।
129. शि.पु., रु.सं., पार्वतीखण्डे, १९।१४-१५।
130. रामानुजन्मा रमणीजनानां विलोचनासेचनको बभूव । ह.के. ३।२०।
131. सर्वेषामक्षिरोगाणामादावाश्चोतनं हितम् । अष्टाङ्गहृदये, १३।१।
132. जातोक्षवृद्धोक्षचयैश्चरद्भिर्जातं महोहैरिव पञ्चषाहैः । ह.के. ८।३।
133. ह्रसन्ते रोगार्ता इव रजनयश्चानुदिवसम् । तत्रैव, ११।१३।
134. नन्दनन्दनमिहानय मुख्यं जीवनौषधमलङ्कुरु सख्यम् । तत्रैव, ८।३।
135. रुषा किं दित्यस्ता गरलगुटिका मोहघटिकाः । तत्रैव, ११।९।
136. अम्बरे जलदमाषपेषणादंशुचूर्णचयमुच्चमाचरत् ।
तर्कयामि शरदङ्गनाऽमुना तारकाक्षिवटिका विनिर्ममे ॥ तत्रैव, ७।३७
137. विभिन्दन् प्रत्यङ्गं ज्वर इव निपीतं विषमिव । तत्रैव, ११।३२।
138. सद्यः प्राणहरो यस्मात् तस्मात्तस्य विशेषतः ।
तस्यां तस्यामवस्थायां तत्तत् कुर्याद् भिषग्जितम् ॥ अ.हृ., चि.स्था. १।१७४।
139. ह.के. ११।३२।
140. विषं हि देहं सम्प्राप्य प्राग् दूषयति शोणितम् ।
कफपित्तानिलांश्चानु समं दोषान् सहाशयान् ॥ अ.हृ. उ. स्था., ३५।९।
141. अचिकित्स्य इवामयो महान् नियतं निष्प्रहरिष्यति द्विषाम् । ह.के. १५।१९।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुश्चिकित्स्यानामचिकित्स्यानाञ्च[142] रोगाणां विवरणानि लभ्यन्ते । उपचाराभावे[143] व्याधिर्वर्धत इति हरिकेलौ निर्देशः । एतद् लोकशास्त्रसम्मतं तथ्यम् । विशल्यकरणीलता[144] वंशमणिना निर्दिष्टा । अजगरदंशे [145] दर्भचूर्णस्योपयोगो वंशमणिना निर्दिष्टः । स च तद्विद्भिरनुसन्धेयो नूनम् । कामज्वरे[146] चन्दनलेपस्य शिरीषसेवनस्य चोपयोगिता कविना सूचिता । आयुर्वेदेऽपि ऋत्वनुसारेण सेवनीयाः पदार्थाः[147] साधु निरूपिताः सन्ति । इयता निरूपणेन वंशमणेरायुर्वेदवैशारदी विवृता भवति निस्सन्देहम् ।

८. ७ सङ्गीतशास्त्रव्युत्पत्तिः

वंशमणेः सङ्गीताभिरुचिरिह[148] स्थाने स्थाने प्रतिबिम्बिता वर्तते । इह सङ्गीतपदं कविना प्रयुक्तम् । गीतनृत्यवाद्यानां सम्मिलितं रूपं सङ्गीतनाम्ना[149] व्यपदिश्यते । गीतिगीतादिपदानि[150] कविना प्रयुक्तानि । आरोहावरोहवद्भिर्वर्णैरलङ्कृता लयसमन्विता गानक्रिया गीतिरित्युच्यते[151] । स्वरसन्निवेशपदतालमार्गयुतं गानं गीतपदेन व्यवह्रियते । हरिकेलौ स्वरपदं[152] प्रयुक्तमस्ति, तच्च षड्जगान्धारधैवतपञ्चमादीन्[153] सप्त स्वरान् प्रत्याययति । काव्येऽस्मिन् कविना मूर्च्छनापदं [154] व्यवहृतम् । क्रमप्रयुक्ताः[155] सप्तस्वरा मूर्च्छनानाम्नाऽभिधीयन्ते । हरिकेलौ रासपदं[156] बहुधा निरूपितमस्ति । पिण्डीबन्धानुसारेण[157] संपद्यमानं नृत्तं रासपदवाच्यं भवति । काव्येऽस्मिन्

---

142. अनुपक्रम एव स्यात् स्थितोऽत्यन्तविपर्यये ।
    औत्सुक्यमोहारतिकृद् दृष्टरिष्टोक्षनाशनः ॥ अष्टाङ्गहृदये सू.स्था. १।३२-३३।
143. ह.के. १५।३३।
144. लगदतनुबालबाधा विशल्यकरणी लतेव । तत्रैव, १४।४७
145. तिमिराजगरग्रसितं जगदिदमगदं कर्तुमुद्यतो देवः ।
    रेजे रजनिरमण्या रमणः करदर्भपातेन ॥ तत्रैव, १४।२९।
146. आसायं मलयजलेपलक्ष्मीराप्रातर्हिमशिशिरा शिरीषशय्या । तत्रैव, ५।८।
147. अष्टाङ्गहृदये, सूत्रस्थाने, ३ अध्याये ।
148. सामोदमन्दानिलमञ्जुभृङ्गीसङ्गीतभङ्गीपिकपञ्चमाद्यैः । ह.के. ३।७
149. गीतनृत्यवाद्यत्रयं प्रेक्षणार्थे कृतं सङ्गीतमुच्यते । अमरनाथपाण्डेयः, वा.सा.अ., पूर्ववत्, पृ. २६२ ।
150. (क) गीतयः कलमगोपिकाननात् । ह.के. ७।३५।
    (ख) गीतिहूतफणिरत्नपावक .... तत्रैव, ७।३४।
    (ग) कामुकस्य कलमाविका जगुः । तत्रैव, ७।३३।
151. अमरनाथपाण्डेयः, पूर्ववत्, पृ. २६२ ।
152. कलिवीजस्वरमुद्गिरन्निव । ह.के. १५।३।
153. षड्ज ऋषभगान्धारौ मध्यमः पञ्चमस्तथा ।
    धैवतश्च निषादश्च स्वराः सप्त प्रकीर्तिताः ॥ अमरनाथः, पूर्ववत्, पृ. २६२।
154. मृदुमूर्च्छनया मुहुर्मुहुर्महतीमप्रहतिं प्रवादयन् । ह.के. १५।६।
155. क्रमयुक्ताः स्वराः सप्त मूर्च्छनास्त्वभिसंज्ञिताः । अमरनाथः, पूर्ववत्, पृ. २६४ ।
156. (क) समन्ताद्राधायाः परिलसति रासे रसमये । ह.के. ७।४८।
    (ख) रासे विलासे विहितावधानः । तत्रैव, १०।७
157. अष्टौ द्वादश द्वात्रिंशद् यत्र नृत्यन्ति नायकाः ।
    पिण्डीबन्धानुसारेण तन्नृत्तं रासकं स्मृतम् । अमरनाथः, पूर्ववत्, पृ. २६४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागशब्दस्याप्युल्लेखो[158] जातः । जनानां प्रसन्नताहेतवो[159] रागा भवन्ति । हरिकेलौ वीणाया[160] उल्लेखो लभ्यते । नाट्यपदमपि[161] तत्र क्वचन लभ्यते । नटैर्विधीयमानं गीतं वाद्यं नृत्तं च नाट्यमुच्यते । नृत्तपदमपि तत्र लभ्यते, स्वाश्रयं नृत्यं नृत्तमिति शास्त्रेषु निर्दिष्टम् । वंशमणिना ताण्डवपदस्यापि[162] प्रयोगो व्यधायि । पुंनृत्यं[163] ताण्डवमिति सङ्गीतशास्त्रे प्रसिद्धम् । गीतिसाधनभूता[164] वंशी, वंशिकामुरलीपदाभ्यामपि परिचायिता । नन्दनन्दनस्य मङ्गलमयं जगन्मोहनं गानं कविना समहिमोदीरणं प्रकाशितम् । जगन्मोहने गाने स्फीते चराचराणां चिदानन्दमग्नता[165] कविना निरूपिता । युद्धकालिकवाद्यवल्गनस्य[166] विषयो वंशमणिना विशदीकृतः । एभिर्विषयैः सङ्गीतशास्त्रसम्बद्धैर्वंशमणेः सङ्गीतवैशारदी प्रमाणिता भवति नूनम् ।

८. ८ शस्त्रविद्याव्युत्पत्तिः

हरिकेलौ धनुर्मखस्योल्लेखो [167] जातः । धनुष्मतां विक्रमपरीक्षको भवति धनुर्मखः । कृष्णेन कोदण्डभञ्जने विहिते विश्वमेव त्रस्तमस्तव्यस्तं च [168]बभूवेति हरिकेलौ निरूपितम् । कविर्धनुर्मखस्थानस्य[169] सटीकं निरूपणं चकार । कंसो धनुर्धराग्रणीत्वेन[170] व्यपदिष्टः ।

---

158. स मण्डले वल्लवनागरीणां गायन् कलं वंशिकया मुकुन्दः ।
सानङ्गरागस्मितमङ्गधारी शृङ्गारसारो रस एव जज्ञे ॥ ह.के. १०।११।
159. (क) यैस्तु चेतांसि रज्यन्ते जगत्त्रितयवर्तिनाम् ।
ते रागा इति कथ्यन्ते मुनिर्भिर्भरतादिभिः ॥
(ख) योऽयं ध्वनिविशेषस्तु स्वरवर्णविभूषितः ।
रञ्जको जनचित्तानां स रागः कथितो बुधैः ॥ अमरनाथः, पूर्ववत्,पृ २६४ ।
160. ह.के., १५।६।
161. इह संसृतिनाट्यमीहते श्रुतिनान्दीनिगदेन यत् स्वयम् ।
स्वयमेव निरीक्षते च यः प्रकटं तं नटमीशमाश्रये ॥ तत्रैव, १५।४३।
162. वने विहारे वनजेक्षणानां शिखण्डिनस्ताण्डवमारभन्त । तत्रैव, १०।२५।
163. पुन्नृत्यं ताण्डवं नाम स्त्रीनृत्यं लास्यमुच्यते । अमरनाथः, पूर्ववत्, पृ. २६५।
164. (क) कर्णेन मुग्धो मुरलीनिनादः । ह.के. १०।८
(ख) विन्यस्य वंशीमधरे यदूनाम् .. तत्रैव, १०।७
(ग) गोविन्दवेणुध्वनिरुल्ललास । तत्रैव, १०।१२।
(घ) आनन्दने नन्दकिशोरवंशी .. तत्रैव, १२।१४।
(ङ) गायन् कलं वंशिकया मुकुन्दः .. तत्रैव, १०।११।
165. मृगा विमुक्तान्यरसप्रसङ्गा मौनैरवर्तन्त वने विहङ्गाः ।
मुकुन्दगाने जगदेव जाने जातं चिदानन्दसमुद्रमग्नम् ॥ तत्रैव, १०।११
166. जयेति कृष्णाय जना ववल्गुर्मिथो मुदा गोपगणा ववल्गुः ।
रङ्गेऽथ वाद्यानि भृशं विनेदुः कंसाय कोपं परिभाविनेऽदुः ॥ तत्रैव, १७।५९।
167. मम चापि धनुर्मखो महान् भविता भावितृतीयके ऽहनि । तत्रैव, १७।२९।
168. (क)अपश्रमेणैव करेण कृष्णः कोदण्डमुद्दण्डतरं बभञ्ज ॥ तत्रैव, १६।३१।
(ख) तत्रैव, १६।३२।
169. तत्रैव, १६।३०।
170. असि धन्यतमो धनुष्मतां प्रथमस्त्वं पृथिवीभुजामपि । तत्रैव, १५।१६।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिभुवनीसुभ्रुवामुन्मदनो मदनो धन्विपदेन[171] परिभाषितः, कदाचन स एव मल्लसंज्ञयापि[172] कविना निरूपितः । नायिकानां[173] कामसेनात्वप्रतिपादने कविना प्रतिभापूर्वकं सैनिकानुकूला सकला रणसामग्री कल्पिता । यदनुसारेण भ्रूचापद्वाराऽपाङ्गतरङ्गरूपबाणप्रहारे सततं संसक्तास्ताः कृपाण्या सन्नद्धा गजगतिमवलम्ब्य जगन्ति जेतुं चलिता इवेत्युत्प्रेक्षा कविना कृता । रामकृष्णयोः[174] कंसभटैः सार्धं सम्पद्यमाने महासमरे तयोर्जगद्विस्मयजननीं वीरतां शस्त्राणां धारावृष्टिं च निरूप्य सर्वाणि शस्त्रास्त्राणि कंसभटैः प्रहृतानि हरिं प्राप्य निष्फलानि जातानीति तथ्यमेकत्र कविर्निरूपयामास । कोमलहृदयोऽपि लालित्यप्रियोऽपि कविः शस्त्रास्त्रपारावारमये महासमरे वीरशिरोमणेः श्रीकृष्णस्य सर्ववीरातिशायिनीं युद्धकलां[175] याथार्थ्येन निरूपयामास । एतेन कवेः शस्त्रशास्त्रविज्ञता प्रमाणिता भवति निश्चप्रचम् ।

८. ९ कविसमयव्युत्पत्तिः

हरिकेलौ कामः कुसुमशरनाम्ना[176] निरूपितः । कविसमयानुसारेण कामबाणाः[177] कौसुमा एव भवन्ति । शुक्लपक्षस्य चान्द्री छटा [178]ज्योत्स्नाशब्देनाभिहिता हरिकेलौ । कविसमये सा च ज्योत्स्नापरपर्यायभूतेन चन्द्रिकापदेनोच्यते[179] । महाकाव्येऽस्मिन् चक्रवाकयूनो रात्रौ[180] विरहो निर्दिष्टः । कविसमयानुसारेण[181] तयो रात्रौ विरहो भवति । हरिकेलौ युवतीनां[182] चरणाघातादशोकस्य पुष्पविकासो भवतीति तथ्यमाविष्कृतम् । [183]कविसमयेऽपि स्त्रीणां पादाघाताद् अशोकस्य विकसनं प्रसिद्धमस्ति । मलये चन्दनोत्पत्तिर्हरिकेलौ[184] सूचिता । कविपरम्परया[185] सैष विषयोऽङ्गीकृतो वर्तते । हरिकेलौ मेघदर्शनेन[186] मयूराणां मुखरता निरूपिता । कविपरम्परायामपि मेघध्वानेषु[187] मयूराणां नृत्यं प्रसिद्धम् । अतो वंशमणिर्मूर्धन्याः कवय इव कविसमयमर्मज्ञो बभूवेति निष्कर्षः ।

८. १० कामशास्त्रव्युत्पत्तिः

---

171. स्मरो धन्वी पृष्ठे कुलचरितमग्रेऽतिविमलम् । तत्रैव, ११।३०।
172. कुसुमशरमल्ले प्रहरति । तत्रैव, ११।४२।
173. कर्णोल्लसत्कनककुण्डलचारुचक्रभ्रूचापसन्वरदपाङ्गतरङ्गबाणैः ।
     वेणीकृपाणलतया गजराजगत्या जेतुं जगन्ति चलिता इव कामसेनाः ॥ तत्रैव १३।६।
174. तत्रैव, १६।३४।
175. तत्रैव, १६ । ४२ ।
176. कुसुमशरमल्ले प्रहरति । तत्रैव, ११।४२।
177. मौर्वी रोलम्बमाला धनुरथ विशिखाः कौसुमाः पुष्पकेतोः । सा.द. ७२४।
178. शरज्ज्योत्स्नाजालोज्ज्वलितजगदालोकनकला .. । ह.के. ७४९ ।
179. चन्द्रिका शुक्लपक्षे ।, सा.द., ७२५ ।
180. इति शोकवन्ति किमु कोककुलान्यरुदन्नुदारकरुणध्वनिभिः । ह.के. ९।२३।
181. "विभावर्यां भिन्नतटाश्रयणं चक्रवाकयोः" । (कविकल्पलतायाम्), अमरनाथः, पूर्ववत्, पृ. २८०।
182. ह.के. ११।१८
183. पादाघातादशोकं विकसति । सा.द. ७२४।
184. वासायं मलयजलेपलक्ष्मीः । ह.के. ५।८।
185. हिमवत्येव भूर्जत्वक् चन्दनं मलये परम् । अमरनाथः, पूर्ववत्, पृ.२८०।
186. ह.के., ६।३३।
187. सा.द., ७२५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिकेलौ प्राणेशः प्राक्तनेन पुण्येन प्रियाधरमधू[188] पिवतीति निरुक्तिः । कामशास्त्रे ललाटालककपोलनयनवक्षस्थलस्तनोष्ठादिषु[189] चुम्बनं निर्दिष्टम् । कविर्हरिकेलौ[190] दश कामदशानां निरूपणं चकार । कामशास्त्रेऽपि 991चक्षुःप्रीतिमनःसङ्गसङ्कल्पादयो दश कामदशा व्याख्याताः । रतिलिप्सा[192] नित्यनूतनतमा भवतीति हरिकेलौ समुदीरितम् । कामशास्त्रे[193] च संवत्सरशतेनापि मानवो भोगैर्न तुष्यतीति निर्देशः । हरिकेलौ मयूरपदकपदं [194] कविना प्रयुक्तम् । पञ्चभिर्नखैरुल्लेखने स्तनयोश्चूचुकाभिमुखी या रेखा सैव [195]मयूरपदकवाच्येति कामशास्त्रे निरूपितम्

हरिकेलौ सगाढालिङ्गनं [196]नखानखिप्रधानोऽनङ्गसमरश्चित्रितः । मिथोरागवृद्धौ संघर्षात्मकं नखविलेखनं कामशास्त्रेण[197] सूचितम् । महाकाव्येऽस्मिन् मदेरिता नायिका कामकेलौ प्रगाढायां निष्पन्नायां प्रियकण्ठे बाहुबन्धं[198] चकारेति कविना निरूपितम् । कामशास्त्रेऽपि मदविह्वलानां तास्ताश्चेष्टा विभ्रमाश्च[199] सम्यगुपदिष्टाः । कामकेलौ [200]निष्पन्नायां श्रमवारिबिन्दुसमलङ्कृतायाः विमृष्टकुचचन्दनायाः सुखसागरे निलीनाया नायिकाया मुखे सीत्कार आविर्भूत इति हरिकेलौ

---

188. उत्सार्यालकमुन्नमय्य वदनं रोमाञ्चितः सस्मितम्
प्राणेशः पिबति प्रियाधरमधु प्राक्पुण्यसम्भारतः । ह.के. १४।४०।

189. ललाटालककपोलवक्षःस्थलस्तनोष्ठान्तर्मुखेषु चुम्बनम् । कामसूत्रे, २।३।४।

190. विधाय दशधा देहं दशावतरणो विभुः ।
दशास्मयदेकस्ता दशकामवशागताः ॥ ह.के. १४।४०।

991. (क) दश कामस्थानानि । का.सू., ५।१।४।
(ख) चक्षुःप्रीतिमनःसङ्गसङ्कल्पोपपत्तिनिद्राच्छेदतनुताः, विषयेभ्यो व्यावृत्तिः, लज्जाप्रणाशः, उन्मादः, मरणमिति तेषां लिङ्गानि । तत्रैव, ५।१।५।

192. तद्द्वयोर्विहरतोरिति गाढं सा घनागमनिशापि शशाम ।
नो पुनर्मनसि मानसिजीयं नित्यनूतनतमा रतिलिप्सा ॥ ह.के., ८।४०।

193. परस्परानुकूल्येन तदेदं रममाणयोः ।
संवत्सरशतेनापि प्रीतिर्न परिहीयते ॥ का.सू. २।५।४२।

194. तन्वास्तनूतडिदतिस्फुटिता विकीर्णा
वर्षन्ति कुन्तलघना घनपुष्पसारम् ।
दृष्ट्वा मयूरपदमुल्लसितं कुचाद्रौ
किं हारवल्लिभुजगी स्खलिता भयेन ॥ ह.के. १४।३९।

195. पञ्चभिरपिमुखैर्लेखा चूचुकाभिमुखी मयूरपदम् । का.सू . २।४।१९।

196. गाढेऽङ्ग्रहणे करेण करजाघाते च जाते मिथः । ह.के. १४।४१।

197. रागवृद्धौ संघर्षात्मकं नखविलेखनम् । का.सू. २।४।११।

198. सा महीयसि रसे निपतन्ती बाहुबन्धमकरोत् प्रियकण्ठे । ह.के. ८।३०।

199. सकचग्रहमुन्नमय्य मुखं तस्य ततः पिबेत् ।
निलीयेत दशेच्चैव तत्र तत्र मदेरिता ॥ का.सू. २।५।२९।

200. सरोरुहदृशा भृशं मदनतापमापन्नया
यथावसनमुज्झितं निपतितञ्च केलीरसे ॥
स्तनौ गलितचन्दनौ पुलकराशिरुज्जृम्भिता
विलोचनमनञ्जनं समुदिता मुखे सीत्कृतिः ॥ ह.के. १४।३६।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरूपितम् । कामशास्त्रे[201] च केलिरससमुद्भवं सीत्कृतमिति व्यपदेशः । हरिकेलौ पुरुषायितं[202] निरूपितम् । कामशास्त्रेऽतृप्ता नायिकाः[203] पूर्णतृप्तिलाभाय पुरुषायितमवलम्बन्त इति निरुक्तम् । हरिकेलौ[204] नायिकया नायकस्योष्ठदंशनादिकं वर्णितमस्ति ।[205]कामशास्त्रेऽपि पुरुषातिवर्तिन्या नायिकायास्तास्ता विभ्रमा निर्दिष्टाः । हरिकेलौ नीविविस्रंसनादिकं[206] निरूपितमस्ति । कामशास्त्रे च नारीकामोद्दीपनाय[207] तत्कर्तव्यतया निर्दिष्टम् । एकस्मिन् पद्ये कविः प्रतीकात्मकतया[208] नायिकानायकयोः संसक्तावस्थायां सम्भाव्यमानानां समेषां रतिविभ्रमाणां निरूपणं चकार ।

इत्थमत्र शृङ्गाराधिराजस्य प्रीतिपूर्णचन्द्रस्य कृष्णचन्द्रस्य केलौ सञ्जातानां प्रेमपावनानां लीलाविलासानां चित्रणमुखेन कविर्वशमणिर्निजां कामशास्त्रवैदुषीं ख्यापयामास ।

८. ११ राजनीतिशास्त्रव्युत्पत्तिः

हरिकेलौ राजनीतिशास्त्रस्यापि मूल्यभाञ्जि तत्वानि कविना सहजतया विनिवेशितानि । प्रजायास्तात्पर्येणेह कविना प्रकृतिपदं[209] प्रयुक्तं न तु राज्याङ्गत्वेन । कविनाऽत्र मन्त्रस्याख्यातरूपेण[210] प्रयोगोऽकारि । राजनये[211]मन्त्रमहत्वमसामान्यमस्ति । याज्ञवल्क्यस्तु राज्यस्य मन्त्रमूलत्वं[212] निर्दिदेश । षड्गुणानामिह[213] सङ्केतः प्रदत्तः । मनुस्मृतौ सन्धिविग्रहादयः[214] षड् गुणाः कीर्तिताः सन्ति । हरिकेलौ कोशपदमपि[215] कविना व्यवहृतम् । राजनये तस्य महिमा गीतो नितराम्[216] । इह[217]करादानप्रसङ्गोऽपि कविना वचसां विषयीकृतः ।

---

201. तदुद्भवञ्च सीत्कृतम् । का.सू., २।७।४।
202. सा यथा नवनवोदितरागादुन्मदादपुरुषायत योषा,। ह.के. ८।३८।
203. नायकस्य सन्तताभ्यासवशात् परिश्रममुपलभ्य रागस्य चानुपशमम् । अनुमता तेन तमधो निपात्य पुरुषायितेन साहाय्यं विदध्यात् ।, का.सू. २।८।१।
204. किन्तु मोहपतिता समकृन्तत् तस्य दन्तवसनं दशनेन । ह.के. ८।३०।
205. हस्तौ विधूनोति, स्विद्यति दशति उत्थातुं न ददाति, पाणिना हन्ति, रतावसाने च पुरुषातिवर्तिनी । का.सू. ८।२।१८।
206. नीविनिग्रहपरे प्रियपाणौ यन्निजं करमयोजयदेषा । ह.के. ८।२७।
207. पुरुषः शयनस्थाया योषितस्तद्वचनव्याक्षिप्तचिताया इव नीविं विश्लेषयेत् ... । का.सू. २।८।८।
208. खं विलोलति तरङ्गति गाङ्गं बंभ्रमीति पुलिनं मिलतीन्दुः । पङ्कजं रसति सारसमाला मायिकं किमपि मान्मथमासीत् ॥ ह.के., ८।३९।
209. "प्रकृतय इव भूपं भानुमन्तं नमन्ति । तत्रैव, १४।४।
210. तृणावर्तादिभिः सार्धं दानवध्यानमन्त्रयत् । तत्रैव, १।६१।
211. कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पत्, देशकालविभागः, विनिपात-प्रतीकारः, कार्यसिद्धिरिति पञ्चाङ्गो मन्त्रः । कौटिलीयार्थशास्त्रे, १।१५।
212. मन्त्रमूलमतो राज्यमतो मन्त्रं सुरक्षितम् । कुर्याद् यथाऽस्य न विदुः कर्मणामाफलोदयात् ॥ या.स्मृ., १।३४३-३४४।
213. न विचिन्तयसीह षड्गुणानगुणस्त्वं किमु राजसंपदा । ह.के., १५।१६।
214. सन्धिञ्च विग्रहञ्चैव यानमासनमेव च । द्वैधीभावं संश्रयञ्च षड्गुणान् चिन्तयेत् सदा ॥ मनुस्मृ. ७।१६०।
215. यत्रार्थवादश्रुतिरेव शास्त्रे शस्त्रे शिते कोशपरिक्षयोऽभूत् । ह.के. १६।८।
216. आकरप्रभवः कोशः कोशाद् दण्डः प्रजायते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजशास्त्रे[218] करविषयकं विमर्शनं ज्ञातम् । दिग्विजयसन्दर्भः प्रकारान्तरेण[219] सूचितः । पुरातनसमये राज्यविस्ताराय दिग्विजयाभियानं प्राचलत्[220] । कर्मकराणां स्वाधिकारमद[221] एव प्रशासने विकृतिं जनयतीति तत्वं हरिकेलौ विवृतमस्ति । सोऽयं विषयः[222] कौटिल्येनापि सङ्केतितः । अत्रोत्तुङ्गदुर्गविनिवेशविधिः[223] सङ्केतितः । कौटिल्येनापि सुरक्षितानां दुर्गाणां रचनाप्रकारो[224] निर्दिष्टः । हरिकेलौ राज्ञां राज्यभिषेकस्य[225] संसूचनमस्ति । वाल्मीकिरामायणे[226] राज्याभिषेकसम्भारा आदिकविना निरूपिताः सन्ति । उपरि दिग्दर्शनायोपस्थापितैरुदाहरणैर्दशमणे राजनयज्ञानं प्रमाणितं भवति ।

८. १२ विज्ञानव्युत्पत्तिः

हरिकेलिमहाकाव्ये धातुवादस्य पशुपक्षिविज्ञानस्य वृक्षवनस्पतिविज्ञानस्य च विषयाः प्रचुरतया वर्णिताः समुद्दिष्टाः सङ्केतिताश्च सन्ति । तत्तद्विषयेषु कवेः साधिकारां व्युत्पत्तिं निरूपयतां तेषामिह संक्षेपेण प्रस्तुतिर्विधीयते ।

(क) धातुरत्नविज्ञानम्

कनककर्णिका[227] - काञ्चनी[228] पाञ्चाली – मणिकङ्कण[229] – मुक्ताफल[230] – गैरिक[231] – सुवर्णसौध[232] – सुवर्णलेप[233] – मणिप्रसाधा[234] – मारकती प्रतिमा

पृथिवी कोशदण्डाभ्यां प्राप्यते कोशभूषणा ॥ कौ. अ., २।१२।४।

217. करग्रहार्तिः प्रियकेलिसङ्गादशे कुरङ्गायतलोचनानाम् । ह.के. १६।८।
218. दण्डविष्टिकराबाधै रक्षेदुपहतां कृषिम् । कौ.अ., २।१।२।
219. ....रतिपतेर्जगतीजययायिनः । ह.के. ६।४२।
220. स गुप्तरयप्रत्यन्तःशुद्धपार्ष्णिरयान्वितः ।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया ॥ र.वं.म.का., ४।२६।
221. स्वाधिकार... ऽनुजीविनां मन्युरापतति हि प्रभुष्वपि ॥ ह.के. ७।९।
222. राजानमुत्तिष्ठमानमनूत्तिष्ठन्ते भृत्याः प्रमाद्यन्तमनुप्रमाद्यन्ति, कर्माणि चास्य भक्षयन्ति । द्विषद्भिश्चापि सन्धीयते । तस्मादुत्थानमात्मनः, कुर्वीत । कौ.अ. १।१९।१६।
223. उद्धृतैरवयवैरिव तस्यास्तुङ्गमारचि बलित्रयदुर्गम् । ह.के. ८।१४।
224. चतुर्दिशं जनपदान्ते साम्परायिकं दैवकृतं दुर्गं कारयेत् । कौ.अ. २।२१।१।३।
225. मन्मथक्षितिपतेरभिषेके रुद्रपीठमिव भाति नितम्बः । ह.के. ८।१५।
226. वाल्मीकिरामायणे, २।३। अध्याये ।
227. अस्खलत् कंसकान्तानां कर्णात् कनककर्णिका । ह.के. १।११।
228. पाञ्चालीमिव काञ्चनीम् । तत्रैव, १।४९।
229. मणिकङ्कणनिस्वणप्रशंसा । तत्रैव, २।३।
230. वहसि च हृदि हारं हृद्यमुक्ताफलस्य । तत्रैव, १४।८।
231. गुरुगौरद्युतिगैरिकावतंसा । तत्रैव, २।३।
232. स्थले स्थले यत्र सुवर्णसौधाः । तत्रैव, १६।५
233. सुवर्णलेपो भवनस्य भित्तौ । तत्रैव, १६।१०।
234. प्रतिप्रयाणं मणिभिः प्रसाध्या । तत्रैव, १६।१०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

235 – हारहीरखचिता236 वीथी - किङ्किणी 237 – कर्णभूषा - विभूषण 238 – काञ्ची239 – विमानादयो 240 हरिकेलौ निरूपिता विषया धातुरत्नसंबद्धाः सन्ति । प्राय एतेषां सौन्दर्यनिभालनविधौ काव्यशैल्या निरूपणं कविनाऽकारि । एतेन कवेर्धातुरत्नविषयको बोधः प्रमाणितो भवति ।

(ख) पशुपक्षिविज्ञानम्

हरिकेलिमहाकाव्ये प्राणिविज्ञानविशारदेन वंशमणिना कविना शरद्हेमन्तशिशिरवसन्तग्रीष्मवर्षादिनिरूपणप्रसङ्गेषु तत्तदृत्वनुसारेण चेष्टमानानां पशूनां पक्षिणां सरीसृपाणाञ्च निरूपणमकारि ।

हंस241– मराल 242– उलूक 243– कोक 244– पिक 245– बक 246 क्रौञ्च247 शिखण्डि 248– मयूर– विहग 249– विहङ्ग- पतङ्ग 250– पिकी 251 –मधुकर 252– भृङ्ग -

---

235. प्रतिमा मारकतीव स व्यराजीत् । तत्रैव, २।२५।
236. वीथी यत्र च हारहीरखचिता ।, तत्रैव, १६।१४,।
237. सकिङ्किणीकङ्कणकर्णभूषा .. । तत्रैव, ३।५१।
238. धवलवस्तुविभूषणभूषिता ... । तत्रैव, ६।५१।
239. त्रिकेण काञ्ची श्रवणेन भूषा । तत्रैव, १२।४७
240. इतीरयित्वा मिहिरप्रकाशं विमानमारुह्य निजं निवासम् ...। तत्रैव, २।५५।
241. (क) सरसि सरसि मूकीभावमापच्च हंसः । तत्रैव, १४।१६।
(ख) शशंस हंसः प्रपतत्प्रवाहे ... । तत्रैव, १२।२०।
242. दिशि विदिशि मराला अप्यजायन्त मूकाः । तत्रैव, १४।१८।
243. सकलकलमुलूका वावदूका बभूवुः । तत्रैव ।
244. शोकाय कोकस्य जनीरजन्याः । तत्रैव, १२।८।
245. गिरा पिकानप्यतिलज्जयन्त्यः । तत्रैव, १०।२३।
246. बकालुरस्तत्र सरस्यवस्थितो बकाकृतिः । तत्रैव, ५।१८।
247. परिक्षतात् क्रौञ्चगिरेः पतत्रिणः । तत्रैव, ४।२७
248. उपवने शिखिमण्डलताण्डवम् ...। तत्रैव, ४।२७
249. उड्डीनं विहगकुलैः ... । तत्रैव, ५।२७
250. ... कायेऽपतिष्यन् न कथं पतङ्गाः । तत्रैव, २०।२६।
251. पिकी लम्पाकीव प्रतिविपिनमेषा विचरति । तत्रैव, ११।७
252. (क) पुन्नागे परिपतति स्म भृङ्गमाला । तत्रैव, ५।१५।
(ख) द्विरेफाः कुर्वाणा इव मधुकरीभिः परिणयम् । तत्रैव, ११।४।
(ग) परिभ्रमन्तीर्मधुपायिमाला: । तत्रैव, ३।३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

द्विरेफ - भृङ्गी[253]- अजगर[254]- दन्दशूक[155] - व्याल - शशक[256]- जम्बूक-मृग [257]- कुरङ्ग - जातोक्ष[258] - वृद्धोक्ष - महोक्ष - गोतरुणी[259] - हयारि[260]- भल्लूक[261] - शार्दूल [262]- सिंह[263]- द्विरद[264]- गजपतिप्रभृतयो नैकविधा जीवविज्ञानसंबद्धा विषयास्तत्तत्स्वभावविशदीकरणपुरःसरमुद्दीपनालम्बनभावप्रतिष्ठाविधौ काव्यशैल्या निरूपिताः । कवेरेतन्निरूपणं तस्य जीवविज्ञानसम्बद्धं गहनमध्ययनं प्रमाणयति ।

(ग) वनस्पतिविज्ञानम्

हरिकेलौ वंशमणिना समाधुर्यं वृक्षवनस्पतिसमृद्धिर्निरूपिता । विशेषत ऋतुवर्णनविधौ तत्तदृतुजन्यां शोभामावहतां तेषां कविश्चारु चित्रणं चकार । प्रकृतिप्रियस्य ललितकवेः प्रकृतिपरीक्षणपाटवीं परिचाययन्तो वृक्षवनस्पतिसौन्दर्यबोधव्युत्पादनपरा हृद्याः शब्दा दिग्दर्शनधिया निरूप्यन्ते ।

नागवल्ली[265] - वासन्ती[266] - शेफाली[267] - मल्ली[268] - लवङ्गी [269] - यूथी - लवली - एलाप्रभृतीनां लतावनस्पतीनां कविना समाधुर्यं प्रकृतिरमणीया छविरुद्भाविता ।

---

253. सामोदमन्दानिलमञ्जुभृङ्गीसङ्गीतभङ्गी ... तत्रैव, ३।७
254. तिमिराजगरग्रसितं जगदिदमगदं कर्तुं समुद्यतो देवः । तत्रैव, १४।२९।
155. (क) .. एष रोषारुणो दन्दशूकेश्वरः । तत्रैव, ५।५३।
(ख) ... नृणां बहुव्यालवृते हि चन्दने । तत्रैव, ४।१४
256. ... जम्बूकैः शशकगणैः क्वचिच्च लीनम् । तत्रैव, ५।२७
257. (क) ...मृगा विमुक्तान्यरसप्रसङ्गाः ...। तत्रैव, १०।१३।
(ख) ....गतं कुरङ्गैः .. । तत्रैव, ५।२७
(ग) .. नयनैः कुरङ्गान् .. । तत्रैव, १०।२३।
258. जातोक्षवृद्धोक्षचयैश्चरद्भिर्जातं महोक्षैरिव पञ्चषाहैः । तत्रैव, ३।३२।
259. इष्टानि मिष्टानि च गोतरुण्यः
तृणान्यतृष्वन्त विदिक्षु दिक्षु । तत्रैव, ३।२१।
260. जीवातुं विमृशति केवलं हयारिः । तत्रैव, ५।२३।
261. भल्लूको न खलु शशाक भीषणोऽपि । तत्रैव, ५।२२।
262. शार्दूलैः करयुगलेन मर्दितो ऽपि । तत्रैव, ५।२१ ।
263. सिंहोऽदः शिखिशिखरं खरं ललङ्घे । तत्रैव, ५।२०।
264. (क) व्यावृत्ता गजपतिगण्डमण्डलेभ्यः पुन्नागे परिपतति स्म भृङ्गमाला ।, तत्रैव, ३।३।
(ख) द्वारि द्विरदमुदैक्ष्यत मधुरिपुरुपचितमदम् । तत्रैव, १७।२१।,
265. आश्लिष्टपूगा इव नागवल्यः ।, तत्रैव, ३।२।
266. त्रसन्ती वासन्ती किसलयकरं कम्पयति किम् । तत्रैव, ११।१०।
267. द्विरेफाः शेफालीवनभुवि निकामं निपतिताः । तत्रैव, ७।४४।
268. मल्लीनां मुकुलकुलानि काननेषु रेजुः । तत्रैव, ५।९।
269. लवङ्गीमालिङ्गत्युपचरति यूथीमविरतम्
गतायातैरुल्लासयति लवलीवल्लिमवलाम् ।
चिरं चुम्बत्येलां मलयवनवेलासहचरः
समीरो दाक्षिण्यं प्रकटयति कामीव कुतुकैः ॥ तत्रैव, ११।६।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वकुल[270] - पाटलि[271] - तमाल[272] - पनस[273] - रसाल[274] - धावाल[275] - कदम्ब[276] - केतक[277] - मुनिद्रुम[278] - अशोक[279] - पलाश[280] - कुन्द[281] - अरविन्द - माध्य - मधूक - पूगादीनां[282] - पुष्पफलवृक्षाणां कविना हृदयहारि चित्रणं कृतम्। अनेन कवेर्वृक्षवनस्पतिसौन्दर्यबोधेऽप्रतिहता शक्तिः प्रकाश्यते।

८. १३ निष्कर्षः

अगाधे ज्ञानपारावारेऽवगाहनं कुर्वतो महाकवेर्वंशमणेर्यथा प्रतिभापरिष्कृतः काव्यकलापक्षस्तथैव मेधामहनीयो विद्याव्युत्पत्तिपक्ष इति तथ्यमनेनाध्ययनेन प्रमाणितम्। महनीयां रचनाधर्मितामङ्गीकृत्य सुरसरस्वतीसपर्यासमर्पितजीवनस्य नैपालकस्य महाकवेर्वंशमणेरुच्चस्तरीयस्य प्रातिभसंस्कारस्य गहनस्य विद्यासंस्कारस्य च परिचायकमिदं हरिकेलिमहाकाव्यं निजैस्तैस्तैर्गुणैर्भगवत्याः सुरसरस्वत्या हृद्यं हारमिव विद्योतते नूनम्।

☆

270. छाया तत्र कुटुम्बिनी वकुलजा ...। तत्रैव, २।५१।
271. समुदितरागपरागपरागतपाटलिपाटलिताशम्। तत्रैव, २।६२।
272. हसदिव देववनानि घनायितमालतमालम्। तत्रैव।
273. परभृतचञ्चुविपञ्चितपनसरसालरसालम्। तत्रैव,।
274. रसालाः सालापा वयमिव किमेते विदधते। तत्रैव, ११।२।
275. धावालो धरणीतले पतत्परागः। तत्रैव, ५।११।
276. नवकदम्बकदम्बकदम्बकम्। तत्रैव, ६।४१।
277. विकचकेतककेसरजं रजः ..। तत्रैव, ६।४२।
279. सशोकोऽशोकोऽयं त्वदधरमयूखेन मलिनैः ...। तत्रैव ११।१८।
280. पलाशानां पुष्पेष्वजानेपत धूमध्वजधियः .....। तत्रैव, ११।५।
281. निरानन्दः कुन्दे विकसदरविन्देऽपि विमुखः ..। तत्रैव, ११।८।
282. तत्रैव, ३।२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९. लोकचित्रणम्

पौराणिकं कथाबीजमधिकृत्य प्रणीतेऽस्मिन् महाकाव्ये कविना वस्तुतः स्वानुभूतः समाज एव चित्रितः । समृद्धे भक्तपुरराज्ये सुकवेर्विदुषश्च राज्ञो जगज्ज्योतिर्मल्लस्य छत्रछायायामासीनेन वंशमणिना निजनिर्मिते महाकाव्ये साहित्यसङ्गीतकलासमृद्धस्य मल्लकालिकसमाजस्य प्रतीयमानतया चित्रणं कृतम् । हरिकेलिमहाकाव्यस्य षोडशसर्गे निहितं मथुरावर्णनं भक्तपुरस्य वर्णनमस्ति । तथैव चतुर्थसर्गे निरूपितं वृन्दावनसौन्दर्यवर्णनञ्च काष्ठमण्डपोपत्यकां निकषा वर्तमानानां निसर्गसुन्दराणां काननकुञ्जानामेव वर्णनमिति तथ्यं हरिकेलिमहाकाव्यस्य गभीरया दृष्ट्याऽवगाहने ज्ञातुं शक्यते । महाकाव्येऽस्मिन् प्रतिबिम्बितानां समाजसंस्कृतिसूचकानां केषाञ्चन तथ्यानामिह वस्तुनिर्देशधिया निरूपणं क्रियते ।

९. १. राजा

कविना राज्ञि जनानामनल्पः[1] समादरः सङ्केतितः । वैदिकविधिना[2] विधीयमानस्य राज्याभिषेककर्मणः सूचना प्रदत्ता । राज्ञो मन्त्रिभिः[3] सार्धं मन्त्रणा च निर्दिष्टा । विशिष्टानां राजभवनानां[4] तदाश्रितानां प्रभूतानां सैनिकानाञ्च[5] निरूपणमिह कविना व्यधायि । [6]दिग्विजययात्राऽपि प्रकारान्तरेण कविना सङ्केतिता । [7]राजमुकुटछत्रदण्डानां च कविना चित्रणं कृतम् ।

९. २. वर्णाश्रमव्यवस्था

हरिकेलौ वर्णाश्रमधर्मगौरवं[8] कविना शब्दत उपात्तं विषयवस्तुना च प्रत्यायितम् । तदानीन्तने समाजे ब्राह्मणानां[9] सर्वोच्चं स्थानं प्रकाशितम् । गृहागतानां[10] ब्राह्मणानां सपर्यादिस्वागतकर्म

---

1. प्रकृतय इव भूपं भानुमन्तं नमन्ति । ह.के., १४।४
2. मन्मथक्षितिपतेरभिषेके स्वर्णपीठमिव भाति नितम्बः । तत्रैव, ८।१५।
3. तृणावर्तादिभिः सार्धं बालवध्यासमन्त्रयत् । तत्रैव, १।६१ ।
4. भुजङ्गजुष्टा शशिबिम्बचुम्बिचूलाचलोत्तुङ्गतरङ्गगङ्गाः ।
   यस्यामराजन्नवदातवेशा गृहा महेशा इव भूमिपानाम् । तत्रैव १६।६ ।
5. अथ प्रेषिता भोजराजेन कोपाच्चमूराजगामोद्भटानां भटानाम् ॥ तत्रैव १६।३४
6. विकचकेतककेसरजं रजो रतिपतेर्जगतीजययायिनः । तत्रैव, ६।४२ ।
7. दिविच्छत्रं चक्रभ्रमणमनिलः पुष्परजसाम्
   इमाः स्फारा धाराः कनकमयदण्डद्युतिभृतः ।
   स्फुरद्भानोर्बिम्बं मणिमुकुटतामञ्चति मघो:
   तमौचित्या सत्यापय ऋतुषु राजानमबले ॥ तत्रैव, ११।१४।
8. स्ववर्णधर्माश्रयणं श्रियः पदम् । तत्रैव, ४।२।
9. प्रेताधिनाथादपि नो बिभेमि तत्कैव चिन्ता पृथिवीपतीनाम् ।
   भयं पुनः केवलमेव लोके प्रतीहि मे विप्र तवैव जातेः ॥ तत्रैव, ३।५२।
10. अथ भोजपतिस्तमागतं मुनिमानर्च यथोचितार्चनैः । तत्रैव, १५।१।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचसां विषयीकृतम् । तपस्विनां[11] साधूनां योगिनाञ्च महिमा निरूपितः । वेदवेदाङ्गपुराणानां[12] दर्शनानां कलानां शिल्पादीनाञ्च पठनपाठनमननादिकार्यजातं कविना सूचितम् । कृषका[13] गोदुहश्च तत्तत्कर्मव्यापृता यत्र तत्र चर्चिताः । आपणानां[14] समृद्धिः सूचिता । राजशासनं[15] साङ्गोपाङ्गं प्रसङ्गानुकूल्येन व्याख्यातम् । नामकरणसंस्कारस्य[16] विवाहसंस्कारस्य[17] पुष्पधूपदीपनैवेद्यादिजाते[18] परमेश्वरीपूजायाश्च निरूपणमत्र जातम् । रजकमालाकारादयो[19] वर्णिनो निरूपिताः । अभ्यागतसत्कारस्य[20] महिमा निर्दिष्टः । पातिव्रत्यस्य[21] गौरवञ्च गीतम् । वर्णाश्रमधर्मप्राणायितस्य[22] पुरुषार्थचतुष्टयस्य निरूपणञ्च कविना व्यधायि । इत्थं हरिकेलौ कविनाऽऽर्षपरम्परानुकूलं मल्लकालिकं जनजीवनं चित्रितम् ।

१. ३. आवासः

हरिकेलौ राजप्रासादानां[23] नागरिकभवनानाञ्च[24] कलात्मकं सौन्दर्यं कविना प्रकाशितम् । मल्लकालस्य भव्या वास्तुकलाऽनया दिशा कविना संसूचिता । स्वर्णलेपैश्चमत्कृतानां[25] कर्पूरपूरैः प्रसाधितानां मणिभिश्च सुसज्जितानां तेषां भवनानां निरूपणावसरे तत्राश्रितानां विलासिनीनामपि विलासमयमैश्वर्यमयञ्च[26] जीवनं निरूपितम् । वस्तुतो मल्लकाले भक्तपुरमधिवसता कविना

---

11. सन्तारिता: शुकसनन्दसनातनाद्या नावं विनैव भवता भवतारसिद्धाः । तत्रैव, १३।३४।
12. निखिलवेदपुराणतदङ्गकैरुपनुतान् कृतरूपपरिग्रहैः ।
परिवृतानणिमादिविभूतिभिः शतमुखप्रवरैरुपसेवितान् ॥ तत्रैव, ६।२७।
13. वयममी पशुपालनवृत्तयो गिरिचरा गिरिमेव यजामहे । तत्रैव, ६।४८।
14. यत्राभान्ति गृहा महामणिवहा पर्यायतोऽभ्रंलिहाः ।
वीथी यत्र च हारहीरखचिता रत्नाकरप्रेयसी ॥ तत्रैव, १६।१४।
15. इति कंसकृतादेशाः सुवेषा मल्लतल्लजाः ।
रङ्गे ववल्गुरुत्तुङ्गनगशृङ्गतनुश्रियः ॥ तत्रैव, १७।१४।
16. क्रमेण गर्गोदितनामधेयौ तौ रामकृष्णौ गृहपालिकासु । तत्रैव, २।४१।
17. मधुः कन्यादाता परिलसति गाता परभृतः
पुरोधाः पञ्चेषुः सुरभिरभितो धावति मरुत् ॥ तत्रैव, ११।४।
18. कुसुमं सुगन्धि विमलं कमलं विनिवेद्य खाद्यमपि हृद्यतमम् । तत्रैव, ९।१७।
19. तत्रैव, १६ (षोडश) सर्गे ।
20. यत्रागतानामगमा लताभिः साकं सदातिथ्यविधिं वहन्ति । तत्रैव, ३।१६।
21. वल्लीनामजनि पतिव्रतं बलीयः । तत्रैव, ५।२६।
22. यत्रान्यथासिद्धिसमर्थितोऽर्थः सदैव धर्मोऽपि समीपवृत्तिः ।
निमेषसङ्गात् सह कामसिद्ध्या करस्थिता कस्य न मुक्तिकन्या ॥ तत्रैव, ३।९।
23. तत्रैव, १६।५-६ ।
24. तत्रैव, १६।१४।
25. सुवर्णलेपो भवनस्य भित्तौ कर्पूरपूरैरजिरोपचारः ।
प्रतिप्रयाणं मणिभिः प्रसाधा साधारणी सर्वजनस्य यस्याम् ॥ तत्रैव, १६।१०।
26. प्रसाधनानि प्रमदा विधाय निधाय चेतः प्रियसङ्गमाय ।
उपेत्य सौधं गमयन्ति सूरं दिनेऽपि दूरं सिचयाञ्चलेन ॥ तत्रैव, १६।३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काष्ठमण्डपस्य ललितपुरस्य भक्तपुरस्य च सौन्दर्यं हृदि निधाय हरिकेलौ मधुरानगरी[27] वर्णिता । कविः सामान्यजनानामावासप्रबन्धं[28] न निरूपितवान् प्रसङ्गाभावात् ।

९. ४. भोजनम्

हरिकेलौ हृद्यस्य नैवेद्यस्य, पात्रेषु सुसज्जितानां नैकविधव्यञ्जनयुतानां सरसभोजनानां च कविना निरूपणं विहितम् । वर्तमानसमये नेपाली - हिन्दीप्रभृतिषु लोकभाषासु प्रचलितं "खानपान"[29] इति पदञ्च कविना प्रयुक्तम् ।

९. ५. वस्त्राभूषणप्रसाधनानि

जीर्णेषु वस्त्रेषु शयानस्य[30] बालकृष्णस्य चित्रणेन कविना सामान्यकृषकस्य गृहस्थितिर्यथार्थतया निरूपिता । सम्पन्नजनानां कौशेयधारणं[31] निर्दिष्टं हरिकेलौ । तत्र नवनीतधवलस्य दुकूलस्य[32] चर्चा कविनाऽकारि । ग्राम्यबालानां[33] विनैव वसनधारणं स्नानं सूचितम् । राजभवनेषु रङ्गरुचिराणां[34] मूल्यवतां वस्त्राणामुपयोगो निर्दिष्टः । वस्त्राभूषणैः[35] समलङ्कृतानां सुन्दरीणां हरिकेलौ स्थले स्थले निरूपणं जातम् । एकस्मिन् पद्ये वासकसज्जाया[36] नायिकाया वर्णनं कविनाऽकारि । कर्णयोः कनककर्णिकाधारणं[37] निर्दिष्टम् । मणिकङ्कणानां[38] च चर्चा जाता । अलङ्कारस्थानीयेष्वङ्गेषु स्वर्णभूषणशृङ्गारो[39] निरूपितः । कट्यां काञ्च्या[40] हृदये मुक्ताहारस्य[41] चरणयोर्नूपुरस्य[42] च

---

27. तत्रैव, ९।१७
28. सरसभोजनपानपरिष्कृतीः कृतकशिल्पकलाः सकला जनाः । तत्रैव, ६।४७
29. धवलवस्तुविभूषणभूषिता विविधखानसुपानसमन्विताः ।
    सुरभिवर्धनमीशनिवेदिता व्रजजना यजनाय समागताः ॥ तत्रैव, ६।५१।
30. नन्दालिन्दे गलितवयसा वाससाच्छन्नमास । तत्रैव, १।६५।
31. नवकौशेयवराम्बराभिरामा । तत्रैव, २।२।
32. (क) उपकुलमर्पितदुकूलचयं चपलाः परिस्फुरितदेहरुचः । तत्रैव, ९।२०।
    (ख) कलयसि नवनीतस्फीतमङ्गे दुकूलम् । तत्रैव, १४।८।
33. वसनं विनैव सलिलाप्लवनं लवनं व्रजस्य यदतोऽजनि वः । तत्रैव, ९।४१।
34. वसनानि रङ्गरुचिराणि नृपसमुचितानि देहि नौ ... । तत्रैव, १६।१८।
35. अष्टमे नवमे दशमे द्वादशे त्रयोदशे च सर्गे विशेषतः प्रसाधितानां रमणीनां चर्चा ।
36. कामबाणबहुलीकृतबाधा सानुरञ्जनपरा तव राधा ।
    स्वे गृहे गुरुजनेऽप्यपलज्जा साम्प्रतं वसति वासकसज्जा । तत्रैव, ८।७
37. अस्खलत् कंसकान्तानां कर्णात् कनककर्णिका । तत्रैव, १।११।
38. मणिकङ्कणनिक्वणप्रशंसा .... । तत्रैव, २।३।
39. गुरुगौरद्युतिगैरिकावतंसा । तत्रैव, २।३
40. त्रिकेण काञ्ची श्रवणेन भूषा ... । तत्रैव, १२।४७
41. (क) वहसि च हृदि हारं हृद्यमुक्ताफलस्य । तत्रैव, १४।८।
    (ख) तासां तदासादि हृदापि हारः । तत्रैव, १२।४७
42. मेखला सहचरी विचकम्पे संरुरोद बहु नूपुरयामी । तत्रैव, ८।३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धारणमपि कविना सूचितम् । अङ्गेषु चन्दनकुङ्कुमादिलेपनं[43] कीर्तितम् । तैलाभ्यङ्गो[44] निर्दिष्टः। कचभारे [45]मल्लिकादामरचना प्रतिपादिता । बालकानां[46] ललाटेषु चन्दनगोरोचनातिलकविधानं कविना समाधुर्यं निरूपितम् । अनुलेपनपात्रहस्ता[47] नारी वचसां विषयीकृता । उक्तैरुल्लेखैर्मल्लकालिकस्य जनजीवनस्य परिधानालङ्करणप्रसाधनेषु सौन्दर्यप्राणा प्रवृत्तिः सूच्यते नूनम्।

९. ६. धर्मानुसरणम्

हरिकेलौ वैदिकसनातनसंस्कृतिमनुसरता वंशमणिना श्रुतिस्मृतिप्रशंसितस्य [48]वैदिकधर्मस्य सर्वप्राधान्यं विशदीकृतम् । वैदिका मूल्यवन्तो विचारा वेदव्युत्पत्तिप्रकरणेऽस्माभिरुद्धृता इति हेतोर्नेह तेषां प्रपञ्च आवश्यकः । ब्रह्मवादमनुसृत्य कविना [49]त्रिदेववादोऽपि समर्थितः । त्रिदेववादभित्तौ पञ्चदेववादेऽपि कविः श्रद्धावानासीदिति तथ्यं हरिकेलिगतैः पद्यविशेषैः सत्याप्यते [50] । सोऽयं

---

43. (क) आसायं मलयजलेपलक्ष्मीः ...... । तत्रैव, ५।८।
(ख) भालदेश इह बालमृगाक्ष्या भाति नागजरजःकृतबिन्दुः । तत्रैव, ८।१०।
44. न श्लाघा सुरभिणि कुङ्कुमे न तैले
नेपथ्ये बहुनि पुरेव नानुरागः । तत्रैव, ५।६।
45. रचयसि कचभारे मल्लिकादामसारम् । तत्रैव, १४।८
46. गोरोचनाचन्दनपङ्कलेखा भाले रराज व्रजराजसूनोः ...... । तत्रैव, ३।२५।
47. अनुलेपनपात्रपाणिमभ्यायतनेत्रः
पथि सोऽय वीक्ष्य कुब्जाम् ॥ तत्रैव, १६।२५।
48. इह संसृतिनाट्यमीहते श्रुतिनान्दीनिगदेन यत् स्वयम् ।
स्वयमेव निरीक्षते च यः प्रकटं तं नटमीशमाश्रये ॥ तत्रैव, १५।४३।
49. हरिः पाता हरो हर्ता कर्ता च कमलासनः ।
जना जल्पन्तु जगतां वस्तुतस्तु त्वमेव ते ॥ तत्रैव, १।२३।
50. (क) ॐ नमोगणपतये । तत्रैव मङ्गलाचरणे ।
(ख) वन्दे सन्देहमन्देहदूरीकरणभास्वती ।
नित्यप्रकाशौ जगतो गुरू गौरीगिरीश्वरौ ॥ तत्रैव, १।१।
(ग) नमस्तुभ्यं हृषीकेश केशव क्लेशनाशन ।
भूतनाथासनीभूतपवमानाशनासन ॥ तत्रैव, १।२२।
(घ) जगन्मातरि जातायां महामोहे महीयसि ।
निरञ्जनस्कम्भिवापन्नं जीवजातमजायत ॥ तत्रैव, १।३६।
(ङ) असभाजयन् मृगकिशोरदृशो नगनन्दिनीं प्रणतिभिः स्तुतिभिः ॥ तत्रैव, ९।१७
(च) यदपि वहति रागं वारुणी सङ्गदोषात्
पतति गगनकोणादस्तविन्यस्तपादः ।
रविरभवदथापि श्लाघनीयो द्विजानाम्
सवितुरतिविकारेऽप्यादरः कस्य न स्यात् ॥ तत्रैव, १४।२।
(छ) वितमसमनुरज्यन्मण्डलं मन्त्रदक्षाः
समयसमुदितार्घाः स्वान् करानुत्क्षिपन्तः ।
यमिन इह निगूढं चिन्तयन्तोऽस्य रूपम्
प्रकृतय इव भूपं भानुमन्तं नमन्ति ॥ तत्रैव, १४।४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कविस्तैरेवपद्यैर्मल्लकालिके जनजीवने लब्धप्रश्रयाणां गाणपत-सौर-शाक्त-वैष्णव-शैवसम्प्रदायानामपि संसूचनं चकार । वैदिकधर्मानुयायिना महाकविना स्वयं शिवेऽनुरक्तिर्विहितेति तथ्यन्तु महाकाव्यारम्भे निहितं मङ्गलपद्यमेव प्रमाणयति ।

९. ७. सामाजिकं जीवनम्

[51]हरिकेलौ कविना सदाचारप्राणं सद्विचारपूतं स्वकर्मनिष्ठं च जनजीवनं चित्रितम् । विमलं कुलचरितं श्रद्धया कीर्तितं पातिव्रत्यस्य महिमा च प्रकाशितः । राजाज्ञायाः प्रभावकारिता सूचिता । वर्णधर्मे आश्रमधर्मे च साभिनिवेशं प्रवर्तितानां जनानां चरितानि प्रकाशितानि । कृषिकर्मणा, पशुपालनेन, व्यापारेण, राजसेवया, विद्योपासनया च स्वानि स्वानि जीवनानि यापयन्तो जना निरूपिताः । वास्तुकलायाश्चित्रकलाया मूर्तिकलायाः साहित्यसाधनायाः सङ्गीताभ्यासस्य, विद्याव्यसनस्य च पर्यायभूते मल्लकाले जीवनं यापयन् कविः निजनिर्मितेऽस्मिन् महाकाव्ये तत्सर्वमेव विषयजातं काव्यशैल्या निरूपितवान् ।

एतावता, आर्षपरम्पराया अनुयायी वर्णाश्रमसंस्कृतेरुद्घोषकः सदाचारसद्विचारपक्षपाती महाकविर्वंशमणिः कर्मोपासनाज्ञानपावनां वैदिकसंस्कृतिमग्रे प्रवर्तयन् सर्वनमस्यस्य विश्वबन्धुवादस्य सुप्रतिष्ठां चकारेति निश्चीयते ।

सोऽयं महाकविर्महाकाव्येऽस्मिन् निरूपितैरादर्शचरितैर्मानवतायाः, सेवायाः, स्वधर्मनिष्ठायाः, सच्चरितस्य, मर्यादायाः, अनुशासनस्य, परमेश्वरभक्तेः, अध्यात्मनिष्ठायाश्च महिमानं गायन् स्वस्थसमाजसंरचनाया महान्तं पन्थानं निर्दिदेश ।

वस्तुतो विक्रमस्य सप्तदश्यां शताव्दौ नेपालाधिराज्यस्य भक्तपुरनगरमधिवसन् सरस्वत्याश्चरणपङ्कजमकरन्दपानप्रमुदितमानसो महाकविर्वंशमणिः, गोलोकाधिपतेर्नन्दनन्दनस्य भगवतः श्रीकृष्णस्य, गोलोकेश्वर्या वृषभानुनन्दिया भगवत्याः श्रीराधिकायाश्च दिव्यानां लीलाविलासानाञ्च विश्ववाङ्मयचूडामणिपदं स्पृशन्त्या संस्कृतवाचा कीर्तनेन धरामण्डलदिव्यलक्ष्म्यास्तस्याः सार्वकालिकं सार्वदेशिकञ्च सामाजिकं महत्त्वमुपदिदेश ।

☆

---

51. सामाजिकजीवनशीर्षके निरूपिता विचाराः पूर्व विभिन्नेषु प्रसङ्गेषु प्रकाशिता इति तेषां प्रमाणजातस्योद्धरणमनावश्यकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिकेलिमहाकाव्यम्

मूलपाठ-खण्डः

(टिप्पणीसमलङ्कृतः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमसर्गः

-ॐ नमो महागणपतये[1]

[2]वन्दे सन्देहमन्देहदूरीकरणभारवी[3] ।
नित्यप्रकाशौ जगतो गुरु गौरीगिरीश्वरौ ॥
॥१॥
अयं मम समारम्भो गोविन्दगुणकीर्तने ।
मेरुहेमसमाहारं [4]शिशोरनुकरोति हि ॥
॥२॥
अनिष्पन्नाभिधेयापि तथापि मम भारती ।
कस्य नानन्दयेदन्तः शिशूनामर्द्धवागिव ॥
॥३॥
यस्य पादजलं गङ्गाऽनङ्गारेर्मौलिमण्डनम् ।
कीर्तितः स कथं न स्यादंहःसंघहरो[5] हरिः ॥
॥४॥
अथ स्वनति जीमूते मङ्गलानकजालके ।
चञ्चलानर्तकीनृत्ते प्रवृत्ते गगनाङ्गणे ॥
॥५॥
प्रसन्नपांसुप्रकरपवनोपवनोदके ।
कालेऽसूत जगत्सूतिं देवं देवकनन्दिनी ॥
(युग्मकम्)[6]
॥६॥

---

1. नमः श्रीगणपतये-इति क.पु. पाठः, ॐ नमः शिवाय-इति ख.पु. पाठश्च ।
2. "वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥
इति कालिदासकीर्तिपताकायितस्य रघुवंशमहाकाव्यस्य मङ्गलपद्यस्य काचनाऽऽविष्कृता छायाच्छविरत्र - नेपालजन्मना महाकविना वंशमणिना । (टि.) ।
3. प्रसङ्गान्तरप्रयुक्तं भारवीतिपदं भारविकवौ वंशमणेरादरं व्यनक्ति । (टि.)
4. शिशोः- इति पदं हरिकेलिमहाकाव्ये माघकृतस्य शिशुपालवधमहाकाव्यस्यापि प्रभावव्यञ्जकमस्ति ।
5. अंघःसंघहरो हरिः - इति सर्व एव पाठाः, औचित्यदृष्ट्या, "अंहः" इति पाठः साधुः ।
6. छन्दोबद्धपदं पद्यं तेन मुक्तेन मुक्तकम् ।
द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते ॥ सा.द., ६।३१४। (टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्ववृद्धिः सतामास खलीकारः[7] खलात्मनाम् ।
बीजं वृजिनभङ्गस्य[8] जात एव जगत्पतिः ॥
॥७॥
अत्यजत् तामसोल्लासभारबाधां[9] वसुन्धरा ।
द्यौरपि द्योतमानाऽर्कचन्द्रादिगगनचेरा ॥
॥८॥
[10]भेजिरेऽसुरसंघातं विहाय सुरसंहतीः ।
जायमाने जगन्नाथे चिन्ताचापलसंज्वराः ॥
॥९॥
आसन्नासादितश्रीका महामोदमनोहराः[11] ।
वने वने सुमनसो भुवने भुवने जनाः ॥
॥१०॥
देवीनां मूर्ध्नि स्थानमापुः सन्तानजस्रजः ।
अस्खलत्[12] कंसकान्तानां कर्ण्णात् कनककर्णिका ॥
॥११॥
[13]अजोऽपि जायते देवश्चित्रमत्रेति कौतुकात् ।
तज्जन्मलग्नं ददृशे समस्तैरपि किङ्ग्रहैः[14] ॥
॥१२॥
पुरा[15] परभयादेव देवो निजगृहं जहौ ।
अध्युवास किमत्रासः पुनस्तद्वासरप्रभुः ॥
॥१३॥

---

7. खलीकालः - इति ग.पु. पाठः ।
8. वृजिनभङ्गस्य - इति पदं ख.पु. नास्ति ।
9. पीडा बाधा व्यथेत्यमरः । (पु.टि.)
10. भेजिरे - इत्यादिकं ख.पु. खण्डितम् ।
11. महामोदमनोहराः - इति पाठः ख.पु. खण्डितः ।
12. त्वमैवैकोऽसि तत्सर्वं कः स्तोता कस्तवस्तवः - इति ख.पु. पाठः स च प्रतिलिपिकृत्प्रमादसूचकः ।
13. अजा छागीस्तभच्छागवस्तच्छगलका अजे । (पु.टि.) ।
14. किङ्ग्रहैः - इति पदं ख.पु. खण्डितम् ।
15. (क) योगिनामप्यगम्योऽसौ-इति ख.पु. पाठः ।
(ख) परापरभयादेव - इति क.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[16]योगिनामप्यगम्योऽसौ गम्यो भवतु चक्षुषो:[17] ।
इत्युत्सुकतया[18] किं स्विदिन्दुरुच्चस्थले स्थित: ॥
॥१४॥
वसुदेव: सुदेवोऽभूद् देवकी सर्वदेवता ।
तौ तदा[19] किमु सञ्जातौ पुनस्तनयजन्मना ॥
॥१५॥
हरि: कौमोदकीकम्बुचक्रवारिजधारिभि:[20] ।
द्योतमानमणिश्रेणीभूरिभूषणभूषितै:[21] ॥
॥१६॥
भुजैरसुरसङ्ग्रामे[22] सिन्धुनिर्मन्थमन्दरै: ।
हसद्भिरिव तद्रूपानल्पायासापसारितान् ॥
॥१७॥
सम्व्यानवसनस्निग्धपीतिम्ना[23] पीतयन् दिश: ।
पुञ्जदञ्जनसंकाशरोचिषा वपुषा पुषन् ॥
॥१८॥
पित्रो:[24] परमिकां प्रीतिं कंसहंसप्रतप्तयो:[25] ।
पुर:[26] प्रादुरभून्मेघो गोत्रागगनयोरिव ॥

(कलापकम्)[27]
॥१९॥

---

16. योगिनामित्यादिभाग: - ख.पु. खण्डित: ।
17. चक्षुषा - इति क.पु. पाठ:, ख.पु. पाठश्च ।
18. इत्युत्सुकतया - इति पदं ख.पु. खण्डितम् ।
19. तौ तदा - इति पाठ: ख.पु. खण्डित: ।
20. धारितै: - इति ख.पु. पाठ: ।
21. भूरिभूषितभूषितै: - इति क.पु. पाठ: ।
22. भुजैरसुर - इति पाठ: ख.पु. खण्डित: ।
23. सम्व्यानम् - उत्तरीयमिति तात्पर्यम् । (टि.)
24. पित्रोष्परमिकां प्रीतिम् - इति सर्व एव पाठा: ।
25. कंसहंसप्रतप्तयो: - इति पाठ: ख.पु. खण्डित: ।
26. पुरष्प्रादुरभून् - इति सर्व एव पाठा: ।
27. कलापकं चतुर्भिश्च पञ्चभि: कुलकं मतम् । सा.द., ६।३१४-३१५ (टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीक्ष्य बालमथस्फुर्जन्महापूरुषलक्षणम् ।
योजयित्वा करं मूर्ध्नि भक्तिभावभरानते ॥
॥२०॥
सम्पादयन् तत्करयोरर्घ्यमानन्दजाश्रुभिः ।
आदरात् [28]प्रणयोदारादस्तौदानकदुन्दुभिः[29] ॥
॥२१॥
नमस्तुभ्यं हृषीकेश केशव क्लेशनाशन ।
भूतनाथासनीभूतपवमानाशनासन ॥
॥२२॥
हरिः पाता हरो हर्ता कर्ता च कमलासनः ।
जना जल्पन्तु जगतां वस्तुतस्तु त्वमेव ते ॥
॥२३॥
यच्च[30] भूतं भवद् यच्च भविष्यदपि वस्तु यत् ।
[31]त्वमेवैकोऽसि तत्सर्वं कः स्तोता कः स्तवस्तव ॥
॥२४॥
अनन्तगुणता गुर्वी तवाल्पा मामकी मतिः ।
तथापि[32] स्तूयसे देव केवलं भक्तिचापलात् ॥
॥२५॥
योगिनामप्यगम्योऽसि किम्पुनश्चर्मचक्षुषाम् ।
तथापि दृश्यसे देव दया दीने तवेदृशी ॥
॥२६॥
[33]कोटिकल्पान्तवृत्तान्तवेत्तासि प्रकृतेः परः ।
ध्रुवं [34]खलखलीकारेऽलङ्कारो मत्कुलेऽभवः ॥
॥२७॥

---

28. अस्तौद् - इति पदं ख.पु. खण्डितम् ।
29. आनकदुन्दुभिः - वसुदेव इत्यर्थः । (पु.टि.)
30. सर्वं भूतं भवद् यच्च - इति ग.पु. पाठः ।
31. न...पु... सर्वम् - इति ख.पु. पाठः ।
32. तथापि - इति पदं ख.पु. खण्डितम् ।
33. कोटिकल्पान्त - इति भागः ख.पु. खण्डितः ।
34. भवन् खलखलीकारलक्षणोऽस्मत्कुलेऽभवः-इति क.पु. - ख.पु. पाठौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वयं कंसनृशंसेन बलिना विकलीकृताः ।
तेन[35] मन्यामहे नाथ तन्निग्रहमनुग्रहम् ॥
॥२८॥
रूपं चेदं[36] निष्प्रपन्चं विरिञ्च्यादिभिरञ्चितम् ।
एष पापो न जानाति यावत्तावत् तिरस्कुरु ॥
॥२९॥
अदस्तदीयव्याहारं तुषारान्ते समागते ।
परपुष्टवदाचष्ट प्रहस्य पितरौ प्रभुः ॥
॥३०॥
पुरा परमभावेन भेजाथे मां तपः स्थितौ ।
मयापि युवयोः प्रीत्या तत्र पुत्रत्वमास्थितम् ॥
॥३१॥
मया जातेन जनकौ [37] सफलं तं तपस्तरुम् ।
वक्तुं[38] वां परमं रूपमाविर्भावितमात्मनः ॥
॥३२॥
गोपाय गोपायतने मां नीत्वा गोकुलं पितः ।
कंसादसाधोः संसाराज्ज्ञानीवात्मानमात्मनि[39] ॥
॥३३॥
इत्युक्त्वा स तनुं त्यक्त्वा दिव्यां नव्यार्भकोऽभवत्[40] ।
आर्य्यस्यापि विपर्य्येति कार्य्यरूपमनाविलम् ॥
॥३४॥
अथास्मिन्नेव[41] समये सायं सन्ध्येव चन्द्रिकाम् ।
यशोदा जनयामास योगनिद्रां कुमारिकाम् ॥
॥३५॥

---

35. तेन मन्यामहे - इति भागः ख.पु. खण्डितः ।
36. रूपं स्वभावे सौन्दर्ये इत्यादि, मेदिनीकारः । (पु.टि.)
37. सम्भृतम् - इति क.पु. पाठः ।
38. वक्तुं वां परमं रूपम् - इति वाक्यं ख.पु. खण्डितम् ।
39. ज्ञानीवात्मानमात्मनि - इति पाठः ख.पु. खण्डितः ।
40. दिव्यनव्यार्भको ऽभवत् - इति ग.पु. पाठः ।
41. अथास्मिन्नेव समये - इति भागः ख.पु. खण्डितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगन्मातरि जातायां महामोहे महीयसि[42] ।
निर्मनस्कमिवापन्नं जीवजातमजायत ॥
॥३६॥
कोऽपि कुत्रापि जानाति न सुखं सुखसाधने ।
दुःखहेतौ न दुःखं वा जगदम्बाविमोहितः ॥
॥३७॥
पुञ्जिताञ्जनसङ्काशं परितोपि महत्तमः ।
नामसाम्यसुहृन्मोहप्रसरे प्रससार किम् ॥
॥३८॥
सामगेयं मुनिध्येयं जगदात्मानमात्मजम् ।
वसुदेवस्तदादाय गोकुलाय प्रतस्थिवान् ॥
॥३९॥
भानुकोटिप्रतीकाशे हरौ हृदयवर्तिनि ।
नाचक्राम तमो नाम परमानकदुन्दुभिम्[43] ॥
॥४०॥
अदृश्यं दृश्यतां यातं वर्त्म यातमपङ्कताम् ।
हरिवाहे व्रजगृहं व्रजत्यानकदुन्दुभौ ॥
॥४१॥
परितो हरितोषाय दर्शयन्त इवायनम् ।
भोगिनो भोगमाणिक्यदीपमालामदीदिपन् ।
॥४२॥
सतां संसारबन्धस्य विच्छेत्ता चिन्तयैव[44] यः ।
द्वारबन्धा विमुक्ताः किं स्वयमेव तदीक्षणात् ।
॥४३॥
क्व भीतिः क्वापयातम्वा क्रीडतोऽस्य जगत्पतेः ।
तडित्तरङ्गैरिति[45] किं हरितो हसिता हठात् ॥
॥४४॥

---

42. महीयसि - इति पदं ख. पु. खण्डितम् ।
43 पदम् - इति क. पु. पाठ : ।
44. यः-परमात्मा, इति (पु.टि.) ।
45. तडित् सौदामिनी विद्युदित्यमरः । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पङ्कसङ्कटदुस्तारा पारावारविवर्जिता ।
यमुनाप्यमुनातारि जानुदघ्नजलामला ॥
॥४५॥

सन्सारसिन्धुसन्तारे चिन्ता यस्य तरिः सताम् ।
कालिन्दी कियती[46] कृष्णे सति लोचनगोचरे ॥
॥४६॥

ततः स गोकुलं प्राप तापहारिहरिं वहन् ।
पङ्कसङ्कटमुत्तीर्य सुकृतीव सुरालयम् ॥
॥४७॥

ततः स्तिमितदीपाक्षि सुप्तगोपीगणं ययौ ।
सूतिधाम यशोदाया धाम ध्यायदिवामलम्॥
॥४८॥

यशोदाशयने सुप्तां पाञ्चालीमिव काञ्चनीम् ।
दिव्यदृष्टिः परां देवीं ददर्शानकदुन्दुभिः ॥
॥४९॥

तत्र न्यस्य निजं बालं बालिकामाददत् स ताम् ।
पुरीन्नेतुं परीवर्तां मूर्तामार्तिमिव द्विषः॥
॥५०॥

वसुदेवोऽपि देवक्याः सूतिसद्मनि सङ्गतः ।
तामेव तनयस्थाने वर्णे मात्रामिवादिशत् ॥
॥५१॥

आत्मघोषगृहे न्यासो निजापत्यस्य यत्कृतः ।
तत्कोकिलव्यवसितं साधु तेनापि[47] शिक्षितम् ॥
॥५२॥

अस्मिन्नवसरे[48] सर्वे चेतना लब्धचेतना : ।
महानिद्रापरीहारात् पुनर्जाता इवाभवन् ॥
॥५३॥

---

46. कियत्यन्तो भागः ख.पु. खण्डितः ।
47. तेन-वसुदेवेनेत्यर्थः । (पु.टि.) ।
48. चेतना लब्धचेतसः- इति ख.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यशोदा विविदे पुत्रं जातां पुत्रीञ्च देवकी ।
अहो बलवती दैवी माया ब्रह्मादिमोहिका[49] ॥
॥५४॥
सूतिं विदित्वा देवक्या दौवारिकमुखादरिः ।
देवानामगमत्तत्र कंसः काल इव क्रुधा ॥
॥५५॥
वार्यमाणोऽपि स तया कृपयादाय दारिकाम् ।
अपातयत पाषाणे पापासक्तस्य का कृपा ॥
॥५६॥
दृषद्यापातितैवाद्या देवी सद्यो दिवङ्गता ।
विद्युत्कोटिरिवोद्योतैर्द्योतयामास रोदसी[50] ॥
॥५७॥
ततः सौदामिनीवासौ वचसा वज्रतेजसा[51] ।
निजघान नृशंसन्तं वसन्तं बसुधातले ॥
॥५८॥
कंस हंसि वृथा किं मामन्य एव तवान्तकः ।
मूढ गूढमिहोत्पन्नो भस्मच्छन्न इवानलः ॥
॥५९॥
इत्युक्त्वान्तर्दधे देवी नभोवाणीव[52] तत्क्षणात् ।
नव्यदिव्योपहारेण सेविता देवतादिभि : ॥
॥६०॥
कंसोऽपि बालिकावाक्याद् बालवधविधूतधीः ।
तृणावर्तादिभिः सार्धं बालवध्याममन्त्रयत् ॥
॥६१॥
कृष्णः पूर्णेन्दुरानन्दसिन्धुं नन्दयशोदयोः ।
अन्वहं वर्धयामास बालभावेन गोकुले ॥
॥६२॥

---

49. ज्ञानिनामपि चेतांसि देवी भगवती हिसा । बलादाकृष्य मोहाय महामाया प्रयच्छति ॥ इति मार्कण्डेयान्तर्गत-दुर्गासप्तशतीपद्यस्य स्पष्टः प्रभावोऽत्रानुभूयते । (टि.)
50. द्यावापृथिव्योरन्तरालं रोदसी, (पु.टि.) ।
51. बहुतेजसा - इति क. पु. पाठ : ।
52. सा नभोवाक् ततः क्षणात्-इति क.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इयं निद्रामुद्रा[53] मम सकलसम्मीलनकरी
जनोऽयं जानीते किमपि न जडः स्वापयति माम् ।
शयानः कैशोरे शयन इति कौतूहलवशात्
यशोदादायादः[54] किमपि किमपि[55] स्वैरमहसत् ॥
॥६३॥

अहो घोरा माया मम बहुविधायासजननी
जनानामज्ञाने महति निहितानामिह मुहुः ।
रुरोद स्मृत्वेवं किमु कलितकैशोरकदशो
वितायानुक्रोशं निभृतनिभृतं नन्दतनयः ॥
॥६४॥

कल्पे कल्पे भुवनमखिलं येन सृष्टं विसृष्टम्[56]
यस्यैवासौ जगति भगवानंशुमानंश एकः ।
कः प्रत्येतु प्रथयतु च को धाम तत्साममगम्यम्
नन्दालिन्दे[57] गलितवयसा वाससाच्छन्नमास ॥
॥६५॥

पिता[58] यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्ये ऽतिभव्येऽ-
भवत्पूर्णः पूर्णो हरिजनिगुणैरादिमः सर्ग एषः ॥
॥६६॥

---

53. यदा स देवो जागर्ति तदेदं चेष्टते जगत् ।
यदा स्वपिति विश्वात्मा तदा सर्वं निमीलति ॥ (पु.टि.)

54. दायादौ सुतबान्धवौ, इत्यमरः । (पु.टि.)

55. मन्दस्वच्छन्दयोः स्वैरमित्यमरः । (पु.टि.)

56. विकृष्टम् - इति क. पु. पाठः ।

57. प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके, इत्यमरः । (पु.टि.) ।

58. श्रीहर्षेण महाकविना निजनिर्मिते नैषधचरितमहाकाव्ये स्वपरिचय : प्रदत्तः । यथा-
श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतम्
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा -
काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः ॥ नै. च., १।१४५।
तेनैव प्रकारेण वंशमणिनापि पुष्पिकापद्येऽत्र स्वपरिचयः प्रस्तुतः । एतेन कविरसौ श्रीहर्षात् प्रभावित इत्यनुमीयते । (टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिश्रीवंशमणिकृते हरिकेलौ महाकाव्ये 59

प्रथमः सर्गः ।

☆☆☆☆☆

59. कविना स्वयं निरूपितं "महाकाव्ये" इति पदं हरिकेलिकाव्यस्य महाकाव्यत्वसाधकमिति तद्विषये नान्यस्य कस्यचन प्रमाणस्यापेक्षा (टि.) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयसर्गः

अथ कंसनृशंसवाक्यनुन्ना प्रतिपन्ना शिशुघातपातकेषु ।
समगच्छत पूतना घनापत्पतिता नन्दनिकेतनं कदाचित् ॥
॥१॥
प्रकृतिं परिवर्त्य यातुधानीमतिमानीकृतदिव्यकायकान्तिः ।
चिकुराञ्चितचारुमल्लिदामा नवकौशेयवराम्बराभिरामा[1] ॥
॥२॥
मणिकङ्कणनिक्वणप्रशंसा गुरुगौरद्युतिगैरिकावतंसा[2] ।
ललिता वलिता विलासिनीनां गुणपुञ्जैरजितस्य रञ्जनाय ॥
॥३॥
अपरैरपरिक्षतप्रचारा पुरदेवीव नवा कृतावतारा ।
नयनान्तरसेन मोहयन्ती मदयन्ती हृदयानि मानवानाम्[3] ॥
॥४॥
रभसादुपविश्य नन्दयोषित्प्रसवागारनिविष्टविष्टरे सा ।
बहुचाटुकरी कुमारविष्णोर्वदनेऽथ स्तनदा रदं दधार[4] ॥
(कलापकम्)
॥५॥

भगवानवधृत्य बालमारीमरिनारीम्बलतः स्तनं विधृत्य ।
असुभिः सहितं न्यपीप्यदस्याः क्व खलु स्यान्महतो[5] हतिः खलेन ॥
॥६॥
अथ सा सहसा परासुरङ्गैर्निपतद्भिः समपातयत्[6] पृथिव्याम् ।
गुरुगर्जकरी नगान् युगान्ते जलदालिकुलिशैरिवातिघोरैः ॥
॥७॥

---

1. (क) ऽम्बरा - इति क.पु.ख.पु. नास्ति ।
   (ख) नवकौशेयवरा सुराभिरामा - इति घ.पु. पाठः ।
2. स्वर्णेऽपि गैरिकमित्यमरः । (पु.टि.)
3. विनाशिनीनाम् - इति घ.पु. पाठः ।
4. वदनेऽघः स्तनदा रदं दधार - इति घ.पु. पाठः ।
5. उक्तस्यार्थस्योपपादकवचनादर्थान्तरन्यासः । (पु.टि.)
6. समपादयत् - इति क.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ गोपगणाः क्षणात् परीतास्तदुरुस्वानभरातिमानभीताः ।
नगश्रृङ्गवदुच्छ्रितं तदङ्गं वलितं बालकमत्र चान्वपश्यन् ॥
॥८॥
अवकृष्य किशोरमङ्गतोऽस्या जनता विस्मयसागरे निमग्ना ।
लवशो लवशो विधाय देहानतिदूरादकिरन्ननोभिरुच्चैः ॥
॥९॥
अथ कंसनिदेशने[7] प्रतस्थे निजनाशे कृतकृष्णनाशनाशः ।
तृणताहितनिर्जरालितेजा दितिजानन्दनकृत् तृणादिसंज्ञः ॥
॥१०॥
चिरचिन्तितया चलन् निकृत्या निजयाऽजायत कृत्यकायधारी[8] ।
स च सञ्चितशिष्टकष्टचेष्टां निकटे नन्दनिकेतनस्य तेने ॥
॥११॥
स चचार चिराय तत्र चक्रानिलताचालितगण्डशैलचक्रः ।
दलयन् निलयानकाण्डचण्डः शतखण्डानि चकार शाखिलेखाः ॥
॥१२॥
परितो हरितो विगाहमानः पवमानप्रकृतिः स पांसुपूरैः ।
रजनीचरचक्रचक्रवर्ती भृशमर्तीरुपनिन्यिवान् जनेभ्यः ॥
॥१३॥
तरसा रजसा दिशो दशापि प्रसभं व्यापिषताऽधिकं धुतेन ।
जगदेव तमोमयं तदानीममुनानीतमनल्पकल्पवेलम्[9] ॥
॥१४॥
जवतो वलयीभवन्नजस्रं ध्वनिमिश्रं भ्रमिकोटिमाततान ।
कलयन्निव कोपकौतुकाभ्यां हरिहेतिकृतचङ्क्रमं क्रमं सः ॥
॥१५॥
नवदेहधरं स दारकीये[10] शयनीये शयितं हरिं जहार ।
सहसा[11] तरसा च तेन साकं गगनागारगतागतं चकार ॥
॥१६॥

---

7. अथ कंसनिदेशनेन तस्थे - इति क. पु. पाठः ।
8. निकृत्या - चेष्टयेति । (पु.टि.) ।
9. कल्पवत्ताम् - इति ख.पु. पाठः ।
10. दावकीये - इति क.पु. पाठः ।
11. महसा तमसा - इति क.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लघु स प्रतिपद्य नाकपालीं जनताभावितभव्यकर्मदिष्ट : ।
ग्रहवद्दुरवग्रहं विहस्तं बलतस्तं ववलेऽथ बालकृष्णः ॥
॥१७॥
निपपात बलेन सङ्गृहीतो हरिणा गाढनिविष्टमुष्टिनायम्[12] ।
मदमोहभरेण तं जिघांसुः परिमुक्तासुरिव द्विपाधिनाथ : ॥
॥१८॥
अवनी समकम्पतातिमात्रं पततस्तस्य कलेवराभिघातात् ।
न च सैव परेऽपि तत्प्रनुन्ना गिरयो वारिधयो रयोपपन्नाः ॥
॥१९॥
अथ गोपगणैरलोकि बालो विकरालोदरदानवोपरिष्ठ : ।
शवसाधनकर्म किन्नु कुर्वन्नमरद्वेषिकुलानि सञ्जिहीर्षुः ॥
॥२०॥
भुवि कृष्णकरग्रहादनर्थात्तृणवत्तूर्णमवर्ततैष यस्मात् ।
तत[13] एव बभूव किन्नु योगात् स तृणावर्त इति प्रसिद्धनामा ॥
॥२१॥
इह केचिदनीचमूचिवांसो वचनं विस्मितचेतसश्चिराय ।
कुशलानि किशोरकस्य कर्ता कमलाकामुक एष देवदेवः ॥
॥२२॥
इदमद्य बभूव मङ्गलं नो यदयं नोपरि दस्युरस्य पेते ।
निहतो निजकर्म्मणैव पापः सुकृती च सुकृतेन शर्म लेभे ॥
॥२३॥
छलिना हृतमन्तरे निधाय च्युतमस्मादवलोकितञ्च दैवात् ।
जगृहे गृहरत्नभूतमेनं गृहिणी गोकुलनायकस्य वेगात् ॥
॥२४॥
सुतवत्सलया निजाङ्कपालौ निहितश्च्योतदुरोजया जनन्या ।
नवहेमलतासने निविष्टा प्रतिमा मारकतीव स व्यराजीत् ॥
॥२५॥

---

12. सार्धनिनिष्टनुष्टिनाक्यम् - इति ख. पु. पाठः ।
13. इत एव - इति क.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुखमिन्दुसखं विलोकयन्त्याः पिबतः स्तन्यरसं तनूभवस्य[14]।
[15]सुहितत्वभरेऽपि चन्द्रसेनस्वसुरासीत्[16] सुहितं[17] कदापि नाक्षि ॥
॥२६॥
तनयं विनयेन लालयन्ती मुखमम्भोजनिभं निभालयन्ती[18] ।
भरमङ्कगतस्य तस्य नन्दप्रमदा जातु शशाक नैव सोढुम् ॥
॥२७॥
अथ सा तरसा शिशुं रसायां विनिधायातिचिरं चकार चिन्ताम् ।
कथमेष शिशोरमुष्य भारातिशयः किन्नु ममैव बुद्धिदोष : ॥
॥२८॥
परिपीतपयोधरन्तदानीं विविधोद्वर्तनरङ्गरञ्जिताङ्गम् ।
निकटे शकटस्य नन्दपत्नी शयनीये शनकैरशाययत्तम्॥
॥२९॥
शकटं विकटं शशंस कंसः प्रथमस्त्वं मम सम्मतोऽसि वीरः ।
निहता[19] मम येन पूतना तं जहि तस्मादनिशं भृशं विशङ्के ॥
॥३०॥
दितिजाधिप कं विना भवन्तं गुरुकर्म्मेदमुदाहरामि कर्तुम् ।
अतिगर्जति रासभो न चेभोपगतं भारमुदारमभ्युपैति ॥
॥३१॥
इति कंसनिदेशदत्तचित्तः शकटे तत्र स भूतवन्निविष्ट : ।
अविलक्षितदेहमात्रधारी परमारीषु परं कृतावधानः ॥
॥३२॥
अथ तेन निवेशितं शरीरे तदनः सम्पतयालु वीक्ष्य कृष्णः ।
चलता चरणाग्रकेण किञ्चिद् व्यरुणद् बालवदुन्नतं रुरोद ॥
॥३३॥
अपि किञ्चिदुदीरणेन विष्णुप्रपदस्योपगताक्षसन्निवेशम् ।
दुरवस्थयुगेशमस्तचक्रं शकटं पातकवत् क्षणादपप्तत् ॥
॥३४॥

---

14. तनूरुहस्य - इति क.पु. पाठ ।
15. मुदितत्वभरेऽपि - इति ख. पु. पाठः ।
16. चन्द्रसेनश्वसुः - यशोदाया इत्यर्थः । (पु.टि.) ।
17. मुदितम् - इति ख. पु. पाठः ।
18. निभालयन्ती - पश्यन्तीत्यर्थः । (पु.टि.)
19. निहिता - इति ग.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधुनापि पुरेव वामनाङ्घ्रेर्बहुधारा धरणीमभिप्रयाता ।
विचलच्छकटप्रभिन्नभाण्डक्षरितक्षीरनिभा नभः स्रवन्ती ॥
॥३५॥

भवसि स्थपतिः पतिर्जगत्या मम विश्वम्भर तद्भरं सहस्व ।
प्रकटं शकटं कटङ्कटेन ध्वनिना किं हरिमित्यवोचदुच्चैः ॥
॥३६॥

शकटोऽपि कियन्ति योजनानि प्रतिपद्यापगतासु 20 निष्पपात ।
गिरिसारतनुर्यथागिरीन्द्रस्त्रिदशेन्द्राशनिपातभिन्नपक्षः ॥
॥ ३७॥

क्षितिरादिवराहमूर्ध्नि लग्ना शकटे निष्पतति प्रकीर्णकाये ।
स च भोगिपतौ स चादिकूर्म्मे स च कुत्रालगदित्यहो न वेद्मि ॥
॥३८॥

पतदेतदुदारदेहभारव्यथितन्यञ्चितमौलिचक्रवाल : ।
धृतिकर्म्मणि कर्म्मठोऽपि भोगिक्षितिपालो न हि चक्षमे क्षमायाः ॥
॥३९॥

परितश्च्युतभूरिभाण्डभारादवकृष्य स्वकिशोरकं यशोदा ।
द्विजदैवतवन्दनादिभिः स्वं निलयं नीतवती सुनीतिरीति : ॥
॥४०॥

क्रमेण गर्गोदितनामधेयौ तौ रामकृष्णौ गृहपालिकासु ।
विचेरतुर्भूमिनिघृष्टजानू 21 भानू इवाभासुरमूर्तिमन्तौ ॥
॥४१॥

अथैकदा पृष्ठविलम्बिवेणी ममन्थ कुण्डे दधि शौरसेनी22 ।
सुधारसोद्धारकुतूहलेन दुग्धोदधौ दुग्धमिवामराली ॥
॥४२॥

---

20. अपगतासु - इति पदं क्रियाविशेषणम् । (टि.)
21. अत्र प्रगृह्यसंज्ञाप्रयुक्त : प्रकृतिभाव : । (टि.)
22. सौरसेनी - इति सर्व एव पाठाः, रुढिं योगञ्च विचार्य शकारः प्रयुक्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रगृह्य[23] मन्थानविलग्नदाम नितम्बबिम्बातिभरालसांघ्रि: ।
तदा तदाकर्षणसप्रमोदा जगौ जगत्प्रीतिकरी यशोदा ॥
॥४३॥

चलत्ततः प्रच्युतमेतदीयं पयोधरप्रेरितमुत्तरीयम् ।
निशम्य तत् किं दधिमन्थगानं प्रसाददानं विदधे महेशः ॥
॥४४॥

अथ व्रजन् जानुरथेन कृष्णस्तन्नावनीते शकले सतृष्णः ।
जवादुपेतः सविधं जनन्यास्तद्भाण्डभुच्चैस्तरलीचकार[24] ॥
॥४५॥

निवारितोऽपि प्रसभं कुमारो यदा तदादातुमिह प्रयेते ।
तदा तदा पातनकातरेण करेण माताऽप्युदताडयत्तम् ॥
॥४६॥

कथञ्चिदप्येष[25] यदा नियन्तुं तया[26] न शेके दधिमन्थनेषु ।
गृहीतदामा व्रजराजरामा रामानुजं बन्धुमनास्तदाऽभूत् ॥
॥४७॥

सन्दानने[27] यद्यदुपाददे सा तदेव दामाभवदस्य नालम् ।
प्रायेण तृष्णातरलीकृतस्य महानपि स्वल्पतरोऽर्थलाभः ॥
॥४८॥

इतिप्रभूतश्रमभूततन्द्रामिन्द्रानुजन्मा जननीं विलोक्य ।
अबन्धयत् स्वं लघुनैव दाम्ना दयालुता खेदयते महान्तम् ॥
॥४९॥

अतः परं गच्छ चलः खलात्मन्नुलूखलाबद्ध इतीरयित्वा ।
ममन्थ मन्थानकरा दधीनि दयायशोदानपरा यशोदा ॥
॥५०॥

---

23. प्रसक्तसन्यान - इति ख. पु. पाठ : ।
24. तद्भक्तिमुच्चैः - इति क.पु.पाठ., ख.पु. पाठश्च ।
25. कथञ्चिदप्येव - इति ख. पु. पाठ. ।
26. तदा न शेके - इति क. पु. पाठः, ख. पु. पाठश्च ।
27. सन्दानने-बन्धन इत्यर्थः, निमित्ते सप्तमी । (पु. टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णोऽपि कर्षन् निजदेहनद्धमुलूखलं तत्खलनिग्रहार्थी ।
निवेश्य मध्येऽर्जुनयोरुभौ[28]तौ भूमिरुहौ कुन्जरवद् बभञ्ज ॥

॥५१॥

भूमीरुहौ[29]भूमितलं प्रयातौ प्रजातशाखोरुभुजप्रपातौ ।
किन्नाम कृष्णस्य चिरेण दृष्टावष्टाङ्गपातप्रणतिं विधत्तः ॥

॥५२॥

तौ दिव्यदेहं प्रतिपद्य सद्यो विद्योतमानौ द्युमणीव नव्यौ ।
भूयो नमस्कृत्य हरिं कृतार्थावित्यूचिवांसौ गुरुणादरेण ॥

॥५३॥

आवां पुरा कोपितनारदाक्षिनीरावसेकान्निजकर्म्मबीजम्[30] ।
यक्षेशयक्षाविह वृक्षभावाद् विवर्तमानं चिरमन्वभूव ॥

॥५४॥

प्राप्ताः स्वरूपं भवदङ्गसङ्गादङ्गारदाहं परिहृत्य देहम् ।
नमो नमस्ते भगवन्निदानीं प्रसाधयामो निजराजधानीम् ॥

॥५५॥

इतीरयित्वा मिहिरप्रकाशं[31] विमानमारुह्य निजं निवासम् ।
उभौ गतौ तत्क्षणमीक्षणेन चिराय बद्धाविव भूमिभर्तुः ॥

॥५६॥

यमादिवाथो यमलागमध्यात् सुतं समादाय मुदा यशोदा ।
आनन्दवाष्पेण निषिच्य मूर्ध्नि शुभाशिषा स्वं निलयं निनाय ॥

॥५७॥

अथ गोकुलमाकुलं समीक्ष्य प्रचुरोत्पातपरम्पराभिराभिः[32] ।
उपनन्दमुखाः सुखाय वृन्दावनमेवाकलयन्त नन्दमुख्याः ॥

॥५८॥

---

28. अर्जुनयोः - अर्जुनाख्यवृक्षयोः, इति तात्पर्यम् । (पु.टि)
29. भूमितले - इति ग.पु. पाठः ।
30. नारदोक्तिनीरावसेकान् - इति क. पु. पाठः ग.पु. पाठश्च ।
31. हिमवत्प्रकाशम्-इति . क.पु. पाठः ।
32. परम्पराभिधाभिः - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चापल्ये[33] चलति स्थिरीभवति च स्थैर्ये द्युतौ द्योतते
नित्यं शीतलतागुणेन मधुरा म्लानौ पुनर्म्लायति ।
आकृष्टापि करेण चण्डमहसा मूलं महीजन्मनाम्
छाया तत्र कुटुम्बिनी वकुलजा नो जातुचिन्मुञ्चति ॥

॥५९॥

आलोके[34] लसदक्षमेण कलिना[35] तन्नाम नाध्यासितम्
स्वर्ग्गप्रायमदुर्गमेव[36] स महाकालीकमप्यासयत् ।
तत्रासीद् बहुबालको[37] विहरणे कोऽप्यत्र नो बालकः[38]
चित्रं चित्रमयुक्त कण्टकिफलैर्मुक्तञ्च तत्कण्टकैः[39] ॥

॥६०॥

ययुरिति मनसिकृत्य वृन्दावनमथ ते बकुलविकाशम् ।
समुदितरागपरागपरागतपाटलिपाटलिताशम् ॥

॥६१॥

हसदिव देववनानि घनायितकुसुमितमालतमालम्[40] ।
परभृतचञ्चुर्विपञ्चीपञ्चितपनसरसालरसालम् ॥

॥६२॥

---

33. चापल्ये इति-तत्र वृन्दावने महीजन्मनां छाया-आतपाभावो मूलं तेषामवे.्य न मुञ्चति-न त्यजतीत्यन्वयः, किम्भूता छाया चण्डमहसा- चण्डांशुना भास्करेण, करेण-किरणेनाकृष्टापि-आक्षिप्ताऽपि वृक्षाणां घनत्वादित्यर्थः । केव कुलीनाः - कुलजा महीजन्मानो मर्त्या इति यावत् तेषां कुटुम्बिनी जाया चण्डमहसा करेणाकृष्टापि-गृहीतापि, मूलम् - कारणं जीवनहेतुं पतिं यथा न मुञ्चति तथेत्यर्थः । यद्वा महीजन्मनां मनुष्याणां करेण धनेनाकृष्टापि चण्डं मूलं पतिं न त्यजति तथेत्यर्थः । किम्भूतेन करेण, अहसा-न ईहति जन इत्यर्थात् येन तदहस्तेनेत्यर्थः । अत्र बहुतरं स्वल्पस्य महसो जनकत्वात् "अन्यस्यापि" - इति क्विप्प्रत्ययः । ईहते रूपं ततोऽहसा करेण बहुतरेण धनेनेत्यर्थः । (क.पु.टि.)
34. लसदक्षमेव, रसदक्षमेव, तलदक्षमेव - इति सर्व एवाशुद्धाः पाठाः ।
35. करिणा - इति घ.पु. पाठः ।
36. दुर्ग्गप्रायमदुर्ग्गमेव - इति ख.पु. पाठः ग.पु. पाठश्च
37. बहुवारकः - इति ख. पु. पाठः ग.पु. पाठश्च ।
38. (क) नावारकः - इति ख. पु. पाठः ।
(ख) नोवारकः - इति ग. पु. पाठः ।
39. सूच्यग्रे क्षेत्रशत्रौ च लोमहर्षे च कण्टक इत्यमरः । (पु.टि) ।
40. सरस - इति घ.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(युग्मकम्)

अनस्सु धृत्वा बहुभाण्डभारान् दारानुदाराकृतयः प्रचेलुः ।
न केवलं ते किमु सञ्चचालाचला विशालाचलचक्रवालैः[41] ॥
॥६३॥

इत्येवं तटभुवि भानुनन्दनायास्ते वृन्दावनमकरन्दतुन्दिलापः ।
विन्यस्य त्वरिततमनांसि निर्मितेषु प्रानन्दन्नुदवसितेषु नन्दमुख्याः ॥
॥६४॥

कादम्बानां[42] मधुरमनोहरारावैरारादेषां प्रकटयतीवाह्वानम् ।
वाचानम्रैः कमलमुखैः कालिन्दी नुत्वा नुत्वा तरलतरङ्गोद्बाहुः ॥
॥६५॥

पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता ज़यमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽतिभव्ये
द्वितीयोऽयं वृन्दावननिवसनः पूर्णतामाप सर्गः ॥
॥६६॥

☆☆☆☆☆

---

41. चलापिशालाचलचक्रवालैः - इति क. पु. पाठः ।
42. इदं कादम्बानामित्यादि पद्यं केवलं क.पु. लभ्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयसर्गः

दृष्ट्वाऽथ हृष्टास्सह गोपवृन्दैर्वृन्दावनं सम्यगमंसुतामी ।
दिवो भुवि प्रेषितमिन्द्रसूनोरानन्दने नन्दनमादितेयै : ॥
॥१॥
पतत्प्रसूनोपधिना वियोगिवधाय कामे किरतीषुजालम् ।
यत्रासत त्रासभरेण गाढमाश्लिष्टपूगा इव नागवल्य: ॥
॥२॥
प्रसूनसौरभ्यहरं समीरमालब्धुकामा इव यत्र शाला: ।
परिभ्रमन्तीर्मधुपायिमाला: कालायसं पाशचयं वितेनु: ॥
॥३॥
तले तले भूमिरुहां प्रसार्य करं कलावानपि यत्र देव: ।
सुधाधिकं साधु मरन्दवृन्दमकिञ्चनो याचति किं द्युसद्भ्य : ॥
॥४॥
यत्र प्रसूनं फलमर्प्पयन्त्य: परस्परं पल्लवपाणिपात्रै : ।
लता: प्रतानै: परिरम्भदानादालीसमाचारमिवाचरन्ति ॥
॥५॥
वल्लीषु[1] वल्लीषु सुगन्धि पुष्पं पुष्पेषु पुष्पेषु च यत्र भृङ्गाः ।
भृङ्गे च भृङ्गे कलकूजितानि जितानि यैरात्मभुवो जगन्ति ॥
॥६॥
सामोदमन्दानिलमञ्जुभृङ्गीसङ्गीतभङ्गीपिकपञ्चमाद्यै : ।
यत्रातिदृप्त: स्मरशासनस्य त्रासादिवासाविरतं रतीश: ॥
॥७॥
आसीदसीमा वनदेवतानामपि प्रसाधाविधिलालसानाम् ।
दिने दिने चारुतया नवीना यन्मानवीनामिव भूमिरेका ॥
॥८॥
यत्रान्यथासिद्धिसमर्थितोऽर्थ: सदैव धर्मोऽपि समीपवृत्ति : ।
निमेषसङ्गात् सहकामसिद्ध्या करस्थिता कस्य न मुक्तिकन्या ॥
॥९॥

---

1. उत्तरोत्तरमुत्कर्षो भवेत् सार: परावधि । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रौढापरीरम्भ इवातिगाढं व्यूढं नवोढापरिधानवच्च ।
स्वाधीनकान्तामुखवत् प्रसन्नं सदा यदानन्दकरं जनानाम् ॥
॥१०॥
अनेकशालं[2] यदलं विशालं[3] शल्येन[4] हीनं न च शल्यहीनम्[5] ॥
भोगीनयुक्तं न च भोगियुक्तं जातं जनानामतिविस्मयाय ॥
॥११॥
पितुर्मयूखैः[6] सुषमाविघातो माभूदमीषामिति यद् द्रुमालीः ।
तरङ्गहस्तोज्झितशीकरार्घैरहर्निशं सिञ्चति भानुकन्या ॥
॥१२॥
समीरचारी चलपत्रपुञ्जः पुरः प्रसर्पन्मणिपुञ्जवातैः ।
दुष्टैरवस्थातुमलं न जातमातङ्किभिर्यत्र च वन्यसत्वै : ॥
॥१३॥
परस्परस्य स्पृहणीयधर्मशोभातिलोभादिव सानुबन्धा : ।
स्थिता मिलित्वा ऋतवोऽपि सर्वे नालं बभूवुः क्षणमुज्झितुं यत् ॥
॥१४॥
यत्राम्बु शीतं स्थलमुष्णमेव धीरः समीरःकुसुमं सुगन्धि ।
धर्मे ऋतूनामविपर्ययेण मियोऽनुरागादकलीव वृत्ति : ॥
(चुम्बकम्)[7]
॥१५॥
फलं प्रसूनञ्च दलं ददानाश्छायाभिरायासनिवारणेन ।
यत्रागतानामगमा लताभिः साकं सदातिथ्यविधिं वहन्ति ॥
(आदिकुलकम्)
॥१६॥
सम्पाद्य पाद्यादिजलं निवेद्य फलानि वृन्दावनजानि तेषाम् ।
मधूनि धृत्वा मधुपर्कमर्कपुत्री चकारातिथिपूजनानि ॥
॥१७॥

---

2. अनेकशाल्यम् - इति घ. पु. पाठः ।
3. विशल्यम् - इति घ. पु. पाठः ।
4. सस्येन - इति घ. पु. पाठः ।
5. शस्यहीनम् - इति घ. पु. पाठः ।
6. मयूषै : - इति सर्व एवं पाठाः, मयूखैः - इत्येव संगच्छते न तु मयूषैरिति । मयूखस्थाने मयूषव्यवहारोऽयं मल्लकालिके जनजीवने शुक्लयजुर्वेदाध्ययनपरम्पराजन्यं प्रभावं जनयति । (टि.) ।
7. "एकार्थे सति द्वाभ्यां कथनं चुम्बकम्" इति । (ग.पु.टि.) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशं निशं तुङ्गतरङ्गरावैरुदस्य दस्यून् शरणागतानाम्[8]
दिने दिने तत्र दिनेशकन्या यामीव तेषामवनं चकार ॥

॥१८॥

दिने दिने तत्र तथा तथाऽभूत् सुखाय तेषां स नवो निवासः ।
यथा कथायामपि जातुचिद्वा[9] न सस्मरुस्ते वसतिं पुरस्त्याम् ॥

॥१९॥

वृक्षालिवृक्षालिसुपर्वमालामूलेऽमृतोघैर्मिहिरात्मजायाः ।
इच्छोपनीतानि सुखानि यत्र दिव्यो[10] हि तेषामुचितोऽत्र वासः ॥

॥२०॥

इष्टानि मिष्टानि च गोतरुण्यस्तृणान्यतृण्वन्त विदिक्षु दिक्षु ।
न केवलं ताः किमु सप्रमोदं हुतानि हव्यानि हविर्लिहोऽपि[11] ॥

॥२१॥

जातोक्षवृद्धोक्षचयैश्चरद्भिर्जातं महोक्षैरिव पञ्चषाहैः ।
स्त्रीपुंसयोर्वाङ्मनसी च तस्मादविन्दतां चित्रमनाविलत्वम्[12] ॥

॥२२॥

[13]सर्वोऽप्ययं घोषमयो निवेशो घोषाश्च सर्वे बहुभाण्डवन्तः ।
भाण्डानि सर्वाणि हविर्मयानि हवींषि सौरभ्यमयान्यभूवन्[14] ॥

॥२३॥

कृष्णोऽपि कैशोरकलोभनीयविलासवल्गुस्मितकौतुकाद्यैः ।
प्रावर्धयत् प्रीतिनदीं स पित्रोः प्रावृट्पयोवाह इवाम्बुवर्षैः ॥

॥२४॥

गोरोचनाचन्दनपङ्कलेखा भाले रराज व्रजराजसूनोः ।
चन्द्राधिके चारुणि वक्त्रबिम्बे सम्वर्धिता सप्तदशी कलेव ॥

॥२५॥

---

8. चरणागतानाम् - इति क.पु. पाठः ।
9. जातुचित्ताम् - इति ग. पु. पाठः ।
10. दिव्यं लवङ्गे धात्र्यां स्त्री वसौ दिवि भवेदिति, मेदिनी । (पु.टि.)
11. हविल्लिहोऽपि - इति क. पु. पाठः ।
12. चित्रमदाविलत्वम् - इति ख. पु. पाठः ।
13. स्थाप्यतेऽपोह्यते वापि यथापूर्वं परं परम् ।
विशेषणतया तत्र वस्तु सैकावली द्विधा ॥ (पु. टि.)
14. सौरस्यमयान्यभूवन् - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्पश्यतो रम्यमुखेन्दुबिम्बमसम्वरेणाक्षिसरोरुहेण ।
प्रीते च तस्मिन्नतिगाढलग्ना प्रीतिर्न पित्रोर्विरराम चित्तात् ॥
॥२६॥

अङ्कादिहाङ्कं व्रजसुन्दरीणामाहूत एवोपगतः शशीव ।
उद्वेलमानन्दसमुद्रमासामसावसावीत् करयोजनेन ॥
॥२७॥

व्रजन्[15] प्रगृह्य व्रजसुन्दरीणां कराङ्गुलीमङ्गुलीभिः कुमारः ।
पदे पदे च स्खलितं दधानस्ततान पित्रोर्मुदमत्युदाराम् ॥
॥२८॥

यामेव लीलामकरोत् कुमारः सैवास बन्धाय हृदो वधूनाम् ।
उन्मोचिका चाप्यपरैव तस्य लीला गता लोचनगोचरं चेत् ॥
॥२९॥

दिने दिनेऽसौ वपुषा त्विषा च नवः कलावानिव वर्धमानः ।
रामानुजन्मा रमणीजनानां विलोचनासेचनको बभूव ॥
॥३०॥

सकिङ्किणीकङ्कणकर्णभूषाकपोलमूलास्खलितालकश्रीः
गोवत्सपुच्छं बलतो विकर्षन् व्रजाङ्गणेऽरिङ्गदनङ्गरूपः ॥
॥३१॥

कौमारलीलाभिरनारताभिर्विडम्बयन्[16] मध्यमलोकमित्थम् ।
धरामधोऽधस्त्रिदिवं चकार किम्वा न लोकोत्तरमुत्तमानाम् ।
॥३२॥

कुमारकेलीषु कदापि कृष्णः सतृष्णवद् बालवयस्यमध्ये ।
निवारितोऽप्येभिरवारितात्मा मुदा मृदः खण्डमुदास्यदास्ये ॥
॥३३॥

वयस्यवृन्दैरिति नन्दपत्न्यै निवेदिते वेदनयाऽनयाऽथ ।
साप्येनमेनस्विनमुग्रदण्डैः पारुष्यगर्भाभिरुवाच वाग्भिः ॥
॥३४॥

अदान्तचित्तः किमु वा प्रमत्तः शिशो मृदं भक्षितवानसि त्वम् ।
अमी सखायः सततानुवृत्त्या रामोऽपि सत्यापयतीदमेव ॥
॥३५॥

---

15. स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् । (पु.टि.)
16. विलम्बयन् - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पशुत्वमीदृक् पशुपाङ्गजेषु न क्वापि दृष्टं न किल श्रुतम्वा ।
त्वयाऽद्य जातेन पिता तवाऽयं गोपेषु सत्यं पशुपालकोऽभूत् ॥
॥३६॥

इतीरयित्वा विरतां पुनस्तां बालो भिया गद्गदवागवादीत् ।
बहु स्तनित्वैव परिस्फुरन्तीं पयोदमालामनुनीलकण्ठः ॥
॥३७॥

सर्वेऽप्यमी देवि ! मृषाभिधाना जानासि तन्मे मुखमीक्षमाणा ।
विलोकिते वस्तुनि यत् पुरस्थे न पृच्छ्यते तुच्छधियापि साक्षी ॥
॥३८॥

तदा समालोकत नन्दजाया मायाकिशोरस्य महेश्वरस्य ।
व्यादीयमाने वदनारविन्दे कुक्षौ निविष्टानि चराचराणि ॥
॥३९॥

महीमहीनद्रुमशैलसारां वारान्निधीनिद्धबृहत्तरङ्गान् ।
द्वीपानुपद्वीपपुरःसराणि विलोक्य विश्वानि विसिस्मिये सा ॥
॥४०॥

अचिन्तयत् सा पुनरेतदेव देवस्य मायेयमुत स्वमोहः ।
शिशोरमुष्यैव हि किन्नु वाऽसौ लोकातिपाती महिमातिमानः ॥
॥४१॥

क्वायं शिशुः क्वाचलचक्रवालं क्वामी नदीनाः क्व पुराणि वन्याः ।
इदं घटेतापि यदा तदा वा घटाघटे संघटते गजानाम्[17] ॥
॥४२॥

अधीरिवाधीतमपेतचिन्तं क्षीवः क्षणादीक्षितमात्मनेव ।
सा चिन्तयित्वेत्थमिहानुभूतं सर्वं पुनः प्रस्मरति स्म सुभ्रूः ॥
॥४३॥

कदापि कौमारविहारबन्धुमन्धस्य पुत्रं निजघान कृष्णः ।
कुतूहली धूलिभिरौषधानि तदक्षिदाने भुवि या बभूवुः ॥
॥४४॥

विचक्षुषं क्षिप्रमुपेत्य विप्रं रुदन् हृदन्तः कुपितोऽयमूचे ।
पितर्वयं दुर्बलतामुपेत्य शठेन कृष्णेन हता हठेन ॥
॥४५॥

---

17. घटाघटनगोष्ठीषु घटनासु च योषिति, इति मेदिनी । (पु.टि.) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशम्य तत्तूर्णममुं विचक्षुः स्खलत्पदो मीलितकम्प्रचक्षुः ।
अयं लगद्वागिव मन्दमन्दं नन्दात्मजीयं पदमुच्चचार ॥
॥४६॥

कृतान्तमन्दीकृतचक्षुरेनं[18] समाचचक्षे स गिरोऽतिरुक्षाः ।
कृतान्त एषोऽतिरुजां यदन्तः कृतान्तदण्डादपि नो बिभेति ॥
॥४७॥

निरागसि प्रेयसि बान्धवानां ममान्धभावान्नयनायमाने ।
सुते प्रहारादपचेष्टसे वा न चेष्टसे वा तव किं दुरात्मन् ॥
॥४८॥

कंसे नृशंसे हि महीपतीनां नियामके राजनि राजमाने ।
द्विजेषु दृष्टः प्रथमोऽधुनैव कोपक्रमो गोपकिशोरकस्य ॥
॥४९॥

बिभेषि भूपादपि चेन्न तत्किं भूमौ भवानेव हि भूमिपालः ।
प्रायः प्रकृत्या पिशुनस्य पुंसः क्व नीतिरीतिः क्व परस्य भीतिः ॥
॥५०॥

इति ब्रुवन्तं नयनेन हीनं दीनं द्विजं वाचमुवाच कृष्णः ।
न कस्य संयाति[19] परापराधकलङ्कपङ्कस्य[20] मृजासु चेतः ॥
॥५१॥

प्रेताधिनाथादपि नो बिभेमि तत्कैव चिन्ता पृथिवीपतीनाम् ।
भयं पुनः केवलमेव लोके प्रतीहि मे विप्र तवैव जातेः ॥
॥५२॥

तवात्मजे किं कथयामि विप्रेष्वागस्विता विप्र न मे कदापि ।
प्रत्येषि नो चेत् परिपश्य तस्य कायं स्वयं कुत्र रजोऽभिघातः ॥
॥५३॥

इति ब्रुवाणे पतगेशयाने यावत् समुन्मीलति तं दिदृक्षुः ।
एतावदेव क्षितिदेव आसीत् प्रफुल्लदिन्दीवरसुन्दराक्षः ॥
॥५४॥

---

18. कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु, इति मेदिनी । (पु.टि.)
19. सम्पाति - इति क. पु. पाठः
20. कलङ्कपङ्कवमृजासु - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[21]हरेरनादीनवदैवलाभादाभाविशेषं[22] सपदि प्रपेदे ।
उर्वीसुपर्वैष मतो न केषामतिप्रकर्षे महतो हि मानः ॥
॥५५॥

अस्तौदेनमथैनसा विरहितो मत्वा महापूरुषम्
साक्षादक्षिपथं गतं चरणयोरानम्य सम्यङ्मना:[23] ॥
प्रत्यङ्गप्रकटीभवत्पुलकितैः स्वेदोर्मिकिर्मीरितैः
अन्त:प्रेमभरादभङ्गुरगिरा वर्णेन वर्णाग्रजः[24] ॥
॥५६॥

मित्रानन्दक भक्तपाल शरणापन्नार्तिहारिन्निति
व्यक्तं कोऽपि भवामि तेषु न हरे जिह्रेमि जल्पन्नतः ।
श्रुत्वाजामिलपद्धतिं परमया किन्त्वाशया चिन्तयन्
एकं त्वां पतितस्य पावनमतो हृष्यामि तुष्यामि च ॥
॥५७॥

यः प्रारक्षदजामिलं[25] द्रुपदजालज्जापटीं यातवान्
ग्राहादुद्धृतवान् गजं च गुरवे योऽदात् सुतं प्राक्तनम् ।
श्रीकृष्णस्य हि तस्य चेद् यदि कृपा नाश्चर्यमेतन्नृणाम्
अन्धः पश्यति संशृणोति बधिरः पङ्गुर्नरीनृत्यति ॥
॥५८॥

कस्ते गुणानां गरिमाणमीश विना फणीशं प्रकटीकरोतु ।
विश्वम्भराभारमुदारमेनं मूर्ध्ना वहन् यः सुवहं चकार ॥
॥५९॥

द्यौरुत्तमाङ्गं पृथिवी पदन्ते दृष्टी चरन्तौ दिवि पुष्पवन्तौ[26] ।
वेदा निरुक्तं पदवारि गङ्गा देव त्वदङ्गानि जगत्प्रपञ्चः ॥
॥६०॥

---

21. दोषश्चादीनवो मत इति हारावली । (पु.टि.)
22. स्त्रियां देवदृशौ दृष्टी दीपौ इति कोषः । (पु.टि.)
23. सम्यक् स्याद् वाक्यलिङ्गन्तु मनोज्ञे सङ्गतेऽपि च । (पु.टि.) ।
24. वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं कुचाक्षरे । (पु.टि.)
25. यः प्रारक्षदिति पद्यं केवलं क. पु. लभ्यते । क.ख.ग.घ. पुस्तकेषु मध्ये क पुस्तकस्य सोऽयं विशेषः, यत् तत्र पञ्चषाणि पद्यानि सन्त्यतिरिक्तानि, तानि पश्चात् प्रक्षिप्तानीति भाषाशैलीप्रसङ्गपर्यालोचनतोऽनुमीयते ।
26. पुष्पवन्तौ सूर्याचन्द्रमसावित्यर्थः । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनादिरप्यादिरसि त्वमस्य विश्वस्य विश्वम्भर विश्ववन्द्य ।
मायाविधेयीकृतमानसेन विज्ञायसे वल्लवमल्लबाल ॥
॥६१॥
न केवलं चार्मणमेव चक्षुरदायि दामोदर दिव्यचक्षुः ।
यतस्त्वयात्मा प्रकटीकृतो मे दयालुता कं न वशीकरोति ॥
॥६२॥
उपेक्षितुं मामरविन्दनाभ[27] न दुर्जनाभेदमवेत्य युक्तम् ।
अजामिलस्योद्धरणेन जाता जाने जगन्नाथ तवातिकीर्तिः ॥
॥६३॥
प्रज्ञादीपः स द्विजरङ्को विकलङ्कम्
देवादस्माल्लोचनरत्नं समवाप्य ।
इत्येवं तं भक्तिविनम्रो बहुवेलम्
नुत्वा नुत्वा धाम निकामं निजमाप ॥
॥६४॥
पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽतिभव्ये
तृतीयः सर्गोऽसावगमदमलः[28] कृष्णकैशोरकेलिः ॥
॥६५॥

☆☆☆☆☆

27. मामरविन्दनाभे । - इति ग.पु. पाठः ।
28. तृतीयः सर्गोऽसावगमदगमः - इति क.पु.पाठः, ख.पु. पाठश्च । उपरि निर्दिष्टश्च ग. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थसर्गः

अथ क्रमेणानुपसन्नयौवनं वनाय नन्दस्तनयं निदिष्टवान् ।
मिलत्सुमित्रात्मजदारकं गवामिहावने राममिवाजनन्दनः ॥
॥१॥

वयं किलाभीरकुलस्य पुङ्गवा गवावनं जीवनमुद्वहामहे ।
अतस्तदालोचय वत्स यत्सतां स्ववर्णधर्माश्रयणं[1] श्रियः पदम् ॥
॥२॥

निशम्य तां गां[2] जगतीन एष गाः समेत्य बालैर्विनतासुतासनः[3] ।
अचारयच्चारुविचेष्टितो[4] बली खलीकरिष्यन् खलतामसावली: ॥
॥३॥

स गोपयन् गोपवपुः स्ववैभवं मृगानिवासौ मृगयन् दुरात्मनः ।
चचार गोचारणकैतवाद् वनेष्वखण्डमापूरशिखण्डमण्डनः ॥
॥४॥

अयं किलोग्रज्वरजृम्भको[5] भवत्युदारदर्प्पेण[6] पुरेति किम्भयात् ।
त्रिविक्रमे हिण्डति हेलया वने घनेऽपि नाजायत दावसंज्वलः[7] ॥
॥५॥

विना दवाग्निं रहिता हि कण्टकैर्विनाम्बुसेकेन[8] तले सुशीतलाः ।
विना ऋतुं पुष्पफलोदयाधिका हरिप्रसादेन वने महीरुहः[9] ॥
॥६॥

---

1. स्ववर्णधर्मात्रयता श्रियः पदम् - इति क. पु. पाठः ।
2. गाम् - वाणीमित्यर्थः । (पु.टि.)
3. (क) विनतासुतानुगः - इति ख. पु. पाठः ।
   (ख) विनतासुताग्रगः - इति ग.पु. पाठः ।
4. आचारयत् - इति ग. पु. पाठः ।
5. किलोग्रजम्भको - इति ख. पु. पाठः ।
6. भवतीत्यत्र यावत्पुरानिपातयोर्लट् इति नियमाल्लट् । (पु.टि.)
7. (क) दावसंज्वरः - इति ख. पु. पाठः ।
   (ख) संतापः संज्वलः समौ, इत्यमरः । (पु.टि.) ।
8. रहिता हि कण्टका - इति सर्व एव पाठाः, अर्थौचित्येन पाठान्तरकल्पना ।
9. महीरुहाः - इति ग पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमोचि दुष्टैरपि जन्तुभिर्वनं विनैव बाधां सति नन्दनन्दने ।
महौषधे तिष्ठति देहिनां तनौ गदैरवस्थातुमलं न भूयते ॥
॥७॥

अमुं घनश्यामलमीक्षमाणया वितत्य बर्हाणि मयूरमालया ।
प्रसन्नषड्जस्वनभिन्नकेकया[10] तरौ तरौ नृत्यमकारि नैकया ॥
॥८॥

अथागमत् कश्चन कानने तयोश्चिराय गाश्चारयतो सहार्भकैः ।
पतङ्गवत् पावकराशिमुल्बणं कृतान्तपाशे पतयालुरासुरः ॥
॥९॥

बली बलीवर्दशिशुर्भवन्नलं स वत्सवृन्दे विननर्द मत्सरी ।
बलारिसूनुं सबलं विघातुकः समस्तपालानुपरिप्रपातुकः ॥
॥१०॥

निरीक्ष्य विक्षोभकरं वृषासुरं सवत्सवृन्दा अपि वत्सपालकाः ।
दिशो दशाप्याशु भयेन भेजिरे वृकावलोकान्मृगशावका इव ॥
॥११॥

हरिस्त्वनूदोरथ[11] पादयोरमुं विगृह्य वेगादविगृह्यपौरुषः[12] ।
कपित्थमूले विनिपात्य सव्यथं व्यपोथयद् बालमृगं यथा हरिः ॥
॥१२॥

अथाह कृष्णो भगवान् सखीनिमानहो किमासध्वमिहाध्वखेदिनः ।
व्रजाम सर्वे शमनानुजामरं[13] परं परिश्रान्तिभरं निरस्यतु ॥
॥१३॥

तटोपकण्ठे तरुवल्लिशीतले तृणावलीचारुणि चारयाम गाः ।
वयं पुनस्तत्सलिले सुसैकते सुखं सखायो विहराम कामतः ॥
॥१४॥

---

10. प्रसन्नषड्जस्वरभिन्नकेकया - इति ग. पु. पाठः ।
11. अनूदोः - पश्चात्तनयोरित्यर्थः । (पु.टि.)
12. वेगादविषह्यपौरुषः - इति ग. पु. पाठः ।
13. शमनानुजामलम् - इति ख. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथेति सर्वैरनुमोदितस्तदा मुदा समादाय स वत्सवत्सपान् ।
चचार तीरं तरणिप्रजापयःप्रवाहपूरस्य[14] पुराणपूरुषः ॥
॥१५॥
स तत्र गत्वा सह वत्सपालकैस्तया तया वल्लवबाललीलया ।
शिशून् प्रतिष्ठाप्य तटान्तकानने कलिन्दकन्यापुलिने व्यदेदिवीत् ॥
॥१६॥
सुरानुकृत्या[15] वयसामरारसीत् समं वयस्यै रभसादजाहसीत् ।
कदाचिदेभिर्भ्रमणीमचर्करीदभीष्टलाभादनरीनरीदपि ॥
॥१७॥
बकासुरस्तत्र सरस्यवस्थितो बकाकृतिः कंसनृशंसदेशितः ।
हरिं जिघांसन् हरिणारिमुन्मदं क्रियाविहीनो[16] हरिणार्भको यथा ॥
॥१८॥
दिशो गरुद्भिश्चरणेन भूतलं स गाहमानः शिरसा नभो बभौ ।
नगो निलीनः सलिले हरेर्भिया ततो नियोद्धुं हरिणा किमुत्थितः ॥
॥१९॥
विचिन्त्य तं विद्विषमात्मनोऽसुरं सुरेन्द्रसूनुः सहसा समीयिवान् ।
जिघांसुमायान्तमसन्तमन्तिकं महानुदारः क इव ह्युपेक्षते ॥
॥२०॥
अथ प्रसार्याननकन्दरोदरं दराद्द्रुतेषु स्वजनेषु[17] सर्वतः ।
हरिः समीपं गत एव तत्क्षणाद् बकासुरेणाजगरेण जग्रसे ॥
॥२१॥
स तं निगीर्य द्रुतमेव दुस्सहं करालकालानलपिण्डसन्निभम् ।
दहन्तमन्तर्मुखमण्डलं खलः समुज्जगार द्युमणिं यथा तमाः[18] ॥
॥२२॥

---

14. पूरो जलसमूहे स्यादिति मेदिनी । (पु.टि.)
15. स्वरानुकृत्या - इति ख. पु. पाठः ग. पु. पाठश्च ।
16. ह्रिया विहीनो हरिणार्भको यथा - इति घ. पु. पाठः ।
17. सुजनेषु - इति क. पु. पाठः ।
18. तमो ध्वान्ते गुणे शोके, क्लीवं वा ना विधुन्तुदे, इति मेदिनी । (पु.टि.) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः परं पौरुषचुञ्चुरुच्चकैर्विधृत्य चञ्चूयुगले करेण तम् ।
विनिर्गतस्तद्वदनादनाकुलं हरिर्हिण्याख्यमिव व्यदारयत् ॥
॥२३॥

तदा बकारिः सदकारि दैवतैरुदारमन्दारजपुष्पवृष्टिभिः ।
जयारवैः सम्यगनावि[19] मानवैरमानवैरप्युदगायि गायनैः ॥
॥२४॥

अथापरेद्युः पुनरेवमेव तद्वयस्यवृन्दैः सह नन्दनन्दनः ।
अचारयद् गाः परिहासकौतुकैर्म्मनांसि तेषां रमयाञ्चकार च ॥
॥२५॥

तदन्तरेऽचिन्तयदान्तरज्वरादघो मघोनः परमो हि विप्रियः ।
परापकारे निरतः स्वभावतः कृताऽपकारः सविशेषतोऽभवत् ॥
॥२६॥

मदन्तिका[20] नन्दसुतेन पूतना बकोऽपि मत्सोदर एव सूदितः ।
प्रसह्य [21] सम्मीतिरमुष्य मन्महे महत्तरा वैरविशुद्धिरेतयोः ॥
॥२७॥

इदञ्च कंसादिहृदोऽपि हर्षदं हते यदस्मिन्नपरेऽपि गोदुहः ।
शुचा विनङ्क्ष्यन्त्यनिलैरपोहिते घनाघने जीवनमेव दुर्लभम् ॥
॥२८॥

इदं विचार्याजगरं कलेवरं विधाय वृद्धं नगराजश्रृङ्गवत् ।
वलाहकोष्ठं[22] वसुधातलाधरं तमत्तुमास्यं स वितत्य तस्थिवान् ॥
॥२९॥

विलोक्य तं विस्मितचित्तवृत्तयः परस्परं प्रोचुरिदं कुमारकाः ।
विसर्प्पदाहेयविषानिलं भृशं विशङ्कमाना दवथुं[23] दवोत्थितम् ॥
॥३०॥

---

19. नु स्तुतावित्यस्माद् णिजि रुपम् । (पु.टि.)
20. अन्तिका भगिनी ज्येष्ठेत्यमरः । (पु.टि.)
21. सम्पूर्वान्मीन् हिंसायामिति धातोस्क्तिन् । (पु.टि.)
22. वलाहकस्थानपर्यन्तमोष्ठं यस्य तत् (पु.टि.) ।
23. प्रसर्प्पन्तमहिविषसहितमनिलं दवथुत्वेन विशङ्कमाना इत्यर्थः । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहो सखाय: परिपश्यताऽधुना धुनोति नो मानसमेष पर्वत: ।
विकाशितोदग्रदरीमुखो रुषाशनायतीव स्विदुदन्यतीव[24] न: ॥
॥३१॥

अयं हि पन्था: पृथलप्रथीयसीं द्विजिह्वजिह्वामनुचर्करीति भो: ।
सुतुङ्गमेतन्नगशृङ्गमुच्चकैश्चकास्ति चाभोगिभुजङ्गभोगवत्[25] ॥
॥३२॥

पथामुना किन्तु युनक्ति सर्पणं क्षणं सरीसर्ति न येन कश्चन ।
परन्तु नो नन्दसुतेन सर्वथा सनाथितानामभयं यतस्तत: ॥
॥३३॥

इदं निगद्य [26]द्रुतमद्युवन्नमी महाहिभूमिधरकुक्षिकन्दरम् ।
हरिश्रितानामिह वा परत्र वा न कुत्रचिद् भीतिलवोऽपि जायते ॥
॥३४॥

अथ प्रविष्टेषु रिपूदरं निजेष्वयं स्वयं प्राविशदास्यमस्य तु ।
परा हि सौहृद्यभरस्य हृद्यता सहोपभोगे सति सम्पदापदो: ॥
॥३५॥

तत: प्रविष्टे वदनं हरावरिर्जिघित्सया यावदमुष्य पश्यति ।
विदार्य तावत् स शिर: सुरद्रुह: सहासुवृन्दैर्वपुषा विनिर्गत: ॥
॥३६॥

कुमारकास्तेऽपि कुमारकान्तयो विनिर्गतास्तेन पथाऽस्य कुक्षित: ।
महाविलेनैव कुमारपत्रिभि:[27] परिक्षतात् क्रोञ्चगिरे: पतत्रिण: ॥
॥३७॥

---

24. (क) पर्वतत्वेन क्रमविपर्यीकृतोऽघ: शिशूनामशनायतीत्यादिना शङ्कापदमभूदित्यर्थ: ।
(ख) रुषाऽशनायतीवा - इति प्राप्ता: सर्व एवं पाठा: ।

25. आभोगो वारुणच्छत्रे पूर्णतायत्नयोरपीति, मेदिनी । (पु.टि.)

26. धुरभिगमने लङि । (पु.टि.)

27. कुमारपत्रिभि: - कार्तिकेयशरैरित्यर्थ: । (टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अघोऽपि यातो[28] यदनुत्तमाङ्गतिं तदङ्गसङ्गाहतपातकोत्करः ।
अहो महद्भिर्विहितो हि [29]निग्रहोऽप्यनुग्रहो दुष्टनरस्य जायते ॥
॥३८॥

तदा मुकुन्दं मुदिता दिवौकसः सुरेन्द्रवाटीसुमनोभिराकिरन् ।
यशांसि चाप्यस्य जगुः पुरे पुरे पुरौकसां प्रीतिकराणि मानवाः ॥
॥३९॥

अघारिणाऽघेऽलघुसाधुलंघनाघनाघसंघातिनि[30] घातितेऽघृणम् ।
अरिघ्नमर्घं जगृहुर्मखे मखे मुखेन लेखेनमुखा[31] मखाशिनः ॥
॥४०॥

अथोत्तरेद्युस्तृणराजराजिते वने वने बालगणैर्विहारिणोः ।
पुरः स्थितः श्रीपददामनामकः सखा समाभाषत रामकृष्णयोः ॥
॥४१॥

अहो सखायौ परिपश्यतं पुरः पचेलिमैस्तालवनं फलैर्युतम् ।
नभः श्रियो मध्यवयःसमागमे सुवर्तुलाभोगिपयोधरोपमैः ॥
॥४२॥

विसप्पर्दामोदविसर्पणादनुप्रलोभ्य दूरादुपभोगदित्सया ।
समीरणोऽद्य छदबाहुचालनैर्वने समाकारयतीव तत्र नः ॥
॥४३॥

रसोत्तमं[32] नः क इहानुभावयेद् विना युवां धेनुकधाम्नि कानने ।
नृणां बहुव्यालवृते हि चन्दने[33] समीर एकोऽस्य गुणोपनायकः ॥
॥४४॥

---

28. अघोऽपिनामा- इति क. पु. पाठः
29. महता विहितस्य निग्रहस्यासतामनुग्रहत्वेनोपन्यासेनार्थान्तरन्यासः । (पु.टि.)
30. लङ्घनं भूपवामे स्यात् क्रमणे प्लवनेऽपि चेति मेदिनी । (पु.टि.)
31. लेखानां- देवानाम् ईनः - स्वामी स एवाग्रणीर्येषान्ते । (पु.टि.)
32. रसोत्तमं तत् - इति घ. पु. पाठः ।
33. कृष्णानुभावकथने हि समीरणस्य चन्दनगुणापहारकत्वेनोपन्यासाद् दृष्टान्तालङ्कारः । (पु.टि.) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशम्य तद्भाषितमीश्वरौ परौ गतौ वयस्यैः सह तालकाननम् ।
शरीरिणां यत् परमं भयङ्करं जिघत्सदुच्चैरिव तालकाननम्[34] ॥
॥४५॥

अथ प्रविष्टो गहनं बलो बली व्यलोलयत्तालतरून्नितस्ततः ।
तथा यथाऽभूत् पतयालुभिः फलैर्भुवस्थलं तुङ्गनगेन्द्रश्रृङ्गवत् ॥
॥४६॥

हरिप्रियास्तेऽपि फलानि तान्यलं विपाकपिङ्गानि समादुरादरात्[35] ।
न दुर्लभं दुर्लभमीश्वराश्रये नृणां हि किञ्चित् सुलभन्तु किम्पुनः ॥
॥४७॥

किशोरकाणां सहजं महारवं तथा फलानां पततां खरासुरः ।
निशम्य तत्र त्वरया समाययौ पराभियोगं[36] सहते हि को बली ॥
॥४८॥

स दृष्टवानेव बलं बलाधिकं निपातयन्तं फलिनोऽवनीरुहः[37] ।
उपेत्य पद्भ्यां रुषितः समाहनत् स्वजातियुक्तं च ररास रासभः ॥
॥४९॥

बलश्च पश्चात्पदयोः प्रगृह्य तं न्यपातयत्तालतरावकातरः ।
स चापि तद्भीतिभरादिव द्रुतं प्रपेदिवान् प्रेतपतीयमास्पदम् ॥
॥५०॥

ततः प्रभृत्येव सुदेवदेवनं बलेन विध्वंसितधेनुकासनम् ।
वनं तदामोदविनोदसाधनं निरामयं[38] देहमिवास देहिनाम् ॥
॥ ५१॥

---

34. तालकाननम्-तालकाख्यस्य कस्यचन दानवस्य मुखमित्यर्थः । (पु.टि.)
35. अद्भक्षणे इत्यस्य लिटि । (पु.टि.) ।
36. पराक्षेपमित्यर्थः । (पु.टि.)
37. (क) फलिनावनीरुह : - इति ग. पु. पाठः ।
(ख) फलवान् फलिनः फलीत्यमरः । (पु.टि.)
38. विनामयम् - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[39]तस्यानुबन्धादपरेऽपि ये ये समागता दैत्यसुतादिभृत्याः ।
अध्वानमध्यासितधेनुकन्तानध्यासयामास बलो बलेन ॥
॥५२॥

इति हलधरहेलाहूयमानामरौघ-
स्तुतिपदसमकालं भोगिराजस्य जाता ।
शिरसि[40] शिरसि रूढप्रौढरोमाञ्चदण्डो-
त्लसितमणिमयूखैः प्रायशः पुष्पवृष्टिः[41] ॥
॥५३॥

पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽतिभव्येऽ-
भवत्पूर्णस्तूर्णं हरिगुणगणैरेष सर्गश्चतुर्थः ॥
॥५४॥

☆☆☆☆☆

39. अनुबन्धः शिशोर्दोषोत्पादे मुख्यानुयायिनि ।
विनश्वरे प्रकृत्यादेः प्रवृत्तस्यानुवर्तने ॥ (पु. टि.)

40. इति शिरसि निरूढ - इति क. पु. पाठान्तरम् ।

41. बलस्य भोगिराजांशत्वेन तद्गतरोमाञ्चोद्गतमणिमयूखानां पुष्पत्वेनोपन्यासेनोत्प्रेक्षालङ्कारः । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्येवं दनुजमृगालिमार्गणेषु व्यासक्तं हरिमनुकाननं समीक्ष्य ।
अध्यास क्षितिमथ वासरस्य वृद्ध्या सश्लाघस्तमिव निषेवितुं निदाघः ॥
॥१॥

उद्भानुः[1] स्वकिरणधोरणीवितानैरापन्नः शिशिरमयीं दिशं दिनेशः ।
सन्त्यक्तुं झटिति न यत् समैहतैनां तेनासन्निव दिवसा निदाघदीर्घाः ॥
॥२॥

मृद्वङ्गी शिशिरपयोधरा गुणाद्या सश्लाघं हृदि विनिवेशिता करेण ।
[2]नारीव स्फुरदतनूपतापशान्त्यै लोकानामजनि [3]महोज्ज्वला जलार्द्रा[4] ॥
॥३॥

आरामाश्चरमनिशा तुषारधामा क्षामाङ्गी हिमशिशिरा शिरीषशय्या ।
तप्तानां तपऋतुना रतिप्रपञ्चे[5] पञ्चेषोरिषव इमे हि पञ्च जाताः ॥
॥४॥

अध्वन्याः कथमनिवेशिनः सहन्तां सन्तापं तपनकरानुषङ्गजातम्[6] ।
सोढुं वा न सुशकमस्ति किन्तु तेषां यैः कान्ताविरहमयोऽप्यूरीकृतोऽग्निः॥
॥५॥

न श्लाघा सुरभिणि कुङ्कुमे न तैले नेपथ्ये बहुनि पुरेव नानुरागः ।
भूषायै वपुषि बभूवुरङ्गनानामानङ्गा वयसि तरङ्गिता हि भावाः[7] ॥
॥६॥

---

1. उद्भानुः - इति क. पु. पाठः ।
2. शीतलजलधारिणी शीतलस्तनी च । (पु.टि.)
3. उज्ज्वला दीप्तशृङ्गारविशेषेषु विकाशिनीति मेदिनी । (पु. टि.)
4. जलार्द्रा सार्द्रवस्तु स्यात्, इति मेदिनी । (पु.टि.)
5. प्रपञ्चे - विस्तार इत्यर्थः । (पु.टि.)
6. किरणसम्पर्कजातमित्यर्थः । (ग. पु. टि.)
7. निर्विकारात्मके चित्ते भावः प्रथमविक्रिया ।
भ्रूनेत्रादिविकारैस्तु सम्भोगेच्छाप्रकाशकः ॥ (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आरम्भे निधुवनभञ्जनेन यूनोर्मध्ये यो मिहिरमहोभिरुद्विजायै ।
आसन्नप्रियजनसङ्गमः स आस द्राघीयानपि दिवसोऽवसानहृद्यः ॥
॥७॥

8आसायं 9मलयजपङ्कलेपलक्ष्मीराप्रातः शिशिरमयी शिरीषशय्या ।
भैषज्यद्वितयमिदं नृणां10 न चेत् स्यान्नैदाघी रुगपि तदा कथं व्ययास्यत् ॥
॥८॥

विस्तारिस्तवकविकस्वराणि रेजुर्मल्लीनां मुकुलकुलानि काननेषु ।
भानीव11 प्रतिभयभानवीयतापत्रासेन त्रिदिवतलादिलागतानि ॥
॥९॥

उत्फुल्लस्तवकितपाटलीद्रुमालिपाटल्यप्रकटितमान्मथप्रतापाः ।
पर्यन्ता विपिनभुवः पथि 12प्रयाणप्रत्यूहं 13प्रतिमुहुरूहुरध्वगानाम् ॥
॥१०॥

वासन्ती कुसुमसमूहतो बभासे धावालो14 धरणितले पतत्परागः ।
ग्रीष्मेण प्रकटमुपायनीकृतोऽसौ भूपाय स्मरसुहृदे सुवर्णदण्डः ॥
॥११॥

उत्तप्तं मिहिरमहोभिरन्तरन्तः पानीयं पयसि पिपासु किं न्यमज्जत् ।
संशुष्यन्मधु मधुपायिभिः सरस्यामालस्यात् कमलमसेवि नाभिलाषात् ॥
॥१२॥

---

8. मभिविघ्नौ । (पु.टि.)
9. लक्ष्मीः संपत्तिशोभयोरिति मेदिनी । (पु.टि.)
10. क.पु.ख.पु.घ.पु. पाठेषु नृणाम्-इति नास्ति ।
11. (क) भङ्करं प्रतिभयमित्यमरः (पु.टि.)
(ख) भानीव - नक्षत्राणीवेत्यर्थः । (ग.पु.टि.)
12. विघ्नोऽन्तरायः प्रत्यूह इत्यमरः । (पु.टि.)
13. वहप्रापणे इति धातोर्लिटि । (पु.टि.)
14. धारालो - इति ग. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यान्तीनां समयवनाय[15] बन्धकीनां बान्धव्ये विधुवदुवास वासरेशः।
तत् किन्त्वस्तिमितशयानजीवजातं सञ्जातं दिनमपि मध्यममर्द्धरात्रः॥
॥१३॥
व्यावृत्ता गजपतिगण्डमण्डलेभ्यः पुन्नागे परिपतति स्म भृङ्गमाला।
कः क्षीणं भजति जनं जहाति को वा सम्पन्नं धनमभिलाषुकःसचेताः॥
॥१४॥
उत्फुल्लैर्मधुमदसेकसार्द्रपादैरुत्तुङ्गैरतिघनपुष्पमुद्गिरद्भिः[16]।
पुन्नागैरपि नगनामिभिः[17] समन्तात् पुन्नागैरिव समपोषि भृङ्गमाला॥
॥१५॥
मध्याह्ने भुवनभयङ्करेऽनुभीताः पीतापस्तरणिकरेण तृष्यतेव।
आहोस्वित् तपनरुजेव दीनदीनाः प्रक्षीणाः प्रतिदिनमापगा बभूवुः॥
॥१६॥
मध्यस्थभ्रमरविलानि केसवारप्रोतानि [18] बभुरमलानि केसराणि।
चक्राणि स्मरणभुवे वियोगिवध्याविध्यर्थे तपकृतुना किमर्पितानि॥
॥१७॥
इत्येवं तपतपनातपोपतापादुत्तस्थौ[19] वनभुवि दुस्सहो दवाग्निः।
अत्युग्रादतनुजसंज्वराल्ललाटे तार्तीयं नयनमिव त्रिशूलपाणेः॥
॥१८॥
तत्कालं बहुतरलेलिहानहेतिः प्रोद्दामद्युमणिसहस्रदुर्निरीक्ष्यः।
सन्नद्धं वनमवरिष्ट[20] वीतिहोत्रः सानीको[21]रिपुरिव पत्तनं परेषाम्॥
॥१९॥

---

15 समयः शपथाचारे सिद्धान्तेषु मतावपि।
क्रियाकारे च निर्देशे सङ्केते कालतीरयोः॥ इति मेदिनी। (पु.टि.)

16. मेघपुष्पं घनरस इत्यमरः। (पु.टि.)

17. शैलवृक्षौ नगावगावित्यमरः। (पु.टि.)

18. केसरारप्रोतानि - इति क. पु. पाठः।

20. वनमवविष्ट - इति क. पु. पाठः, ख. पु. पाठश्च।

21. अनीकोऽस्त्री रणे सैन्ये इति मेदिनी। (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विक्रान्त्या बहिरतिभूमधूमपुञ्जे सञ्जातद्विरदमतिर्दुतं निपत्य ।
सिंहोऽद:[22]शिखिशिखरं खरं ललङ्घे जङ्घालो जगति न भाजनं भयस्य ॥
॥२०॥

शार्दूलैः करयुगलेन मर्दितोऽपि व्याधूतः श्वसितभरेण पाटितश्च[23] ।
लग्नोऽङ्गे तदपि शशाम नो कृशानुःकैर्वा न व्यथयति विप्रियो विधाता ॥
॥२१॥

संलग्नं व्युदसितुमग्निमेनमङ्गे भल्लूको न खलु शशाक भीषणोऽपि ।
सद्यस्तत्[24]प्रकटकचौघतारतृण्यासङ्कीर्णं वनमवनं स्फुटं यतोऽभूत् ॥
॥२२॥

उज्ज्वालज्वलनशिखाकलापतापादापन्नः पुनरपि काननस्य मध्ये ।
न स्थातुं बहिरपि नाशकत् प्रयातुं जीवातुं[25]विमृशति केवलं हयारिः ॥
॥२३॥

[26]ऊर्ध्वं ये तपतपनातपेन तप्तास्तस्याधो वत परितो दवाग्निदग्धाः ।
ते गोपा वनभुवि विष्णुतोषकामाः पञ्चाग्निव्रतपरमा[27]जना इवासन् ॥
॥२४॥

वित्रस्तं तम इव भूतलं प्रयातुं भूदारो[28] वनमपि सन्ददार दद्भ्याम् ।
भीमोऽपि स्फुरति किलात्र यस्य दाहे माहेयं शुषिरशरण्यमेव चक्रे ॥
॥२५॥

आजन्मावधि तदुपाश्रयस्थितानामाजीवं समसुखदुःखभोगभाजाम् ।
दग्धानामपि तरुणा धवेन[29] साकं वल्लीनामजनि पतिव्रतं बलीयः ॥
॥२६॥

---

22. अग्निज्वालामित्यर्थः ।(टि.)
23. श्वसितभरेण स्फाटितश्च - इति ग. पु. पाठः ।
24. सद्यश्च - इति क. पु. पाठः, ख. पु. पाठश्च ।
25. (क) जीवान्तम् - इति क. पु. पाठः ।
    (ख) जीवातुर्जीवनौषधम्, इत्यमरः । (ग.पु.टि.)
26. इदं पद्यं केवलं क. पु. लभ्यते ।
27. व्रतपरा- इति क.पु.पाठः, परमाः - इति समीचीनं भवेदिति छन्दोभङ्गनिवृत्तये परिष्कृतिः ।
28. भूदारः - महिष इत्यर्थः । (पु.टि.)
29. तरुणाधरेण - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उड्डीनं विहगकुलैर्गतं कुरङ्गैर्जम्बूकैः शशकगणैः क्वचिच्च लीनम् ।
द्रागाकस्मिकसमुपागमो वनेऽस्मिन् मारीव[30]व्यवसितमाततान वह्निः ।
॥२७॥

इत्यूचुस्तदनुसमेत्य सर्वगोपाः साटोपाद् दवदहनात् समुद्विजन्तः ।
श्रीकृष्ण प्रतिकुरु नो विपत्प्रपन्नान् खिन्नानां जगतिगतिस्तु कस्त्वदन्यः ॥
॥२८॥

कृष्णस्तानिति निजगाद वाञ्छितं वो यद्येवं भवत तदा निमीलिताक्षाः ।
श्रुत्वैवं[31]समजनि गोपमण्डलं तत् सन्ध्यायां सर इव मीलिताक्षिपद्मम् ॥
॥२९॥

इत्येवं नयननिमीलनेषु तेषां गोविन्दोऽगिलदखिलं दवानलं तत् ।
व्यामोहे महति पुरा सुरासुराणां सिन्धूत्थं शिव इव कालकूटकूटम् ॥
॥३०॥

सुस्थत्वोपगतविहङ्गयुग्ममुच्चैस्तत्कालं नयनपुटैः समुन्मिषद्भिः ।
निष्पीतस्थगितधनञ्जयं वनं तत्[32]तेऽपश्यन् मुनिजनचित्तवत्प्रसन्नम् ॥
॥३१॥

उद्दामद्युमणिकरेण कृष्यमाणाः कृष्णेन प्रियवचसा निदिश्यमानाः ।
कालिन्दीतटमगमन्निमे भवेऽस्मिन्नुतप्ताः सुरसरितं हि संश्रयन्ति ॥
॥३२॥

उत्तुङ्गैस्तरलतरङ्गशीकरोघैः सिञ्चन्तीं पितुरिव सम्भ्रमेण पादान् ।
अत्यर्थत्रिभुवनविक्रमावसादे ते दृष्ट्वा जहृषुरतीव भानुकन्याम् ॥
॥३३॥

सुस्निग्धं वपुरिव केशवस्य नीलं ते दृष्ट्वा तपनसुताम्बु तत्क्षणेन ।
निःशङ्कं परिहृतवन्त एव तापं चिक्रीडुः परमिह बालचापलेन ॥
॥३४॥

---

30. मारीकव्यवसितम् - इति क. पु. पाठः ।
31. कृत्वेदम् - इति क. पु. पाठः ।
32. वनं त - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रैकः पयसि परिप्लवन्तमन्वैदन्योऽपि स्थगिततनुं व्यमृग्यदन्यम् ।
केचित्तु स्वपरविभागकल्पनाभिर्वात्यूक्षीसमरमहं33 चिराय चक्रुः ॥
॥३५॥

ये ये तज्जलमपिबन् विषाक्रमार्तास्ते सर्वे सपदि विचेतना बभूवुः ।
दृष्ट्यैव प्रबलकृपातिरेकरत्या पत्याऽथ श्रिय इह योजिताश्च जीवैः ॥
॥३६॥

इत्येवं कलितकुमारकौतुकेषु क्रीडत्सु स्वजनगणेषु34 नन्दसूनुः ।
कालिन्दीह्रदमदनस्य कालियाहेरुद्दामे दमनविधौ मनो दधार ॥
॥३७॥

निःशङ्कः सकरुणसौभरिप्रयुक्तैः35 शापास्त्रैर्विहगपतेरुदस्यमानात् ।
यो नित्यं फणिकरदानकातरत्वादुज्झित्वा रमणकमेनमध्युवास ॥
॥३८॥

कृत्वादौ परिकरगाढबन्धमुच्चैरारूढस्तदनुकदम्बपादपाग्रम्36 ।
नागेन्द्रावसथह्रदे37 ततः स तस्मादाकाशादशनिरिव द्रुतं पपात ॥
॥३९॥

व्यामृद्नन् कमलवनानि चिन्तितागा नागानां नगरमतीव कम्पयंश्च ।
उन्मत्तः पुरुषकरी करेण कृष्णः कालिन्दीसलिलममन्थरं ममन्थ ॥
॥४०॥

उन्मीलत्कमलकुचाग्रमर्दबाधा कुर्वाणा किसलयपाणिधूननानि38
तत्काले पुरुषवरेण मृश्यमाना कालिन्दी नवरमणीवदाचकम्पे ॥
॥४१॥

---

33 वात्यूक्षीसमरमहम् - जलक्रीडामहोत्सवम् । (पु.टि.)

34 सुजनगणेषु - इति क.पु. पाठः ।

35. सौभरिकालियसंबद्धा कथा श्रीमद्भागवते, (१०।१७) विलोकनीया । (टि.)

36 भवेत् परिकरो बन्धे समारम्भविवेकयोः ।
प्रगाढगात्रिकाबन्धे पर्यङ्कपरिवारयोः ॥ इति मेदिनी । (पु.टि.)

37. नागेन्द्रावसथजये - इति क. पु. पाठः ।

38. पाणि - इति पदं ग. पु. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्वेलप्रचलबृहत्तरङ्गमालं[39] व्याबध्नद्बहुलतराहिनक्रजालम्[40] ।
सम्वर्तानिल इव वारिधिं मुकुन्दः कालिन्दीह्रदमतिलोलयाञ्चकार ॥

॥४२॥

तं दृष्ट्वा कुपितमतिः पतिः स वेगान्नागानामगमदुरुक्रमाक्रमाय[41] ।
उग्रः[42]सन्निह सहते हि किन्त्वकामं वैपक्षाचरणपरं विषाणि पाता ॥

॥४३॥

विस्फारिस्फुरितफणश्च[43]यो मुकुन्दं मन्दोऽसावदशदुपेत्य दन्दशूकः ।
जानीते जगति निरञ्जनं जनं को जात्यन्धःकिमुत रुषा कषायिताक्षः ॥

॥४४॥

[44]रीढाभिर्दृढमुपसृत्य भोगजालैरुत्तालैरहिपतिरेनमाबबन्ध[45] ।
[46]व्यामोहात् परिपतितं भवाम्बुराशौ क्षेत्रज्ञं मन इव मानसैर्विकारैः ॥

॥४५॥

सन्दष्टः परिलगिताहिपाशबन्धो निस्पन्दः सपदि पपात नन्दसूनुः ।
निर्भिन्नो रणभुवि रावणिप्रयुक्तैर्जानक्याः पतिरिव भीषणेषुजालैः ॥

॥४६॥

तत्रैके तटभुवि कृष्णमोहपश्या हाहेतिव्यथितगिरो निषेदुरन्याः[47] ।
अन्ये च द्रुतमुपसृत्य गोपवासानाचख्युः सकलमुदन्तमेव[48] तेभ्यः ॥

॥४७॥

---

39. तरङ्गमालि - इति क. पु. पाठः ।
40. बहुरतरा - इति क. पु.पाठः ।
41. उरुक्रमो विष्णुस्तस्याक्रमायेत्यर्थः । (पु.टि.)
42. उग्रः शूद्रासुते क्षत्रात् शिवे पुंसि त्रिरुत्कटे । (पु.टि.)
43. विस्तारिस्फुरितफणाच - इति क. पु. पाठः ।
44. रीढावमाननावज्ञा, इत्यमरः । (पु.टि.)
45. भोगः सुखे धने चाहेः शरीरफलयोरिति मेदिनी । (पु.टि.)
46. अथ मोहो नृलिङ्गे स्यादविद्यायां च मूर्च्छने, इति मेदिनी । (पु.टि.)
47. अन्याः - गोप्य इत्यर्थः । (टि.)
48. सकलमुदन्तमेनमेभ्यः - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते श्रुत्वा तनयदशामतीव शोच्यां नन्दाद्याः सबलवधूजनाः समेताः ।
कालिन्द्यां विकलतरं विलोक्य बालं निर्जीवा इव जगतीतले निपेतुः ॥
॥४८॥

हित्वैकं हलधरमाप्नुवन्49 विमोहं ते सर्वे विकलमुकुन्दवीक्षणेन ।
घर्मांशौ विरमति पावके पतङ्गाः प्रायेण ज्वलति पतन्ति नो रथाङ्गाः ॥
॥४९॥

रामस्तान् प्रसभमुदीक्ष्य मोहमग्नान् सङ्केतैरजितमबोधयत् स्वरूपम् ।
तेनासौ विदितनिजानुभावशक्तिर्द्रागेवैधत वपुषा घनत्विषा च ॥
॥५०॥

तत्काले वपुषि भृशं विवर्धमाने कृष्णस्याच्छुटदखिलोऽपि भोगबन्धः ।
दृष्ट्वातो विषयपिधायकं समन्तात्50 तारुण्ये तम इव शर्वरीकरस्य ॥
॥५१॥

श्रीकृष्णः सपदि विनिर्गतोऽहिबन्धात् सानन्दस्मितवदनो भृशं ममन्थ ।
तन्मौलीन् पदसरसीरुहं निधाय त्रैलोक्योद्वहनभरातिभारि51 भूयः ॥
॥५२॥

यं यमत्याकुलो मौलिमुत्तोलयत्येष रोषारुणो दन्दशूकेश्वरः ।
पादपङ्केरुहं न्यस्य तस्योपरि प्रीतिमानच्युतं52 नृत्यति स्माच्युतः ॥
॥५३॥

शोणितौघं शतेनाननैरुद्वमन् नृत्यता माधवेनाधिकं बाधितः ।
53वज्रिवज्राहतो धातुधारामयैः शृङ्गसंघैरिव क्षोणिभृत् सोऽपतत् ॥
॥५४॥

---

49. हलधरस्यानन्तांशत्वान्मोहाभावः । (पु.टि.)
50. समन्तात् - चतुर्दिक्षु इत्यर्थः । (पु.टि.)
51. त्रैलोक्यस्य यद्वहनं तेन यो भरस्तस्मादतिगुरुतरमित्यर्थः । (पु.टि.)
52. अच्युतमिति क्रियाविशेषणत्वेन प्रयुक्तं पदम् । (टि.)
53. सुत्रामा गोत्रभिद् वज्रीत्यमरः । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नागपत्नीगणस्तुष्टुवे केशवं त्रातुमत्यातुरं कालियङ्कातरः ।
[54]भर्तृदुःखेन या दुःखिता योषितस्तोषितस्ताभिरेवाखिलो निर्जरः ॥
॥५५॥

त्वं हरिस्त्वं हरस्त्वं विधिर्वासवस्त्वामृते किञ्चिदप्यस्ति नासच्च सत् ।
त्वद्गुणोदीरणे का वयं योषितः केन मूकायते[55] यत्र योगीश्वरः ॥
॥५६॥

उच्छलच्छीकराच्छोदविक्षेपिकोल्लासहासावृता भानुकन्याम्भसि ।
बालगोपावली केलिकौतूहलं मन्यते मानवं वेषतोऽमानवम्[56] ॥
॥५७॥

नापराध्यत्ययं किन्तु युष्मत्कृपामुष्य सन्नीयते दृष्टिपाते यया ।
दीनमेनं जनं रक्ष हीनं ह्रिया यत्सतां निग्रहोऽनुग्रहानन्तरः ॥
॥५८॥

एवमादिस्तुतिश्रेणिभिस्तोषितो योषितः प्राह पीताम्बरः प्रीतिमान् ।
यात यूयं सहानेन पाथोनिधिं भानुकन्याजलैरस्तु पुण्यामलैः[57] ॥
॥५९॥

मत्पदाम्भोजलेखाङ्किते कालिये व्येतु वो भीतिरद्यादि मद्वाहनात् ।
प्रीणितस्य प्रभोः सापराधे जने यत्परोपद्रवे पत्रमेकं[58] बलम् ॥
॥६०॥

आदिष्टो बकरिपुणेति काद्रवेयः स्तुत्वागाद्रमणकनामकान्तरीपम् ।
कृष्णोऽपि प्रमुदितमानसैः परीतो नन्दाद्यैर्निजकनिवासमाससाद ॥
॥६१॥

---

54. नागपत्नीनां पातिव्रत्यसमलङ्कृतं माहात्म्यं सूच्यते । (टि.)

55. केन मोहायिता यत्र योगीश्वराः - इति क. पु. पाठः ।

56. मन्यते मानवैरेव सोऽमानवः - इति प्राप्तौ पाठौ ।

57. एषा भानुकन्या जलैः पुण्याऽस्तु त्वयि स्थिते सपापत्वात् । (पु.टि.)

58 स्तोत्रमेकं बलम् - इति ख.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्येद्युः शिशुकेलिकौतुकवशात् पृष्ठे प्रलम्बं वहन्
लम्बं लक्षितमीक्षितादिभिरतिक्रोधेन कृष्णाग्रजः ।
59निष्पात्यैनमिलातलेऽतिबलतो मल्लाजिमुल्लासयन्60
प्रेताधीशपुरं प्रति प्रतिभयप्रौढिः61 प्रभुः प्राहिणोत् ॥
॥६२॥

पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽति भव्येऽ-
भवत् पूर्णस्तूर्णं भुजगदमनः62 पञ्चमः सर्ग एषः ॥
॥६३॥

☆☆☆☆☆

---

59. इला पृथिवी तस्यास्तले इत्यर्थः । (पु.टि.)
60. मल्लाजिम् - मल्लयुद्धमित्यर्थः । (पु.टि.)
61. भयङ्करी प्रौढता यस्य सः । (पु.टि.)
62. भुजगनमनः - इति ख. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठसर्गः

अथ नियुज्य कदापि शिशूनसूनिव पशूनुपचारयितुं चिरात् ।
धृतमना यमुनापुलिनाङ्गणेऽरमत रामसखा जगतां पतिः ॥
॥१॥
अशनपानजलप्लवधावनैर्ध्वनितकम्बुकुतूहलकेलिभिः[1] ।
सवयसां निवहैर्विहरन्नयं दिनकृतोऽपि गतिं गगनेऽरुणत् ॥
॥२॥
सरसघासवशादतिदूरगास्तदनु गाः सहसा सहितानुगाः ।
विविदिषुर्बलमस्य तिरोऽकरोद् भुवनशिल्पशतव्यसनी विधिः ॥
॥३॥
निहितगोपितगोपतिगोकुलं किमपि भूधरकन्दरमन्दिरम् ।
पिहितनिर्गमनाध्वमहोपलैरपरगोकुलमेव स निर्ममे ॥
॥४॥
अथ विलोक्य भयेन विषीदतो निजसखीनितिवाचमुवाच सः ।
जहित भीतिमलं परिदेवितैर्विहरतेह सुखेन सखिव्रजाः ॥
॥५॥
अयमहं महिमातिशयाश्रये निखिलदुर्गमयेऽपि महीधरे ।
क्वचन वा परतोऽपि तिरोहिता जनहिताय गवेषयितास्मि गाः ॥
॥६॥
इति निगद्य गदाधरकेसरी गिरिभुवि प्रविवेश निरङ्कुशः ।
भवति साहसलालसमानसो विपदि को न परं सति गोग्रहे ॥
॥७॥
गिरिवने गुरुणि ग्रहिलोऽथ गाश्चिरममृग्यत गोपगुणाकृतिः ।
[2]परमपुण्यतमो विधिनेरिता जलनिधौ झषवेष इव प्रभुः ॥
॥८॥
अनुपलभ्य पशून् पशुपाशभित्[3] सरसि शैलवनेऽथ यतस्ततः ।
विधिकृतं निकृतं तदवेतवान्[4] सकलहृद्वसतेः किमगोचरम् ॥
॥९॥

---

1. कम्बु - इति पदं ग. पु. नास्ति ।
2. परमपुण्यतमो विधिनेरितो - इति ख. पु. पाठः ।
3. पशूनां पाशः - संसारजनकादृष्टविशेषस्तं भिनत्तीति पशुपाशभित् । (पु.टि.)
4. विधिकृतं निकृतं तदवैत यद् - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपशुचः पशुपालकुटुम्बिनां रचयितुञ्च विरिञ्चिकुतूहलम् ।
सकलवत्सपवत्सवपुर्धरो ह्ययमभूत् स्वयमेव जगन्मयः ॥
॥१०॥

तनुवयःपरिमाणगुणाकृतिप्रकृतिभिर्न भिदामुपजग्मिवान् ।
अभिनवोऽपि भवन् स पुरातनाद्रविकरा इव नित्यमुदित्वराः ॥
॥११॥

सति बलेऽपि स नान्वयदूक्षकान् कमलयोनिकुतूहलकारणात् ।
प्रकृतिसिद्धमिदं हि महीयसां परहिताचरणं व्यसनेऽपि यत् ॥
॥१२॥

इति विहृत्य वने पशुपालकैः स पशुभिः सहितो निजमूर्तिभिः ।
व्रजमुपागमदेष दिनात्यये विशति हि प्रकृतिं पुरुषो गुणैः ॥
॥१३॥

निजनिजं गृहमीशनिवेशितास्त इह मातृगणैरुपलालिताः ।
कृतकतास्वपि जन्मसमन्वयं व्यतिगताः स्म परं व्यतिबिभ्रते ॥
॥१४॥

न जननी न सुतो न च वा[5] परः कृतिमिमामवगन्तुमलं हरेः ।
अभवदस्य जगद्विधिशिल्पिनस्तदपि शिल्पमनल्पतरं यतः ॥
॥१५॥

कृतकवत्सपवत्सगणैरिति[6] प्रकृतपूरुषवत् पुरुषोत्तमः ।
व्यवहरद् व्रजवासिविमोहनैरगमयत् समयं समयापितम् ॥
॥१६॥

अथ कदापि चरद्गिरिमूर्धनि द्रुतमधावत धैनुकमुद्धतम्[7] ।
समवलोक्य[8] शिशूनुपगोकुलं प्रणयवारिधिवीचिपरिप्लुतम् ॥
॥१७॥

द्रुतमपत्यमुपेत्य[9] निजं निजं पशुगणः प्रणयाधिकलालनैः ।
विधुरिव व्युषितं कुमुदव्रजं व्रजमहोपवने समनन्दयत् ॥
॥१८॥

---

5. न चराचरः - इति ग. पु. पाठः ।
6. कृतकवत्सपवत्सगवादिभिः - इति ग.पु. पाठः ।
7. द्धतम् - इति ग.पु. नास्ति ।
8. समवलोक्य - इति ग.पु. नास्ति ।
9. द्रुततमं समुपेत्य निजं निजम् - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ विरिञ्चिरुदञ्चितविस्मयः सपदि कृष्णसमीपमुपागमत् ।
निजगृहादगृहीतमनःस्थितिः कलितगोकुल आकलयन्निति[10] ॥
॥१९॥
पशुकुलं पिहितं निहितं मया गिरिवने वसति स्म तथैव तत् ।
तदनुरूपगुणाकृतिचेष्टिताः पुनरहो क इमे समुपस्थिताः ॥
॥२०॥
कतरदत्र मृषा न मृषा कियत् तदवगन्तुमहं न किल क्षमः ।
अपशुरेव पशुर्विहितोऽनया परमया पिहितो हरिमायया ॥
॥२१॥
वनजनीरतृणाभ्यवहारिणः प्रभुनियोगभृतो भृतका इव ।
न पशवः पशवः पशवो वयं व्यवसिता यदमुष्य विडम्बने ॥
॥२२॥
इतर एव तिरस्क्रियतेतरां परविलम्बनयानमहामहाः ।
मलिनयत्युदिता दिनधूमरी दिवसमेव परं न दिनेश्वरम् ॥
॥२३॥
इति विचारपरे परमेष्ठिनि स्वरचितानुचितादुपतापिनि ।
सुरहितप्रहितो निजमायिताजवनिकामुदवासयदच्युतः ॥
॥२४॥
विधिरथोदितदिव्यविलोचनो ददृशिवान् दिशि दिश्यवतस्थुषः ।
सपदि वत्सपवत्सगणानलं विहरतो हरिविग्रहधारिणः ॥
॥२५॥
विधृतगैरिकगौरवराम्बरान् रथपदाम्बुजकम्बुगदाकरान्।
कुमुदगुच्छकरम्बितशाखिनो [11] नवतमालतरूनिव सङ्गतान् ॥
॥२६॥
निखिलवेदपुराणतदङ्गकैरुपनुतान् कृतरूपपरिग्रहैः[12] ।
परिवृतानणिमादिविभूतिभिः[13] शतमुखप्रवरैरुपसेवितान् ॥
॥२७॥

10. कलितगोकुलमाकुलयन्निति - इति ग. पु. पाठः ।
11. कुमुदगुच्छकरस्यितशाखिनो - इति क. पु. पाठः ।
12. कृतदेहपरिग्रहैः - इति ग. पु. पाठः ।
13. परिवृतानलमादिविभूतिभिः - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्फुटमुदीक्ष्य तदम्बुरुहासनः सनकमुख्यमुनिप्रवरस्तुतम् ।
पुरुषमेव नुनाव पुरातनं तनयतोपगतं व्रजवासिनः ॥
॥२८॥
जय जयाजितनिर्जितदानवाऽभिनवमानवदेवगणावन ।
तव पदाथ सदा मम भो नमः पुनरमुष्य विशिष्य कृतागसः ॥
॥२९॥
तव तरङ्गितया भवसागरेऽनुचितमारचयं वत मायया ।
हतमतिर्न हि दूषणमत्र मे न बिभृते [14] भृतकः प्रभुवश्यताम् ॥
॥३०॥
त्रिभुवनीभवनस्थपतिः पतिस्त्वमसि देव परे तव सेवकाः ।
श्रुतिभिरप्यत एव निगद्यसे निखिलपूज्यतमः पुरुषोत्तमः ॥
॥३१॥
इति बहुस्तुतिभिः प्रणिपत्य तं कमलयोनिरगान्निजविष्टपम् ।
[15]हरिरतोऽपहृताननयत् पशून् स कृतकानपि तानुदवासयत् ॥
॥३२॥
जलदमण्डलमण्डितदिङ्मुखो मुखरमत्तमयूरगणस्ततः ।
स्तनितभीरुसभर्तृकभाविनीरसमयः[16] समयः समुपागतः ॥
॥३३॥
विरहियौवनबाधनसाधने समतया ऋतुनैव निदेशिता ।
अनुदिनं ववृधे घनमण्डले मुखरता खरता सरितां रये ॥
॥३४॥
सहसहस्रगुणा गगनालये ग्रहगणा गिलिता इव नीरदैः ।
न बभिरे समयस्य विपर्ययादुपचितोऽपचितो भवति ध्रुवम् ॥
॥३५॥
वियति वारिदराजिविराजिते प्रतिहरित् सरसां सरितामपि ।
अधिकमैधत जीवनमित्यदः परमहीयत वर्त्मिकयोषिताम् ॥
॥३६॥

---

14. (क) विवभृते - इति ग. पु. पाठः ।
(ख) रिरभृते - इति क. पु. पाठः । उभावेव चिन्त्याविति परिवर्तितम् ।
15. हरिरदोपहृतान् - इति सर्व एव पाठाः ।
16. हरिकेलिमहाकाव्ये भामिन्यर्थे सार्वत्रिको भाविनीपदप्रयोगः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्फुटपयोधरभारभृतो दिशः समभवन् सरितोऽपि रजस्वलाः ।
इति किमु त्रपया कमलापतिर्विधुरवी नयने सममीलयत् ॥
॥३७॥
क्व दिनकृत् क्व दिनं क्व निशाकरो जगति नाम निशैव तमोमयी ।
इति विचिन्त्य विचुक्रुशुराकुलं झटिति झङ्कृतिभिःकिमु झिल्लिकाः ॥
॥३८॥
उपवने शिखिमण्डलताण्डवं रतिगृहञ्च सखीभिरनुज्झितम्[17] ।
घनततिश्च घनाध्वगयोषितामतनुतातनुतापमहर्निशम् ॥
॥३९॥
अतनुतापभृतः कुसुमाकरप्रणयिनो विरहाद् गगनश्रियः ।
उरसि किं निहिता हरिदालिभिर्जलदनीलसरोजदलावलिः ॥
॥४०॥
स्तन इव स्तनयित्नुऋतुश्रियो मिलितषट्पदचूचुकमुच्चकैः ।
कनककन्दुकरोचिरधान्न किं नवकदम्बकदम्बकसुन्मदम् ॥
॥४१॥
विकचकेतककेसरजं रजो रतिपतेर्जगतीजययायिनः ।
नवरथेन वरूथविसर्पणादुपवने[18] पवनेन विचिक्षिपे ॥
॥४२॥
जलधरध्वनिभिः श्रुतिसङ्गतैरनुनयैरिव सङ्गमिता बलात् ।
असुखयत् प्रियमङ्कपरिग्रहान्नवतमा वत मानवती वधूः ॥
॥४३॥
अचिररोचिरुदञ्चितरोचिषामुरुचमत्कृतिभिः सपदि प्रियैः ।
सहचरीव चिरं समयोजयद् वरवधूरवधूतमनस्विताः ॥
(चुम्बकम्)
॥४४॥
दिनमणौ मुषिते घनमालया घनतमे तिमिरे मधुपायिनाम् ।
कमलकैरवकाननसम्भ्रमः क्रमकृतो दिवसं निशमादिशत् ॥
॥४५॥

---

17. अनुज्झितमित्यस्य स्थाने, उज्झितम् - इति क. पु. पाठः ।
18. रथगुप्तिर्वरूथो ना, इत्यमरः । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ सतामिह सर्वसमृद्धिमानपरिहार्य इतोऽन्वयसंभवः ।
विविधशिल्पविधिर्व्रजवासिनां प्रववृते परमिन्द्रमहो[19] महान् ॥
॥४६॥

सरसभोजनपानपरष्कृतीः कृतकशिल्पकलाः सकला जनाः ।
व्यरचयन्नचिरेण परश्शताः[20] शतमखं तमखण्डितमर्हितुम् ॥
॥४७॥

स निजगाद निजानजनिर्जनो[21] जहित जम्भजितो यजनं जनाः ।
वयममी पशुपालनवृत्तयो गिरिचरा गिरिमेव यजामहे ॥
॥४८॥

शतमखस्य न कस्यचिदीक्षणं तदवनं च कुतः परिशङ्क्यताम् ।
दृगुपनीतमवैत सदन्यथा त्वधिगमं धिगमञ्जुमसङ्गतम् ॥
॥४९॥

भवति यस्य हि यः परिपालकः स्फुटतरं तदुपेक्षणमक्षमम् ।
विहितया हितया विधयानया [22]निगमतोऽगमतो यजतोत्तमाः [23] ॥
॥५०॥

धवलवस्तुविभूषणभूषिता विविधखानसुपानसमन्विताः[24] ।
सुरभिवर्धनमीशनिवेदिता व्रजजना यजनाय समागताः ॥
(चुम्बकम्)
॥५१॥

हरिगिरेति गिरेर्यजनं जना विदधिरे पशुवर्धनसंस्थिताः ।
नतिपरिक्रमवस्तुसमर्पणैः क्व महतामहता[25] न हि शासना ॥
॥५२॥

अथ जगाम रुषं नगपक्षभित् क्षुभितहृत् स मखक्षतिकारिषु ।
परिभवाचरिते क इव प्रभुः परिजनेऽरिजने [26] भवति क्षमी ॥
॥५३॥

---

19. मखो - इति क. पु. पाठः ।
20. परः शताद्यास्ते येषां परा संख्या शतादिकात् । (पु.टि.)
21. अजनिर्जनः-जननशून्य इत्यर्थः (पु.टि)
22. निगमो वाणिजे पुर्यां करे वेदे शिशौ पथे । (पु.टि.)
23 चरतोत्तमाः - इति क. पु. पाठः ।
24. इदं पद्यं केवलं क. पु. लभ्यते ।
25. अहता-अखण्डितेत्यर्थः । (पु.टि.)॥
26. परिजने विजने - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशिषदेष रुषाऽथ पयोमुचः प्रलयकालघटाघटनापटून् ।
हरगणा इव दक्षमखे मदोत्कटतरेऽटत रे पशुपव्रजे ॥
॥५४॥

व्रजमरैषुरिति प्रभुशासनान्निरसनाद् यजनात् पशुजीविनाम् ।
अवसितौ जगतामतिदारुणाः परिणता इव पापगणा घनाः ॥
॥५५॥

ववृषुरेषु महारयधारया बहलया प्रलयाय वपुष्मताम् ।
उरुतरस्तनिताः स्तनयित्नवः सकरकं करकम्पकरं पयः ॥
॥५६॥

अशनिपातपराहतचेतनं स्तनितभीषितबालवधूजनम्[27] ।
घनचये घनवर्षिणि गोकुलं सकलमेव बभूव समाकुलम् ॥
॥५७॥

क्व जननी क्व पिता क्व शिशुः[28]प्रियेत्यनधिगम्य तमोपहतेन्द्रियाः ।
जलदजालकरालमकालजं प्रलयकालममंसत मानवाः ॥
॥५८॥

व्रजजनाः करुणाकलनादिनः[29] प्रबलवृष्टिवशादवसादिनः ।
शिशिरचण्डसमीरसमीरणादशरणाः[30] शरणाय हरिं ययुः ॥
॥५९॥

उत्खाय[31] भूमितलतः स्वमिवातपत्रम्
त्राणाय सत्वरितमुत्त्रसतां जनानाम् ।
एकेन पाणिकमलेन दिनानि सप्त
गोवर्धनं गिरिवरं गगने दधार ॥
॥६०॥

वर्षत्रसद्व्रजनिवासिजनावनाय
छत्रीकृतेन गिरिणा हरिणा हठेन ।
सा वारितव्यवसितिः प्रतिकृत्ययैव
कृत्या[32] जगाम जलदावलिरिन्द्रमेव ॥
॥६१॥

---

27. स्तनितभीषितबारवधूजनम् - इति क.पु. पाठः ।
28. क्व शिशुः प्रभुः प्रिया - इतिरुपेण प्रभुरिति अधिकः क.पु. पाठः ।
29. करुणाक्वणनादिनः इति क.पु. पाठः ।
30. शीतेन चण्डो दुस्सहो यः समीरस्तस्य समीरणात् प्रजहनात् । (पु.टि.)
31 उत्पूर्वात् खनु अवदारणे धातोर्ल्यपि । पु.टि.)
32. कृत्या - अभिचारप्रयोज्या तमोमयी काचन शक्तिः । (टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति विरमिते[33] धारासारे घने घनमण्डले
गतवति गिरौ गाढं गोवर्धने धरणौ धृते ।
अज इव जगत् सम्वर्तान्ते[34] नितान्तमनोहरम्
व्रजमपि जनावासं देवः पुनरेव स निर्ममे ॥
॥६२॥

पिता यस्यान्वीक्षाम्बुधिवहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽतिभव्येऽ –
गमत् सर्गो दुर्गात्मजमुखगतामेष संख्यां दधानः ॥
॥६३॥

☆☆☆☆☆

33. विरमिते - निवृत्ते इत्यर्थः । (पु.टि.)
34. सम्वर्तान्ते - कल्पान्त इत्यर्थः । (पु.टि.) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तमसर्गः

तन्निशम्य मुरवैरिणो बलं विस्मयस्तिमितलोचनावलिः ।
सायमानतसरोजकाननं निश्चलं सर इवास वासवः ॥
॥१॥
स्वापराधपरिमार्जनोन्मुखः पुरुषं परमपारपौरुषः ।
मर्त्यमेत्य धृतमर्त्यविग्रहं संनुनाव तममर्त्यनायकः ॥
॥२॥
नूनमादिपुरुषोऽसि तन्मया चेतसाऽवधृतमक्षिभिः शतैः ।
मानुषं वपुरमानुषी क्रिया यस्य ते न सुशका सुरासुरैः ॥
॥३॥
नैतदस्ति मम विस्मयावहं यत्करेण गिरिधारणं तव ।
यत्तनौ तनुरुहावलम्बनादुल्लुठन्ति[1] जगदण्डकोटयः ॥
॥४॥
नन्दकद्वितयमेव मन्महे स्नेहसद्म तव पद्मलोचन ।
एकतो दनुजनाशकृत् करे सेवकस्तु सनकादिरन्यतः ॥
॥५॥
देव दुःखमपि मे सुखावहं यत्र नाम भवतामुदीर्यते ।
स्वर्गसम्पदपि कम्पकारिका हारिका भवति या तव स्मृतेः ॥
॥६॥
कः स्तवस्तव सरस्वतीपतेर्माधवस्य न किमस्ति वस्तु वा ।
पूज्यसे परिजनैरिव प्रभुः केवलं तदपि भक्तिभावितैः ॥
॥७॥
यत्कृतं [2]कदनमद्य गोकुले तन्मम क्षमसुपेक्षितुं प्रभो ।
पुत्रपादपतनं तनौ पितुः प्रीतये न कुपिताय [3]कर्हिचित् ॥
॥८॥

---

1. -दाल्लुठन्ति - इति ग.पु. पाठः ।
2. कदनं कन्दपापयोरित्यमरः । (पु.टि.)
3. कुत्रचित् - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वाधिकारमदतोऽनुजीविनां मन्युरापतति हि प्रभुष्वपि ।
स्नेहशीतलजलेन तं पुनः[4] क्षालयन्ति सपदि क्षमाधनाः ॥
॥९॥
इत्यनादिपुरुषं पुरूक्तिभिस्तं विनुत्य मघवाऽघवानिव[5] ।
सप्रमोदमनुमोदितोऽमुना दैवतैस्त्रिदिवमन्वपद्यत ॥
॥१०॥
स क्रमादुपनिषण्णयौवनो यौवतस्य हृदयान्यपाहरत् ।
चन्द्रमा इव वलक्षपक्षगो लोचनानि ललितोरुमण्डलः ॥
॥११॥
[6]यौवतेषु परिहासपेशलो राधिकामनुबबन्ध सोऽधिकम् ।
वल्लिवृन्दसुखदे परं मधौ माधवी मधुभरेण मोदते ॥
॥१२॥
हृष्यमाणमनसो दिने दिने कृष्णकेलिगुणकौतुकादिभिः ।
गोपिका विषमबाणधाटिकापातपात्रमभवन्नपत्रपाः ॥
॥१३॥
कापि कान्तकृतहूतिरादराद्[7] गन्तुमन्तिकममुष्य सोद्यमा ।
सद्य एव हरिभावनावशाद् व्यस्तनीविरशकन्न कामिनी ॥
॥१४॥
कापि कर्म्म गृहिणी गृहाङ्गणे कुर्वती खरकरांशुमध्यगा ।
[8]नन्दनन्दनमुखेन्दुचिन्तया [9]पञ्चपावकतपश्चरीकृता ॥
॥१५॥
पृष्टया रहसि[10] गण्डपाण्डुतादूनतादिषु [11]निदानमादरात् ।
मानमौनमनिमित्तमुत्तरं दत्तमेकतमया विलासिनि ॥
॥१६॥

---

4. पुनः प्रायोऽभिधेयवत् । (पु.टि.) ।
5. मघवाद्घराडिव- इति क. पु. पाठः ।
6 युवतीनां ये समूहास्तेषु । (पु.टि.)
7. हूतिराकारणाह्वानमित्यमरः । (पु.टि.)
8. नन्दनो हर्षके सुते, इति मेदिनी । (पु.टि.)
9 पञ्च-इति क.पु. नास्ति ।
10. वहसि - इति क.पु. पाठः ।
11. निदानम् - आदिकारणमित्यर्थः । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्दनन्दनविलोकनेच्छया निर्गताऽपि मदनादनाप्य तम् ।
पुत्रिकेव[12] कतमापि देहलिस्तम्भ एव विललाग नागरी ॥
॥१७॥

कापि हस्तधृतगण्डमण्डलाऽऽखण्डलानुजविलासलालसैः ।
पातिता महति मोहसागरे जागरेण रजनीमयापयत् ॥
॥१८॥

कापि कृष्णविरहोपतापिनी दुस्सहे दहनभासि भास्वति ।
निर्ववौ वदनकौमुदीमिलत्सोमकान्तमणिहारवारिभिः ॥
॥१९॥

काचिदाचितमनोजसंज्वरस्वान्तचिन्तितमुकुन्दसङ्गमा ।
उत्थितैः सपदि भावसञ्चयैराररराम[13] रमणेन रागिणी ॥
॥२०॥

[14]काचिद्रामा धरण्यां धरणिधरधराधीशधाराधराभम्
स्मारं स्मारं स्मराग्निप्रतपितहृदया जातकम्पा पपात ।
कृत्वा हाहेत्यधावद् हर हर हर हा हार हाहे हरेऽन्याऽ-
न्यान्या वक्तुं न शक्ता यदुपतिमगमद् धावमानाऽथ वक्तुम् ॥
॥२१॥

अद्य यत् कुसुमभारि काननं पद्मिनीदलसमाकुलं सरः ।
वामवृत्तिरमुनाऽध्वना ध्रुवं माधवो न विदधे गतागतम् ॥
॥२२॥

कण्ठलम्बितकदम्बमालिकामण्डनो नयनखेदखण्डनः ।
आगतोऽपि सखि वर्त्मनाऽमुना ह्रीणया हरिरवैक्षि नो मया ॥
॥२३॥

गोकुले कति न सन्ति सुभ्रुवो यासु रज्यति स नन्दनन्दनः ।
राधिका तु सकलाधिका यया राधिकारमण इत्युदीर्यते ॥
॥२४॥

मग्न एव मनसि श्रितः श्रुतौ वाचि बद्ध इव वर्तते सदा ।
लोचनस्य न तथापि गोचरश्चित्रमालि वनमालिचन्द्रमाः ॥
॥२५॥

---

12. पाञ्चालिका पुत्रिका स्यादित्यमरः । पु.टि.)
13. वारवारमणेन रागिणी-इति क.पु. पाठः ।
14. इदं पद्यं केवलं क. पु. लभ्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेपितासि तरले निरन्तरं चक्रिणं किमु सखि व्यलोकय: ।
अह्नुताय च भयाय [15]चेक्षितो मौलिबद्धशिखिपिच्छलाञ्छन: ॥
॥२६॥

खण्डितासि[16] किमु कृष्णभोगिना मोहमेषि बहुशो विषीदसि ।
दृष्ट एव सखि चित्तमोहनो यद्ययं दशति किं विखिद्यते ॥
॥२७॥

यामि नन्दसदनं वदालि मे साधयामि तव किं समीहितम् ।
निर्मलं शुचिरसं रसातले माधवं सखि मदर्थमानये: ॥
॥२८॥

इत्यनन्यमनसां मृगीदृशां गोकुले ववृतिरे मिथ: कथा: ।
कृष्णदृष्टिपरिभूतचेतसां मादनञ्च कदनं दिने दिने ॥
॥२९॥

एवमादिपरिहासकौतुकैरिङ्गितैरवशयन् तमङ्गना: ।
तं प्रमोदयितुमात्मनो गुणैरुत्सुकेव भुवमागता शरद् ॥
॥३०॥

अम्बरे विमलता जलाकरे स्वच्छताऽवनितले विपङ्कता ।
कानने च कमनीयतागुण: श्रीधराय शरदोपहारित:[17] ॥
॥३१॥

तत्र पार्श्वपरिवर्तने हरेर्विश्वपूरवपुषोऽवघट्टनै:[18] ।
चालितानि किमु [19]कृत्यकर्म्मणे दैवतानि सकलान्यजागरु: ॥
॥३२॥

विश्वविस्मयकरं यशोभरं भावभङ्गुरगिरा निराकुला: ।
मोहनिश्चलविहङ्गमारमा: कामुकस्य कलमाविका जगु: ॥
॥३३॥

गीतिहूतफणिरत्नपावकभ्रान्तिपातुकपतङ्गनिर्वृता: ।
आलिपालिषु सुखं सहाभिकै: शालिपालिसृदृशोऽभिरेमिरे ॥
॥३४॥

---

15. अङ्गतापचयया ययेक्षितो - इति पाठान्तरमूह्यम् ।
16. खण्डिता किमसि - इति क.पु. पाठ: ।
17. शरदा समर्पित: - इति क. पु. पाठ: ।
18. विश्वपूरवपुषोऽवघुट्टनै: - इति क.पु. पाठ: ।
19. भृत्यकर्मणे - इति ग. पु. पाठ: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गीतयः कलमगोपिकाननादुत्थिताः शिथिलितान्यसंविदः ।
चातकानमृतवृष्टिशङ्किनोऽनर्तयन्नभसि निर्झरोत्सवान् ॥
॥३५॥
उद्धृतं जलदपङ्कजालतः पङ्कजन्नु शरदा मरीचिभिः ।
क्षालितन्नु घटितन्नु किन्नवं बिम्बमम्बरतले कलावतः ॥
॥३६॥
अम्बरे जलदमाषपेषणादंशुचूर्णचयमुच्चमाचरत् ।
तर्कयामि शरदङ्गनाऽमुना तारकाक्षिवटिका विनिर्ममे ॥
॥३७॥
भ्रम्यमाणमयनद्वयं घनैः श्रीमती शरदपुस्फुटत्तमाम् ।
एकमत्र मनुजन्मनां गतं चाम्बरे परभतः सुपर्वणाम् ॥
॥३८॥
मेघपङ्कपटलीपुटीकृते शेषमौलिशयनं समुज्झतः ।
गाढमुन्मिमिषतुः प्रकाशिनी लोचने रविविधू रमापतेः ॥
॥३९॥
मोदितं कुमुदवृन्दमिन्दुना तैरमोदि मधुपायिसंहतिः ।
तैर्वियोगविधुराः प्रवासिनः प्रौषितैरुपगमेन योषितः ॥
॥४०॥
निर्म्मलेन्दुरभिरामतारका तारकान्तिहसिता [20]सिताम्बरा ।
शारदी विरुरुचे विभावरी [21]मारदीप्तिरसिकेव नागरी ॥
॥४१॥
अम्बुदालिकलुषीकृताः पुनः प्रापिताश्च शरदा प्रसन्नताम् ।
खञ्जरीटनयनान्यपातयन्[22] भर्तरीव गगने दिगङ्गनाः ॥
॥४२॥
आपगाः स्फुरितसैकताम्बरा हंसराजिरसनाः कलस्वनाः ।
स्वं [23] पतिं शुचिरसेन भेजिरे योषितोऽभिनवयौवना इव ॥
॥४३॥

---

20. सिता - इति क. पु. नास्ति ।
21. मारवीतिरसिकेव नागरी - इति ग. पु. पाठः ।
22. खञ्जरीटनयनान्यपाटयन् - इति ग. पु. पाठः ।
23. (क) स्वं पतिम् - पारावारमित्यर्थः । (टि.)
(ख) स्वं समुद्रं पतिम् - इत्याकारतया समुद्रमित्यधिकः क.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईषदुल्लसितलग्नषट्पदं शोणकान्तिमुकुलं मुनिद्रुमे ।
पक्वजम्बुफलखण्डमण्डितं कीरतुण्डमिव तारमाबभौ ॥
॥४४॥

दृशो लोला लीला इव कुतुकिनः कौमुदकृतो:
द्विरेफाः शेफालीवनभुवि निकामं निपतिताः ।
तदुन्मीलत्स्वेदोदकविसरबिन्दुश्रियमितः
पतन्तीवाराला कुसुमततिरासादितवती ॥
॥४५॥

[24]घनोदश्वित्पूर्णे तरुणशरदाभीरसुदृशा
वियत्कुण्डे च्छायापरमथनदण्डेन मथिते ।
कलानाथः स्फीतं नवकनवनीतं समुदितम्
लसत्ताराधारा दधिकणसनाभिः समुदभूत् ॥
॥४६॥

शरज्ज्योत्स्नाजालोज्ज्वलितजगदालोकनकला-
विलासव्यासङ्गो विहितबहुरङ्गो युवतिभिः ।
स्फुरद्रासानन्दो निशि निशि मुकुन्दोऽतिरभसै-
रनङ्गोऽङ्गीवासामुरसि रसकासारमतनोत् ॥
॥४७॥

समन्ताद्राधायाः परिलसति रासे रसमये
कपोले कालिम्नि प्रतिफलति दामोदरतनोः ।
स्मरस्ते केनायं सखि विलिखितो गण्डफलके
सखीनामित्युक्तौ दरहसितमास्यं [25] समनमत् ॥
॥४८॥

भिन्दन् द्यां ककुदेव किन्नु ककुभः कायेन दूरं क्षिपन्
दुष्टोऽरिष्टवृषस्तदैव तरसा विद्रावयन् वल्लरीः ।
श्रीकृष्णेन भृशं निरर्गलवलद्बाह्वर्गलान्तर्गलद्-[26]
घाटामोटितकेन[27] दुर्ग्रहगलग्राहं गृहीत्वा हतः ॥
॥४९॥

---

24. उदश्वित् - तक्रमित्यर्थः । (टि.) ।
25. हरहसितमास्यं समतनोत् - इति क.पु. पाठः ।
26. निरर्गलबलद्बाह्वर्गलाकल्पग - इति क.पु. पाठः ।
27. घाटा - ग्रीवेत्यर्थः । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽतिभव्येऽ -
भवत् पूर्णः शरदृतुगुणैः सप्तमः सर्ग एषः ॥
॥५०॥

☆☆☆☆☆

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टमसर्गः

एकदा गतवति व्रजवासं वल्लभे मनसिकृत्य विलासम् ।
प्राणवत्प्रियतमामथ मेधां राधिका रहसि वाचमुवाच ॥
॥१॥
अम्बुदस्तनितनिर्झरभीमा यामिनी सलिलपातसुषीमा ।
दारुणो दहति पञ्चशरो मामुन्मदं तदनुबन्धि वयोऽपि ॥
॥२॥
प्राणधारणमपारणमेतद् दुस्सहो बलवतामभियोगः ।
नन्दनन्दनमिहानय मुख्यं जीवनौषधमलङ्कुरु सख्यम् ॥
॥३॥
इत्युदीरितमवेत्य वयस्या सा विधेयचतुरा चिरमस्याः ।
चित्तवृत्तिरिव निर्झरलग्ना नन्दनन्दनसमीपमवाप ॥
॥४॥
तत्र तं सुशयितं शयनीये कामदेवसुषमं कमनीये ।
सम्प्रबोध्य शनकैरथ मेधा माधवं मधुरवाणि[1] बभाण ॥
॥५॥
या जगद्विजयकीर्तिपताका जीवनौषधिलता मदनस्य ।
चन्द्रसेनरमणीरमणीया चेतसा वलति सा बहुशस्त्वाम् ॥
॥६॥
कामबाणबहुलीकृतबाधा सानुरञ्जनपरा तव राधा ।
स्वे [2]गृहे गुरुजनेऽप्यपलज्जा साम्प्रतं वसति वासकसज्जा ॥
॥७॥
सुभ्रुवो जयति गर्भकदामग्रन्थिबन्धरुचिरः कचभारः ।
ऊर्ध्वगैर्वदनचन्द्रमयूखैर्ध्वान्तजालमिव पृष्ठपिनद्धम् ॥
॥८॥
कामकेलिविपिने कचभारे[3] सन्निमग्नजनचित्तमृगाणाम् ।
बन्धनाय निहितं वरवध्वाः कालपाश इव राजति वेणी ॥
॥९॥

---

1. मधुरवाणि- इति पदं क्रियाविशेषणम् । (टि.)
2. स्वगृहे - इति क. पु. पाठः ।
3. कचभावे - इति घ. पु. पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भालदेश इह बालमृगाक्ष्या भाति नागजरज:कृतबिन्दु: ।
पूजित: स्मृतिभुवा जनमोहे बन्धुजीवकुसुमेन किमिन्दु: ॥
॥१०॥
यौवनप्रसृमरस्मरलीलाभङ्गिसङ्गिरसवारिधिवृद्धौ ।
लोचने कलयत: किल तस्या मोदमानशफरस्फुरितानि ॥
॥११॥
यौवनाभिनवकान्तिझरेण क्षालितो मुखविधुर्विधुमुख्या: ।
अङ्कपङ्कपटली गलितास्माद् रोमराजिरिति गच्छति वादम् ॥
॥१२॥
कामदेवनृपतेरिव केली हेमशैलयुगली हरिणाक्ष्या: ।
उल्लसत्युरसि यौवनकारो: किञ्चिदेव करशिल्पमुरोजौ ॥
॥१३॥
तत्तनौ मदनदेवनिवासे यौवनेन परिखा यदखानि ।
उद्धृतैरवयवैरिव तस्यास्तुङ्गमारचि वलित्रयदुर्ग्गम् ॥
॥१४॥
ऊरुयुग्मवरकाञ्चनरम्भास्तम्भमौलिमिलितो हरिणाक्ष्या: ।
मन्मथक्षितिपतेरभिषेके रुद्रपीठमिव भाति नितम्ब: ॥
॥१५॥
किङ्किणीक्वणितकैतवतोऽस्या: काकुमाकुलतया विदधान: ।
उन्नतस्तनमहीधरभारापीडनात् किमपलायत मध्य: ॥
॥१६॥
पादशोणसरसीरुहमस्या यावरागपरभागमनोज्ञम् ।
श्रोणिबिम्बगुरुयन्त्रणभाराल्लोहितं वमदिव प्रतिभाति ॥
॥१७॥
[4]शीतरोचिरुचिरद्युतिरम्भाबालपल्लवमृणालमृगीणाम् ।
त्वामयं समवयन् समवायो जायतां जगति नाथसनाथ: ॥
॥१८॥
कोविद: सकलकेलिकलानामाकरोऽसि नवयौवनलक्ष्म्या: ।
तामिमामनुसर स्मरखिन्नां कौमुदी मिलतु शीतकरेण ॥
॥१९॥

---

४. शीतरोचिरचिरद्युति - इति ग.पु. पाठ: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेधयेति भणिते मधुहन्ता राधिकामनुजगाम सकाम: ।
तद्गुणेन वचनेन च दूत्या: प्रेरितो नु पुरतो नु[5] विकृष्ट: ॥
॥२०॥

ध्वान्तमर्चिरपथं पथमन्त: स्वं मिथ: सहचरौ च विदन्तौ ।
तौ मनोरथरथावधिरूढौ गूढमङ्गलमवापतुरस्या: ॥
॥२१॥

मेधया सपदि धौतपदाब्जो राधया मधुरदृष्टिनिदिष्ट: ।
तत्र भोगभवनं वरमस्या रागवानिव भवं स विवेश ॥
॥२२॥

मेदिनीमिलितमौलिरथैनं सा प्रणम्य सहसोज्झितशय्या ।
भाविनी भवनभित्तिसमीपे पुत्रिकेव लिखिता निषसाद ॥
॥२३॥

तां विधृत्य स करे कमनीये सन्निनाय शनकै: शयनीये ।
नागरी निधुवने किल पत्यु: प्राक्करग्रहमपेक्षत एव ॥
॥२४॥

भाषिता न यदभाषत बाला सम्ववार वसनं विधृतौ[6] यत् ।
वल्लभस्य तदभूदतिमानं द्रागनङ्गदहनेन्धनदानम् ॥
॥२५॥

अम्बरं हृतवति प्रियपाणौ पाणिपद्मनिहितोरसिजाया: ।
सुभ्रुवो बहुमिलन्मणिभूषा भावितानन पिधानकमासीत् ॥
॥२६॥

वाससि प्रियतमेन विकृष्टे सार्पिप्पत् करसरोजमुरोजे ।
नूनमर्चितवती शशिमौलिं नित्यसङ्गरतिरङ्गसुखाय ॥
॥२७॥

नीविनिग्रहपरे प्रियपाणौ यन्निजं करमयोजयदेषा ।
युक्तमेव करदानममुष्मिन् नामत: सहजतोऽप्यबलाया: ॥
॥२८॥

सम्मुखे विमुखतामुपजाताऽनुत्तरा किमपि पृच्छति कान्ते ।
मुष्टिरुद्धवसनापि बभूव प्रीतये नववधूरिव तस्य ॥
॥२९॥

---

5. प्रेरितो नु पुरतो ननु कृष्ण: - इति ग.पु. पाठ: ।
6. विहृतौ यत् - इति क. पु. पाठ: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा महीयसि रसे निपतन्ती बाहुबन्धमकरोत् प्रियकण्ठे ।
किन्तु मोहपतिता समकृन्तत् तस्य दन्तवसने दशनेन ॥
॥३०॥
ह्रीधनानि हरति प्रियपाणौ नीविसन्धिमवदाय मृगाक्ष्याः ।
मेखला सहचरी विचकम्पे संरुरोद बहु नूपुरयामी ॥
॥३१॥
बन्धकारिणि हठेन हृदीशे सुभ्रुवो हृदयहारिभिरङ्गैः ।
स्तम्भितं तदनु कम्पितमुच्चैः स्वेदबिन्दुमणयः प्रतिदत्ताः ॥
॥३२॥
कामिनि[7] स्तनतटे करजाङ्कं कण्ठपालिमवगृह्य ददाने ।
सुभ्रुवा विरचितोऽप्यनुवेलं सच्छलो विधिरभून्ननकारः ॥
॥३३॥
मामभेत्यविमुखं मुखचन्द्रं चुम्बति प्रियतमेति गदन्त्या ।
लज्जया सहजया हरिणाक्ष्या ह्रीणयैव सहसा परिजह्रे ॥
॥३४॥
वल्लभेऽतिपरिरम्भिणि गाढं सुभ्रुवो वलितबाहुलतायाः ।
मानसादपससार सलज्जा पीनपीडनभयादिव भीतिः ॥
॥३५॥
लग्नमन्मथमदे मदिराक्ष्या निर्दयस्तनविमर्दनशीले ।
वल्लभे विरचितो बहुवारं साधुसीत्कृतिसुधारसवृष्टिः ॥
॥३६॥
कान्तदन्तदलिते दयिताया वक्त्रचन्द्रमसि वैरिणि हृष्टैः ।
मौलिधूननचलैः किमु चक्रे पुष्पवृष्टिरपि केशतमोभिः ॥
॥३७॥
इत्यनुक्षणविलक्षणलीलालोभयोस्तदुभयो रतिरासीत् ।
सा यथा नवनवोदितरागादुन्मदादपुरुषायत योषा ॥
॥३८॥
खं विलोलति तरङ्गति गङ्गा[8] बंभ्रमीति पुलिनं मिलतीन्दुः ।
पङ्कजं वसति सारसमाला मायिकं किमपि मान्मथमासीत् ॥
॥३९॥

---

7. कामिनीस्तनतटे - इति ग.पु. पाठः ।
8. गाङ्गम् - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्द्वयोर्विहरतोरिति गाढं सा घनागमनिशापि शशाम ।
नो पुनर्मनसि मानसिजीयं नित्यनूतनतमा रतिलिप्सा ॥
॥४०॥

अच्छिनत् तिमिरकासरकण्ठं हेलया वत[9] विभातकिरातः ।
उच्छलद्रुधिरधोरणिलक्ष्मीं चर्क्करीति पुनरर्क्कमरीचिः ॥
॥४१॥

भास्करोऽपि भगवानगराजं राजमानमुदयं समरोहत् ।
कोकयोर्मिलितयोरनुरागै रञ्जितः प्रसृमरैरिव चित्तात् ॥
॥४२॥

कोपारक्त इव व्युदस्य तिमिरस्तोमारिचक्रं हठात्
विश्वस्मिन्नपि विश्रुतं धवलिमाद्वैतं[10] समुद्दीपयन् ।
प्राक्पृथ्वीधरशेषवासरसमासीनो नु राजा रुचाम्
द्रागुन्मोचयति स्म किं कमलिनी कारासु बद्धानलीन् ॥
॥४३॥

प्राची कुङ्कुमपङ्कलेपललितैवाभूदलं रागिणी
[11]किञ्चिन्मुग्धविबुद्धपङ्कजदलस्मेरानना[12] पद्मिनी ।
दृष्ट्वागन्तुकमन्तिके दिनकृतं कान्तं दिवासुन्दरी
सिन्दूरद्युतिपूरमण्डितमुखी दीप्तं दधाराम्बरम् ॥
॥४४॥

इति रजनिविरामं[13] वीक्ष्य रामानुजन्मा
नयनकुमुदचन्द्रश्चन्द्रसेनप्रियायाः ।
अलिरिव कुमुदिन्याः कोषमुत्सृज्य भेजे
निजसदनसरोजं गोपतिप्रीतिदायी ॥
॥४५॥

---

9. रतविभातकिरातः - इति क. पु. पाठः ।
10. धवलिमावर्तम् - इति क.पु. पाठः ।
11. विरुद्ध - इति - क.पु. पाठः ।
12. दरस्मेरानना - इति क. पु. पाठः ।
13. इति रजनिविभातम् - इति क.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽतिभव्येऽ –
भवत् पूर्णस्तूर्णं वसुगणनया कामिनीकेलिसर्गः ॥
॥४६॥

☆☆☆☆☆

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुरागितां दिनकरस्य करे कमनीयतामनलभासि भृशम् ।
ऋतुराजगाम हिमधामरुचावरुचिं जनस्य जनयन् शिशिरः ॥
॥१॥
तुहिनद्युतौ मलिनतां गमिते शमिते सरोरुहवने शिशिरैः ।
रमणीजनस्य रमणीयतया मुखमेव जातमसमेषुहितम् ॥
॥२॥
कमलक्रुधा कमलसन्निभयोस्तुहिनं चकार कदनं करयोः ।
तुहिनाचलस्य तुलयैव द्रुतं[1] स्तनमूष्मलं [2]वरतनोरतनोत् ॥
॥३॥
कुचकुम्भसम्भृतनिदाघचयं हृदयङ्गमं हृदयमात्मविभोः ।
शिशिरेण दून इव सूनशरः शरणीचकार किमरालदृशाम् ॥
॥४॥
ननु हैमनी न रजनी रजनी समया समा भवति किन्नु विधेः ।
इदमूचिरे द्विरुदितेन समा ध्वनिना रथाङ्गमिथुनानि मिथः ॥
॥५॥
विदधे विधुं गहनमप्यदहन् मलिनीचकार नलिनीनिकरम् ।
तुहिनं तथाप्यमदयन्मिथुनं द्रुतमानभङ्गमतसङ्गमनम् ॥
॥६॥
हिममग्निमद्गुणविकारकृतेरिति यैरमायि तदिदं न मृषा ।
उदकेऽपि भूयसि यदापतिते रमति स्म वाष्पमयधूमचयम् ॥
॥७॥
जडताहितः[3] शिशिरदोषचयैस्तदनुप्रमृष्टरविरत्नवरः ।
[4]गुरुशोकशङ्कुभरसङ्कुचितो दिवसोऽवसानमगमत् त्वरया ॥
॥८॥
परिरम्भणं प्रियतमानुमतं वसतिर्महोष्मणि च गर्भगृहे ।
द्वयमेतदेव मदनस्य शराः शिशिराहतानि न सुमानि शराः ॥
॥९॥

---

1. कृतम् - इति ग.पु. पाठः ।
2. स्तनमूष्मणमू - इति ग. पु. पाठः ।
3. जगतोहितः - इति क. पु. पाठः ।
4. उरु - इति ख. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतिशीतभीत इव शीतगुणः खरभानुभानुषु कृशानुधिया ।
अविशत्तथा स दिन एव यथा द्विजराजवन्न विरराजतमाम् ॥
॥१०॥
अतिसङ्कुचत्प्रहरपत्रपुटस्फुटधूमरीमधुकरप्रकरम् ।
मिहिरे हिमेन हिमधाम्नि कृते न विदिद्युते दिवसवारिरुहम् ॥
॥११॥
कलितेऽम्बरे प्रियकरेण शनैः क्षणविक्षरत्तुहिनलेपनया ।
विधृते कलावति कुहेलिकया किमु दीर्घमानमभजद्रजनी ॥
॥१२॥
रविजातकं [5] रजनिजातहरी यदपाहरद्[6] झटिति दीर्घतमा ।
इति शोकवन्ति किमु कोककुलान्यरुदन्नुदारकरुणध्वनिभिः ॥
॥१३॥
सविता सरोजमथरङ्कजनस्त्रिभिरेभिरापि हिमकालवशात् ।
स्फुरितैः सहैव सहसङ्कुचितैः सुहृदौचिती समुदयेऽस्तमये ॥
॥१४॥
मुषितो मुखे बहुकुहेलिकया दिवसोऽवसानदलितो निशया ।
बलवद्विलुण्ठित इव क्षितिपो न तताप मन्दमहसा जडितः ॥
॥१५॥
अथ चक्रुरत्र समये गिरिजायजनव्रतं व्रजसरोजदृशः ।
कमलापतिं मनसिकृत्य पतिं प्रथमानभासि वयसि प्रथमे ॥
॥१६॥
कुसुमं सुगन्धि विमलं कमलं विनिवेद्य खाद्यमपि हृद्यतमम् ।
असभाजयन् मृगकिशोरदृशो नगनन्दिनीं प्रणतिभिः स्तुतिभिः ॥
॥१७॥
अयि देवि देहि मम नन्दसुतं पतिमित्युदीतपुलकोत्कलिकाः[7] ।
मिलिताः प्रदक्षिणपरिक्रमणे बहु वव्रिरे वरमरालदृशः ॥
॥१८॥

---

5. रविजातकैरजनिजातहरी - इति लब्धाः पाठाः । अर्थानुरोधादावश्यकं परिवर्तनं कृतम् ।
6. यदुपाहरत् - इति क. पु. पाठः ।
7. पतिमिन्दूदीतपुलकोत्कलिकाः- इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ ताः कदाचिदचिरोदयिनि द्युमणौ दिनेशतनयामगमन् ।
अजितं विजेतुमतनोस्त्रिजगज्जयशक्तयः[8] किमु धृतव्रतिकाः ॥
॥१९॥

उपकूलमर्पितदुकूलचयं चपलाः परिस्फुरितदेहरुचः ।
अविशन् त्रसन्मृगकिशोरदृशो यमुनाजले जलदजाल इव ॥
॥२०॥

अथ यावदेव विहिताप्लवनास्तटमुत्तरन्ति सलिलादबलाः[9] ।
हरिरेत्य तावदुपहृत्य पटान् तटमारुरोह सपदि प्रियकम् ॥
॥२१॥

वसनापहारविषमव्यसने वनमालिनि व्यवसिते बलतः ।
व्रजनीलनीरजदृशां यमुनाजलवास[10] एव वसनं ववृते ॥
॥२२॥

उपनाभिदघ्नपयसि प्रमदा नमदाननेन्दुरुचयस्त्रपया ।
करुणेन किन्नु सवितुः सुतया लहरीभुजेन परिषस्वजिरे ॥
॥२३॥

हरिणा हठेन हृतचीरचया समुदीक्षितुं न सहनेन्दुमुखीः ।
किमु सङ्कुचत्कमलकैतवतो मलिनीचकार नलिनी नयनम् ॥
॥२४॥

अनुरागभागधिकमत्र[11] हरौ हरिणीदृशां हृदयमेकरसम्[12] ।
अरविन्दवृन्दविरतैरिति किं वदनं सुगन्धि जगृधे मधुपैः ॥
॥२५॥

हृतमम्बरं हरिघनेन कृता [13]रसदृष्टिरप्युरसि वामदृशाम् ।
विचकाशिरे तनुतनूतडितः[14] सपदि त्रपासरिदलं ववृधे ॥
॥२६॥

---

8. त्रिजगद् - इति क. पु. नास्ति ।
9. सलिलादवनात् - इति क. पु. पाठः ।
10. यमुनाजनवास एव- इति क. पु. पाठः ।
11. अनुरागभागधिकसत्वहरौ - इति क. पु. पाठः ।
12. हृदयमेकवशम् - इति क. पु. पाठः ।
13. वशादृष्टि - इति क. पु. पाठः ।
14. तनुतनूतलिनः - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिरकालमुष्णकिरणप्रभवासलिले सलीलशफरीनयना: ।
त्रपया तपस्यभिरता इव तास्तुहिनाभिषङ्गविषमे ववरु: [15] ॥
॥२७॥
अथ शीतजेन युगपत्प्रलयप्रभवेन भावनिवहेन युता: ।
अपि सत्रपा विनयगर्भगिरा कमलापतिं समवदन्नबला: ॥
॥२८॥
अयि नन्दनन्दन विधेहि कृपां कृपणोऽसि किं वसनदानविधौ ।
सुजनाय ते तृणवदुत्सृजतो भुवनत्रयं कियदहो वसनम् ॥
॥२९॥
अबला वयं हिमभरैर्विकला: सकलास्त्वदर्थनियमैकरता: ।
न खलु प्रभु: क्वचन भक्तजने श्वसितावसायि[16] कदनं कुरुते ॥
॥३०॥
हृतमम्बरं यदि तदिष्टतरं तरलं मनो भवति यस्य कृते ।
अधुना हरे वितर नौ वसनं समये यत: सुविहितं विहितम् ॥
॥३१॥
विरतासु तास्विति निगद्य चिरं हरिरूचिवानुचितवर्णपदम् ।
सफलं हि वा विफलमर्थयतां प्रतिवाक्यदानमपि दानसमम् ॥
॥३२॥
अतिशीतवेपिततनूलतिका: कतिकालमत्र सलिले वसत ।
सुदृशो भवत्य इत एत्य निजं निजमम्बरं चपलमाददताम् ॥
॥३३॥
अथ ता मिथो मुखमुदीक्ष्य दरस्मितसुन्दरं हरिणशावदृश: ।
इदमूचिरे हरिघनं[17] मिलितुं तडितो[18] दिव: क्षितिमिवोपगता: ॥
॥३४॥
हृतवानसि प्रथमतो वसनं वसुदेवनन्दन तदेव न सत् ।
तदनु त्रपावसनमत्र हरन् शतपत्रनेत्र किमु न त्रपसे ॥
॥३५॥

---

15. ववलु: - इति ग. पु. पाठ: ।
16. श्वसितावसादि - इति क. पु. पाठ: ।
17. हरिघनं मिलितुं दिव: - इति क. पु. पाठ: ।
18. तलितो दिव: - इति क. पु. पाठ: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयि नन्दनन्दन विधेहि दयां वसनानि देहि जगदेकगतिः ।
अबलाजनेषु न बलाचरितं[19] सति वा नृपे समुचितं भवतः ॥
॥३६॥
स जगाद तास्त्रिजगदेकगतिर्न भयाय[20] मे न च पतिः कुपितः ।
मदुदीरितं रचयत त्वरितं मम नाथता यदि मता सुदृशः ॥
॥३७॥
इति शौरिणा सपदि संलपिते करपल्लवापिहितकामगृहाः ।
हरिमाययुस्तरलदेहलता यमुनाजलाज्जलजमञ्जुदृशः ॥
॥३८॥
हरिभाषितापहृतहृत्कमलाः कमलानना निदधुरत्र[21] करान् ।
मदनस्य मन्दिरमुदारमुदा किमपूजि ताभिरपि तामरसैः ॥
॥३९॥
अथ ताः समीपमुपगत्य हरेर्हरिणार्पितानि हरिणीनयनाः ।
करपल्लवेन पृथुवेपथुनाऽशुचिवच्छुचीनि वसनानि दधुः ॥
॥४०॥
वसनं विनैव सलिलाप्लवनं लवनं व्रतस्य यदतोऽजनि वः ।
तदघापनोदविधये विधिवन्नमतेह यज्ञपुरुषं प्रमदाः ॥
॥४१॥
इति माधवस्य वचसा तरसा चतुरा निपेतुरथ पादतले ।
नवयौवनाः पवनपातनया[22] नमिता लता इव तमालतरोः ॥
॥४२॥
सुदती रतीरिव [23]सुक्ष्मवतीर्दधतीरतीव विनयावनतीः ।
हरिराह तुष्टहृदयो महितः सदयोदयो भवति को न महान् ॥
॥४३॥
तपसापसारितसुखं सुदृशो मदुपासनामकुरुताविरताः ।
नियमेऽत्र यत् किमपि वः कमितं तदवश्यभव्यमिति भावयत ॥
॥४४॥
रतिसौहृदेन समये सभये समया मया सह वनोपवनम् ।

---

19. लवलाचरितम् - इति क. पु. पाठः ।
20. भयायसे. - इति क. पु. पाठः ।
21. अत्र - कामगृह इत्यर्थः । (ग.पु.टि.)
22. पवनचालनया - इति ख. पु. पाठः ।
23. स्वक्ष्मवती - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विहरिष्यथेह सुदृशो [24]बहुशस्त्रिदशेश्वरेण दिवि देव्य इव ॥
॥४५॥
इति शौरिणा सरभसं गदिता हृदि ता निधाय वरमिष्टतमम् ।
अभजन् निजानि भवनानि वनादधिदेवता इव विलासनिधेः ॥
॥४६॥
हृत इव हरिणीदृशामपाङ्गैः सुतनुरुचामितरेतरन्तरङ्गैः[25] ।
स्वयमपि समुपाजगाम धाम सुपदमिवामलधाम[26] वृष्णिवीरः ॥
॥४७॥
पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽति भव्येऽ-
भवत् पूर्णोऽपर्णातिथिगणनया सम्मितः सर्ग एषः ॥
॥४८॥

☆☆☆☆☆

24. बहुलम् - इति ख. पु. पाठः ।
25. सुतनुदृशाम्- इति क. पु. पाठः ।
26. स्वपदमिव - इति ग. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशमसर्गः

पुरा मुरारिः किमु रामदेवदेहे विदेहेन्द्रसुतावियोगैः ।
खिन्नो विनोदाय पुनः स एव जातोऽधुना वृष्णिषु कृष्णदेवः ॥
॥१॥
सुवर्णसीताः परिहृत्य सीतां यस्तेन क्लृप्ताः सवनेषु सख्यः ।
तन्न्यस्तजीवा इव गोपकन्यास्ता एव जाता नरलोकधन्याः ॥
॥२॥
अन्येऽपि ये केचन गोपदाराः कृतावतारा भुवि देव्य एव ।
ताभिर्विहाराय मनो दधार विचित्रचारित्रमयो मुकुन्दः ॥
॥३॥
बीजं मनोजन्ममहीरुहस्य रहस्यलीलाविधिवावदूकः ।
वियोगिनारीनिधने कृतान्तस्ततः प्रवृत्तः समयो वसन्तः ॥
॥४॥
विहर्तुकामो वनदेवताभिरालोकितः काम इवाभिरामः ।
कलिन्दकन्यातटकाननानि समाससाद प्रवरो यदूनाम् ॥
॥५॥
समागतः काननकेलिकामो दामोदरोऽस्मानिति सप्रमोदाः ।
अवाकिरन् किं विगलत्परागसिन्दूरपूरं वनवीरुधोऽपि ॥
॥६॥
रासे विलासे विहितावधानो विलासिनीः स्वं वशमानिनीषुः ।
विन्यस्य वंशीमधरे यदूनां जगौ जगन्मोहनमेकनाथः ॥
॥७॥
समं समासादि हृदा मुकुन्दो दृशा च वृन्दावनमङ्गनानाम् ।
कर्णेन मुग्धो मुरलीनिनादः कायेन कामज्वलनावसादः ॥
॥८॥
निशम्य सानन्दमुकुन्दगानमाकृष्यमाणा इव तद्गुणेन ।
अनावृतस्वीयनिमेषवृन्दा[1] वृन्दावनं वामदृशः प्रयाताः ॥
॥९॥

---

1. अनावृतस्वीयनिषेधवृन्दा - इति ख. पु. पाठः, ग. पु. पाठश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रितं पयः कापि विहाय काचिदाचीयमानं दधिसारमेव ।
अन्या समुत्सृज्य निजप्रसाधामाधाविता माधवसन्निधानम् ॥
॥१०॥
स मण्डले वल्लवनागरीणां गायन् कलं वंशिकया मुकुन्दः ।
सानङ्गरागस्मितमङ्गधारी श्रृङ्गारसारो रस एव जज्ञे ॥
॥११॥
नितम्बिनीमोहनमूलविद्या जीवातुरेको मकरध्वजस्य ।
जनार्ण्णवानन्दनपूर्णचन्द्रो गोविन्दवेणुध्वनिरुल्ललास ॥
॥१२॥
मृगा विमुक्तान्यरसप्रसङ्गा मौनैरवर्तन्त वने विहङ्गाः ।
मुकुन्दगाने जगदेव जाने[2] जातं चिदानन्दसमुद्रमग्नम् ॥
॥१३॥
आनन्दने नन्दकिशोरवंशीनादेऽपि यन्न द्रवतामुपेताः ।
चित्रं हि तत्किं पुनरत्र चित्रं दारूणि वृन्दावनशाखिनस्ते ॥
॥१४॥
भृङ्गस्वनाविष्कृतसाधुनादा गोविन्दगानान्यभिनन्दमानाः ।
व्यालोलयन् मौलिमिव स्वकीयं समीरलोला वनशाखिनोऽपि ॥
॥१५॥
मुकुन्दमेघे मुरलीनिनादैः सुधारसं मुञ्चति चारुमाले [3] ।
हृत्कानने वल्लवनागरीणां श्रृङ्गारशाखी शतपल्लवोऽभूत् ॥
॥१६॥
काचित् कराभ्यामधृतास्यकण्ठमन्यातिधन्याधरसीधुमाधात् ।
प्रौढा परा प्रेमवती कुचाद्रौ कराम्बुजं कोमलमानिनाय ॥
॥१७॥
नवे लतानां कसुमोपरागे परागपिष्टातकवाहिनेव ।
आमन्त्रिता धीरसमीरणेन सुगन्धिनाबन्धुरबन्धुभावाः ॥
॥१८॥
सुगन्धिभिः श्वाससमीरचारैः करप्रवालैः पररागभारिभिः ।
स्मितप्रसूनेन मनोहरेण जेतुं प्रवृत्ता इव बालताली: ॥
॥१९॥

---

2. अहं जाने इति कवेस्तात्पर्यम् । (टि.) ।

3. याचमाने - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विन्यस्य पादौ पथि मन्दमन्दं स्थलारविन्दप्रकरं[4] किरन्त्यः ।
नभोऽन्तराले तरलैरपाङ्गैः कुमुद्वतीकाननमादधानाः ॥
॥२०॥
मुखाम्बुजेन त्रिवलीतरङ्गैः शोभाजलैरुज्वलसिन्धुलीनाः[5] ।
स्मरोत्सवे धातुरनल्पशिल्पशैलावतीर्णा इव शैवलिन्यः ॥
॥२१॥
मुखत्विषा मेदुरया सृजन्त्यो राकानिशानायकलक्ष्मलक्ष्मीम् ।
शृङ्गारसिन्धोरधिदेवता वा हरिप्रिया वा हरिमाप्तुकामाः ॥
॥२२॥
गत्या मतङ्गान् नयनैः कुरङ्गान् गिरा पिकानप्यतिलज्जयन्त्यः ।
विस्मापयन्त्यो जगदङ्गभासा वने विलासानबला वितेनुः ॥
(अन्त्यकुलकम्)
॥२३॥
दृष्ट्वा हरिण्यो हरिणायताक्षीरक्षीणतारुण्यमृगेन्द्रमध्याः ।
विषादभीतिस्मरविस्मयानां वने बभूवुः पदमेकदैव ॥
॥२४॥
वने विहारे वनजेक्षणानां शिखण्डिनस्ताण्डवमारभन्त ।
धम्मिलभारानुभवे ह्रियैव न शेकुरुल्लासयितुं कलापान् ॥
॥२५॥
विलासिनीनां महसां निकाये कायेऽपतिष्यन् न कथं पतङ्गाः ।
निराविलेऽस्मिन् प्रतिबिम्बदानं लतावितानं यदिनाऽभविष्यत् ॥
॥२६॥
कुचौ लिखन्तः कचमामृशन्तः श्रोणीतलादम्बरमाहरन्तः ।
आश्लिष्य शाखाभुजया भुजङ्गास्तदा वधूनां तरवो बभूवुः ॥
॥२७॥
प्रकम्पभाजा सहजालसेन करेण शाखा नमितास्तरूणाम् ।
विहारवाञ्छातिशयादकारि बलाधिकं[6] साहसमङ्गनाभिः ॥
॥२८॥

---

4. स्तनारविन्दप्रकरं किरन्त्यः - इति क. पु.पाठः ।
5 उज्ज्वलसिन्धुनीराः - इति क. पु. पाठः ।
6 वनाधिकम् - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनागनास्वादितपूर्वमेव तदीयमामोदमवाप्य भृङ्गाः ।
विहाय फुल्लस्थलपङ्कजानि[7] व्रजाङ्गनानां वदनानि भेजुः ॥
॥२९॥

भवन्नमूषामथ नाथरूपो भूपो यदूनां धृतकायकोटिः ।
अरीरमत्ता मदनातिमत्ता भोगीव योगी भगवान् वनेषु ॥
॥३०॥

लताः प्रसूनाभरणप्रदानैर्नवप्रवालावलितल्पतानैः ।
प्रियानुपानीय हरिप्रियाणां वनेऽभवन्नर्मसखीसमानाः ॥
॥३१॥

मुखेन साचिस्मितसुन्दरेण करेण काचिद्दरकम्पितेन ।
[8]प्रियाय नीतं कुसुमं सखीनां जग्राह मुग्धा महतादरेण ॥
॥३२॥

एह्येहि वामोरु ममोरुकायमास्थाय[9] कुर्याः कुसुमावचायम् ।
लतासु फुल्लास्विति भर्तृमानममन्यतान्या गरलोपमानम् ॥
॥३३॥

एहि प्रिये पुष्पचयाय पत्याविति ब्रुवाणे चलितां सपत्नीम् ।
विलोक्य तस्थौ चलितापि काचित् साचीकृतेनाननपङ्कजेन ॥
॥३४॥

विलोकयन्त्या दयितं सपत्न्या रजः किरन् कौसुममक्षिपद्मे ।
धीरः समीरः सहसा कयाचिदाश्लेषि सानन्दममानि मित्रम् ॥
॥३५॥

द्वयोः सपत्न्योर्वनकेलिकाले यां प्राहरत् प्राणपतिः प्रसूनैः ।
सा प्रापदङ्गेषु परागरागमन्या दृशोरप्यपरागरागम् ॥
॥३६॥

कान्तेन काचिद् विहता प्रसूनैरसावदूनेव[10] जघान तन्तैः ।
प्रियाः प्रियाणां हि विहारकाले कांक्षन्ति वैयात्यविजृम्भितानि ॥
॥३७॥

---

7. फुल्लस्तनपङ्कजानि - इति क. पु. पाठः ।
8. प्रियोपनीतम् - इति क. पु. पाठः ।
9. समोरुकायमास्ताय- इति घ.पु. पाठः ।
10 रसावधूतेव जघान दन्तैः - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्या सपत्नीजनसन्निधाने पौष्पेऽङ्गना दामनि दीयमाने ।
घनानुरागस्मितसुन्दरेण मोदं समावेदयदाननेन ॥
॥३८॥

प्रियेण विन्यस्तपलाशमालमूरो मृगाक्ष्याः स्रुतघर्म्मवारि ।
तस्यानुबिम्बात् सपदि प्रभूतमन्तर्गतं रागमिवोज्जगार ॥
॥३९॥

प्रिये सपत्नीजनकुन्तलेषु[11] प्रफुल्लपुष्पस्तवकं दधाने ।
दृगन्तकान्त्या हृदयस्य हारं चकार काचित् कुरुविन्दसारम् ॥
॥४०॥

कामी जनः कश्चन कैतवेन मनस्विनीमानमपानिनीषुः ।
भुजङ्गमाभोगमहाविशालां तस्याः शिरस्याधित पुष्पमालाम् ॥
॥४१॥

अस्यूतचित्राधिकचारुमालानिर्म्माणकर्म्मादद्भुतर्शनेन ।
कुञ्जे कलावानपि कोपनायाः कोपं घनाटोपमपाचकार ॥
॥४२॥

सखीसमक्षं सुमुखी निशम्य कुञ्जे कपोतीकलकूजितानि ।
प्रियं समामन्त्रयदिङ्गितेन क्व धीरता वैरिणि पञ्चबाणे ॥
॥४३॥

ह्रिया सखीनां सह वल्लभेन रन्तुं प्रयाता अपि कुञ्जकोषे ।
स्वदेहदीप्त्या दलितान्धकारा दारा[12] विहाराय न सम्बभूवुः ॥
॥४४॥

सखीषु विस्मेरमुखीषु दूरे दुकूलहारे दयिते हठेन ।
कुञ्जे घनस्फीतपलाशपुञ्जे वासो[13] हि वासोऽभवदङ्गनायाः ॥
॥४५॥

अशोककुञ्जे कुतुकेन लीनां हठादलीनां कलनादहृद्ये ।
नवोदिताभिः कलिकाभिरस्या विलासिनीमन्वमिनोद् विलासी ॥
॥४६॥

---

11. प्रिये सपत्नीजनकुण्डलेषु - इति क.पु.पाठः, ख.पु. पाठश्च ।
12. दावाविहाराय- इति क. पु. पाठः ।
13. बासो हि रासो. - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदञ्चिते पुष्पचयावचाये पाणौ तया[14] निष्पतदुत्तरीये ।
निकुञ्जगेहान्तरगो निगूढं वोढा नवोढाकुचमाममर्श ॥
॥४७॥
प्रिये ददत्यादरदृष्टिपातं जम्बीरयुग्मे करजाभिघातम् ।
सघर्म्मपूरस्रुतिराचकम्पे शम्पेव[15] कायः कमलायताक्ष्याः ॥
॥४८॥
महीयसा वैरिवधूसमक्षं स्नेहेन देहे दयितार्पितानि ।
जहौ न तत्सङ्गतभृङ्गदंशदूनापि सूनाभरणानि[16] काचित् ॥
॥४९॥
तदेव मे नूनमनूनशोभं समर्पयेति प्रियमर्थयित्वा ।
मिषाल्लतासद्मनि रन्तुकामा[17] विवेश रामा रमणेन काचित् ॥
॥५०॥
वने विलासव्यसनेन बाला पतन्मुखामोदपिकालिमाला ।
भृतिं भयापायकृतः समानं चकार भर्तुः परिरम्भदानम् ॥
॥५१॥
महीरुहो मौलिविलम्बि सूनं विलासदूनं पतिमर्थयन्तीम् ।
आश्लिष्य गाढं पुलकाचिताङ्गीं चकर्ष पाणौ हसितां नताङ्गीम् ॥
॥५२॥
केलिं निकुञ्जे कलयन्त्यपूर्व विहङ्गमानां विरुतं निशम्य ।
भयेन भर्तुः पुनरङ्क[18] एव राकानिशानाथमुखी निलिल्ये ॥
॥५३॥
समं सखीभिः कुसुमावचाये काये क्षते काननकण्टकेन ।
समन्थरं[19] भर्तृसुखावहानि चकार नारी भयसीत्कृतानि ॥
॥५४॥

---

14. तदा- इति क. पु. पाठः ।
15. सम्पेव - इति ख. पु. पाठः ।
16. सूनाभरणा कदाचित् - इति क. पु. पाठः ।
17. वर्णकामा - इति घ. पु. पाठः ।
18. पुनरङ्ग एव - इति क. पु. पाठः ।
19. ससम्भ्रमम् - इति ख. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति प्रहृष्टाः स्मरकेलिजुष्टाः साकं मुकुन्देन भृशं ननन्दुः ।
वृन्दावने नन्दनसन्निकाशे ते देवदारा इव गोपदाराः ॥
॥५५॥

अथ गुणजितगोपदारवृन्दां रहसि विधृत्य करेण गोपवृन्दाम् ।
ऋतुविहितवनश्रियं[20] तदानीमकथयदेष विभुर्नराभिमानी [21] ॥
॥५६॥

पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽतिभव्ये
गतो दिक्संख्याको रसिकहृदयोल्लासकः सर्ग एषः ॥
॥५७॥

☆☆☆☆☆

20. अनुविहितवनश्रियम् - इति क. पु. पाठः ।
21 विभुर्नवाभिमानी - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकादशसर्गः

प्रिये पश्य प्रातस्तनवनजपत्रच्युतिदृशा
वसन्तस्य क्रीडाभवनमिव वृन्दावनमदः ।
अमी रत्नस्तम्भावलय इव राजन्त्यभिनव-
च्छदच्छन्ने यस्मिन् सकुसुमसमूहाः क्षितिरुहाः[1] ॥
॥१॥

उदञ्चद्रोमाणो मुकुलपटलैः पल्लवकरम्
सखेलं बिभ्राणाः कुसुमितलतामण्डपगताः ।
भृशं भृङ्गश्रेणीसरसरसितै रासरभसम्
रसालाः सालापा वयमिव[2] किमेते विदधते ॥
॥२॥

पुरः प्रादुर्भूता मधुसहचरस्यैव जगती-
जिगीषोः पञ्चेषोः पिकनिकरवैतालिकगिरः ।
पुषन्तो दृश्यन्ते शुभदमपि शङ्खध्वनिममी
समुन्मीलन्मल्लीमुकुलमिलदास्या मधुकराः ॥
॥३॥

मधुः कन्यादाता परिलसति गाता परभृतः
पुरोधाः पञ्चेषुः सुरभिरभितो धावति मरुत् ।
द्विरेफाः कुर्वाणा इव मधुकरीभिः परिणयम्
भ्रमन्ति प्रत्यञ्चः[3] कुसुमितपलाशालिशिखिनः ॥
॥४॥

पुरस्तात् पान्थानामलिपटलधूमं कलयताम्
पलाशानां पुष्पेष्वजनिषत धूमध्वजधियः ।
अथ क्लान्ताः स्वान्तस्तलदहनसामर्थ्यकलनात्
अमूषां याथार्थ्यं शिव शिव [4]दृढीकुर्वत इमे ॥
॥५॥

---

1. क्षितिरुहः - इति ग. पु. पाठः ।
2. रयमिव - इति क.पु. पाठः ।
3. सर्वदिक्षु इति तात्पर्यम् । (ग.पु.टि.)
4 दृढी - इति क.पु.नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लवङ्गीमालिङ्गत्युपचरति यूथीमवितथम्
गतायातैरुल्लासयति लवलीवल्लिमबलाम् ।
चिरं चुम्बत्येलां मलयवनवेलासहचरः
समीरो दाक्षिण्यं प्रकटयति कामीव कुतुकैः ॥
॥६॥

रसालानां शाखावलिषु वलितानामभिनवम्
दलानां प्रत्यन्तर्मुकुलकुलमालोक्य[5] मुदिता ।
भ्रमन्ती गायन्ती सह मधुकरीभिः सुमधुरम्
पिकी [6]लम्पाकीव प्रतिविपिनमेषा विहरति ॥
॥७॥

निरानन्दः कुन्दे विकसदरविन्देऽपि विमुखो
न वासन्तीवासे रसवति विलासे न वलते ।
लतास्तास्ता हित्वा बहु विहरति त्वामहमिव
स्थिरप्रेमा भृङ्गो लवमिह लवङ्गीमुपगतः ॥
॥८॥

परागैरासङ्गादिह विदधते धूम्रतनवो
निवासं रासानां कुसुमनिकुरम्बे मधुकराः ।
वियोगिव्यापादे फणिमुखशरैः पुष्पधनुषा
रुषा किं विन्यस्ता गरलगुटिका मोहघटिकाः ॥
॥९॥

मरन्दप्रस्वेदा विपुलमुकुलाकारपुलका
नकारं कुर्वाणा मधुकरवधूमन्दरसितैः ।
परीरब्धा गाढं तरुतरुणकान्तेन तरुणी
त्रसन्ती वासन्ती[7] किसलयकरं कम्पयति किम् ॥
॥१०॥

चलन्मन्दं मन्दं हरति सुमनःसौरभमसा -
वितिक्रोधावेशात्[8] पवनमवरोद्धुं व्यवसितः ।

---

5. मुकुलकुलमाला समुदिता - इति क. पु. पाठः ।
6. लम्पाकीव - लम्पटा नारीवेत्यर्थः । (ग.पु.टि.)
7. वासन्ती - इति क.पु.नास्ति ।
8. क्रोधावेगात् - इति क.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिभ्राम्यद्भृङ्गावलिवलयदम्भेन विपिने
वितेने पाशालीरिव विपिनपाली [१]मधुकृतुः ॥
॥११॥

निरुद्धाः पन्थानः कुसुमशरपाटच्चरशरै-
रवस्थानं स्थाने विघटयति पाटीरपवनः ।
स्फुरन्नाके राकारजनिपतिराकारदहनः
कथङ्कारं पारं पथिकजनता यातु सुरभेः ॥
॥१२॥

मरुन्मन्दं मन्दं वहति मतिवन्मन्थरमतेः
शशी दीव्यत्युच्चैरुपचित इव क्षोणितिलकः ।
ह्रसन्ते रोगार्ता इव रजनयश्चानुदिवसम्
वशं कामस्याप्ता रतय इव सर्वा युवतयः ॥
॥१३॥

दिवि च्छत्रं चक्रभ्रमणमनिलः पुष्परजसाम्
इमाः स्फाराः धाराः कनकमयदण्डद्युतिभृतः ।
स्फुरद्भानोर्बिम्बं मणिमुकुटतामञ्चति मधोः
तमौचित्या सत्यापय ऋतुषु राजानमबले ॥
॥१४॥

पथि क्लान्ताः कान्तापरिहरणपापेन पथिकाः
सुखाय प्रोदञ्चद्दलकुसुमितं काननमिताः ।
अथामी निर्यातास्त्वरितमुदयत्कोकिलकुहू-
बहूभूतैर्भृङ्गध्वनिभिरसिपत्रादिव ततः ॥
॥१५॥

सति श्लाघ्ये माध्ये रसवति रसाले विकसिते
वसन्त्यां वासन्त्यामुदयिनि मधूके मधुमये ।
सरङ्गो भृङ्गोऽयं रुदति किल दास्यामनुगतः
गुणग्राही प्रायो न पदमपदं वा गणयति ॥
॥१६॥

परीरब्धे कान्ते रसवति वसन्ते विमलया
नभोलक्ष्म्या दिव्यद्विधुवदनतारातिलकया ।

१. विपिनपाणी - इति ग. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतः कोपाटोपादिव नवदलोत्कम्पितकरा[10]
वनश्रेणी शोणं कुरुवकमिषादक्षि कुरुते ॥
॥१७॥

सशोकोऽशोकोऽयं त्वदधरमयूखेन मलिनैः
प्रसूनैरित्याप्तुं किमु कमपि तद्रागविभवम् ।
मिथः श्लिष्टैरेभिः किसलयकरैरञ्जलिकरो
वरोरु त्वत्पादाभिहतिमभिलष्य स्थित इव ॥
॥१८॥

अशोका एवामूरसुभरभृतोऽशोकलतिकाः
सरङ्गाः सारङ्गैरिति हि गणिका एव गणिकाः ।
परागानां रागादुदयदनुरागा वनभुवो
नवोढावक्षोजद्युतिमपि कदम्बानि दधते ॥
॥१९॥

मधु ग्राहं ग्राहं मधुसमुदितामोदमधिकम्
तया साकं भृङ्ग्या[11] भ्रमर इव विभ्रम्य परितः ।
ब्रुवन्नेवं देवः प्रणयपरिणाहेन महता
मुदा वृन्दां वृन्दावनमखिलमालोकयत सः ॥
॥२०॥

अथ श्रान्ता नाहं पदमपि समर्थाऽस्मि चलने
प्रसीद प्राणेश क्षणमिह निषीद क्षितितले ।
ब्रुवत्यामित्यस्यामतिमृदुघने कुञ्जसदने
हरिर्हेलाकृष्टस्तडिदिव तिरोधानमकरोत् ॥
॥२१॥

हरावन्तर्धानं गतवति निरानन्दहृदया
करभ्रश्यच्चिन्तामणिरिव सचिन्ता चिरमभूत् ।
अथ श्वासं श्वासं मुहुरतिशुचाऽसंयतकचा
मृदुर्मूलच्छिन्ना सपदि कदलीव क्षितिमगात् ॥
॥२२॥

तथाभूतामेतां विरहसमुपेतां विधुमुखीम्
सखी काचित् कृष्णानुसरणसतृष्णा समगमत् ।

---

10. नवदरोत्कम्पितकरा - इति क.पु.पाठः ।

11. भृङ्ग्याम् - इति क.पु.पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुहुर्मोहापन्नामसकृदवसन्नां स्मरशरैः
निषिक्तामम्भोभिर्नवकिसलयैर्वीजितवती ॥
॥२३॥

क्रमेणोपक्रान्तोपचरणविधिव्याकुलतरा
परावृत्तश्वासां नयनसविकासां कथमपि ।
विधायाङ्के पङ्केरुहकिसलयाकीर्णहृदयाम्
उवाचेदं वृन्दामधिवनममन्दा सहचरी ॥
॥२४॥

न दूना दोर्मूलं विगलितदुकूलं कलयसे
न जानीषे मुक्तामपि हृदयतो हारलतिकाम् ।
न धम्मिल्लान् धत्से मुखरुचिमुषः साधु किमहो
यशोदादायादः सखि न इव न त्वामपि जहौ ॥
॥२५॥

न साधूनां व्रीडा खलहसितपीडा न हृदये
वयस्या ग्रस्तास्ते विरहशमनी का न रमणी ।
विदग्धामूर्धन्या सखि धरणिधन्यासि विगुणे
कथं वा सानन्दा सखि भवसि नन्दस्य तनये ॥
॥२६॥

कुरु प्रीतिं पत्यौ विगणय निजं निर्मलकुलम्
स्मरश्रेणीरेणीनयनि पिशुनानां कुवचनाः[12] ।
मुकुन्दे तानन्दे परयुवतिवृन्देऽनुदिवसम्
त्वमद्यापि क्रूरे परिहर सखि प्रश्रयि मनः ॥
॥२७॥

यदाभीरीभीरुस्तरुतलमुपानीय रभसात्
अहासीत्त्वामेकामकलितविवेकाङ्कुशभरः ।
अहो ते धिङ्मोहं सहचरि चिरादस्तु यदि वा
तृणावर्तप्राणप्रहरणपटोरेव कपटम् ॥
॥२८॥

ततस्तोकस्तोकोन्मिषितमतिमन्दाक्षमलिना
निलीना विश्लेषज्वरजलधिमध्ये मधुरिपोः ।

---

12. कुरचनाः - इति क. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीदं जल्पन्ती नयनजलमन्दीकृतमुखी
सखीमूचे वृन्दा विदितगुणवृन्दा युवतिषु ॥
॥२९॥
इतः प्रेमाबन्धः सखि पुरुषसारे मधुरिपौ
खलोक्तिप्राखर्य्यं विषविषमसन्वेति परतः ।
स्मरो धन्वी पृष्ठे कुलचरितमग्रेऽतिविमलम्
मनो मुग्धं मुग्धे मम किमपि कर्तुं न वलते ॥
॥३०॥
ददानो दौर्बल्यं वपुरपि दिहानो जडतया
वितन्वानो दौस्थ्यं शिव शिव दशन् वृश्चिक इव ।
असाध्यो मन्त्राणां किमपरमबाध्यो रसविदाम्
न शक्यो निर्वक्तुं हरिविरहजन्मा परिभवः ॥
॥३१॥
निरोधी निद्राया ऋणमिव समृद्धः प्रतिदिनम्
प्रबोधी पीडानामपरिणतमर्म्मव्रण इव ।
विभिन्दन् प्रत्यङ्गं ज्वर इव निपीतं विषमिव
प्रमाथी[13] पापानां प्रतिनिधिरयं बन्धुविरहः ॥
॥३२॥
विषव्याला माला मलयपवनो दावदहनो
मृणाली पाशाली कुसुमितवनं कालभवनम् ।
क्षतक्षाराकाराः शिशिरघनसारा मम हरे-
र्वियोगे बाधानामजनि खनिरेषा सखि तनुः ॥
॥३३॥
विधिं याचे नत्वा मम सखि शरीराद् विगलितम्
मनो युक्त्वा चन्द्रं विशतु मुखचन्द्रं मधुरिपोः ।
यदासाद्य स्फीतं तदधरमधुप्रीतमधिकम्
सदेतन्मां जन्मान्तरतनुगतामप्यनुसरेत्॥
॥३४॥
भवन्त्यस्मिन् दृष्टे भुवनसुभगालोकनकला-
विलासव्यासङ्गात् तरलहृदया गोपदयिताः ।

---

13. प्रमाथी - मथनशीलः, इत्यर्थः । (ग.पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथं नो गोविन्दे कृतवति रतिं प्रेमचतुरा
वरारोहा मोहादधिवसतु कामाधिजलधिम् ॥
॥३५॥
हरन्तीनां कान्त्या जगदभिभवन्त्याऽक्षिविषयम्
सहस्रं रामाणां[14] रमयति रमावन्दितपदः ।
इदं विद्मस्तथ्यं गुरुगुणगणाकृष्टमिह मे
मनो मुक्त्वानन्दं तदपि हि मुकुन्दं मृगयते ॥
॥३६॥
व्रजस्त्रीणां चेतो मधुरमुरलीनादमधुभिः[15]
समासिञ्चन्नुच्चैः कनकरुचिकौशेयवसनः ।
कदा नः कालिन्दीतटभुवि भवेदक्षिविषयो
विषक्तः श्रृङ्गारे सकलसुखसारे हरिघनः ॥
॥३७॥
सखि स्वान्तं क्लान्तं तदधरसुधापानतृषया
परिक्षीणाः प्राणा रतिरमणबाणाग्निपतनात् ।
भृशं भ्रान्त्वा वृन्दावनभुवमसन्दातिचपलम्
न पश्यामो दासोदरजलधरं किन्नु करवै ॥
॥३८॥
कराले कालेऽस्मिन् मदनशरजालेन पतता
समापन्ने खिन्ने विरहदहने मादृशि जने ।
पुरः प्रेयोभावं गतवति विना दोषमधुना
न वैमुख्यव्रीडा हरिहृदयपीडाञ्जनयति ॥
॥३९॥
अमान्यं कौलीन्यं सहचरि न वृन्दावनमिदम्
परित्यक्ता लज्जा न किसलयशय्यापरिचयः ।
वरं प्राणा यान्तु प्रणयपरिणाहो न च हरौ
खलोक्तिः सोढव्या न पुनरतनुव्याधविहतिः ॥
॥४०॥
परित्यक्ता नीतिः कुलविमलरीतिः परिहृता
कृतावज्ञा पत्यौ गुरुजनगिरो नापि गणिताः ।

---

14. सहस्रं वामानाम् - इति क. पु. पाठः ।
15. मधु - इति ग.पु. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[16]तदंहःसंघानामपगमविधानाय सखि मे
हरिस्नेहस्थाने विरहदहने देहदहनम् ॥
॥४१॥
प्रिये दूरे क्रूरे मलयपवने पङ्कजवने
समन्तादुत्फुल्ले कुसुमशरमल्ले प्रहरति ।
न हि प्राणा यान्ति प्रियसखि विरुद्धे बहुविधे
विधेयव्यत्यासो मयि वत विधेः कोऽयमधुना ॥
॥४२॥
इति विलपन्तीमेतां सम्रं समन्तादुपागता गोप्यः ।
यदुकुलमणिरपि सहसा तासामन्तस्तमस्तिरश्चक्रे ॥
॥४३॥
अथ यदुकुलनाथं नाथमासाद्य सद्यः
विविधवनविलासायासजेन श्रमेण ।
धरणिवलयधन्या गोपकन्यास्तटिन्याः
तपनदुहितुरेतास्तीरमापुः समेताः ॥
॥४४॥
पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्ये ऽतिभव्येऽ -
गमत् सर्गो नैसर्गिकगुणमयो भर्ग्यसंख्यासमेतः ॥
॥४५॥

☆☆☆☆☆

---

16. तदंघःसंघानाम् - इति क.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वादशसर्गः

तदा वधूनां वदनेषू रागं समादधानः स्वकरेण देवः ।
सत्यापयामास निजानुरागं रूढं सरोजेषु सरोजबन्धुः ॥
॥१॥
दृष्ट्वैव हृष्टा वनिता नितान्तं निराविलं वारि कलिन्दजायाः ।
जगाहिरे यत्पुनरेतदासां नैसर्गिकं चापलचेष्टितं तत् ॥
॥२॥
भूषादुकूले विनिधाय कूले पिधाय वक्षः करपल्लवेन ।
विधाय वित्रस्तचमूरुनेत्रे नेत्रे सुनेत्रा विविशुः पयांसि ॥
॥३॥
जवात् सलीलं सलिलं विशन्तीर्विलोकमाना ललना विलज्जाः ।
किमु स्फुरत्फेनकदम्बदम्भाद् विसर्पदम्भा यमुना जहास ॥
॥४॥
वनं विशन्तीर्वनजायताक्षीरालक्ष्य राकारजनीकरास्याः ।
मृणालशैवाललतार्द्धयुक्ताः[1] शोकेन कोकद्वितयेन मुक्ताः ॥
॥५॥
नितम्बिनीनां नयनानुबिम्बान् निरीक्ष्य नीरे शफरीसमूहः ।
समन्ततस्ताननुधावमानो विवर्तनावर्तनकृन्ननर्त ॥
॥६॥
अनाविले वारिणि वीक्षमाणा स्वरोमराजिप्रतिबिम्बितानि ।
भ्रमद्भुजङ्गभ्रमतो नवोढा वोढारमाश्लिष्य चिरं चकम्पे ॥
॥७॥
मुखं मृगाङ्कस्तिलकानि तारा धम्मिल्लभारा निबिडान्धकाराः ।
शोकाय कोकस्य जनी रजन्या सिन्दूरबिन्दू[2] रविरुत्सवाय ॥
॥८॥
जलप्रचारे[3] जलजेक्षणानां कलं चुकूजुः कलहंसमालाः ।
विमुक्तकाञ्चीकलशिञ्जितानि प्रीत्यैव दूरं परिपूरयन्त्यः ॥
॥९॥

---

1. "मृणालशैवाललतार्द्धमुक्ता शोकेन कोकद्वितयेन युक्ताः"-इति क.पु.पाठः ।
2. बिन्दू - इति क.पु. नास्ति ।
3. जलप्रचालैः - इति ख.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विलासिनीनां जलकेलिकाले नितम्बबिम्बः स्थगितस्तटिन्याः ।
पतन् कुचाद्रौ पृथुलः प्रवाहः शशंस सिन्धोरिव सेतुबन्धम् ॥
॥१०॥
पुरावगाहे गिरिणाम्बुराशेरेकैव विष्णोरुदपद्यत श्रीः ।
स्तनावगाहे व्रजनागरीणां को वेद जाताः कति न श्रियोऽस्य ॥
॥११॥
दलैः[4] प्रसूनैरुदकैरुदस्तैराश्लेषदानैश्च तरङ्गहस्तैः ।
चकार भानुप्रभवापि तासामभ्यागतानामुचितोपचारम् ॥
॥१२॥
मन्दाभिलाषा अरविन्दवृन्दे मुखेन्दुमासामभजन्त भृङ्गाः ।
शोभातिरेको हि विवेकनाशे बीजं विशेषेण मलीमसानाम् ॥
॥१३॥
धृता करे भर्तृकरेण रागात् पतन्तमामोदतृषा मुखाब्जे ।
भ्रमच्छलाविष्कृतदूरदीर्घश्वासा निरासालिवरं नतभ्रूः ॥
॥१४॥
लब्ध्वा मुखामोदमुदञ्चितोऽसौ तासामनास्वादितपूर्वमेव ।
मधुव्रतोऽमन्यत बन्धनैकस्थानानि पङ्केरुहकाननानि ॥
(चुम्बकम्)
॥१५॥
जलप्रवाहप्रसरावरोधिपीनस्तनोत्तुङ्गिमदर्शनेन ।
प्रमोदयन्त्यो दयिताक्षिभृङ्गान् ममज्जुरम्बुन्यथ कम्बुकण्ठ्यः ॥
॥१६॥
आमोदिभिः स्निग्धपयोदनीलैस्तस्मिन् निलीनैरिव भक्तियोगात् ।
धम्मिल्लभारैरपि वल्लवीनामद्वैतमाप्तं यमुनाजलौघैः ॥
॥१७॥
व्रजाङ्गनानां चलवीचिमुक्तैश्चिराय मुक्तैरिव गाढबन्धात् ।
अपेततापैः कवरीकलापैर्ननर्ति सावर्तविवर्तनेन ॥
॥१८॥

---

4. दलैः प्रकाण्डैः - इति क.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उवाह [5]रागं सवितुः सुताऽऽसामासाद्य सद्यश्च्युतमङ्गरागम् ।
रूपं विपर्य्येति हि सङ्गदोषात् सचेतनानामपि किं जडानाम् ॥
॥१९॥
निमज्जने नीरजलोचनानामन्तःस्फुरन्निर्मलकेशपाशे ।
शशंस हंसः प्रपतत्प्रवाहे शैवालवन्यामिव शैवलिन्याः ॥
॥२०॥
आश्लेषदानैस्तरुणीजनानां पृथुस्तनाभोगविमर्दनेन ।
तरङ्गसंसूचितरोमहर्षैर्जातं जलानामपि कामिभावैः ॥
॥२१॥
धृत्वाधिकण्ठं कलशं कराभ्यामाहत्य पद्भ्यां सलिलं सलीलाः ।
रसज्ञतां रागिषु दर्शयन्त्य इव व्यगाहन्त विशालनेत्राः ॥
॥२२॥
चिनु प्रिये चारु पुरःस्थितानि मत्कायमासाद्य सरोरुहाणि ।
इति प्रिये जल्पति वक्रितेन मुग्धा मुखेनैव निषेधमूचे ॥
॥२३॥
धवेन दोर्भ्यां विधृता विलग्ने[6] लग्ना भुजाभ्यां स्वयमस्य कण्ठे ।
चिचीषुरित्थं नवनीरजानि नीरं गभीरं युवती जगाम ॥
॥२४॥
काचिद् विलग्ना दयितस्य कण्ठे गभीरनीरं युवती यियासुः ।
पणीचकाराकुलकाकुपूर्वं नवीनपीनस्तनपीडनानि ॥
॥२५॥
परिभ्रमन्ती सलिले सलीला मृणालनालाग्रविघट्टितोरुः ।
प्रियं परीरभ्य चरन्निचोला बभार बाला चपलाविलासम् ॥
॥२६॥
परामृशत्यम्बुजिनीः करेण प्रिये सरोमाञ्चितकम्पिताङ्गी ।
ममज्ज सामज्जकपङ्कशीते जले सलज्जालिजनेषु बाला ॥
॥२७॥
परां परागैरुपरक्तनेत्रामालक्ष्य भर्तारमुदीक्षमाणाम् ।
अमन्यतान्या बहु गन्धवाहं बान्धव्यमव्याहतमाचरन्तम् ॥
॥२८॥

---

5. रागस्तु मात्सर्य्यलोहितादिषु, क्लेशादावनुरागे चेति मेदिनी । (पु.टि.)
6. विलग्नमस्त्रियां मध्ये, इति मेदिनी । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सखीभिरेका जलसेचिकायामपारयन्ती बलतो विजेतुम् ।
विलोक्य भर्तारमपाचकार कपोलपालिश्रमवारिबिन्दून् ॥
॥२९॥
प्रयच्छ मे स्वच्छविपङ्कजातमित्युक्तवत्या दयितः सुदत्या ।
मुखानुबिम्बेऽम्बुनि दत्तपाणिर्विहारयामास[7] विहारिणीन्ताम् ॥
॥३०॥
धृता करे काचन कामुकस्य मिलन्तमास्ये मधुपं निरास ।
करेण कोपादपरापि मित्रं मत्वा तमानर्च्च विलोचनेन ॥
॥३१॥
समं सपत्नीजनदृष्टिपातैः कुतूहलावेशवशेन जातैः ।
आवर्तमानं दयितस्य देहे काचिन्न सेहे शफरीतरङ्गम् ॥
॥३२॥
प्रियेण दत्तं कमलं सपत्न्याः पुरोऽनुरोधेन कुतूहलिन्याः ।
विलोक्य बाला मुहुरादरेण दधार काचित् कुचयोः करेण ॥
॥३३॥
त्वयालि कुत्रेदमलम्भि पद्ममित्यालिभिः सस्मितमुच्यमाना ।
मुखेन मुग्धा मधुरस्मितेन साचीकृतेन प्रतिवाचमूचे ॥
॥३४॥
सामोदमामोदभरं जनानां राजीवमाजीवमिव स्मरस्य ।
प्रीत्या पतिः प्रार्प्पयदङ्गनायै नवोपहारं नवयौवनस्य ॥
॥३५॥
मुखेन्दुभासा मलिनायमानं तत्सङ्कुचत्पङ्कजमादरेण ।
कृत्वा करे प्राणपतिप्रदत्तं स्मित्वा सखीरिन्दुमुखी जगाद ॥
॥३६॥
दिष्ट्या भवत्यो विकचैः सरोजैः स्रजः सृजध्वं रमणाय नीतैः ।
मम त्वयं प्राणपतिः प्रदत्ते स्नेहातिरेकात् कलिकामिहैकाम् ॥
॥३७॥
इति ब्रुवत्या दयितः सुदत्याः समीपमत्यादरतः समेत्य ।
अजिघ्रपत् तत् कमलं करेण पिधाय पूर्णेन्दुसमास्यमस्याः ॥
॥३८॥

---

7. विहासयामास - इति ख.पु.पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्याह च प्राणपतिः प्रतीहि प्रिये जलोत्थं जलमेव पद्मम् ।
भवन्मुखे भास्वति निष्कलङ्के शशाङ्कबुद्ध्या मलिनायते यत् ॥
॥३९॥

अस्यानुबिम्बं तुहिनांशुबिम्बं न येन सेहेऽम्बरदर्पणेऽपि ।
स्थानेऽथवा म्लानिरिहोदियाने[8] तवानने पङ्कजकाननस्य ॥
॥४०॥

जित्वाऽमुना सुन्दरि ते मुखेन सुधाकरोऽनीयत दासभावम् ।
स्फुटं तदाक्षेपिसरोजराजिश्रियं स यत्संक्षिपति क्षपासु ॥
॥४१॥

मुखेन कान्तिर्मुषिता सुधांशो रुचिः कुचाभ्यां कनकाचलस्य ।
मध्यः कथङ्कारमकारणन्ते वरोरु धत्ते वलिवन्धनानि ॥
॥४२॥

विसृज्य रङ्कुं यदि रङ्कुलक्ष्मा सुरज्य मध्यं मुदितोऽभ्युदेति ।
तदा लभेतापि न वा लभेत त्वदास्यहास्यद्युतिमद्वितीयाम् ॥
॥४३॥

इति प्रियोक्तिप्रथितानुरागा नागारिकेतुं परिरभ्य हृष्टा ।
जलान्निवृत्ता जलजायताक्षी समं सखीभिस्तटमाससाद ॥
॥४४॥

अङ्गेषु भूषावसनानि धृत्वा कृत्वा मनः कृष्णमुखारविन्दे ।
लावण्यवन्या इव देहभाजः प्रतस्थिरे स्वानि गृहाणि गोप्यः ॥
॥४५॥

[9]स्मितानि चाश्चर्यमयानि[10] सुन्दरं कटाक्षविक्षेपकृतानि मन्थरम् ।
स खेलया तानि वचांसि योषितामनङ्गरागत्वमबोधि माधवः ॥
॥४६॥

त्रिकेण काञ्ची श्रवणेन भूषा तासां तदासादि हृदापि हारः ।
कचान्धकारैरिति गाढबद्धैरिव स्रवद्वारिमिषादरोदि ॥
॥४७॥

---

8. म्लानिरिहोदयानाम् - इति क.पु.पाठः ।

9. स्मितानीति पद्यं केवलं क.पु. लभ्यते ।

10. स्मितानि चार्य्यमयानि-इति क.पु. पाठः, पाठान्तराभावात्तत्र परिष्कृतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थिता इहैता इति मन्यमाना मुकुन्दमायाशयने शयानाः ।
दृष्ट्यैव तुष्टाः प्रणयाय[11] जुष्टास्ताभ्यो न तासां पतयोऽप्यकुप्यन् ॥
॥४८॥

भृङ्गीसङ्गीतरङ्गीरुचिरशुचिरसोल्लासको रासकेलि-
व्यासङ्गी दूरमङ्गीकृतमदनरतिश्चारुचन्द्राम्बरश्रीः[12]।
इत्थं रागातिरेकात् स्फुरदुरसिरुहोच्छूनगुच्छासुरम्यस्
रेमे रामानुजन्मा सुरभिरिव वलन् वल्लवीवल्लिकासु[13] ॥
॥४९॥

पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णाकाव्ये ऽतिभव्येऽ-
गमत् सर्गो नाम्ना हरिविहरणो माससंख्येयसंख्यः ॥
॥५०॥

☆☆☆☆☆

---

11. प्रणयोपजुष्टाः - इति घ.पु. पाठः ।
12. स्वर्णेऽपि भूरिचन्द्रौ द्वाविति त्रिकाण्डकोषः । (पु.टि.)
13. वल्लवीमल्लिकासु - इति क.पु. पाठः, ख.पु. पाठश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोदशसर्गः

अन्येद्युरात्मकुलजाचरितानुरूपे
तक्रस्य विक्रयणकर्मणि दत्तचित्ताः ।
पारं प्रयातुमगमन्नहिमांशुकन्याम्
आभीरनीरजदृशोऽतिगभीरनीराम् ॥
॥१॥

उद्गत्त्वरीः कचरुचः परिवीक्ष्य तासाम्
त्रासाद्द्रुतं विगलितस्य सुधाकरस्य ।
पीयूषपिण्डमिव किं नवनीतखण्डम्
तक्रं पयोऽतिरभसादवशा गृहीत्वा ॥
॥२॥

राधा जगत्त्रयजनीशिरसां प्रसाधा
मेधा मनोजरभसोल्लसिते सुमेधा ।
आमोदिनी[1] च मुदिता मुदितायताक्षी
क्रीडाकलासु कुशला कमलाभिधाना ॥
॥३॥

लोला कुचाचलचमत्कृतचारुचोला
चन्वन्नितम्बतलभा[2] अपि चञ्चलाख्या ।
नाम्ना स्वभावविमला विमलाभिरामा[3]
रामा रमाप्रतिकृतिर्विरमा दशैताः ॥
॥४॥

ताः पुष्पिताः स्मितरुचा फलिताः कुचाभ्याम्
[4]अङ्गप्रकाण्डरुचिमण्डलसालबालाः ।
प्लुष्टस्य[5] शङ्करभयङ्करदृष्टिपातैः
जीवातुजङ्गमलता इव मन्मथस्य ॥
॥५॥

---

1. आमोदनी च मदिरा - इति क.पु. पाठः ।
2. चन्वत्तडिन्नियुतभा इति क.पु. पाठः, घ. पु. पाठश्च ।
3. विमला - इति क.पु. नास्ति ।
4. प्रकाण्डं न स्त्री विटपे मूलशाखान्तरे तरोः । (पु.टि.)
5. प्लुष दाहे, इति । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्णोल्लसत्कनककुण्डलचारुचक्र-
भ्रूचापसञ्चरदपाङ्गतरङ्गबाणैः ।
वेणीकृपाणलतया गजराजगत्या
जेतुं जगन्ति चलिता इव कामसेनाः ॥
॥६॥
लावण्यजालजलधेरिव मथ्यमानात्
कामेन कामिजनमानसमन्दरेण ।
भ्रूरङ्कुलक्ष्मललितं वचनामृतेन
प्रागुद्गतं वदनचन्द्रमुदाहरन्त्यः ॥
॥७॥
श्रोणीपथाङ्गविलसद्रसनाकलाप-
मञ्जीरमञ्जुकरकङ्कणशिञ्जितेन ।
चेतोभुवो निखिलदिग्विजयप्रयाणे
जाने शुभानिव[6] वरानुपदर्शयन्त्यः ॥
॥८॥
प्रत्यङ्गसङ्गतगुणैः परिरभ्य[7] गाढम्
द्रागक्षिपक्षिनिवहानवलोककानाम् ।
लावण्यलोभरभसोल्लसितानुपेतान्[8]
उत्कण्ठया बहुलया[9] वशतान्नयन्त्यः ॥
॥९॥
पीनस्तनद्वितयतुङ्गिमसन्निवेशात्
उत्तुङ्गितानि वसनानि हृदा वसानाः ।
कामस्य बन्धुवयसा जगतीजिजीषोः
यात्रासु कर्प्पटगृहाणि किमर्प्पितानि ॥
॥१०॥
पद्माभिरामवदनाः स्फुरदञ्जनाक्ष्यो
रम्भोरवो रतिमयं हृदयं दधानाः ।

---

6. शुभानिव रवान् - इति क.पु. पाठः ।
7. परिलक्ष्य - इति क.पु. पाठः ।
8. लावण्यलोभ - इति क.पु. पाठः ।
9. बहलया - इति क.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एका अपि स्फुटमनेकसुराङ्गनानाम्
संसारसागर इव प्रतिबिम्बरूपा: ॥
(एकादशभिरादिकुलकम्)
॥११॥

तुङ्गत्तरङ्गचयचङ्क्रमरुग्णतीराम्
सावर्तनर्तनविवर्तिगभीरनीराम् ।
दृष्ट्वैव भानुतनयां यमदैवतस्य
ता मेनिरे भयभृतो भगिनीं यथार्थाम् ॥
॥१२॥

उक्त्वा गुरूनुपगता गृहतो हताशा:
पारप्रयाणमनुपायमथाकलय्य ।
बाला विशुष्कलपनास्तपनात्मजाया:
तीरे चिराय सकला[10] विकला निषेदु: ॥
॥१३॥

अत्रान्तरे तदिति भूरिविषादभाजाम्
अभ्यर्च्चनीयमहिमा जगतीविराजाम् ।
नावा नवाम्बुदनिभ: सलिले विलासी
तासामसाधुदमनो हरिराविरासीत् ॥
॥१४॥

दृष्ट्वा प्रहृष्टमनसो व्रजनायिकास्ता:
कृष्णं गभीरमिव नीरधरं समस्ता: ।
ऊचु: कलस्वरमयं कमनीयकण्ठ्य:
कामं वनान्तरणिता[11] इव नीलकण्ठ्य: ॥
॥१५॥

उद्वेगचौरहृतजीवनवित्तदाता
चिन्तामणिस्त्वमसि लोचनगोचरो न: ।
दिष्ट्या[12] हरे हरिणशावदृशामिदानीम्
नूनं विनोदय दयोदयदूनमन्त: ॥
॥१६॥

---

10. विकला - इति क.पु. नास्ति ।
11. कामं वनान्तवलिता इव - इति क.पु. पाठ: ।
12. दृष्ट्या हरे । - इति घ.पु. पाठ: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीने जने सकरुणोऽसि गुणाकरोऽसि
लोकातिगप्रथितपौरुषभूषणोऽसि ।
श्रीनन्दनन्दन कलिन्दसुताप्रवाह-
पारं प्रणीय कुरु नः परिपूर्णकामाः ॥
॥१७॥

प्रत्याह ताः प्रहसिताननपुण्डरीको
देवो दयानिधिरिदं सुदतीर्वदन्तीः ।
दन्तावलीधवलकान्तिपरम्पराभि -
राभिन्नकालिममलानि जलानि कुर्वन् ॥
॥१८॥

तुङ्गस्तनीस्तरुणतामरसाभिराम-
नेत्रा विचित्रमदयौवनभारभाजः ।
जीर्णा तरिस्तरणिजाऽतिविदूरपारा
पारं कथं वत नयामि नितम्बिनीर्वः ॥
॥१९॥

गोप्यः सुखं निजगृहान् प्रतियात यूयम्
अस्मद्गिरालमनुभूत पराभवं मा ।
सम्भाविताय गमनं न कदापि धीमान्
कर्म्मारभेत पुनरल्पफलं विशिष्य ॥
॥२०॥

अस्त्येव पारगमने यदि वा समीहा
युष्माकमत्र शतपत्रसमाननेत्राः ।
स्वं स्वं करं ददतु मह्यमनन्तरं वः
सन्तारयामि यमुनाममुना क्षणेन ॥
॥२१॥

गोप्यस्ततो जगदिरे जगदेकनाथम्
नाथन्ति[13] यं त्रिदशनाथमुखाः सुखानि ।
अन्यायवृत्तिनिरतेऽपि निजाधिनाथे
मुञ्चन्ति वाचमुचितां न कदापि धीराः ॥
॥२२॥

---

13. नात्यृ याञ्चायाम् इति । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तक्रे करः क्षितिभुजो न कदापि दृष्टो
नापि श्रुतो न च सतामनुपालनीयः ।
तत्रापि चेत् पुरुषसार तवेह तृष्णा
कृष्णावतंसमदनैरसि मा भवाङ्ः ॥

॥२३॥

त्राता वयं भगवता[14] भवताम्बुपातात्
छत्रीकृतेन गिरिणा मृदुपाणिपद्मे ।
विस्मृत्य तद्वद बलादबलाः किमित्थम्
व्यर्थं कदर्थयसि कृष्ण करग्रहाय ॥

॥२४॥

हारं हृदो हरसि कर्षसि मौलिरत्नम्
यत्नं करोषि कुचकञ्चुकमोचनाय ।
व्यक्तं वद प्रकृतिसुन्दर नन्दसूनो
पाटच्चरोऽसि चरतां किमु कामुकोऽसि ॥

॥२५॥

तक्रस्य विक्रयकृतः कति वा न वारान्
कुर्म्मो गतागतमनेन किलायनेन ।
सत्यं प्रतीहि पुरुषोत्तम दत्तपूर्वम्
उर्वीपतौ न पणमल्पमपि स्मरामः ॥

॥२६॥

आरभ्यतेऽभिनव एव यदि त्वयाऽयम्
पन्थास्तदा न किल नः पुनरेष पन्थाः ।
व्यर्थं प्रयाति विरतिं सकलोऽपि यामो[15]
यामो गृहानिति हि सुन्दरमत्र विघ्नः ॥

॥२७॥

जाने यमादपि जनो विजहाति भीतिम्
आख्याति यस्तव मनागपि नामधेयम् ।

---

14. उत्पत्तिं प्रलयं चैव, भूतानामगतिं गतिम् ।
वेत्ति विद्यामविद्यां यः स वाच्यो भगवानिति ॥ (पु.टि.)

15. प्रवृत्तौ परतश्चैव वृत्तौ हि स्वत एव च ।
नित्यप्रवृत्तः सामीप्याद् वर्तमानश्चतुर्विधः ॥ (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्माकमाकलितयुष्मदुपाश्रयाणाम्
धिग्दैवमर्कतनयैव यदन्तरायः ॥
॥२८॥

आपत्पयोधितरणे तरणिस्तवाङ्घ्रिः
बाहू विलोलकठिनौ तव केनिपातौ [16] ।
एकः सतां त्वमसि केशव कर्णधारो
भारोऽत्र वा भवतु को भवति स्थितेनः ॥
॥२९॥

आकर्ण्य तत् प्रणिजगाद[17] गदाधरस्ताः
व्यस्तास्तदा भजत नावमरालनेत्राः ।
एषा भरं गुरुतरं न मृदुर्विसोढा
वोढारमल्पकवया इव नूतनोढा ॥
॥३०॥

स्मित्वा मिथस्तदनुवीक्षितवक्त्रपद्माः
पद्मापतिं जगदिरे मदिरेक्षणास्ताः ।
शक्तस्य तारयितुमीश वधूस्समस्ताः
व्यस्तावभाषणविधिस्तव कामचारः ॥
॥३१॥

भीमा कृतान्तभगिनी तरिरप्यसारा
दारा वयं वनसदामनभिज्ञचाराः ।
दुष्पारपारगमने गजगामिनीनाम्
त्वामन्तरा भवतु कृष्ण ! परायणं कः[18] ॥
॥३२॥

अम्भोनिधावकुरुथाः किल[19] शैलसेतुम्
हेतुं पुरा प्लवगकोटिगतागतस्य ।
एताः कियत्य इह तारयितुं पुरस्ताद्
व्यस्ताक्षरं वदसि नाथ ! न लज्जसे किम् ॥
॥३३॥

---

16. नौकादण्डः क्षेपणी स्यादरित्रं केनिपातकः, इति त्रिकाण्डकोषः । (पु.टि.)
17. प्रतिजगाद - इति घ. पु. पाठः ।
18. पराश्रयस्कः - इति ख.पु. पाठः ।
19. "अम्भोनिधौ चकृथ किल कथञ्चन - इति प्राप्ताः सर्व एव पाठाः, दोषनिवृत्तिमूलेयं परिष्कृतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्तारिता: शुकसनन्दसनातनाद्या:
नावं विनैव भवता भवतारसिद्धा:[20] ।
तन्न: कथं कथय कृष्ण कलिन्दकन्या-
सन्तारणे सतरणेरपि ते विलम्ब: ॥

॥३४॥

संसारसिन्धुतरणे तरणिस्तवैव
चिन्ता सतामिति वदन्ति हि वेदवादा: ।
तर्तुं पुन: कथय कैव कलिन्दकन्या
कृष्णे त्वयि स्फुरति लोचनगोचरे न: ॥

(चुम्बकम्)

॥३५॥

उद्वेलिता: स्थितवतीर्युवती: समस्ता:
हस्ताम्बुजेन तरुणस्तरणौ निवेश्य ।
तां प्रैरयत् पुरुषवत् प्रकृतिं प्रवीण:
पारं प्रणेतुमपरं तपनात्मजाया: ॥

॥३६॥

अत्रान्तरे तरुणवातनिपातकम्पा-
दावर्तवर्तुलितवारिणि दुर्निवारा ।
धीरस्य धीरतिशुचा[21] तमसीव गाढे
सध्येतरङ्गिणि [22] तरि: सहसा ममज्जे ॥

॥३७॥

एषा सखीव सुमुखी सुखमङ्कपाली-
[23]दानादराऽऽपयति न: परपारमस्या: ।
स्नेहादितीव दश ते पशुपालदारा:,
नावा सहैव यमुनासलिले निलीना: ॥

॥३८॥

कोलाहल: समभवत्तटयोस्तदानीम्
सन्ध्याचलक्षुभितसिन्धुनिनादघोर: ।

---

20. भवतारसिन्धो, - इति क. पु. पाठ:, घ. पु. पाठश्च ।
21. धीरस्य धीरिव शुचा तमसावगाढे - इति ख. पु. पाठ: ।
22. सध्येतलं निशि तरि: - इति ख. पु. पाठ: ।
23. दानादवापयति न: - इति क. पु. पाठ: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकर्ण्य कर्णकुहरच्छिदुरं यमुच्चैः
तत्रागमन्नतिशुचः[24] पतयोऽपि तासाम् ॥
॥३९॥
चन्द्रगोपयुतसेनसंज्ञकौ तारसेनपदयुङ्मदोन्मदौ ।
[25]कुन्तिनः [26]सबलसालनामकौ [27]रामणोऽथ रमणोऽपि ते दश ॥
॥४०॥
कान्तावियोगवडवानलकीलदुःस्थे[28]
मोहार्ण्णवे महति निष्पतिता हताशाः ।
ते बन्धुभिः सुवचनैरुपदिश्यमानाः[29]
प्राणानिव स्वभवनानि चिरेण भेजुः ॥
॥४१॥
हरिरपि सह ताभिरेव रन्तुं पुरममलं[30] यमुनाजले ससर्ज ।
अघटितघटनापटीयसीयं घटयति किन्न महेश्वरस्य माया ॥
॥४२॥
पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽतिभव्ये
समाप्तः सर्गोऽयं त्रिगुणशिखियुग्वेदसंख्यासमेतः[31] ॥
॥४३॥

☆☆☆☆☆

---

24. तत्रापतन् - इति क.पु. पाठः, ख.पु. पाठश्च ।
25. कुण्ठिनः - इति घ. पु. पाठः ।
26. सरल - इति क.पु. पाठः ।
27. वामनोऽथ - इति क.पु.पाठः ।
28. कीलदुष्टे - इति घ.पु. पाठः ।
29. स्ववचनैः - इति क. पु. पाठः ।
30. यदनाविलम् - इति घ.पु. पाठः ।
31. वेदसंख्येयसंख्यः - इति घ.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्दशसर्गः

विधिनियतिकृपाणीपातनापाटितायाः
गगनमणिरपेतो वासराधारिकायाः ।
अरुणरुचिरथोऽयं तन्मिलद्धातुरागैः
चरमशिखरिश्रृङ्गं तुङ्गमालिङ्ग्य तस्थौ[1] ॥
॥१॥

यदपि वहति रागं वारुणी सङ्गदोषात्
पतति गगनकोषादस्तविन्यस्तपादः ।
रविरभवदथापि श्लाघनीयो द्विजानाम्
सवितुरतिविकारेऽप्यादरः कस्य न स्यात् ॥
॥२॥

यदपि करसहस्रं दीप्तमुच्चैः प्रतापात्
भुवनविजयबीजं[2] बीजमुग्राधिराजः[3] ।
तदपि भजति काले भानुमानस्तसानुम्
भवतु[4] विधिविधानं बाधितुं कः समर्थः ॥
॥३॥

वितमसमनुरज्यन्मण्डलं [5] मन्त्रदक्षाः
समयसमुदितार्घान् स्वान्[6] करानुत्क्षिपन्तः ।
यमिन इह निगूढं चिन्तयन्तोऽस्य रूपम्
प्रकृतय इव भूपं भानुमन्तं नमन्ति ॥
॥४॥

समधिगततमोभिर्वासरस्यावसाने
मृदुलपवनधूतप्रस्फुरत्केसरोघैः ।

---

1. तस्थे - इति क.पु. पाठः ।
2. बीजवीर्येन्द्रियाणि चेति । (पु.टि.)
3. उग्रस्तु क्षत्रिये करे (पु.टि.)
4. अत्र "जगति" इति पदं समुचितं स्यात् । (टि.)
5. वितमसमनुरक्ष्यम् - इति ख.पु. पाठः ।
6. स्वान् - इति ख.पु. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वनवसतिभिरक्कैः पुण्डरीकैर्निदद्रे[7]
द्रुतमुरुतरदम्भेनोज्जजृम्भे तदन्यैः ॥
॥५॥

चरमशिखरिसानौ[8] सम्प्रयात्युष्णभानौ
स्मरकृतपरिमाथां चिन्तितप्राणनाथाम् ।
विरचितबहुवेशां चारुसंस्मृष्टकेशाम्
वदनसुभगहास्या काचिदूचे वयस्याम् ॥
॥६॥

निभृतनयनपातैः प्रीयसे वीक्षमाणा
निजमिव हृदयेशं सानुरागं दिनेशम् ।
बहिरथ भवनान्तर्यासि चायासि भूयः
सुतनु किमनुरूपक्रीडितं[9] मीनकेतोः ॥
॥७॥

रचयसि कचभारे मल्लिकादामसारम्
वहसि च हृदि हारं हृद्यमुक्ताफलस्य ।
कलयसि नवनीतस्फीतमङ्गे दुकूलम्
सुरसरिदनुकूलं दुष्करं[10] केन तेपे ॥
॥८॥

मुहुरनुसरतीयं तन्वि ते केलिकुञ्जम्
भयचकितकुरङ्गीचण्डिमा नेत्रभङ्गी[11] ।
कथय कथय कस्मै दास्यसि प्राणराज्यम्[12]
मृदुमृदितमृणालम्लानिभाजा भुजेन ॥
॥९॥

प्रणयिसहचरीषु प्रायशः सुन्दरीणाम्
हृदयगतकथाया गोपनं प्रेमलोपः ।

---

7. पुण्डरीको व्याघ्रपद्मयोः, इति । (पु.टि.)
8. अस्तं तु चरमः क्ष्माभृदित्यमरः । (पु.टि.)
9. किमनु - इति क.पु. नास्ति ।
10. दुष्करम् - तप इत्यत्र तात्पर्यम् । (पु.टि.)
11. भृङ्गिः - इति क.पु. पाठः ।
12. प्राज्यराज्यम् - इति क.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथयति न कथं वा चीनचेलाञ्चलैस्ते
निचुलितघनसारालेपनेपथ्यमेतत् ॥
॥१०॥

प्रियसुहृदि वदन्त्यामित्थमेणायताक्षी
प्रतिवचनमुदारं कल्पयामास सद्यः ।
नमदमलमुखेन्दुज्योतिरुद्योतिगण्ड-
स्तनभरपरिणाहोद्भासिना[13] कण्टकेन ॥
॥११॥

गगनगहनगामी गोपतिर्गोसहस्रम्
तरुणतिमिरतृण्याश्चारयित्वा चिराय ।
अथ परिपतति स्म प्रायशः पाययिष्यन्[14]
श्रमभरकृतरागः सागरे किं प्रतीच्याः ॥
॥१२॥

अधिजलनिधि कालप्रेरिते व्योमवृक्षात्
निपतति मधुभाण्डे मण्डले चन्द्ररश्मेः ।
तदनु परिपतद्भिर्मक्षिकोघैरमुष्मात्
जगदिदमनुपूरि ध्वान्तधारामिषेण ॥
॥१३॥

चरमगिरिनितम्बं यावदालम्बतेऽर्को
हरितमपि हिमांशुर्नास्थितो यावदैन्द्रीम् ।
अहह[15] सपदि तावद् ध्वान्तपाटच्चरोऽयम्
नयनमणिनिकायं मानवानां जहार ॥
॥१४॥

[16]तिमिरमलिनरङ्गाच्छादनादप्रसादाः[17]
प्रसभमपरिचेया देहसङ्कोचभाजः ।

---

13. परिणाहो विशालता । (पु.टि.)
14. प्रापयिष्यन् - इति ख.पु. पाठः ।
15. अहह । - इति कष्टे आश्चर्ये वा । (पु.टि.)
16. तिमिरमलिनवस्त्राच्छादनात् - इति क. पु. पाठः ।
17. अप्रसादाः - अप्रसन्ना इत्यर्थः । (टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपययुरविशेषं प्रोषितप्रेयसीनाम्
सवितरि विरतांशा वप्रकाशाः किलाशाः ॥
॥१५॥
अविशदनलराशौ दीप्यमाने पतङ्गः
सरसि सरसि मूकीभावमापच्च हंसः ।
अरचयदिव भानावस्तसानावुपेते
द्वयमिदमपि[18] संज्ञासाम्यसौहृद्ययुक्तम् ॥
॥१६॥
नयनमिह तदेव ग्राहकास्तेऽपि लोके
तदपि हि विषयाणामास नैवावभासः ।
गतवति दिननाथे तेन साकङ्गतम्वा
मुषितमिव जगद्वा कालपाटच्चरेण ॥
॥१७॥
दिशि विदिशि मराला अप्यजायन्त मूकाः
सकलकलमुलूका वावदूका बभूवुः ।
रजनिरजनि भीमा भानुरस्तं प्रयातः
विघटयति विधत्ते[19] किन्न किन्नेह कालः ॥
॥१८॥
तिमिरजलदजाले कौशिकश्रेणिशब्दम्[20]
स्तनितवति नितान्तं गाहमाने वियन्ति ।
अजनि रजनिवेलावर्धितः कोकयूनो-
रहह विरहनामा दारुणो वज्रपातः ॥
॥१९॥
रमणमभिसरन्तीं हन्त कोऽवेदयिष्यत्
तमसि मसिनिकायोद्भासि केलीनिकुञ्जे ।
इह यदि न विहङ्गश्रेणिरुड्डीनपूर्वम्
कलकलमतिलोलं [21]द्रागकाण्डेऽकरिष्यत् ॥
॥२०॥

---

18. द्वयमपि च - इति क.पु. पाठः ।
19. विधत्ते - घटयतीत्यर्थः । (पु.टि.)
20. कौशिकः - उलूक इत्यर्थः । (पु.टि.)
21. द्राग् - अकस्मात्, इत्यर्थः । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रुतकनकनिकाशाः कालपाशावकृष्टाः
रजनिमिव निविष्टा वासरप्राणपिण्डाः ।
गतवति गगनान्तं गोसहस्राधिनाथे
दिशि दिशि भवनेषु द्रागदीप्यन्त दीपाः ॥
॥२१॥

प्रलयघनघटाभिः किम्प्रसूतं किमाहो
गिरिगहनसमूहादुत्थितं सार्थवाहि ।
जगदुदयदशेषं ध्वान्तमेकान्तनीलम्
वलिविजयिमुकुन्दस्पर्धयाऽवर्धतेव[22] ॥
॥२२॥

क्षोणीमण्डलमज्जदञ्जनभरैः कस्तूरिकादीर्घिका[23] -
जम्बालैः[24] परिलिम्पदम्बरतलं मस्या दिशो मिश्रयत् ।
लुप्तासु व्यवहारितासु विगतालोकेषु लोकेष्वपि
ग्राह्यं केवलमास लोचनवतामद्वैतमन्धं तमः ॥
॥२३॥

गाढं पौरविलासिनी कुमुदिनीवृन्दैः सहानन्दिता
चेतस्तापमवाप कोकमिथुनैस्साकं[25] नवोढाजनः ।
एषा घोरतमा जगन्ति गिलितुं किं यामिनीडाकिनी
झिल्लीझङ्कृतिकैतवादकुरुत द्रागूर्ज्जितं[26] गर्जितम् ॥
॥२४॥

लुण्ठल्लोचनरत्नमीक्षणवतामाहोस्विदुन्मोहतः[27]
चण्डज्योतिरुदारवैरिविरहाद्वा स्वैरिणीमोहतः[28] ।
स्वद्रव्यत्वमुदीरितुं[29] गुरु तमो लोके व्यवस्थापयत्
ध्वान्तं धावदिव क्रमेण धरणीचक्रं समाचक्रमे ॥
॥२५॥

---

22. वर्धते च - इति ख.पु. पाठः ।
23. दीर्घिका - दीर्घपुष्करिणीत्यर्थः । (पु.टि.)
24. जम्बालः - कर्दम इत्यर्थः ।(पु.टि.)
25. कोकश्चक्रश्चक्रवाक इत्यमरः । (पु.टि.)
26. द्रागर्ज्जितम् - इति ख.पु. पाठः ।
27. उत्साहतः - इति क.पु. पाठः ।
28. स्वैरिणी - वेश्येत्यर्थः । (पु.टि.)
29. स्वं द्रव्यत्वमुदीरितुम् - इति ख. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किन्नाम वामनयनागुरुमानभङ्गे
कामस्य कुण्डलितकौसुमचापखण्डः ।
[30]लक्ष्यापदेशविगलन्[31] तुलिनोऽन्तरालम्[32]
आलम्बतोदयगिरिं सकलः कलावान् ॥

॥२६॥

धत्ते कन्दर्पदर्प्पं विशति कुमुदिनीकाननस्याननश्री-
रश्रीकं भानुभासा कवलितमखिलं जीवयन् जीवनलोकम् ।
[33]अस्यत्युग्रैस्तमिस्रातिमिरमपरुजां रोचनालोचनानाम्[34]
अङ्के नाकप्रदेशादवहदिव परामौषधीमौषधीशः ॥

॥२७॥

तिमिरमलिनं क्षाराम्भोभिः समुक्षितमातपे
[35]रथपदपतच्छूवासोच्छूवासे ततः परितापितम् ।
[36]प्रसृमरतरैर्ज्योत्स्नाजालैर्जलैरतिनिर्म्मलैः
रजनिरजकी साक्षादक्षालयत् नवमम्बरम् ॥

॥२८॥

तिमिराजगरग्रसितं जगदगदं कर्तु समुद्यतो देवः ।
रेजे रजनिरमण्या रमणः करदर्भपातेन[37] ॥

॥२९॥

ज्योत्स्नाजालजटालिते धवलिमाद्वैते जगत्युद्गते
प्रेमाकृष्टतया [38]प्रियाभिसरणव्यग्राशया बन्धकी[39] ।

---

30. लक्ष्यापदेशात् - लक्ष्यव्याजादित्यर्थः । (पु.टि.)
31. विलसत् - इति ख.पु. पाठः ।
32. तुलिनं विवले स्तोके तुच्छेऽपि वाच्यलिङ्गकम्, इति मेदिनी । (पु.टि.)
33. अस्यति - असु क्षेपणे धातोः । उग्रैः - किरणैरित्यर्थः । (पु.टि.)
34. रोचना - कज्जल इति प्रसिद्धः । (पु.टि.)
35. रथपदः - चक्रवाक इत्यर्थः । (पु.टि.)
36. प्रसृमरतरैः - अतिप्रसरणशीलैरित्यर्थः । (पु.टि.)
37. करदण्डपातेन - इति ख.पु. पाठः ।
38. प्रियाभिरमण - इति ख.पु. पाठः ।
39. बन्धकी - व्यभिचारिणीत्यर्थः । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अङ्कादिन्दुमितो दिशो वनमित: सङ्केतकुञ्जं ततोऽ -
भिज्ञाय त्वरितं[40] मृगीव मदनव्याधेन विद्धाऽविशत् ॥

॥३०॥

स्वयोगमायाबलकल्पितेषु[41] माणिक्यदीपावलिदीपितेषु ।
हैमेषु हर्म्येषु सुरप्रसूनैरामोदमामोदमयैर्ददत्सु ॥

॥३१॥

सवारुणे[42] वारिणि वर्तमाने पुरप्रधाने पुरुहूतसूनु: ।
तत: प्रशस्तास्तरणोपचारैर्दारैरमीभि: सहितोऽभिरेमे ॥

॥३२॥

विधाय दशधा देहं दशावतरणो विभु: ।
दशारमयदेकस्ता दशकामदशागता:[43] ॥

॥३३॥

कान्ते कर्षति कौतुकेन वसनं रोमाञ्चरुद्धाङ्गया
तस्मिन् पाणितलस्पृशि स्मितलवप्रेङ्खन्मुखज्योतिषा ।
आश्लेषाय कृतोद्यमे दयितया वक्रीकृतभ्रूयुगम्
न्यस्तास्त्रस्तचमूरुचण्डिमरुचो दीपाङ्कुरे[44] दृष्टय: ॥

॥३४॥

हरति पटं प्राणपतौ पयोधरे पाणिमार्प्पिपत् त्रपया ।
आनर्च रन्तुकामा रामा कामारिमम्बुजेनैव ॥

॥३५॥

सरोरुहदृशा भृशं मदनतापमापन्नया
त्रपावसनमुज्झितं निपतितं च केलीरसे ।
स्तनौ गलितचन्दनौ पुलकराजिरुज्जृम्भिता
विलोचनमनञ्जनं समुदिता मुखे सीत्कृति: ॥

॥३६॥

---

40. –ऽभिज्ञायानुचितम् - इति ख.पु. पाठ: ।
41. सुयोगमायाबलकल्पितेषु - इति ख.पु. पाठ: ।
42. वरुणस्येदं वारुणं वारुणे पुरप्रधाने वर्तमाने वारिणि स्त्रीभि: सह कृष्णोऽभिरेमे । (पु.टि.)
43. दृङ्मनस्सङ्गसङ्कल्पजागराकृशतादिभि: ।
ह्रीत्यागोन्मादमूर्च्छान्ता विप्रयोगे दशा दश ॥ (पु.टि.)
44. दीपाकरे - इति ख.पु. पाठ: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रीडावित्तं हरतो रतोत्सवे कामुकस्य कामिन्याः ।
भुजबन्धो[45] नखराहतिरुचिरो रचितञ्च कुन्तलग्रहणम् ॥
॥३७॥

नीवीग्रन्थिकपाटपाटनपरे[46] भर्तुः करे तस्करे
व्रीडावित्तविलुण्ठनाय सुदृशो नाभिगृहं गच्छति ।
चक्रन्दे प्रतिवेशिनी कलकलं प्रोत्कम्पिनी किङ्किणी
प्रौढं[47] प्रारभत प्रचण्डरसितं मञ्जीरको यामिकः ॥
॥३८॥

तन्वास्तनूतडिदतिस्फुटिता[48] विकीर्णा
वर्षन्ति कुन्तलघना [49]घनपुष्पधाराम् ।
दृष्ट्वा मयूरपदमुल्लसितं कुचाद्रौ
किं हारवल्लिभुजगी स्खलिता भयेन ॥
॥३९॥

प्राप्तः केलिगृहं विलोक्य वनितामीषन्नमत्कन्धराम्
गच्छन्तीषु बहिः सखीषु शनकैः[50] प्रस्वेदिना पाणिना ।
उत्सार्यालकमुन्नमय्य वदनं रोमाञ्चितः सस्मितम्
प्राणेशः पिबति प्रियाधरमधु प्राक्पुण्यसम्भारतः ॥
॥४०॥

पर्यस्ते वसने विकीर्णकवरीभारे गलन्माल्यके[51]
गाढेऽङ्गग्रहणे करेण करजाघाते च जाते मिथः ।
यूनोरित्थमनङ्गरङ्गसमरे सम्वर्धिते चापलात्
मध्यस्थैरथ मेखलामणिगणैरस्वानि साक्षाक्षरम् ॥
॥४१॥

सकम्पः सीत्कारोऽधरकिसलयोत्खण्डनविधौ
घनाश्लेषे नेति व्यवहृतमवैमुख्यसुभगम् ।

---

45. (क)भुजबन्धो नखराहतिरुचितं रचितं कुण्डलग्रहणम्-इति क.पु. पाठः ।
(ख) भुजबन्धो नखराहतिरुचितं रचितं कुन्तलग्रहणम्-इति ख.पु. पाठः ।
46. नीवीग्रन्थिकवाटपाटनपरे - इति ख.पु. पाठः ।
47. प्रौढः प्रारभत - इति क. पु. पाठः ।
48. -तलिदति- इति क.पु. पाठः ।
49. मेघपुष्पं घनरसः । (पु.टि.)
50. सपदि प्रस्वेदिना पाणिना - इति क.पु. पाठः ।
51. गलत्प्रायके - इति ख. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रियाया: प्राणेशे नवनवरसावेशकलुषे
निषेधोऽनुज्ञा वा कुसुमधनुषो बुद्धिविषय: ॥
॥४२॥

[52]वैमुख्येऽपि बलेन चुम्बनमथाश्लेषं निषेधेष्वपि
प्रौढं [53]पाणिविधूनने विदधतो मुग्धाधरोत्पीडनम् ।
ईषत्सङ्गतरङ्गितस्य महतीमानन्दकल्लोलिनीम्
रुन्धानोऽपि रतिं चकार कृतिनो वोढुर्नवोढाजन: ॥
॥४३॥

यत्नादेव नताननेन्दु[54]शयनोपान्तं समालम्बते
वक्तुं नोत्सहते मनोरथपदारूढाऽपि सम्भाषिते ॥
आकृष्टापि करे करोति विमुखावस्थानमालिङ्गने[55]
विस्रम्भेण[56] विलासिनी समतनोदात्मेशितु: प्रेष्यताम् ॥
॥४४॥

आयाते वासगृहं बहिरुपयातुं समुत्थिता वनिता ।
धृतवति धवे पटान्तं नयनान्तमुदश्रु[57] विभ्रमं निदधे ॥
॥४५॥

प्रत्यायाते सपदि शयनादुत्थिता[58] रत्नपीठम्
धृत्वा दूरे मुहुरथ समुद्दीपित: केलिदीप: ।
संलापाय[59] प्रियसहचरीवृन्दमाकारयन्त्या
कान्ते कोप: कुवलयदृशा[60] दर्शितो रञ्जनाभि: ॥
॥४६॥

अथ सा गुरुमानवती हरिणा हरिणायतेक्षणा जगदे ।
लगदतनुबालबाधा विशल्यकरणी लतेव सानुनयम् ॥
॥४७॥

---

52. वैमुख्ये विनयेन - इति ग.पु. पाठ: ।
53. प्रौढं पाणिविधूननं विदधतो - इति ख.पु.
54. नताननेन्दु यथा स्यादेवमिति क्रि
55. मालिङ्गिते - इति ख.पु.
56. वक्रेणेत्यर्थ: । (पु.टि.)
57. नयनान्तमुदमतिप्रिया निदधे - इति ख. पु. पाठ: ।
58. शयनादुत्थितम् - इति ख. पु. पाठ: ।
59. सल्लापाय - इति ख. पु. पाठ: ।
60. कुवलयदृशो - इति ख.पु. पाठ: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इह मदनमहेऽस्मिन्[61] पृच्छ्यमानापि मानात्
अवनतमुखचन्द्रं[62] चिन्तयैव स्थितासि ।
अयि कथय कथन्नु प्रेयसि ! प्रीतिदाने
प्रतिवचनविधाने देवि ! दैन्यं दधासि ॥
॥४८॥
वपुषि वहसि बाले कौमुदीसौकुमार्य्यम्
शिथिलयसि विपञ्चीपञ्चमं वाङ्मयेन[63] ।
तदपि कथय किन्ते मञ्जुमञ्जिष्ठपुञ्ज-
प्रसरदरुणिमायं[64] दारुणो दृष्टिपातः ॥
॥४९॥
विश्वस्यापि मनोहरासि तदहो पञ्चेषुवध्या[65] वयम्
त्वन्मौनव्रतपारणापि भवति त्यागाय भोगस्य नः ।
श्वासोष्मा मुखशीतरोचिषि महानन्तस्तु मे शोषय-
त्यद्वैतं दयिते चकास्ति मयि ते युक्तो न मानग्रहः ॥
॥५०॥
आस्यं द्रागुन्नमय रचय द्यां द्विचन्द्रप्रकाशाम्
आशाः पश्य स्फुरतु परितो वृन्दमिन्दीवराणाम् ।
मौनं मुञ्चावनिरपि चिरं चारुपीयूषधारा-
पारावारप्रसरसरसा जायतामायताक्षि ॥
॥५१॥
किङ्कार्यं सुधया धयामि तव चेदव्याजभव्याधरम्
दृष्टासीति किमाचरामि चतुरे देवाङ्गनासङ्गमैः ।
प्रेम्णा पश्यसि मां महेन्द्रपदवी नो मे दवीयस्यतो
यद्यालिङ्गसि तेन यत्पदमिदं कल्याणि जानीत कः ॥
॥५२॥
गाढाश्लेषं सुतनु वितनु प्राणसन्त्राणसिद्ध्यै
वामं कामं प्रणयिविरहे चेतनः कः सहेत ।

---

61. मह उद्धव उत्सव इति त्रिकाण्डकोषः । (पु.टि.)
62. मुखम् - इति क.पु. भ्रष्टम् ।
63. वाङ्मयेनेति स्वरूपार्थे मयट्, वाक्स्वरूपेणेत्यर्थः । (पु.टि.)
64. प्रसरदरुणिमायाः - इति क.पु. पाठः ।
65. पञ्चेषुबद्धा वयम् - इति ख. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्याभाष्य स्तनपरिसरे प्रापित: पक्ष्मलाक्ष्या[66]
पत्यु: पाणिर्नयनसलिलक्लिन्नया नावरुद्ध: ॥
॥५३॥

इति बहुगणरात्रं क्लृप्तकेलीकलाभि:
सह युवतिभिराभिस्तत्र चिक्रीड कृष्ण: ।
अकृतकवपुषापि[67] द्रागिव प्राक्तनेन
व्रजवसतिषु[68] वृत्तिर्लोकवृत्तिं दधान: ॥
॥५४॥

इति कतिपयरात्रं कामिनी: क्रीडयित्वा
निजनिजवसतीस्ता: प्रापयामास कृष्ण: ।
तपनदुहितृनीरोन्मग्ननौलब्धपारा:
जगति हि किमसाध्यं योगमायेश्वरस्य ॥
॥५५॥

पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽतिभव्ये
समाप्त: सर्गोऽयं भुवनगणनापूरकश्चारुसर्ग:[69] ॥
॥५६॥

☆☆☆☆☆

---

66. पद्मलक्ष्मा - इति ख. पु. पाठ: ।
67. अकृत च वपुषापि - इति क. पु. पाठ: ।
68. व्रजवसतिवृत्तिर्लोकवृत्तिं दधान: - इति ख.पु. पाठ: ।
69. भुवनगगनापूरकश्चारुसर्ग: - इति क.पु. पाठ: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चदशसर्गः

अथ ताः प्रतिपद्य वल्लभाः परितापं जहति स्म वल्लभाः ।
तपकालहता इव द्रुमाः प्रथमा वारिदमण्डलीरिव ॥
॥१॥

इति कृष्णचरित्रमद्भुतं[1] कलयन्तः सकलं जगज्जनाः ।
तममंसत कंसहिंसनप्रतिपन्नावतरं परं प्रभुम् ॥
॥२॥

कमलासनमानसात्मजः कलिकेदारकृषीवलो मुनिः ।
भुवने भुवने परिभ्रमन् भवनं भोजपतेः कदाप्यगात् ॥
॥३॥

गुरुगैरिकरागरोचिषा परिवीतः तरुवल्कवाससा ।
परिरब्ध इव स्वशुद्धये ज्वलनेनापि हि सर्वभक्षिणा ॥
॥४॥

बहुपुण्यजलोक्षिताः क्षितावुदिताः प्राप्य महत्तपोवनम् ।
फलपाकपिशङ्गदीधितीर्दधदुच्चैर्विकटा जटालताः ॥
॥५॥

मृदुमूर्च्छनया मुहुर्मुहुर्महतीमप्रहतिं प्रवादयन् ।
जनरञ्जनकृत्यकैतवं कलिबीजं सुरमुद्गिरन्निव[2] ॥
॥६॥

मतिपावकपूरितान्तरान्नितरां दावदवादिहोद्गतैः ।
निवहैः परिसङ्कुलं वहन् धमनीनां कमनीयमङ्गकम् ॥
॥७॥

रविमण्डलमेव[3] खेतलाद् भुवि निर्यन्नवलोकितो जनैः ।
सुसमिद्धतनुः समुत्थितो मथिताच्क्षीरनिधेरिवोडुराट् ॥
(षड्भिः कुलकम्)
॥८॥

अथ भोजपतिस्तमागतं मुनिमानर्च यथोचितार्चनैः ।
द्विषतामपि सङ्गमे सतां महतामप्रहता हि सत्क्रिया ॥
॥९॥

---

1. इति देवचरित्रमद्भुतम्- इति क.पु. पाठः ।
2. कलिबीजं स्वरमुद्गिरन्निव - इति क.पु. पाठः ।
3 रुचिमण्डलमेव - इति ख. पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनिवेशितविष्टरेऽमुना विनिविष्टः कृतपिष्टकभ्रमः ।
बहुमानपुरःसरं मुनिर्जगदे संसदि कंसभूभुजा ॥
॥१०॥

भ्रमता भुवने सह त्वया क्षणसङ्गोऽपि तमोपहः सताम् ।
जलधाविव यानवाहिनां मणिना मूल्यवता[4] समागमः ॥
॥११॥

द्वयमेतदघापहं नृणां द्रुपदा[5] वारि तवांघ्रिजं रजः ।
शिरसोपगृहीतमादिमं चरमं सङ्गतमात्रमङ्गणे ॥
॥१२॥

विमलं कुलमक्षि सत्फलं जननं जातमपेतपातकम् ।
अमुना भवदीक्षणेन मे ध्रुवमाधायि धराधुरीणता ॥
॥१३॥

भवदागमनप्रयोजनप्रतिपित्सातरलीकृतं मुने ।
नलिनीदलनीरबिन्दुवत् क्वचिदप्यञ्चति न[6] स्थितिं मनः ॥
॥१४॥

तदनन्तरमन्तरं दिशां दशनांशुप्रकरेण दीपयन् ।
मुनिराह नृपं तमान्तरं स तमस्सत्वमिषाद्[7] वमन्निव ॥
॥१५॥

असि धन्यतमो धनुष्मतां प्रथमस्त्वं पृथिवीभुजामपि ।
न विचिन्तयसीह षड् गुणानगुणस्त्वं किमु राजसंपदा ॥
॥१६॥

हरिरास हिते सुपर्वणामवतीर्णो वसुदेवयोषिति ।
अधितिष्ठति नन्दमन्दिरं कृतरक्षो[8] जनकेन कैतवात् ॥
॥१७॥

अमुना शिशुनैव पूतना निहता नागसहस्रसत्वभाक् ।
अपरे बकधेनुकादयस्तृणवत्तेन निपातिता रणे ॥
॥१८॥

---

4. बहुमूल्यस्य मणेरुपागमः - इति ख.पु. पाठः ।
5. द्रुपदा वारि - द्रुपदादिवेतिमन्त्राभिमन्त्रितं जलमित्यर्थः । (पु.टि.)
6. क्वचिदप्यञ्चति मास्थितिं मनः - इति ख.पु. पाठः ।
7. सतमस्सत्वमिषम् - इति प्राप्तयोरुभयोरेव क.ख. पुस्तकयोः समानः पाठः, अर्थानुरोधेनात्र परिष्कृतिः । (टि.)
8. कृतपक्षो - इति ख.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधुना स निरूढयौवनस्त्वदुरुच्छेद[9] इवावभाति नः ।
अचिकित्स्य इवामयो महान् नियतं निष्प्रहरिष्यति द्विषाम् ॥
॥१९॥
इति ते हितकृत्तयेरितं[10] सकलं देवचरित्रमुत्तमम् ।
परवृद्धिरुदञ्चतु[11] ध्रुवा निदिशाधीशतमाय मां दिवः[12] ॥
॥२०॥
अथ भोजमहीभुजा मुनिर्जगदेऽसौ जगदेकवन्दितः ।
विनयावनतिस्फुटीकृतैरनुरागैः परिपूरितात्मना ॥
॥२१॥
असमीरहतिः[13] सदोज्वला गुरुविज्ञानमयी महातरिः ।
विदितोऽसि किलावलम्बनं पततां नो विपदर्ण्णवोर्मिषु ॥
॥२२॥
भवता भ्रमता यतस्ततो मम देयाः सदयात्मनाशिषः ।
प्रणमामि भवन्तमन्तकादपि मे भीतिरपैतु तन्मुने ॥
॥२३॥
इति भोजपतिर्विसृज्य तं वसुदेवं सदसि व्यताडयत् ।
सरुषा परुषाक्षरैः शरैर्हरिणं व्याध इवाधिकाननम् ॥
॥२४॥
प्रथमो यदुषु द्विषत्तमो वसुदेव त्वमिहासि मे मतः ।
दमुना[14] इव यत् कुशूरजो[15] निजमेवाश्रयमश्नुषे भृशम् ॥
॥२५॥
अहनिष्यमहं कथं न हि प्रथमं त्वामतिकोपदीपितः ।
यदि नारदसुश्रुतामृतैरकरिष्यं न सुशीतलान्तरम् ॥
॥२६॥

---

9. सुदुरुच्छेद - इति ख.पु. पाठः ।
10. हितकारितयेत्यर्थः । (पु.टि.)
11. परावृद्धिरित्यर्थः । (पु.टि.)
12. मा दिवा - इति क.पु. पाठः ।
13. असमीरगतिः - इति क.पु. पाठः ।
14. दमुनाः - अग्निरित्यर्थः । (पु.टि.)
15. (क) कुशूलजो - इति ख.पु. पाठः ।
(ख) कुशूरजः - अरण्यजः , इत्यर्थः । (प.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति तं परिभाष्य भोजपोऽभणदक्रूरमदूरवर्तिनम् ।
मम दानपते द्विषत्तमो वसुदेवः सुहृदेकको भवान् ॥
॥२७॥

अपि दानपते हिते मम व्रजवासं व्रज गोपमण्डितम् ।
इह नन्दसुतौ समानयन्[16] त्वरितं मन्नयनातिथीकुरु ॥
॥२८॥

मम चापि[17] धनुर्मखो महान् भविता भावितृतीयकेऽहनि ।
प्रहिणु व्रजवासिनो जनान् परमोपायनपाणिकानिह ॥
॥२९॥

इति लब्धनृपानुशासनः पतगेशासनदर्शनोत्सवः ।
उपजातमनोरथो[18] रथी व्रजवासं प्रति स प्रतस्थिवान् ॥
॥३०॥

अशिषत्[19] स्वचरेण केशिनं स तु वृन्दावनवासिनं विभुः ।
अहितौ जहि तौ ममाहवे सहितावानकदुन्दुभेः सुतौ ॥
॥३१॥

अथ वाजिवपुर्महासुरो नृपकंसच्छलकालदेशितः ।
अभिगम्य हरिं महाविलं[20] वदनं व्याददयेनमाशितुम्[21] ॥
॥३२॥

हरिणापि निवेशितं मुखे करमाभोगिनमेष जग्रसे ।
स च तद्गिलितो गलं गतो ववृधे व्याधिरिवाप्रतिक्रियः ॥
॥३३॥

विनिविश्य गलं महाविलं तदधः [22]सम्प्रसरारुणाऽमुना ।
हृदयाखुरमुष्य जग्रसे किमिव श्रीपतिबाहुनाऽहिना ॥
॥३४॥

---

16. समानय - इति क.पु. पाठः ।
17. मम वापि - इति क.पु. पाठः ।
18. उपजातमनोरथी रथी - इति ख.पु. पाठः ।
19. प्रास्थापयदित्यर्थः । (पु.टि.)
20. महाविलो - इति क. पु. पाठः, ख.पु. पाठश्च ।
21. वदनं व्यादद एनमाशितुम् - इति ख.पु. पाठः ।
22. प्रसरणशीलेनेत्यर्थः । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिपीनभुजाभुजङ्गमप्रतिपन्नोदरकन्दरस्य किम् ।
द्रुतमस्य पलायितं भिया प्रबलैः प्राणसमीरणैरपि ॥
॥३५॥
विधृतैककपोलनासिकाश्रुतिदृक्सामिशिरोऽर्धबालधी[23] ।
हरिबाहुमहत्त्वनिर्मितौ शकलौ तस्य निपेततुः क्षितौ ॥
॥३६॥
अवकेशिनि केशिनि प्रभौ प्रहते केशवकेशिकानने ।
सुमनोभिरकारि शोभना सुमनोभिः सुमनोभिवर्षणा ॥
॥३७॥
दितिजाश्वनिवेशिता रुषा हरिबाहौ दशनव्रणावलिः[24] ।
विजयाक्षरमालिका हरिन्मणिदण्डे लिखिता इवाबभौ ॥
॥३८॥
अथ दानपतिः सुराऽसुरप्रमदायोपगमाय शार्ङ्गिणः ।
प्रजवेन रथेन गोकुलं सति सायं समये समासदत् ॥
॥३९॥
उपलभ्य स दिव्यलक्षणं हरिपादं पदवीरजोगतम् ।
अवरुह्य रथान्मुहुर्मुहुः प्रणनाम स्तुतवांश्च तच्च सत् ॥
॥४०॥
महदाश्रयणं श्रियः पतेः पतिताघप्रकराघमर्षणम् ।
रुचिरं चरणाम्बुजं भजे भजतामप्रतिबन्धमङ्गलम् ॥
॥४१॥
असतां लवनाय यत्सतामवनायावतरद् युगे युगे ।
व्यवहारपथोपदेशकः प्रणमामस्तममानवं नवम् ॥
॥४२॥
इह संसृतिनाट्यमीहते[25] श्रुतिनान्दीनिगदेन यत् स्वयम् ।
स्वयमेव निरीक्षते च यः प्रकटं तं नटमीशमाश्रये ॥
॥४३॥

---

23. श्रुतिदृक्सामिलिरोऽधिबालधी - इति क.पु. पाठः ।
24. दशनव्रणावली - इति ख.पु. पाठः ।
25. संसृतिः - संसार इत्यर्थः । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगतामुपरि क्षितौ वसन्नपि कर्तुं मुदमद्य मे दृशोः ।
नवनीरदनीलमद्भुतं श्रुतिमृग्यं मम धाम धास्यति ॥
॥४४॥

इदमध्वनि चिन्तयन्नसौ बहुसौहृद्यभरेण चेतसा ।
उपनन्दशिशु प्रयातवान् धृतवानस्य पदं च मूर्धनि ॥
॥४५॥

वसितासितवाससं बलद्वलबन्तं बलदेवमन्वितः ।
स्फटिकाचलमाचितं हरिन्मणिभासैव ननाम मौलिना ॥
॥४६॥

तमुभावपि रामकेशवौ समवेत्यातितरां चकासतुः ।
पिकमाप्य कलस्वरोत्सुकं मधुमन्तौ मधुमाधवाविव ॥
॥४७॥

अथ रामरमापती पितुर्निकटं निन्यतुरादरेण तम् ।
रचितोचितशिष्टपूजनं सुजनं[26] द्यामिव धर्म्मकर्म्मणी ॥
॥४८॥

अथ कंसकृतानुशासनं सकलं नन्दयथोचितार्चितः ।
पशुपेषु निरस्तसंभ्रमः[27] सुखमाभाषत गान्दिनीसुतः ॥
॥४९॥

श्वफल्कजेनेति निवेदिते [28] तत उपायनानि प्रतिगृह्य वल्लवाः[29] ।
मुदा हृदा यादवराजधानिकामतिस्थिरेण [30] त्वरिताः प्रतस्थिरे ॥
॥५०॥

दिवोऽवतीर्णौ पृथिवीं पुनाथे नाथौ युवामत्र जनत्रयस्य ।
अघापघातौ रविजह्नुकन्यापयःप्रवाहाविव नीलशुक्लौ ॥
॥५१॥

---

26. स्वजनम् - इति ख. पु. पाठः ।
27. सम्भ्रमस्तु भ्रमादरे । (पु.टि.)
28. निवेदिते सति - इति क.पु. पाठः, ख.पु. पाठश्च । सन्धिजन्यदोषनिरासार्थं "तत" इति पदं दत्तम् । (टि.)
29. वल्लकाः - इति क.पु. पाठः ।
30. मुदा हृदा यादवराजधानीम् - इति ख.पु. पाठः, क.पु. पाठश्च । त्रीणि चरणानि वंशस्थस्यैकं चरणं चोपेन्द्रवज्राया इति तत्रास्वारस्यनिराकरणाय परिवर्तनम् । (टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विजित्य भोजाधिपतिञ्च पित्रोः प्रीतिं परामर्पय बन्धमोक्षात् ।
अक्रूर उक्त्वेति बलाच्युतौ च ताभ्यां सह स्यन्दनमारुरोह ॥
॥५२॥

अथो रथोऽमुष्य पथोपसर्पणे रविं रुचा वारिमुचो महारवैः ।
जिगाय वेगेन समीरमम्बरे किमत्र चित्रं यमधिष्ठितो हरिः ॥
॥५३॥

अक्रूरोऽपि रथादथावतरणं कृत्वा जले यामुने
मग्नो दैनिकनित्यकृत्यविधये यावत् समुन्मज्जति ।
तावत् प्रैक्षत शेषवेषममलं नीलाम्बरं सुन्दरम्
क्षुभ्यत्क्षीरसमुद्रनीरलहरीमालोज्ज्वलैर्मौलिभिः ॥
॥५४॥

अङ्के तस्य नवीनपीनजलदश्रेणीश्रियाऽधिश्रितम्
सानन्दं सनकादिवन्दितपदं कृष्णं समालोक्य च ।
[31]उन्मग्नोऽपि निमग्न एव स चिरं चित्राम्बुधौ तस्थिवान्
दृष्ट्वा तौ च तथैव तत्पथगतौ देवौ रथस्योपरि ॥
॥५५॥

दृष्टचित्र इवाभासि किं विलक्ष्य महाशय[32] ।
इति पृष्टो भगवता वक्तुं व्यवसितोऽपि सः ॥
॥५६॥

नापारयत[33] संरुद्धव्यापारप्रकरो गिराम् ।
नीरात्तीरं गतो मेने मायामेव हरेरिमाम् ॥
॥५७॥

अथ रथमधिरुह्य प्रीतचेताश्चरित्रम्
परमपुरुषयोस्तत् प्रेक्ष्य लोकातिपाति ।
पुनरपि सह ताभ्यां गान्दिनीनन्दनोऽसौ
मधुनगरमुदारं प्राप निर्मुक्तपापः ॥
॥५८॥

---

31. उन्मग्नोऽपि निमग्न एवेत्यस्य सप्तवारानुन्मग्नः सप्तवारान् निमग्न इत्यर्थः । (पु.टि.)
32. महायशः - इति ख.पु. पाठः ।
33. अपारावसंरुद्धव्यापारप्रकरौ गिराम् - इति ख.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽतिभव्येऽ -
भवत् पूर्णस्तूर्णं तिथिगणनया सम्मितः सर्ग एषः ॥
॥५९॥

☆☆☆☆☆

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विसृज्य गेहाय स गान्दिनेयं बलेन साकं बलिनां वरेण्यः ।
श्रियो जनिस्थानतयाऽवगाढं द्विधानुबद्धो[1] मथुरामलोकीत् ॥
॥१॥

यत्र स्फुरन्निर्मलरत्नभासामतिप्रसारे[2] दिवसावसानाः[3] ।
कलावतीनां कलभृङ्गनादैरावेदयन्ति श्रुतिकैरवाणि ॥
॥२॥

प्रसाधनानि प्रमदा विधाय निधाय चेतः प्रियसङ्गमाय ।
उपेत्य सौधं गमयन्ति सूरं दिनेऽपि दूरं सिचयाञ्चलेन ॥
॥३॥

मिथः सखीनां वलभीमुपेत्य[4] क्रीडारसे कौसुमकन्दुकेन ।
[5]यस्यामवश्यायकरेऽधिसायं कुतूहलिन्यः करमर्प्पयन्ति ॥
॥४॥

स्थले स्थले यत्र सुवर्णसौधाः सौधेषु सौधेषु नवाश्च दाराः ।
दारेषु दारेषु मनोजलीला याभिः कृता द्यौरपि तामधोऽधः ॥
॥५॥

भुजङ्गजुष्टाः शशिबिम्बचुम्बिचलाचलोत्तुङ्गतरङ्गगङ्गाः ।
यस्यामराजन्नवदातवेशा[6] गृहा महेशा इव भूमिपानाम् ॥
॥६॥

यत्र प्रजानामितरेतरेण प्राणाधिके प्रेमणि जागरूके[7] ।
एकस्त्वशब्दायत शब्दशास्त्रपदावलीनामनुबन्धलोपः ॥
॥७॥

यत्रार्थवादश्रुतिरेव शास्त्रे शस्त्रे शिते कोशपरिक्षयोऽभूत् ।
करग्रहार्त्तिः प्रियकेलिसङ्गादङ्गे कुरङ्गायतलोचनानाम् ॥
॥८॥

---

1. द्विधानुबद्धाम् - इति ख.पु. पाठः ।
2. स्फुलन् - इति ख.पु. पाठः ।
3. दिवसावसानम् - इति क.पु. पाठः ।
4. गोपानसी तु वलभी, इत्यमरः । (पु.टि.)
5. अवश्यायस्तु नीहार इत्यमरः । (पु.टि.)
6. अवदातः सितो गौर इत्यमरः । (पु.टि.)
7. जागरूक - इति ख.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्र छलापार्थदिरोधबाधासिद्धप्रतिज्ञाहतिजातिदोषाः[8] ।
विभान्ति विद्वत्परिषन्मुखेन्दुसञ्चारिपञ्चावयवप्रयोगे ॥
॥९॥

सुवर्णलेपो भवनस्य भित्तौ कर्पूरपूरैरजिरोपचारः ।
प्रतिप्रयाणं मणिभिः प्रसाधा साधारणी सर्वजस्य यस्याम् ॥
॥१०॥

वणिङ्नतभ्रूनयनाञ्चलानि चलानि पश्यन् भ्रमरोपमानि ।
प्रहृत्य मौर्वीगुणभङ्गभीरुः पौष्पं धनुः पश्यति यत्र कामः ॥
॥११॥

स्थिते पुरः क्रेतरि नालिकेरीफलं नखैरुल्लिखति क्षणेन ।
भवन्ति रोमाङ्कुरदन्तुराणि वणिग्वधूनां कुचकोरकाणि ॥
॥१२॥

द्रष्टुं देहि सरोजसुन्दरमुखि । त्वं ह्यस्तनौ[9] वीक्षितौ
यौ तौ हाटकसंपुटौ पुटितवल्लग्नं [10] मनस्तत्र मे ।
किं मूल्यं न यतः परं प्रियतरं लोके त एवासवः
यत्रैवं लपतोर्बभूव विपणौ [11] यूनोरनूनो रसः ॥
॥१३॥

यत्राभान्ति[12] गृहा महामणिवहाः पर्यायतोऽभ्रंलिहा
वीथी यत्र च हीरहारखचिता [13] रत्नाकरप्रेयसी ।
चित्रं यत्र च नागरीमयतडिल्लेखामुखाम्भोरुहात्
उन्मीलन्ति मुहुर्मुहुर्मधुलिहो लक्ष्यं कटाक्षोर्मयः ॥
॥१४॥

जल्पन्त्यः प्रथमं सभङ्गिमधुरस्निग्धं सुधादुर्दिनम्
कुर्वाणा विपणीषु यत्र तडितां कान्तीः सृजन्त्यः स्वयम् ।
गच्छन्त्यो दरहास्यहारिवलितग्रीवं कपोलस्खलल् -
लोलापाङ्गतरङ्गितैर्मृगदृशः क्रीणन्ति लोकत्रयम् ॥
॥१५॥

---

8. सामान्यच्छलं वाक्छलमुपचारच्छलं चेति छलं त्रिविधम् । (पु.टि.)
9. श्वस्तनौ-इति क.पु.पाठः, ख.पु.पाठश्च । तत्र तत्र टिप्पण्यां गतदिवसीयावित्युल्लेखश्च ।
10. पुटितं स्यात् वस्तपुटे पाटितस्यूतयोरपि, इति मेदिनी । (पु.टि.)
11. विपणौ - आपणे विपणे हट्टे । (पु.टि.)
12. यत्र केलिगृहा - इति ख.पु. पाठः ।
13. हारहीरखचिता - इति ख.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वं क्रीतमत्र कमलं कलयेति ताभिः
उक्ता[14] निवेशितकरा वदनानुबिम्बे ।
यत्र स्फुटस्फटिकवीथीषु मालिकानाम्[15]
अन्तःस्मितानि जनयन्ति न के युवानः ॥

॥१६॥

नगरन्तदेष सविशेषविषयवलितं विलोकयन् ।
धौतवसनमयने मिलितं रजकञ्च कञ्चिदुदवोचदच्युतः ॥

॥१७॥

वसनानि रङ्गरुचिराणि [16] नृपसमुचितानि देहि नौ ।
तेन भवतु भवतोऽपि भवे भवनादिसम्पदतिलोभनीयभाः[17] ॥

॥१८॥

[18]इति तं निगदन्तमुवाच रुषा वचनं कुटिलं रजकः कुटिलः ।
नृपयोग्यतरं वसनं न हि ते वनवासिन एव वने वसनम् ॥

॥१९॥

इति तं वदन्तमयमाह महितमहिमानमन्त्यजः[19] ।
ब्रूहि नृपसमुचितानि कथं वसते वनेषु वसनानि गोदुहः ॥

(चुम्बकम्)

॥२०॥

पुनरीदृशं न वद मूढ यदि मनसि ते जिजीविषा ।
क्रूरमिति च बहु वदन्तममुं सहसा हरिस्तमसुभिर्व्ययोजयत्[20] ॥

॥२१॥

---

14. उक्ते - इति क.पु. पाठः ।
15. (क) मालिकीनाम् - इति ख.पु. पाठः ।
(ख) मालिकाकाररमणीनामित्यर्थः । (पु.टि.)
16. रङ्गः - श्यामपीतादिरङ्ग इत्यर्थः । (पु.टि.)
17. भवभवनादिसम्पदिहलोभनीयभाः - इति ख.पु. पाठः ।
18. इति तं निगदन्तमिति १९ संख्यकं पद्यं केवलं क. पुस्तके लभ्यते ।
19. अन्त्यजः - शूद्र इत्यर्थः । (पु.टि.) ।
20. व्यपोथयत् - इति क.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रसनानि तानि परिधाय हरिरपरिमेयविक्रमः ।
पौरयुवतिनयनोत्सवदः सबलो गतो गुणकमालिकालयम्[21] ॥
॥२२॥
नत्वा नत्वा नुत्वा मालिकाकारः ।
दायं दायं मालाः कृष्णमतोषयदेष सशेषम् ॥
(भारच्छन्दः)
॥२३॥
देवोऽमुष्मै प्रादात् प्रीतः पीताम्बरो वरानिष्टरान् ।
किं किं न साधयति वा साधुसमाराधितो महानुग्रमहाः[22] ॥
॥२४॥
अनुलेपनपात्रपाणिमब्जायतनेत्रः पथि सोऽथ वीक्ष्य कुब्जाम् ।
[23]तदुपाहितचन्दनानुलिप्तः कृपया तां चकमे[24] विधातुमृज्वीम् ॥
॥२५॥
चिवुकं समुदञ्च्य पाणिनाऽस्याः प्रपदेन प्रपदं प्रगृह्य गाढम् ।
सरलां तरलाक्षिपङ्कजान्तां सुरकान्तामिव निर्ममे मुकुन्दः ॥
॥२६॥
सा चित्रचारुमहसा सहसा कृशाङ्गी
लोकैरलोकि सुषमासमुदायसिन्धुः ।
मायेह किं मधुपरिपोरुत दैवरामा
रामा क्व सेति समशायि[25] ततश्च पश्चात् ॥
॥२७॥
स प्रार्थितः स्वगृहवासविलासमस्यै [26]
स्वीकृत्य तं सह बलेन पुनः प्रतस्थे ।
भक्तप्रियो हि भगवानपि किन्न तस्य
श्रेयस्यमर्प्पयति किञ्चिदुपासनाभिः ॥
॥२८॥

---

21. (क) गतोऽनुलकमालिकालयम् - इति ख.पु. पाठः ।
(ख) गुणकनामा मालिकस्तस्य गेहमित्यर्थः । (पु.टि.)
22. उग्रमहाः - उग्रं महो वर्चो यस्य सः । पु.टि.)
23. तदुपोहित - इति ख. पु. पाठः ।
24. चकमे - ईप्सितवान् इत्यर्थः । (पु.टि.)
25. समशायि - सन्देहो विहित इत्यर्थः । (पु.टि.)
26. विलास - इति ख. पु. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महामहारम्भविजृम्भमाणमृदङ्गशङ्खादिनिनादिवाद्यम् ।
द्वारोदयत्तोरणपुष्पमालानिपातिपुष्पं लयगीतहृद्यम् ॥
॥२९॥

उद्दीप्तदीपावलिदीपिताशं प्रभूतभास्वत्प्रकरप्रकाशम् ।
सचित्रभोज्यप्रचुरोपचारमगादगारं नृपकार्मुकस्य ॥
॥३०॥

निवेदितं रक्षिभिरक्षिभङ्ग्या करीव कान्तारमुदारसत्व:[27] ।
अपश्रमेणैव करेण कृष्ण: कोदण्डमुद्दण्डतरं बभञ्ज ॥
॥३१॥

भ्रश्यद्भूधरचक्रमक्रमचलत्पाथोधिनक्रोत्करम्
व्यस्यद्दिश्यकरीन्द्रवृन्दमवनीचक्रं न चक्रे परम् ।
कृष्णाकर्षितकंसकार्मुकदलद्वैतप्रभूतो ध्वनि:
किं[28] प्रध्वस्तसमाधिबन्धमतनोदद्धा[29] मनो वेधस: ॥
॥३२॥

ततो जातभामा: परे बद्धुकामा: समुत्तस्थुरेके तमाहन्तुकामा: ।
हरिश्चापखण्डेन रक्षानियुक्तान् पराबीभवतान्नशेषान् सशेष: ॥
॥३३॥

अथ प्रेषिता भोजराजेन कोपाच्चमूराजगामोद्भटानां भटानाम् ।
महाशस्त्रधारातडित्पातघोरा मिलज्जालिका[30] कालिकाऽकालिकीव[31] ॥
॥३४॥

तत: प्रोद्भटास्ते भटा: सर्वशस्त्रै: सरामं निकामं हरिं तत्र जघ्नु: ।
भवाम्भोनिधौ यौगपद्यप्रयुक्तैरविद्यानिवात्मानमाविद्यकोघै: ॥
॥३५॥

हरेरङ्गमासाद्य शस्त्राणि तानि प्रभूतानि[32] भूतानि मोघानि[33] सद्य: ।
विशीर्यन्त एवाद्रिशृङ्गे निपातादुदाराम्बुधारा हि धाराधराणाम् ॥
॥३६॥

---

27. कान्तारो वर्त्मदुर्गेषु, इति त्रिकाण्डकोष: । (पु.टि.)
28. किन्नुध्वस्त - इति क.पु. पाठ: ।
29. अद्धा - अत्यर्थेनेत्यर्थ: । (पु.टि.) ।
30. जालिका - संनाहा । (पु.टि.)
31. कालिका - मेघपङ्क्तिरिति । (पु.टि.)
32. प्रभूतानि - पराभवं प्राप्तानीति । (पु.टि.)
33. मोघानि - निस्फलानीत्यर्थ: । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदस्तं[34] भुजस्तम्भदम्भोलिदम्भादहंभावसम्भावितैरन्यपक्षैः ।
प्रलम्बो द्विषन्मण्डलाकारगत्या [35]शरासारमुच्चैरपाराधयच्च[36] ॥
॥३७॥

अथाप्लुत्य[37] वेगात् परेषामनीके तदा रामकृष्णौ परेषां समीके ।
करादस्त्रशस्त्रं[38] मुदाच्छिद्य सद्यः [39]सुनिघ्नावनिघ्नान् समाजघ्नतुस्तान् ॥
॥३८॥

बलो बाहुमेकस्य पादौ परस्य प्रचिच्छेद पादेन धारासितेन ।
शिरः शौरिरन्यस्य विन्यस्य भूमौ चपेटेन कञ्चिद् वितुण्डं[40] चकार ॥
॥३९॥

क्वचित्कञ्चिदस्यन् परं शस्त्रयित्वा[41] क्रियाकोविदस्तौ परासू चकार ।
तदौजायितं[42] तस्य मत्वैव शत्रुग्रहे न प्रयासद्वयाधिक्यदोषम् ॥
॥४०॥

प्रहारातिरेकान्नतेनारिमूर्ध्ना दिवोऽधस्तलं पातिना कृष्णदेवः ।
गृहीत्वैव पुंविग्रहं वीरलक्ष्मीश्चकारोच्चकैः[43] कन्दुकक्रीडनानि ॥
॥४१॥

स्थितावेक एव प्रयाणे शतञ्च प्रदाने रिपूणां सहस्रायमाणः ।
प्रगाढं बलन् वीरलीलावितानो[44] विपक्षैरलक्षि प्रभुर्लक्षसंख्यः ॥
॥४२॥

दृश्योऽदृश्यो दूरवच्चान्तिकस्थः खस्थो भूस्थो निश्चलो चञ्चलश्च ।
इत्थं वीरश्रेणिमध्ये तदानीं देवोऽतानीदिन्द्रजालं करालम् ॥
॥४३॥

---

34. उदस्तम् - उत्क्षिप्तम्, इति । (पु.टि.)
35. आसारोऽम्बुकणाः स्मृताः । (पु.टि.)
36. अपाराधयत् - निष्फलमकरोदित्यर्थः । (पु.टि.)
37. अथारुह्य वेगात् - इति ख.पु. पाठः ।
38. करादस्त्रमस्त्रम् - इति ख.पु. पाठः ।
39. सुनिघ्नौ - स्वायत्तावित्यर्थः । (पु.टि.)
40. विचूर्णञ्चकार - इति क.पु. पाठः ।
41. शान्तयित्वा - इति ख. पु. पाठः ।
42. ओजायितम् - प्रभावितमित्यर्थः । (पु.टि.)
43. वीरलक्ष्मा - इति ख. पु. पाठः ।
44. वीरलीलावितानम् - इति ख.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सपदि रुधिरधारयोच्छ्वलन्त्या विदलितमूर्धकबन्धतो[45] भटानाम् ।
दिवि सरसि बभूव लिप्यमानो रविरपि लोहितनालपङ्कजाभः ॥
॥४४॥

इति समरपराङ्मुखानि भेजुः शतमुखवैरिदलानि कंसमेव ।
निजगदुरधिकं त्रिविक्रमस्य क्रमचरितानि च तानि सम्पराये ॥
॥४५॥

कृत्वा कुमुदाकरकरणं रणं रणयशा दिशासु विशालविभवः ।
हृदि भोजभूभुजो विजयं निधाय शकटं[46] प्राप कृष्णः ॥
॥४६॥

पिता यस्यान्वीक्षाम्बुधिवहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽतिभव्येऽ -
भवत् पूर्णस्तूर्णं शशधरकलासंख्यया सर्ग एषः ॥
॥४७॥

☆☆☆☆☆

45. विदलितमूर्धकबन्धको भटानाम् - इति क.पु. पाठः ।
46. शकटे प्राप कृष्णः - इति क.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तदशसर्गः

कृत्वा कंसबलध्वंसमित्वा शकटमच्युतः ।
नन्दाद्यैः कौतुकालापैर्यापयामास यामिनीम् ॥
॥१॥

धनुष्प्रवरभङ्गेन बलभङ्गेन सङ्गरे ।
मेने कंसोऽवसन्नः सन्नासन्नं मृत्युमात्मनः ॥
॥२॥

न रेमे रमणीवृन्दे नाननन्देन्दुरश्मिभिः ।
विहारेऽभ्यवहारे[1] वा नोल्ललास भयालसः ॥
॥३॥

सौधशेखरमूषायामुषितः[2] खरमुच्छ्वसन् ।
निशामनयदेकाकी जागरेण गरीयसा ॥
॥४॥

मल्लतल्लजवर्गोग्रवल्गनावल्गुचत्वरम् ।
कारुभिः कारयामास रङ्गमुत्तुङ्गतोरणम् ॥
॥५॥

सप्रपञ्चानतो[3] मञ्चानुच्चैरुच्चावचासनान् ।
सुखालोकाय लोकानां निरमापयत प्रभुः ॥
॥६॥

अथाधोरणमाहूय भूयः संस्तूय[4] सुनृतैः ।
उवाच वचनं कंसो नृशंसोचितमुच्चकैः ॥
॥७॥

सज्जीकृत्य मतङ्गं प्रविशन्तौ मम रङ्गम् ।
शत्रू पशुपविहारौ जहि वसुदेवकुमारौ ॥
॥८॥

अथ सुरगिलनग्राहश्चाणूरादीनाह ।
भवति हि कुदैवदृष्टः त्रिजगति मतिविभ्रष्टः ॥
॥९॥

---

1. विहारे व्यवहारे वा - इति ख.पु. पाठः ।
2. राजभवनच्छदिवर्तिकोष्ठविशेषे, इत्यर्थः । (ख.पु.टि.)
3. सप्रपञ्चमतो मञ्चान् - इति ख.पु. पाठः ।
4. भूयः सम्भूय - इति ख.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[5]मायासकं कंसयामायामतास्य स्यतामया ।
सतामाररमातास कंस्यवस्यस्य वस्यकम् ॥

(सर्वतोभद्रबन्धः)[6]

॥१०॥

शत्रुश - पक्षप - मञ्जुम - गर्वग
भव्यभ - दस्युद - धर्मध - लक्ष्यल ।
यत्नय - रत्नर - पत्तिम - यन्मम
तन्तव - पत्तन - वाहन - वन्तु च ॥

(कामधेनुः)[7]

॥११॥

मल्ला भवन्तो विघ्नन्तु प्रधने मित्रदारकौ ।
[8]मल्ला भवन्तो विघ्नन्तु प्रधने[9] मित्रदारकौ ॥

(गोमूत्रिकायमकम्)[10]

॥१२॥

न देवादाहवाद् दम्भान्नादेवाद् दानवादरः ।
मम वा न भवाद्रुद्राद् यमरादाहवाभयम् ॥

(मुरजबन्धः)[11]

॥१३॥

इति कंसकृतादेशाः सुवेषा मल्लतल्लजाः ।
रङ्गे ववल्गुरुत्तुङ्गनगशृङ्गतनुश्रियः ॥

॥१४॥

---

5. मायः पीताम्बरे सुरे, इति मेदिनी । (पु.टि.)
6. तदिष्टं सर्वतोभद्रं सर्वतो भ्रमणं यदि । सरस्वतीकण्ठाभरणे, २।१२१ (टि.)
7. पदग्रहाद् यथाकामं कामधेनुरियन्तु नः । स.क., २।१४० (टि.)
8. मल्लाभयुक्ता इत्यर्थः । (पु.टि.)
9. प्रकृष्टधन इत्यर्थः । (पु.टि.)
10. गतिरुच्चावचा यत्र मार्गे मन्त्रस्य गोरिव गोमूत्रिकेति तत् प्राहुः । स.क., २।१३० (टि.)
11. अत्र पादचतुष्केऽपि क्रमशः परिलेखिते ।
श्लोकपादक्रमेण स्यात् रेखासु मुरजत्रयी । स.क., २।१२७ (टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ मञ्चमुपारुह्य[12] प्रसह्य पृथिवीपतिः ।
रङ्गरङ्गावलोकाय[13] पौरानदादुपज्वरम्[14] ॥

॥१५॥

रङ्गदर्शनसावेशा नरेशानुमता नराः ।
सुप्रपञ्चेषु मञ्चेषु यथोचितमुपाविशन् ॥

॥१६॥

चारुचीरचमत्कारा देवदाराधिकत्विषः ।
अत्र चित्रमुपासन्ना बहुला महिलाजनाः ॥

॥१७॥

या मता हि विभाधारा सा रामा सुरनायिका ।
कायिनारसुमारासा राधा भाविहिता मया ॥

(गतप्रत्यागतम्)[15]

॥१८॥

अथ नन्दोपनन्दादिगोपाः कोपाकुला अपि ।
मत्वा कंसकृतादेशं तं देशं समुपाविशन् ॥

॥१९॥

तौ रामकृष्णौ समरे सतृष्णौ श्रुत्वा महामल्लमहामहन्तम् ।
विधाय वेशं वरसन्निवेशं तमेव देशं चलितौ मदेन ॥

॥२०॥

तुलितमानवर्धिष्णुविन्ध्यशिखरवितानकम्
सभयसूरसूतेन वियति विलोक्यमानकम् ।
मन्दगमनविनमदवनिचलनदन्नदीनदम्
द्वारि द्विरदमुदैक्षत मधुरिपुरुपचितमदम् ॥

(विगलितकम्)[16]

॥२१॥

---

12. मञ्चमुपारूढः - इति ख.पु. पाठः ।
13. रङ्गरङ्गावलोकाय - इति क.पु. पाठः ।
14. समीप इत्यर्थः । (पु.टि.)
15. अत्रायुक्पादयोर्गतिर्युक्पादयोः प्रत्यागतिः । स.क., २।१२१ (टि.)
16. यत्र प्रथमद्वितीयादिचरणेषु क्रमशो वर्णानां विगलनं तद् विगलितकमिति प्रतीयते । (टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकृतिरिपुमम्बरे रविमवरोद्धुमुदितम्
दृढरूढमिव कूटमन्धतमसां चितम् ।
क्रोधपुञ्जमिव कंसहृदयगतमागतम्
बहिरहितहरिजिगीषुमभिष्वजन्तमागतम् ॥

(गलितकम्)[17]

॥२२॥

समरविमुखरिपुराजदुर्यशोभरचितम्
निजकनृपतिना दिक्षु जयलाभरचितम् ।
दशनमुखरोचिषा स्फटिकतटविभासितम्
मरकतगिरिमिव कज्जलजलदनिभासितम् ॥

(सङ्गलितकम्)[18]

॥२३॥

मदभरनिर्झरधारया मधुकरनिकरविहारया ।
मण्डितमरिमदसायकं गर्वितमिव गणनायकम्॥

॥२४॥

सुप्रतीककरलालनासहं सुप्रतीककरलालनासहम् ।
कुम्भीनसमाहवसमुद्रयं [19] कुम्भीनसमाहवसमुद्रयम् ॥

(भूषणा)[20]

॥२५॥

अथ वचनमुचितमूचे विचरन्नमुचे रिपोरपरजन्मोच्चैः ।
द्वारं द्विरदनिषादिन् देहि ममाभीष्टरङ्गदृष्टिहृतहृदः ॥

॥२६॥

---

17. गृहीतवर्णानां क्रमशः परित्यागलक्षणमिति प्रतीयते । (टि.)
18. गृहीतवर्णानां सम्यग्गलनात् सङ्गलितकमिति प्रतीयते । (टि.)
19. सहर्षवेगमित्यर्थः । (पु.टि.)
20. पदविन्यासदृष्ट्या प्रथमद्वितीययोस्तृतीयचतुर्थयोश्च साम्ये समानरूपेणावृत्तौ वा भूषणेति प्रतीयते । (टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुदितकंसमहाकरं कुवलयापीडकम्
समुदितकंसमहाकरं कुवलयापीडकम् ।
[21]समाज हरयेऽधिकमहार्य्यरयप्रधानपः[22]
समाजहरयेऽधिकमहार्य्यरयप्रधानपः[23] ॥

(खञ्जरकम्) [24]

॥२७॥

अथ स करी करेण विचकर्ष नन्दसूनम्[25]
सनकसनातनादिभिः स्तुतमनादिमनूनम् ।
धृतनियमा यमामनन्ति हि यमेन यतयः
कथमिह तं विदन्तु पुरुषं मदान्धमतयः[26] ॥

(विलम्बितम्) [27]

॥२८॥

असह्यविक्रमस्ततो विगृह्य बालधौ बली
प्रसह्य तं सविक्रमं सवत्रुरप्यविक्रमत्[28]।
निपात्य गण्डमण्डले हरीन्द्रवदद्रुतं हरिः
पदाशनिप्रपाततः शिरोऽचिरादचूर्णयत् ॥

॥२९॥

---

21. अज गतिक्षययोरिति धातोः । (पु.टि.)
22. महापात्रप्रधानानीति त्रिकाण्डः । (पु.टि.)
23. प्रकृष्टं धानं पोषणं पानं यस्य स इति । (पु.टि.)
24. सप्तदशाक्षराणां त्रयोविंशतिमात्राणाञ्च पादबन्धे प्रथमद्वितीययोः तृतीयचतुर्थयोश्च चरणयोः साम्ये सति खञ्जरकमिति प्रतीयते । (टि.)
25. सूनं प्रसवपुष्पयोः । (पु.टि.)
26. महान्धमतयः - इति क.पु. पाठः ।
27. सान्त्यानुप्रासं सविलम्बवर्णाहारोज्वलं विलम्बितमिति प्रतीयते । (टि.)
28. विपुले नकुले विष्णौ वत्रुः स्यात् पिङ्गले त्रिपु । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गजे कुवलयापीडके गजे कुवलयापीडके ।
हरिरुरुक्रमं निर्ममे हरिरुरुक्रमं निर्ममे ॥

(सुन्दरा) [29]
॥३०॥
हरिणा परिहतशिरसा विगलितगुरुगण्डशैलेन ।
दन्तावलकुलगिरिणा पक्षच्छेदाकुलेन परिपेते[30] ॥
॥३१॥
उत्पाट्य दन्तिदन्तौ रामसहायो रमारमण: ।
अनयन्निषादिलोकानवशान् यमसादनं तरसा ॥
॥३२॥
नृपसदस्तदा रामकेशवौ विविशतुर्मुदा[31] दीक्षिताहवौ ।
भयकुतूहलानन्दराशिभि: सदयमीक्षितौ रङ्गवासिभि: ॥
॥३३॥
युगपदुत्थिता मल्लतल्लजा हरिमुदीक्ष्य तेऽनल्परल्लका:[32] ।
दरमुपाविशन् रङ्गभित्तय: पुरनिवासिनां चित्तवृत्तय: ॥
॥३४॥
तावाह्वयन्तो रिङ्गन्त: समरायामरारय: ।
करं करेण कर्षन्ति दन्तिनामसुनिर्दया: ॥
॥३५॥
अनेकयुद्धजयिनो यूयं विदितविक्रमा: ।
वयं वनचराभासा: कदापि न कृतश्रमा: ॥
॥३६॥
अनयोरनयो नूनं सङ्गरस्समसङ्गर: ।
निवर्तध्वमित प्राध्वं[33] माधमोऽस्तु सभासदाम् ॥
॥३७॥

---

29. नवाक्षरात्मके त्रयोदशमात्रात्मके च चरणबन्धे प्रथमद्वितीययोस्तृतीयचतुर्थयोश्च चरणयो: साम्ये सुन्दरेति प्रतीयते । (टि.)
30. पक्षच्छेदाकुलेन दन्तावल: परिपेते - इति ख.पु. पाठ: ।
31. विविशतुर्मदाद्दीक्षिताहवौ - इति क.पु. पाठ: ।
32. कटुवचना इत्यर्थ: । (पु.टि.)
33. आनुकूल्यार्थकं प्राध्वं व्यर्थार्थे तु वृथोच्यते । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ[34] मल्लोऽपि नीरन्ध्रबलव्यायतविग्रहः ।
इति कृष्णोक्तमाकर्ण्य स्पष्टमाचष्ट भारतीम् ॥

॥३८॥

यूयं सत्यं वनचरा वयञ्च विहितश्रमाः ।
समं वा विषमं वाऽस्तु रक्ष्यो राजा किलावयोः ॥

॥३९॥

इतीरयति चाणूरे शूरे समरसूरिणि ।
त्रिविक्रमः क्रमं कर्तुं विक्रमेणोपचक्रमे ॥

॥४०॥

चाणूरः शौरिणायुद्ध बलदेवेन मुष्टिकः ।
इन्दुना केतव इव तमा इव तमोऽरिणा

॥४१॥

कृष्णरामौ रणासक्तौ दृष्ट्वा दूना[35] दयाभृतः ।
सन्तोषवन्तः सन्तोऽपि प्रायुञ्जत शुभाशिषः[36] ॥

॥४२॥

जय जय कृष्ण रामयुत मुख्यमहावरवीरगञ्जन ।
न यमय कृष्णरामनुतसख्यमहाचलधीरसञ्जन ॥

॥४३॥

परतर वेदसारधर धन्य चराचरलोकरञ्जन ।
सुरनरखेदभारहर पुण्यपरायणशोकभञ्जन ॥

(कल्पतरुबन्धः)[37]

॥४४॥

वेल्लद्वारिधिविस्खलत्कुलगिरिव्यस्यद्धरामण्डलि-[38]
भ्रश्यद्दिश्यकरित्रसत्सुरपुरिप्रध्वानदीर्यद्दरि[39] ।

---

34. बान्ध्रमल्लोऽपि - इति क.पु. पाठः ।
35. दूनोदयाभृतः - इति ख.पु. पाठः ।
36. शुभाशिषा - इति ख.पु. पाठः ।
37. प्रथमद्वितीयपादयोस्तृतीयचतुर्थपादयोश्च पादपदान्तवर्णसाम्ये कल्पतरुबन्धो भवतीति प्रतीयते । (टि.)
38. विस्फुरत् - इति ख. पु. पाठः ।
39. प्रोद्दामदीर्यद्दरि - इति ख.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हस्ताहस्तितलातलिप्रहरणे प्रोद्यत्प्रचण्डारवम्
बाहूबाहविगाहनादथ तयोः प्रावर्ततायोधनम् ॥
॥४५॥

अयुक्त शिरसा शिरश्चरणमङ्घ्रिणा सङ्गतम्
मिथस्तदुभयोः करः करमुरस्तथोरःस्थले ।
सहैव पततोर्लघु दिवं सहैवोद्यतोः
समः समभवत् क्रमः समरविक्रमोपक्रमे ॥
॥४६॥

मिलन्तावन्योन्यं प्रबलपवनान्दोलनवशात्
विरामे विश्वेषामिव दुरवगाहौ गिरिवरौ ।
समुन्मीलत्क्ष्वेडाभरितहरिदाभोगकुहरात्[40]
उभौ चिक्रीडाते समरभुवि[41] तौ मल्लवृषभौ ॥
॥४७॥

तुङ्गोत्तुङ्गतरङ्गबाहुनिवहैराभोगिनः[42] सागराः
वेगाद् विष्णुपदं भयेन गुरुणा धर्तुं किमु प्रोत्थिताः ।
वात्यावर्तविवर्तमानसरसीपाथोजिनीपत्रवत्
भूगोलं समकम्पतातिबहले मल्लावमर्दे तयोः ॥
॥४८॥

रेरे[43] रुरो रुरो रारै रर रोरा ररै ररम् ।
रूरो ररे रुरूरूरो रररेरोऽरिरिाररौ ॥

(एकाक्षरः)
॥४९॥

---

40. क्ष्वेडा तु सिंहनादः स्यात्, इति त्रिकाण्डः । (पु.टि.)
41. समरतुलितौ - इति ख.पु. पाठः ।
42. तुश्त्तुश्तरश्च - इति ख. पु. पाठः ।
43. (क) रेरेशब्देनातिशायितस्य रुरोः, मृगतुल्यस्य, उरुरुरोः सुदेशस्येति । (पु.टि.)
(ख) रुरुर्ना मृगदैत्ययोः । (पु.टि.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेला [44] वेला दले वाले वाले ववि वलावल: ।
वलल्लोला[45] लवल्लोलां लालीलीला लवल्ललौ ॥

(द्वयक्षर:)

॥५०॥

महिला रमणीयाभा मदमोहमहावला ।
व्याजहार लसल्लोभा कापीत्थं हरिमाकुला ॥

॥५१॥

जय गेय जय ध्येय जयाजेयाजशत्रुश [46] ।
जन्मधन्यजनस्थाने जहीमं हीजलं खलम् ॥

(अष्टदलबन्ध:)[47]

॥५२॥

नन्दनन्दनभुजाभुजापीडपीडतयाऽनया[48] ।
रङ्गरङ्गतपे तेपे हासहासपरापरा ॥

॥५३॥

प्रेङ्खत्पाणिजभास्तडित् समधिकं देवेन्द्रबन्दीदृशाम्
अम्भोबिन्दुभरेण भूयसि कृते देवद्विषां दुर्दिने ।
भज्यत्पञ्जरगण्डशैलशकल: श्रीकृष्णकालाम्बुदो-
न्मुक्त: मुष्टिपवि: पपात सहसा चाणूरसानूपरि ॥

॥५४॥

मुष्टिको मुष्टिपातेन तदैव[49] हलिना हत: ।
न हि कालप्रतिक्षेपं सहते विक्रमाश्रित: ॥

॥५५॥

---

44. (क) वेला वेला वले वाल वालो ववि वलो वल: ।
वलल्लीलां लवोल्लीला लाला लीला लवल्ललौ ॥ - इति ख.पु. पाठ: ।
(ख) वेला काले च सीमायामब्धे: कूलविकारयो:, इति मेदिनी । (पु.टि.)

45. सुदृष्टे चञ्चले लोला तडित्कमलयोरपि । (पु.टि.)

46. जयजयाशशत्रुश - इति ख.पु. पाठ: ।

47. कर्णिकायां न्यसेदेकं द्वे द्वे दिक्षु विदिक्षु च ।
प्रवेशनिर्गमौ दिक्षु कुर्यादष्टदलाम्बुजे ॥ स.क., २११२ (टि.)

48. नन्दनन्दनस्य भुजया या भुजापीडयो: पीडना तया । (पु.टि.)

49. तथैव - इति क. पु. पाठ: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शलतोशलकौ तदैव ताभ्यां निहतौ दैवतमुख्यदेवताभ्याम् ।
अपरे परिहृत्य नार्जवेन क्षितिमेतामगमन् पुनजर्वेन ॥
॥५६॥

जयेति कृष्णाय जना ववल्गुर्मिथो मुदा गोपगणा ववल्गुः ।
रङ्गेऽथ वाद्यानि भृशं विनेदुः कंसाय कोपं परिभाविनेऽदुः ॥
॥५७॥

अथ प्रतीकारभयानुभिन्नमलघ्ववस्थानमिव प्रकोपम् ।
कंसो नृशंसोऽधिसदोनिदेशमावेशमन्दां गिरमुज्जगार ॥
॥५८॥

अलं खलास्तूर्यरवैरमित्रौ बहिष्क्रियेतां वसुदेवपुत्रौ ।
विहन्यतामेव[50] विलुण्ठितार्थं खलीकुरुध्वं पशुपालसार्थम् ॥
॥५९॥

इतीरयन्तं सहसोपसृत्य कंसञ्च केशेषु विधृत्य मञ्चात् ।
अपातयद् भूमितले परासुं हरिर्गिरीन्द्रादिव कुञ्जरेन्द्रम् ॥
॥६०॥

इति हतवति कंसे केशवे केशिहत्या -
जलधिमथनसारस्मेरदाः[51] स्तम्भशैले ।
कृतजयजयनादैरादितेयैरुदारा
सुरतरुसुमनोभिः कल्पिता वृष्टिधाराः ॥
॥६१॥

रामो रमेशः पितरौ प्रणम्य दीनौ समानन्दयतां[52] सुवाष्पैः ।
द्यावापृथिव्यौ रवितापतप्ते हिमांशुपातैरिव शीतरोचिः ॥
॥६२॥

---

50. विहन्यतामेष - इति क.पु. पाठः ।
51. जलधिमथनसारस्फारदा - इति क.पु. पाठः ।
52. समावेदयताम् - इति ख.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाहृत्यैवं श्रीश इह परमाशामरिपुम्[53]
समीके मल्लोमप्रकृतिचरितं च क्वणिलितम्[54] ।
समानानामिन्द्रस्त्रिदशसहितः सुस्थिरमयम्
सनानाचित्रं तेष्वधितपरमानन्दहिमितम् ॥

(कविकाव्यनामचित्रमिदम्)[55]

॥६३॥

पिता यस्यान्वीक्षाम्बुधिबहलने चन्द्रमा रामचन्द्रो
जगत्ख्याता माता जयमतिरिति श्रीभवानीव वन्द्या ।
कृते तेन श्रीवंशमणिकविना कृष्णकाव्येऽतिभव्ये
समापत् सर्गोऽयं शिशिरकरसंयुक्तश्रृङ्गारसंख्यः[56] ॥

॥६४॥

इति[57] श्रीविल्वपञ्चकुलावतंसमणिमहोपाध्याय-
श्रीवंशमणिशर्म्मकृतं हरिकेलिमहाकाव्यं
समाप्तम् ।

ॐ

☆☆☆☆☆

53. परमाराशमरिपुम् - इति ख.पु. पाठः ।
54. क्वणिशितम् - इति ख.पु. पाठः ।
55. प्रथमद्वितीयचरणगतैर्वर्णैः श्रीवंशमणिहरिकेलिपदे सूच्येते । तृतीयेन चरणेन नामपदं चतुर्थेन च चित्रमिति पदं सूच्यते ।
56. शिशिरकरयुक्तस्यश्रृङ्गारसंख्यः - इति क.पु. पाठः ।
57. इति श्रीविनुपञ्च[illegible]कुलावतंस - इति ख.पु. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्दर्भग्रन्थानुक्रमणी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्दर्भग्रन्थानुक्रमणी -

(क) संस्कृतग्रन्था: -

१- ईश्वरकृष्ण: - साङ्ख्यकारिका, चौखम्भा संस्कृत सिरीज अफिस, वाराणसी, द्वि.सं., वि.सं. २०३३ ।

२- कालिदास: - कुमारसम्भवमहाकाव्यम्, चौखम्भाविद्याभवन, वाराणसी, च.सं., ई. १९८१ ।

" - रघुवंशमहाकाव्यम्, टीकाकार:, सी. आर.देवधर: मोतीलाल बनारसीदास, दिल्ली, प्र.सं.ई. १८८५ ।

३- केदारभट्ट: - वृत्तरत्नाकर:, मोतीलाल बनारसीदास, वाराणसी, पुनर्मुद्रणम्, ई. १९७९ ।

४- कौटिल्य: - कौटिलीयमर्थशास्त्रम्, पण्डितपुस्तकालय:, काशी, प्र.सं., वि.सं. २०१६ ।

५- गर्ग: - गर्गसंहिता, सम्पादक:, पण्डितो रामतेजशास्त्री, पण्डितपुस्तकालय:, काशी, प्रसं., वि.सं. २०२८ ।

६- गौतम: - न्यायदर्शनम्, (वात्स्यायनभाष्ययुतम्), चौखम्भा संस्कृत सिरीज, अफिस, वाराणसी, द्वि.सं., ई. १९७० ।

७- चरक: - चरकसंहिता, प्रकाशक चौखम्भा विद्याभवन, वाराणसी, प्र.सं., वि.सं.२०१९ ।

८- पं. जगदीशलालशास्त्री (सम्पादक:) - शुक्लयजुर्वेदसंहिता, मोतीलाल बनारसीदास, दिल्ली, पुनर्मुद्रणं, ई. १९७८ ।

९- पण्डितराजो जगन्नाथ: - रसगङ्गाधर: (मधुसूदनीयुत:), टीकाकार:, मधुसूदनशास्त्री, साहित्यानुसन्धानपरिषद हिन्दुविश्वविद्यालय:, काशी, प्र.सं., वि.सं.२०२० ।

१०- धर्मराजाध्वरीन्द्र: - वेदान्तपरिभाषा, चौखम्भासंस्कृतसिरीज अफिस, वाराणसी, तृ.सं., ई. १९५५ ।

११- नागेशभट्ट - परिभाषेन्दुशेखर:, व्याख्याकार:, आचार्यविश्वनाथमिश्र:, चौखम्भा सुरभारतीप्रकाशन, वाराणसी, द्वि.सं., ई. १९९० ।

१२- पतञ्जलि: - योगसूत्रम्, गीताप्रेस, गोरखपुर, एकादशं संस्करणम्, वि.स. २०३५ ।

" - पातञ्जलं महाभाष्यम्, वाणीविलासप्रकाशन, वाराणसी, द्वि.सं.,ई. १९८८ ।

१३- पाणिनि: - अष्टाध्यायी, चौखम्भासंस्कृतसिरीज अफिस, वाराणसी, प्र.सं.,ई. १९४२ ।

१४- भामह: - काव्यालङ्कार:, विहारराष्ट्रभाषापरिषद्, पटना, प्र.सं., वि.सं. २०१९ ।

१५- भारवि:, - किरातर्जुनीयमहाकाव्यम्, व्याख्याकार:, पं. आदित्यनारायणपाण्डेयशास्त्री, चौखम्भा संस्कृत सिरीज अफिस, वाराणसी, षष्ठं संस्करणम्,वि.सं. २०३६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१६- भोजदेवः - सरस्वतीकण्ठाभरणम्, सम्पादकः, अनुन्दोरामवरुवा, पब्लिकेशन वोर्ड, गौहाटी, आसाम, पुनर्मुद्रणम्, ई. १९६९ ।

१७- मनुः - मनुस्मृतिः, (मन्वर्थमुक्तावलीयुता), मोतीलाल वनारसीदास, दिल्ली, वनारस, पटना, प्र.सं., ई. १९८३ ।

१८- मम्मटः - काव्यप्रकाशः, व्याख्याकारः, आचार्यविश्वेश्वरः, ज्ञानमण्डल, काशी, प्र.सं., ई. १९६० ।

१९- माघः - शिशुपालवधमहाकाव्यम्, चौखम्भा विद्याभवन, वाराणसी, पञ्चमं संस्करणम्, ई. १९८४ ।

२०- याज्ञवल्क्यः - याज्ञवल्क्यस्मृतिः, (समिताक्षरा), पाण्डुरंग जावजी, निर्णयसागरमुद्रणालयः, मुम्बई, ई. १९२६ ।

२१- राजशेखरः - काव्यमीमांसा, चौखम्भा विद्याभवन, वाराणसी, प्र.सं., वि.सं. २०२९ ।

२२-राष्ट्रियाभिलेखालयः - पुरातत्वप्रकाशनमाला-५, नेपालराजकीयवीरपुस्तकालयस्य पुस्तकानां बृहत्सूचीपत्रम् ज्योतिषविषयको प्रथमो भागः,

- सम्पादकाः, श्रीदेवीप्रसादादयः पण्डिताः, प्रकाशको निर्देशकश्च, सत्यमोहनजोशी, श्री ५ को सरकार, पुरातत्व र संस्कृति विभाग, प्र.सं वि.सं. २०१७ ।

- पुरातत्वप्रकाशनमाला - ६ ने.रा.वी.पु. बृहत्सूचीपत्रम् साहित्यकाव्यविषयको द्वितीयो भागः, सम्पादकाः श्रीघनश्यामादयः पण्डिताः, प्रकाशकः, अध्यक्षश्च, बुद्धिसागरपराजुली, पूर्ववत् प्र. सं. वि. सं. २०१८

- पुरातत्वप्रकाशनमाला - ९ ने.रा.वी.पु. बृहत्सूचीपत्रम् पूर्ववत्, प्र.सं. वि.सं. २०१९ ।

२३- लौगाक्षिभास्करः, - अर्थसङ्ग्रहः, निर्णयसागरमुद्रणालयः, बम्बई, पञ्चमं सस्करणम्, ई. १९५० ।

२४- वराहमिहिरः - बृहज्जातकम्, चौखम्भा संस्कृत सिरीज अफिस, वाराणसी, तृतीयं संस्करणम् ई. १९५० ।

२५- वाग्भटः - अष्टाङ्गहृदयम्, सम्पादकः अनन्तकुण्टे, प्रकाशकः, तुकारामजावजी, निर्णयसागर-मुद्रणालयः, मुम्बई, तृतीयं सस्करणम् ई. १९०२ ।

२६- वाल्मीकिः - श्रीमद्वाल्मीकीयं रामायणम्, गीताप्रेस, गोरखपुर, प्र.सं, वि.सं. २०१७।

२७- वात्स्यायनः - कामसूत्रम्, हिन्दीटीकाकारः, देवीदत्तशास्त्री, चौ. सं. सि. अ. वाराणसी, प्र.सं., ई. १९६४ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२८- कविराजो विश्वनाथः - साहित्यदर्पणः, व्याख्याकारः, डा.सत्यव्रतसिंहः, चौखम्भा विद्याभवन, वाराणसी, नवमं संस्करणम्, ई.१९९२ ।

२९- विश्वबन्धुः (सम्पादकः) - अथर्ववेदसंहिता विश्वेश्वरानन्दवैदिकशोधसंस्थानम्, होशियारपुरम् प्र.सं., वि. सं. २०१८ ।

३०- भगवान् वेदव्यासः - आग्नेयमहापुराणम्, चौखम्भासंस्कृतसिरीज अफिस, वाराणसी, ई.१९६६ ।

" - नारदमहापुराणम्, सम्पादकः, डा.चारुदेवशास्त्री, नागपब्लिसर्स, जवाहरनगर, दिल्ली ७, ई. १९६३ ।

" - स्कन्दमहापुराणम्, खेमराजश्रीकृष्णदास, वेङ्कटेश्वर (स्टीम्) मुद्रणालयः, मुम्बई, वि.सं. १९६३ ।

" - कूर्ममहापुराणम् वाल्मीकिविद्यापीठस्य पुस्तकालये वर्तमानाऽज्ञातलेखनसमया पाण्डुलिपिः श्लोकाङ्करहिता ।

" - लिङ्गमहापुराणम्, खेमराज श्रीकृष्णदास वेङ्कटेश्वर (स्टीम्) मुद्रणालयः, मुम्बई, वि.सं. १९६३ ।

" - गरुडमहापुराणम् गङ्गाविष्णु खेमराज, वेङ्कटेश्वर (स्टीम्) मुद्रणालयः, मुम्बई, वि.सं. १९४८ ।

" - पद्ममहापुराणम् खेमराज श्रीकृष्णदास, वेङ्ककेटेश्वर (स्टीम्) मुद्रणालयः, बम्बई, वि.सं. १९८४ ।

" - मार्कण्डेयमहापुराणम् खेमराज श्रीकृष्णदास, वेङ्कटेश्वर (स्टीम्) मुद्रणालयः, मुम्बई, वि.सं. १९६७ ।

" - मत्स्यमहापुराणम्, खेमराज श्रीकृष्णदास, वेङ्कटेश्वर छापाखाना, मुम्बई,वि.सं. १९५२ ।

" - भविष्यमहापुराणम्, खेमराज श्रीकृष्णदास, वेङ्कटेश्वर (स्टीम्) मुद्रणालय, मुम्बई, वि.सं. १९६७ ।

" - श्रीमद्भागवतमहापुराणम् (मूलमात्रम्) गीताप्रेस गोरखपुर, अष्टमं संस्करणं, वि.सं. २०२२ ।

" - श्रीमद्देवीभागवतमहापुराणम् (मूलमात्रम्) चौखम्भा विद्याभवन वाराणसी, पुनर्मुद्रणं, ई. १९८६ ।

" - ब्रह्माण्डमहापुराणम् खेमराज श्रीकृष्णदास, वेङ्कटेश्वर (स्टीम्) मुद्रणालयः मुम्बई, वि.सं. १९६९ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

" - ब्रह्ममहापुराणम् खेमराज श्रीकृष्णदास, वेङ्कटेश्वर (स्टीम्) मुद्रणालयः, मुम्वई, वि.सं. १९६३।

" - ब्रह्मवैवर्तमहापुराणम् खेमराज श्रीकृष्णदास, वेङ्कटेश्वर (स्टीम्) मुद्रणालयः, मुम्वई, वि.सं. १०६७।

" - वायुमहापुराणम्, खेमराज श्रीकृष्णदास, वेङ्कटेश्वर छापाखाना, मुम्बई, वि.सं. १९५२।

" - वामनमहापुराणम् खेमराज श्रीकृष्णदास, वेङ्कटेश्वर (स्टीम्) मुद्रणालयः, मुम्बई, वि.सं. १९८६।

" - वाराहमहापुराणम्, खेमराज श्रीकृष्णदास, वेङ्कटेश्वर (स्टीम्) मुद्रणालयः, मुम्बई, वि.सं. १९५९।

" - हरिवंशमहापुराणम्, गङ्गाविष्णु श्रीकृष्णदास, लक्ष्मी वैकटेश्वर छापाखाना, मुम्बई, वि.सं. १९५८।

" - विष्णुमहापुराणम्, गीताप्रेस, गोरखपुर, पञ्चमं संस्करणं, वि.सं. २०१८।

" - शिवमहापुराणम्, चौखम्भा विद्याभवन, वाराणसी, पुनर्मुद्रणम्, ई. १९८३।

" - पुराणसंहिता, सम्पादकः, कृष्णप्रियाचार्यः, चौ.सं.सि.अ., वाराणसी, वि.सं. २००८।

" - श्रीमन्महाभारतम्, गीताप्रेस, गोरखपुर, वि.सं. २०१३।

३१- वेणीमाधवढकालः - मल्लकाले काष्ठमण्डपोपत्यकायां रचितानां संस्कृतनाटकानां समालोचनात्मकमध्ययनम्, (अप्रकाशितोऽनुसन्धानप्रबन्धः) त्रि.वि.वि.सं.अ.सं., वि.सं. २०४०।

३२- वंशमणिः - हरिकेलिमहाकाव्यम्,

" - "क" पाण्डुलिपिः। ल.सं. ५,७२४४, वि.सं. काव्य ८४१, पत्रसंख्या ११२ रीलसं. ए. ३९८/२५, राष्ट्रियाभिलेखालयः, काठमाण्डौ।

" - "ख" पाण्डुलिपिः ल.सं. ४, - ७७६५, वि.सं. काव्य - ८४२ पत्र सं. १०६, रील सं. ए. ३९७/२३, पूर्ववत्।

" - "ग" पाण्डुलिपिः ल.सं. १ - ४२७, वि.सं.काव्य - १३९, प.सं. ४२, रील सं. वी ३११।२० पूर्ववत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

„ - "घ" पाण्डुलिपिः ल.सं. ७२८२, प.सं. २७, वि.सं. काव्य - ८७३, रील सं.बी. १०५८/१० पूर्ववत् ।

„ - सङ्गीतभास्करः (पाण्डुलिपिरूपः) ल.सं.२२२२, वि.सं. सं. १६१, प.सं. १९२, री. सं. बी. २८८/२७ पूर्ववत् ।

„ - गीतदिगम्बररूपकम् (पाण्डुलिपिरूपम्) ल.सं. १३८२, वि.सं. ना. ११, प.सं. ४४, री.सं बी. १५/९ पूर्ववत् ।

„ - चतुरङ्गतरङ्गिणी (पाण्डुलिपिरूपा) ल.सं. ११६१, वि.सं. का. २५१, प.सं. १४, री.सं बी ३१४/२६ पूर्ववत् ।

३३- वंशीधरमिश्रः (सम्पादक): - शतपथब्राह्मणम् भारतीय विद्या प्रकाशन, दिल्ली, ई. १९८९ ।

३४- कौडिन्यायनः शिवराजाचार्यः - "कतिपयनैपालसंस्कृतग्रन्थकारपरिचयः, प्रकाशिका, देवी आचार्यानी, स्वाध्यायशाला, काठमाण्डौ, प्र.सं, वि.सं. २०४८ ।

३५- महाकविः श्रीहर्षः - नैषधचरितमहाकाव्यम्, चौ.सं. सि.अ. वाराणसी, द्वि.सं., ई. १९६७ ।

३६- आचार्यः श्रीरामशर्मा - १०८ उपनिषद् संस्कृतिसंस्थान, बरेली, च.सं., ई. १९६९ ।

३७- श्रीशङ्कराचार्यः (भाष्यकारः) - छान्दोग्योपनिषद् (शाङ्करभाष्यसहिता), - महेशानुसन्धानसंस्थानम् वाराणसी, ई. १९७९

„ - बृहदारण्यकोपनिषद् (शाङ्करभाष्ययुता), वाणीविलाससंस्कृतपुस्तकालयः, कचौडीगली, वाराणसी, ई. १९८२ ।

„ - कठोपनिषद् (सशाङ्करभाष्या), चौ.सं. सि.अ., वाराणसी, ई. १९५० ।

३८- सत्यव्रतसामाश्रयी (सम्पादकः) - सामवेदसंहिता प्रकाशकः, एन्.के.सरकारः, आर्य गणेशप्रेस, कलकत्ता, प्र.सं., ई. १८७७ ।

३९- सातवलेकरकुलजः (सम्पादकः) - ऋग्वेदसंहिता, प्रकाशकः- वसन्तसातवलेकरः, भारतमुद्रणालयः औन्धनगरं सातारा, ई. १९४० ।

(ख) नेपालीभाषाग्रन्थाः-

४०- बालचन्द्रशर्मा - नेपालको ऐतिहासिक रूपरेखा, - प्रकाशिका - कृष्णकुमारी देवी, २३/११९ दूधविनायक, वाराणसी, तृतीय संस्करण, वि.सं. २०३३ ।

४१- माधवप्रसाद देवकोटा - ईशादि नौ उपनिषद्, नेपाल राजकीय प्रज्ञा प्रतिष्ठा, काठमाडौ, प्र.सं., वि.सं २०३० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४२- सूर्यविक्रमज्ञवाली - नेपाल उपत्यकाको मध्यकालीन इतिहास, रोयल नेपाल एकेडेमी, प्र.सं., वि.सं. २०१९ ।

४३- संस्कृत छात्रावास - अरुणोदय, वेणीमाधवढकाल, नेपालका प्रथम महाकवि र प्रथम महाकाव्य, रजतजयन्तीवर्ष, वर्ष २५ संयुक्ताङ्क १-४, वि.सं. २०४६ पौष ।

४४- हेमराज शाक्य - नेपाललिपिप्रकाश, नेपाल राजकीय प्रज्ञा प्रतिष्ठान, काठमाडौ, प्र.सं., वि.सं. २०३० ।

४५- हंसपुरे सुवेदी - संस्कृतवाङ्मय संक्षिप्त अध्ययन, पा.वि.के. त्रि.वि.वि., काठमाडौं, प्र.सं., वि.सं. २०३७ ।

ग) हिन्दीभाषाग्रन्थाः -

४६- अमरनाथ पाण्डेय, - बाणभट्टका साहित्यिक अनुशीलन भारतीय विद्याप्रकाशन, वाराणसी, प्र.सं., ई. १९७४ ।

४७- डा. उमेशमिश्र - भारतीय दर्शन, हिन्दी समिति, उत्तरप्रदेश शासन, लखनऊ च.सं.,ई.१९७५ ।

४८- डा. केशवराव मुसलगांवकर - संस्कृतमहाकाव्य की परम्परा, चौ.सं.सि. अ. वाराणसी, प्र.सं., वि.सं. २०२६

४९- डा. चण्डिकाप्रसाद शुक्ल - नैषध परिशीलन, हिन्दूस्थानी एकेडेमी, इलाहवाद, प्र.सं., ई १९६० ।

५०- रमेश झा (सम्पादक): - मैथिली जगत (पत्रिका) प्रकाशकः,-अखिलनेपाल मैथिलीसाहित्य परिषद, - कार्तिक २०४७ । काठमाण्डौ भाद्र · कार्तिक २०४७ ।

५१- डा. राजवंशसहाय हीरा - संस्कृतसाहित्यकोष, चौ.सं.सि.अ., वाराणसी, प्र.सं., ई. १९७३ ।

५२- लेखनाथमिश्र - वंशमणि झा, मिथिला भारतीप्रकाशन, पटना, प्र.सं., ई. १९८८ ।

☆☆☆☆☆

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुद्धिपत्रम् -

पृष्ठम्-	पंक्ति :-	अशुद्धम्-	शुद्धम्-
१	६	ज्योतिमल्लस्य	ज्योतिर्मल्लस्य
१	१०	१६८८	१६८७
१	टि. २१	-नारयणयो-	-नारायणयो-
३	४	-वतंसा	-वतंसो
३	७	ब्राह्मणनां	ब्राह्मणानां
३	८	वित्व-	विल्व-
४	१	गीता-	गीत-
६	१	-दय	-दयं
६	६	-तिङन्-	-तिङन्त-
१३	२७	ग्रन्थारम्भङ्गलाचरणे	ग्रन्थारम्भमङ्गलाचरणे
१६	२६	पाण्डुलिपेरक्षया	पाण्डुलिपेरपेक्षया
१९	२२	पुष्का	पुष्पिका
२३	१८	प्रतस्थितवान्	प्रतस्थिवान्
२४	९	बद्धुमना	बन्द्धुमना
२७	२५	समागत	समागतः
३०	३३	श्रृङार-	श्रृङ्गार-
३२	२	निश्चलो चन्चलश्च	चन्चलो निश्चलश्च
३३	१६	प्रत्यायन्ति	प्रत्याययन्ति
३३	टि.१४	महाभागा	महाभागाः
३४	१४	-रद्दघासुरतया	-रघासुरतया
३४	१५	जात	जाता
३४	२४	कृष्णोना-	कृष्णेना-
३५	९	कृष्णावरतरण-	कृष्णावतरण-
३७	७	निरुपिता	निरूपिता
३७	१३	-भिन्ने	-भिन्ने
४०	टि.१७	मारूताः	मारुताः
४५	४	२ तमे	२४ तमे
४५	११	प्रतिष्ठापिस्य	प्रतिष्ठापितस्य
४६	४	श्रीकृण-	श्रीकृष्ण-
४६	६	रस्रो-	रसो-
४६	टि.११	चेष्टिमत्	चेष्टितम्
५०	९	भङ्ग	भङ्गः
५१	टि.१०	हयस्मिन्	ह्यस्मिन्
५२	१०	दशाधिकतवर्षाणां	दशाधिकवर्षाणां
५४	१६	श्रमिद्-	श्रीमद्-
५५	१	सस्कृत-	संस्कृत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५९	२१	पञ्चदशात	पञ्चदशात्
६८	७	काव्म्	काव्यम्
७१	२५	रुपेण,	रूपेण
७७	२०	शिशिन्जे	शिशिञ्जे
८८	३१	सुवचैन-	सुवचनै-
९४	९	वृन्दादया	वृन्दादयो
९९	१७	नितान्-	नितान्त-
१०१	१०	सिहं-	सिंह-
१०१	१४	हरुणै-	हरणै-
१०४	५	-क्नैकान्तिकस्य	-ऽनैकान्तिकस्य
१०४	७	पन्चा-	पञ्चा-
१०४	८	पन्चा-	पञ्चा-
१०४	१३	न्यायय-	न्याय-
१०९	टि.६	-क्तिथि-	-ऽतिथि:
१११	टि.७	महोहै:	महोक्षै:
११५	१	मघू	मघु
११७	५	राज्य-	राज्या-
११८	८	क्रोन्व	क्रौञ्च
११८	टि.१४	क्रोन्व	क्रौञ्च
११९	११	वासन्ता	वासन्ती
१२३	टि.९	-क्जनि,	-ऽजनि
१३५	११	-माददत्	-माददात्
१४३	टि.२	प्रकृचिभाव:	प्रकृतिभाव:
१४५	२	भूमि-	भूमी-
१५१	११	कङ्कण-	कङ्कण-
१५९	टि.१	रुपम्	रूपम्
१६०	१४	क्रोञ्च-	क्रौञ्च-
१७१	८	दृष्ट्वातो	दृष्ट्यातो
१८२	३	पुरूर्वं	पूर्वं
१८३	टि.२	-क्घराडिव	-ऽघराडिव,
१९५	टि.२	स्तनमूष्मणमू	स्तनमूष्मणम्
१९७	११	हृतचीरचया	हृतचीरचया:
२२१	९	कृष्णा-	कृष्ण-
२३०	१९	केसरोघै:	केसरौघै:,
२३५	६	जीवनलोकम्	जीवलोकम्
२३८	टि.३	विशेषणत्व	विशेषणत्वम्
२५३	१	-शङ्खादि-	-शङ्खादि-
२५४	१३	निश्चलो चन्चलश्च	चञ्चलो निश्चलश्च

★★★★★

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५९	३१	पञ्चदशात	पञ्चदशात्
६८	७	काव्म्	काव्यम्
७१	२५	रुपेण,	रूपेण
७७	२०	शिशिन्जे	शिशिञ्जे
८८	३१	सुवचैन-	सुवचनै-
९४	९	वृन्दादया	वृन्दादयो
९९	१७	नितान्-	नितान्त-
१०१	१०	सिहं-	सिंह-
१०१	१४	हरुणै-	हरणै-
१०४	५	-क्नैकान्तिकस्य	-ऽनैकान्तिकस्य
१०४	७	पन्वा-	पञ्वा-
१०४	८	पन्चा-	पञ्चा-
१०४	१३	न्यायय-	न्याय-
१०९	टि.६	-क्तिथि-	-ऽतिथि:
१११	टि.७	महोहै:	महोक्षै:
११५	१	मधू	मधु
११७	५	राज्य-	राज्या-
११८	८	क्रोन्च	क्रौञ्च
११८	टि.१४	क्रोन्च	क्रौञ्च
११९	११	वासन्ता	वासन्ती
१२३	टिं.९	-क्ध्वनि,	-ऽध्वनि
१३५	११	-माददत्	-माददात्
१४३	टि.२	प्रकृचिभाव:	प्रकृतिभाव:
१४५	२	भूमि-	भूमी-
१५१	११	कङ्ककण-	कङ्कण-
१५९	टि.१	रुपम्	रूपम्
१६०	१४	क्रोञ्च-	क्रौञ्च-
१७१	८	दृष्ट्वातो	दृष्ट्यातो
१८२	३	पुरूषं	पूरुषं
१८३	टि.२	-क्घराडिव	-ऽघराडिव,
१९५	टि.२	स्तनम्ष्मणमू	स्तनसूष्मणम्
१९७	११	हृतचीरचया	हृतचीरचया:
२२१	९	कृष्णा-	कृष्ण-
२३०	१९	केसरोघै:	केसरौघै:,
२३५	६	जीवनलोकम्	जीवलोकम्
२३८	टि.३	विशेषणत्व	विशेषणत्वम्
२५३	१	-शङ्खादि-	-शङ्खादि-
२५४	१३	निश्चलो चञ्चलश्च	चञ्चलो निश्चलश्च

★★★★★

Acc-22153
22153

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इह संकृतिनाट्यमीहते
श्रुतिनान्दीनिगदेन यत् स्वयम् ।
स्वयमेव निरीक्षते च यः
प्रकटं तं नटमीशमाश्रये ॥

-हरिकेलिमहाकाव्यम् (१५।४३) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu